पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम्

(तृतीयाध्यायः)

सम्पादकः

डा. ए.वि. नागसम्पिगे

निदेशकः , पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२००९

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम्

(तृतीयाध्यायः)

सम्पादकः

डा. ए.वि. नागसम्पिगे

निदेशकः , पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२००९

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला – ६२

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम् **श्रीमद्ब्रह्मसूत्रभाष्यम्**

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम् (तृतीयाध्यायः)

सम्पादकः

डा. ए.वि. नागसम्पिगे

निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

प्रकाशनम् -

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन्रोड्, बेङ्गलूरु - २८

पुटानि	: ५० + ४७४
प्रथममुद्रणम्	: २००९
मुद्रितपुस्तकसङ्ख्या	: १०००
मूल्यम्	: २६० रूप्यकाणि
मुद्रणालयः	: वृन्दावन् मुद्रणालयः, बेङ्गलूरु

POORNAPRAJNA SAMSHODHANA MANDIRAM

Recognised by Rashtriya Sanskrit Samsthan, (Deemed University)
Ministry of H.R.D., Govt. of India, New Delhi

ŚRIMAD BRAHMASŪTRA BHĀṢYAM

of

Sri Madhwacharya

with Bhashyadeepika and Sutradeepika of

Sri Jagannathatirtha

(Chapter III)

Editor :

Dr. A.V. Nagasampige

Director, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Publisher :
Poornaprajna Samshodhana Mandiram,
Poornaprajna Vidyapeetha, Bangalore -560 028

2009

Poornaprajna Samshodhana Mandiram Series No. 62

ŚRIMAD BRAHMASŪTRA BHĀṢYAM of

Sri Madhwacharya with Bhashyadeepika and Sutradeepika of Sri Jagannathatirtha

(Chapter III)

Editor :
Dr. A.V. Nagasampige
Director, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Published by :

Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Katriguppa Main Road,
Bangalore-560 028

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

Pages	: 50+474
First Edition	: 2009
Copies	: 1000
Price	: 260/-
Printed by	: Brindavan Printers, Bangalore

अनुग्रहसन्देशः

वेदार्थनिर्णायकन्यायग्रथनात्मकानि हि ब्रह्मसूत्राणि भगवद्-बादरायणप्रणीतानि नैकभाष्योपजीवकानि विद्वत्प्रवरैः सन्ततम् अध्ययनयोग्यानि विराजन्तेतमाम् । तदेतेषां ब्रह्ममीमांसासूत्राणां भाष्याणि नैकाचार्यप्रणीतानि दृश्यन्ते । तत्र श्रीमदानन्दतीर्थ-भगवत्पादाचार्यविरचितं भाष्यं समुचितश्रुतिस्मृत्युदाहरणेन पुष्टं गभीरया शैल्या परमतविमर्शनसत्सिद्धान्तस्थापनदक्षं च विराजते । अस्य च गाम्भीर्यं षड्दर्शनाचार्यैः श्रीमज्जयतीर्थश्रीमच्चरणप्रभृतिभिः सुष्ठूपवर्णितम् । अत्र भाष्योदाहृतश्रुतिस्मृतीनां प्रतिपदार्थविवरणम् अपेक्ष्यते अद्यतनमन्दाधिकारिभिः श्रुत्यध्ययनव्याख्यानसम्प्रदाय-विकलैः । इयं च दीपिका भाष्योदाहृतप्रमाणव्याख्यापरा प्राचीनव्याख्यानविमर्शनकुतूहला च श्रीजगन्नाथतीर्थप्रणीता विदुषां विद्यार्थिनां महते उपकाराय कल्पत इति पूर्णप्रज्ञसंशोधनमन्दिरद्वारा मुद्रापिता । यद्यपीयं दीपिका प्रायश्चत्वारिंशद्वर्षेभ्यः पूर्वमेव श्रीमद्व्यासराजमठाधीशैः यशःशरीरैः विद्यापयोनिधितीर्थश्रीपादैः मुद्रापिताऽऽसीत् । परमिदानीं ग्रन्थानाम् अनुपलम्भाद् विदुषां विद्यार्थिनां चाभ्यर्थनां पुरस्कृत्य अस्मदादेशेन संशोधनमन्दिरद्वारा यावच्छक्ति संशोध्य मुद्रापितः । गतवर्षे समन्वय-अविरोधाध्यायौ भाष्यदीपिकासमलङ्कृतौ मुद्रापितावास्ताम् । इदानीं तृतीय-तुरीयाध्यायावपि सिद्धाविति सर्वे ग्रन्थाः विदुषां अध्ययनाध्यापने सूपकुर्वन्तीति विश्वसिमः ।

अस्य संशोधनकर्मणि बद्धादरम् अस्मत्प्रियशिष्यम् अध्ययन-अध्यापन-संशोधनकर्मणि व्यापृतं नागसम्पिगे इत्युपाह्वम् आनन्दतीर्थं सप्रश्रयमभिनन्दामः ॥

श्रीश्रीविश्वेशतीर्थश्रीपादाः

श्रीपेजावर-अधोक्षजमठाधीशाः

उडुपि

ಉಪೋದ್ಘಾತ

ಶ್ರೀವ್ಯಾಸರಾಜ ಮಠದ ವಿದ್ಯಾಸಿಂಹಾಸನವನ್ನು ಕ್ರಿ.ಶ. 1755-1770ರ ವರೆಗೆ ಅಲಂಕರಿಸಿ ತತ್ತ್ವವಾದದ ಪರಂಪರೆಗೆ ಅದ್ವಿತೀಯ ಸೇವೆ ಸಲ್ಲಿಸಿದವರು ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯಕ್ಕೆ ಅವರು ರಚಿಸಿದ ವ್ಯಾಖ್ಯೆ 'ಭಾಷ್ಯದೀಪಿಕೆ'. ಭಾಷ್ಯಕಾರರ ಆಶಯವನ್ನು ಪ್ರಾಚೀನ ಟೀಕೆಗಳ ಬೆಳಕಿನಲ್ಲಿ ವಿವರಿಸುವ ಈ ಕೃತಿಗೆ ಭಾಷ್ಯದೀಪಿಕೆಯೆಂಬ ಹೆಸರು ಅನ್ವರ್ಥವೆನಿಸುವುದು. ಭಾಷ್ಯದೀಪಿಕೆಯ ವೈಶಿಷ್ಟ್ಯವನ್ನು ಹೀಗೆ ಸಂಕ್ಷೇಪವಾಗಿ ಸೆರೆಹಿಡಿಯಬಹುದಾಗಿದೆ-

1. ಭಾಷ್ಯದಲ್ಲಿ ಪಾಠಭೇದಗಳ ಸೂಚನೆ ಮತ್ತು ಅರ್ಥವಿವರಣೆ.
2. ಟೀಕೆಯಲ್ಲಿ (ತತ್ತ್ವಪ್ರಕಾಶಿಕೆ) ನಿರೂಪಿಸಿದ ವಿಷಯಗಳ ಜೊತೆಗೆ ಪ್ರಾಚೀನ ಟೀಕೆಯಾದ ತತ್ತ್ವಪ್ರದೀಪದ ವಿಷಯಗಳ ಮಂಡನೆ.
3. ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ ಟೀಕೆಯ ವಿವರಣೆಯ ಜೊತೆಗೆ, ಅನುವ್ಯಾಖ್ಯಾನ ಸುಧಾ-ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳಲ್ಲಿ ಬರುವ ಸಂದರ್ಭೋಚಿತ ವಿಷಯಗಳ ಉಪಪಾದನೆ.
4. ಭಾಷ್ಯದಲ್ಲಿ ಉದಾಹರಿಸಿದ ಶ್ರುತಿಸ್ಮೃತಿಗಳ ಪ್ರಾಯಃ ಪ್ರತಿಪದಾರ್ಥ ವಿವರಣೆ.
5. ಕೆಲವು ಟಿಪ್ಪಣಿಯ ವಿಷಯಗಳ ಅನುವಾದದ ಜೊತೆಗೆ ಕೆಲವೆಡೆ ಅಭಿಪ್ರಾಯಭೇದ ತಳೆಯುವುದು ಅಥವಾ ಇನ್ನೊಂದು ವ್ಯಾಖ್ಯಾನದ ಆಶಯ ನಿರಾಕರಣೆ.
6. ಟೀಕಾಗ್ರಂಥಗಳಲ್ಲಿ ಮತ್ತು ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳಲ್ಲಿ ಆಪಾತತಃ ತೋರುವ ವಿರೋಧ ಪರಿಹಾರ.

ಸೂಕ್ಷ್ಮಪ್ರಮೇಯ ವಿವರಣೆ -

ಅಗ್ನ್ಯಧಿಕರಣದಲ್ಲಿ ಪೂರ್ವಪಕ್ಷಮಂಡನೆಯ ಸಮಯದಲ್ಲಿ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ಸೂಕ್ಷ್ಮಪ್ರಮೇಯಗಳನ್ನು ನಿರೂಪಿಸಿದ್ದಾರೆ. ಈ ಅಧಿಕರಣದಲ್ಲಿ ಇಂದ್ರಿಯಾಭಿಮಾನಿದೇವತೆಗಳು ಜೀವರೊಡನೆ ಪ್ರಯಾಣ ಮಾಡುವರು ಎಂಬುದಾಗಿ ಸಿದ್ಧಾಂತ ಮಾಡಲಾಗಿದೆ. ಪೂರ್ವಪಕ್ಷ ಹೀಗಿದೆ- ಇಂದ್ರಿಯಾಭಿಮಾನಿದೇವತೆಗಳು ಜೀವನೊಡನೆ ತೆರಳುವುದಿಲ್ಲ. ಮೃತಜೀವನ ವಾಗಿಂದ್ರಿಯವು ಅಗ್ನಿಯನ್ನು ಸೇರುವುದು. ವಾಯುದೇವತೆಯನ್ನು ಶ್ವಾಸವಾಯುವಿನ ಅಭಿಮಾನಿದೇವತೆ ಹೊಂದುವನು. ಶ್ರೋತ್ರೇಂದ್ರಿಯವು ದಿಗ್ದೇವತೆಗಳನ್ನು ಹೊಂದುತ್ತದೆ. ಪೂರ್ವಪಕ್ಷ ಮಾಡುವಾಗ ಜೀವನು ಈ ದೇಹ ತೊರೆದಾಗ

ಇಂದ್ರಿಯಾಭಿಮಾನಿದೇವತೆಗಳು ಅವನ ಸಂಪರ್ಕವನ್ನು ಸಂಪೂರ್ಣ ಕಡಿದುಕೊಂಡು ತೆರಳುವರು ಎಂಬರ್ಥದಲ್ಲಿ ತೆಗೆದುಕೊಳ್ಳಬೇಕು.

ಆದರೆ ವಾಸ್ತವ ಸಂಗತಿ (ಸಿದ್ಧಾಂತಗತಿ) ಹೀಗಿದೆ ಎನ್ನುತ್ತಾರೆ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು.

ಶರೀರಪ್ರೇರಕನಾದ ಶ್ರೀವಿಷ್ಣುಮತ್ತು ತತ್ತ್ವದೇವತೆಗಳು ಒಂದು ಅಂಶದಿಂದ ಜೀವನನ್ನು ತೊರೆದು ತಮ್ಮ ತಮ್ಮ ಮೂಲರೂಪ ಸೇರುವರು. ಇನ್ನೊಂದು ರೂಪದಿಂದ ಜೀವನ ಜೊತೆಗೆ ಮುಂದಿನ ಶರೀರದ ಭೋಗಾನುಭವಕ್ಕಾಗಿ ಅವನೊಡನೆ ತೆರಳುವರು. ಈ ಆಶಯವು ಐತರೇಯಭಾಷ್ಯದಲ್ಲಿ ಸ್ಫುಟವಾಗಿದೆ-

'ಮ್ರಿಯಮಾಣಮಿಮಂ ಜೀವಂ ವಾಸುದೇವಾದಿದೇವತಾಃ।
ತ್ಯಕ್ತ್ವಾ ಭಾಗೇನ ಗಚ್ಛಂತಿ ಭಾಗತೋಽನುವ್ರಜಂತಿ ತಮ್ ॥'

'ದೇಹ ತೊರೆಯುತ್ತಿರುವ ಜೀವನನ್ನು ವಾಸುದೇವ ಹಾಗೂ ತತ್ತ್ವಾಭಿಮಾನಿ ದೇವತೆಗಳು ಒಂದು ರೂಪದಿಂದ ತೊರೆದು ಮತ್ತೊಂದು ರೂಪದಿಂದ ಅವನನ್ನು ಅನುಸರಿಸಿ ಹೋಗುತ್ತಾರೆ. ಇದೇ ಆಶಯವನ್ನು ಬೃಹದಾರಣ್ಯಕಭಾಷ್ಯವೂ ನಿರೂಪಿಸುತ್ತಿದೆ-

'ಆಕಾಶಾಖ್ಯಸ್ವರೂಪಂ ತು ವಿಷ್ಣುಸ್ತದ್ ಹೃದಿಸಂಸ್ಥಿತಃ।
ಭಾಗತೋ ಭಾಗತಶ್ಚೈತಾನನುಯಾತಿ ಜನಾರ್ದನಃ॥'

ಇದರ ಮೇಲೊಂದು ಪ್ರಶ್ನೆ ಸಹಜ.

ಜೀವನನ್ನು ದೇವತೆಗಳು ತೊರೆದು ಹೋಗುವಾಗ ಮುಖ್ಯಪ್ರಾಣನೂ ಒಂದು ರೂಪದಿಂದ ತೊರೆದು ಮತ್ತೊಂದು ರೂಪದಿಂದ ಜೀವನ ಜೊತೆಗೆ ಇರುವುದಾದರೆ, 'ಅನಾವೃತ್ತಿರ್ದೇಹಿನಾಂ ದೇಹಪಾತೇ' ಎಂಬ ವಾಕ್ಯವನ್ನು ಕೂಡಿಸುವುದು ಹೇಗೆ? ಈ ವಾಕ್ಯವು ಪ್ರಾಣನು ದೇಹವನ್ನು ತೊರೆದಾಗ ದೇಹಪಾತವಾಗುವುದು ಎಂದು ತಿಳಿಸುತ್ತದೆ. ಪ್ರಾಣನ ಸಂಬಂಧವು ರೂಪಾಂತರದಿಂದ ಇರುವುದಾದರೆ 'ಪ್ರಾಣನ ಸಂಬಂಧವಿಲ್ಲದಾಗ ದೇಹಪಾತವಾಗುವುದು' ಎಂಬ ವಚನದ ಆಂತರ್ಯವೇನು?

ಇದರ ಆಶಯವನ್ನು ಮೂರು ರೀತಿಯಿಂದ ವಿವರಿಸಬಹುದೆನ್ನುತ್ತಾರೆ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು.

1. ಪ್ರಾಣನು ಪುನರಾವೃತ್ತಿಯಿಲ್ಲದ ಮುಕ್ತಿಪ್ರದನು.
2. ಮೃತದೇಹದಲ್ಲಿ ಮುಖ್ಯಪ್ರಾಣನಿರುವುದಿಲ್ಲ.
3. ಉಳಿದ ದೇವತೆಗಳು ದೇಹ ತೊರೆದರೂ ಈ ದೇಹ ಬೀಳುವುದಿಲ್ಲ. ಆದರೆ ಮುಖ್ಯಪ್ರಾಣನು ದೇಹವನ್ನು ತೊರೆದರೆ ಉಳಿದವರ ಅಸ್ತಿತ್ವಕ್ಕೆ ಬೆಲೆ ಇಲ್ಲ. ಆದ್ದರಿಂದ ಪ್ರಾಣಗಮನವೇ ದೇಹಪಾತಕ್ಕೆ ಕಾರಣ.

'ತು' ಶಬ್ದ-'ಚ' ಶಬ್ದಗಳ ಕೃತ್ಯ-

ಭಾಷ್ಯದಲ್ಲಿ ಇದೇ ಅಧಿಕರಣದಲ್ಲಿ ಆಚಾರ್ಯರು ಉದಾಹರಿಸಿದ ಪ್ರಮಾಣವಚನ ಹೀಗಿದೆ-

ಪುರುಷಸ್ಯ ಮೃತೌ ಬ್ರಹ್ಮನ್ ಪ್ರಾಣಾ ಭಾಗತ ಏವ 'ತು'।
ಅಧಿದೈವಂ ಪ್ರಾಪ್ನುವಂತಿ ಭಾಗತೋಽನುವ್ರಜಂತಿ ತಮ್।
ಪುನಶ್ಶರೀರಸಂಪ್ರಾಪ್ತೌ ತಮೇವಾನುವಿಶಂತಿ 'ಚ' ॥

ಇದರಲ್ಲಿರುವ 'ತು' ಮತ್ತು 'ಚ' ವರ್ಣಗಳಿಗೆ ಕೃತ್ಯವನ್ನು ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ನಿರೂಪಿಸಿದ್ದಾರೆ- ಹನ್ನೊಂದು ಇಂದ್ರಿಯಗಳು ಮತ್ತು ಪಂಚಭೂತಗಳು ಲಿಂಗಶರೀರದ ಘಟಕವಾಗಿ ಅನಾದಿಕಾಲದಿಂದ ಜೀವನ ಜೊತೆಗೆ ಇರುತ್ತವೆ. ಇವುಗಳಿಗೆ 'ತೇಷಾಂ ಭೂತೈರುಪಚಯಃ ಸೃಷ್ಟಿಕಾಲೇ ವಿಧೀಯತೇ' ಎಂಬ ಪ್ರಮಾಣ ತಿಳಿಸುವಂತೆ, ಸೃಷ್ಟಿಕಾಲದಲ್ಲಿ ಸ್ಥೂಲತೆ (ಉಪಚಯ) ಉಂಟಾಗುತ್ತದೆ. ಪ್ರಲಯಕಾಲದಲ್ಲಿ 'ಅಪಚಯ' ಉಂಟಾಗುತ್ತದೆ. ಉಪಚಿತಭಾಗದಲ್ಲೂ ಕೂಡ ಮರಣಕಾಲದಲ್ಲಿ ಕೆಲವು ಭಾಗ ಜೀವನನ್ನು ತೊರೆಯುವುದು. ಮತ್ತೆ ಶರೀರ ದೊರಕಿದಾಗ ಅದೇ ಜೀವಶರೀರವನ್ನು ಆಶ್ರಯಿಸುವುದು. ಈ ಅಂಶವು 'ತು' 'ಚ' ಶಬ್ದಗಳಿಂದ ತಿಳಿಯುವುದು.

ವ್ಯಾಖ್ಯಾನವಿಮರ್ಶೆ-

ವಿಶೇಷಜನನವನ್ನು ವಿವರಿಸುವ ಪ್ರಸಂಗದಲ್ಲಿ ಭಾಷ್ಯದಲ್ಲಿ ಬ್ರಾಹ್ಮಪುರಾಣವಚನವನ್ನು ಉದಾಹರಿಸಿದ್ದಾರೆ-

ವಿಶೇಷಜನನಂ ಚಾಪಿ ಪ್ರೋಚ್ಯಮಾನಂ ನಿಬೋಧ ಮೇ।
ಸ್ಥಾಸ್ನುಷ್ವಥಾಪಿ ಪುರುಷೇ ಪ್ರಮದಾಯಾಮಥಾಪಿ ವಾ।
ಗರ್ಭೇ ವಾ ಬಹಿರೇವಾಥ ಕ್ವಚಿತ್ ಸ್ಥಾನಾಂತರೇಷು ಚ॥

ಇದಕ್ಕೆ ಆಧಾರವಾದ ಶ್ರುತಿವಚನ ಹೀಗಿದೆ- 'ದಿವಃ ಸ್ಥಾಸ್ನೂನ್ ... ಪಿತುರ್ಮಾತುರಂತರೇ ಗರ್ಭೇ ವಾ ಬಹಿರ್ವಾ ಇತಿ ಪೌಷ್ಯಾಯಣಶ್ರುತಿಃ'. ಇಲ್ಲಿ 'ಗರ್ಭೇ' ಎಂಬ ಪದಕ್ಕೆ ಕೆಲವರು ವ್ಯಾಖ್ಯಾನ ಮಾಡಿರುವುದನ್ನು ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು ಸೂಕ್ಷ್ಮವಾಗಿ ವಿಮರ್ಶಿಸುತ್ತಾರೆ. ಕೆಲವರ ವಿವರಣೆ ಹೀಗಿದೆ- 'ಗರ್ಭೇ' ಎಂದರೆ ಪೂರ್ವಸಿದ್ಧವಾದ ಶರೀರದಲ್ಲಿ ಪ್ರವೇಶವನ್ನು ಹೊಂದುವುದು. ಉದಾ- ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು. ಮುಖ್ಯಪ್ರಾಣನು 32 ಲಕ್ಷಣಗಳುಳ್ಳ ಶರೀರವನ್ನು ಗರ್ಭವಾಸದುಃಖವನ್ನು ಅನುಭವಿಸದೆಯೇ ಅಲ್ಲಿರುವ ಜೀವನನ್ನು ಜನನಕಾಲದಲ್ಲಿ ಹೊರಹಾಕಿ ಪ್ರವೇಶಿಸುವನು. ಮಧ್ವವಿಜಯದಲ್ಲಿರುವ 'ಸಂಪೂರ್ಣಲಕ್ಷಣಚಣಂ' (2.25) ಎಂಬ ಶ್ಲೋಕವು ಈ ಆಶಯಕ್ಕೆ ಪೋಷಕವಾಗಿದೆ.

ತತ್ತ್ವಪ್ರದೀಪವಿವರಣೆಗೆ ಮೇಲಿನ ವ್ಯಾಖ್ಯಾನವು ವಿರುದ್ಧವಾಗಿದೆ ಎಂದು ಭಾಷ್ಯದೀಪಿಕಾರರ ಅಭಿಪ್ರಾಯ. ತತ್ತ್ವಪ್ರದೀಪದಲ್ಲಿ 'ಬಹಿರೇವ' ಎಂಬ ಪದವಿವರಣೆಗೆ ಶ್ರೀಮದಾಚಾರ್ಯರ ಜನನವನ್ನು ಉದಾಹರಣೆಯಾಗಿ ನೀಡಲಾಗಿದೆ ಎನ್ನುತ್ತಾರೆ ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು. ಅವರ ಪ್ರಕಾರ ಶ್ರೀತ್ರಿವಿಕ್ರಮಪಂಡಿತರ ಆಶಯ ಹೀಗಿದೆ–

'ಅತ್ಯಂತವಿಶಿಷ್ಟವಿಷಯಂ ಬಹಿಃಪ್ರವೇಶವಚನಮುವಗಮ್ಯತೇ' (ತತ್ತ್ವಪ್ರದೀಪ)

'ಗರ್ಭವಾಸವಿಲ್ಲದ ಜನನವು ವಿಶಿಷ್ಟಜೀವರಿಗೆ ಅನ್ವಯಿಸುವ ಸಂಗತಿಯಾಗಿದೆ.' ಇಲ್ಲಿ ಅತ್ಯಂತವಿಶಿಷ್ಟ (ಶ್ರೇಷ್ಠ)ರೆಂದರೆ ಋಜುಜೀವರು. ಅವರು ಗರ್ಭದಿಂದ ಹೊರಗೆ (ಗರ್ಭವಾಸವಿಲ್ಲದೆಯೇ) ಜನಿಸುವರು. ಇದು ಭಾಷ್ಯದೀಪಿಕಾಕಾರರ ವಿವರಣೆ.

ಹೀಗೆ ಹೇಳಿದರೆ ಟೀಕಾವಿರೋಧ ಬರುವ ಸಂಭವವಿದೆ. ಟೀಕಾಚಾರ್ಯರು 'ಬಹಿರೇವ' ಎಂಬ ಪದಕ್ಕೆ ದ್ರುಪದಾದಿಗಳು ಎಂದು ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆ. ಅವರ ಆಶಯವನ್ನು ಹೀಗೆ ವಿವರಿಸಬಹುದಾಗಿದೆ ಎನ್ನುತ್ತಾರೆ ಜಗನ್ನಾಥಯತಿಗಳು. ತಂದೆಯ ಮೂಲಕ ತಾಯಿಯ ಗರ್ಭಕ್ಕೆ ಬರದೆ ಜನ್ಮ ಪಡೆದವನು ದ್ರುಪದ. ಆದರೆ ತಂದೆಯ ಶುಕ್ರದಿಂದಲೇ ಅವನ ಜನ್ಮವಾಗಿದೆ. ಗರ್ಭದಿಂದ ಹೊರಗೆ ಅವನ ಜನ್ಮವಾದ ಕಾರಣ 'ಬಹಿರೇವ' ಎಂಬ ಪದಕ್ಕೆ ಅವನನ್ನು ಉದಾಹರಿಸಲಾಗಿದೆ.

ತತ್ತ್ವಪ್ರದೀಪಕಾರರ ಆಶಯ ಹೀಗಿದೆ– ಯಾವುದೇ ರೀತಿಯಿಂದಲೂ ತಂದೆ-ತಾಯಿಗಳ ಶುಕ್ರ-ಶೋಣಿತ ಸಂಬಂಧವಿರದ ದೇಹದಲ್ಲಿ ಜನ್ಮ ಪಡೆದವರನ್ನು 'ಬಹಿರೇವ' ಎಂಬ ಪದದಿಂದ ಉದಾಹರಣೆಯಾಗಿ ತೆಗೆದುಕೊಳ್ಳಬಹುದು. ಈ ಅರ್ಥದಲ್ಲಿ 'ಬಹಿರೇವ' ಎಂಬ ಪದವನ್ನು ತೆಗೆದುಕೊಂಡಾಗ ಋಜುಯೋಗಿಗಳೇ ಇದಕ್ಕೆ ಉದಾಹರಣೆಯಾಗಬಲ್ಲರು.

ತತ್ತ್ವಪ್ರದೀಪದ ಆಧಾರದಿಂದ ಭಾಷ್ಯದೀಪಿಕೆಯಲ್ಲಿ ಈ ವಿಷಯವನ್ನು ಹೀಗೆ ಸಮರ್ಥಿಸಲಾಗಿದೆ–

'ಗರ್ಭದಲ್ಲಿ ಶರೀರ ರಚನೆಯಾದಾಗ ಗರ್ಭವಾಸದುಃಖ-ಪ್ರಸೂತಿದುಃಖಗಳು ಶರೀರದಲ್ಲಿರುವವನಿಗೆ ಅನಿವಾರ್ಯ. ಇಂತಹ ಗರ್ಭವಾಸವಿಲ್ಲದೆಯೇ ನಾರಾಯಣನ ಪರಮಾನುಗ್ರಹದಿಂದ ಕೆಲವರಿಗೆ ಜನ್ಮ ಸಂಭವಿಸುವುದು. ಗರ್ಭದಿಂದ ಶರೀರವು ಹೊರಬಂದ ನಂತರ ಅದರಲ್ಲಿ ಪ್ರವೇಶಿಸುವವರು ಉತ್ತಮರು. ಆದ್ದರಿಂದ 'ಗರ್ಭೇ' ಎಂಬ ಪದಕ್ಕೆ ಋಜುವ್ಯತಿರಿಕ್ತರನ್ನೇ ಉದಾಹರಣೆಯಾಗಿ ತೆಗೆದುಕೊಳ್ಳಬೇಕು. ಆದ್ದರಿಂದಲೇ ಟೀಕಾಚಾರ್ಯರು 'ಗರ್ಭೇ ಪೂರ್ವಸಿದ್ಧಶರೀರಂ ಕ್ವಚಿತ್' ಎಂಬುದಾಗಿ ಸಾಮಾನ್ಯವಾಗಿ ನುಡಿದಿದ್ದಾರೆ. ಶ್ರೀಮದಾಚಾರ್ಯರು ಎಂದೇನೂ ನುಡಿದಿಲ್ಲ. ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ 'ಗರ್ಭೇ' ಎಂಬುದು ಋಜುವ್ಯತಿರಿಕ್ತಜೀವರಿಗೆ ಸಂಬಂಧಿಸಿದ್ದೆಂದು ಮತ್ತು 'ಬಹಿಃ' ಎಂಬುದು

ಋಜುವಿಷಯಕವೆಂದೂ ತಿಳಿಯಬೇಕು. ಹೀಗೆ ಪ್ರಾಚೀನವ್ಯಾಖ್ಯೆಯನ್ನು ವಿಮರ್ಶಿಸಿ ತತ್ತ್ವಪ್ರದೀಪಕ್ಕೆ ಒತ್ತು ಕೊಟ್ಟು ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆ.

ವಸ್ತುತಸ್ತು 'ಗರ್ಭೇ' ಎಂಬ ಪದಕ್ಕೆ ಪೂರ್ವಸಿದ್ಧಶರೀರದಲ್ಲಿ ಪ್ರವೇಶ ಹೊಂದುವುದು ಎಂಬ ವಿವರಣೆಯನ್ನು ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು ನಿರಾಕರಿಸಿದ್ದು ಸೂಕ್ತವೆನಿಸುವುದಿಲ್ಲ. ತತ್ತ್ವಪ್ರದೀಪದಲ್ಲಿ ವಿಶಿಷ್ಟಜೀವರಿಗೆ ಬಹಿರ್ಜನನವು ಹೇಳಲ್ಪಟ್ಟಿದೆಯಾದರೂ ಅವರು ಋಜುಗಳೆಂದೇನೂ ಕಂಠತಃ ಹೇಳಿಲ್ಲ. ಆದ್ದರಿಂದ ಯಥಾಶ್ರುತ ವ್ಯಾಖ್ಯಾನವೂ ಉಪಪನ್ನವಾಗುತ್ತದೆ.

ಜೀವನಿರುವುದೆಲ್ಲಿ?

'ಮುಗ್ಧೇऽರ್ಧಸಂಪತ್ತಿಃ' (3.2.10) ಸೂತ್ರವ್ಯಾಖ್ಯಾನಪ್ರಸಂಗದಲ್ಲಿ ಭಾಷ್ಯದಲ್ಲಿ ಹೀಗೆ ಜೀವನವಿಷಯವನ್ನು ನಿರೂಪಿಸಲಾಗಿದೆ–

ಹೃದಯದಲ್ಲಿರುವ ಪರಮಾತ್ಮನಿಗಿಂತ ಜೀವನು ಎಚ್ಚರಕಾಲದಲ್ಲಿ ದೂರದಲ್ಲಿ (ಕಣ್ಣಿನಲ್ಲಿ) ಇರುವನು. ಕನಸು ಕಾಣುವಾಗ ಕಂಠದೇಶಕ್ಕೆ ಬಂದು ಸ್ವಪ್ನವನ್ನು ಕಾಣುವನು. ಯಾವಾಗ ಹೃದಯದಲ್ಲಿರುವ ಪರಮಾತ್ಮನಲ್ಲಿ ಪ್ರವೇಶ ಪಡೆಯುವನೋ ಆಗ ಗಾಢನಿದ್ರೆ ಪಡೆಯುವನು.

ಇಲ್ಲಿ ಒಂದು ಪ್ರಶ್ನೆ ಬರಬಹುದು–

'ದಕ್ಷಿಣಾಕ್ಷಿಮುಖೇ ವಿಶ್ವಃ ಮನಸ್ಯಂತಸ್ತು ತೈಜಸಃ' ಎಂಬ ಪ್ರಮಾಣಾನುಸಾರವಾಗಿ ಜೀವನಿಗೆ ಕಣ್ಣಿನಲ್ಲಿ ವಿಶ್ವನಾಮಕ ಪರಮಾತ್ಮನ ಸಾಮೀಪ್ಯವಿರುವ ಕಾರಣ ದೂರದಲ್ಲಿರುವನು ಎಂಬ ವಿವರಣೆ ಸರಿಯೆ?

ಇದರ ಪರಿಹಾರವನ್ನು ಹೀಗೆ ಅರಿಯಬೇಕು– ಜೀವನು ಕಣ್ಣಿನಲ್ಲಿರುವ ವಿಶ್ವರೂಪಕ್ಕೆ ಹತ್ತಿರವಾದರೂ ಹೃದಯದಲ್ಲಿರುವ ಪ್ರಾಜ್ಞರೂಪವನ್ನು ಗಮನದಲ್ಲಿರಿಸಿಕೊಂಡು ಅವನು ದೂರದಲ್ಲಿರುವನೆಂದು ವರ್ಣಿಸಲಾಗಿದೆ.

ಇಲ್ಲಿ ಮತ್ತೊಂದು ಪ್ರಶ್ನೆ ಸಹಜ–

'ಅವಸ್ಥಿತೇರೇಷ್ಯಾದಭ್ಯುಪಗಮಾದ್ ಹೃದಿ ಹಿ' (2.3.24) ಎಂಬ ಸೂತ್ರದಲ್ಲಿ 'ಹೃದಿ ಹ್ಯೇಷ ಆತ್ಮಾ' ಎಂಬ ಷಟ್‌ಪ್ರಶ್ನೋಪನಿಷತ್ತಿನಲ್ಲಿ ಜೀವನು ಸರ್ವದಾ ಹೃದಯದೇಶದಲ್ಲಿರುವನೆಂಬ ವಿವರಣೆ ಇದೆ. ಆದ್ದರಿಂದ 'ಕಣ್ಣಿನಲ್ಲಿರುವನು' 'ಕಂಠದೇಶದಲ್ಲಿರುವನು' ಇತ್ಯಾದಿವಾಕ್ಯಗಳ ಆಂತರ್ಯವೇನು?

ಇಲ್ಲಿ ಪ್ರಮೇಯರಹಸ್ಯ ಹೀಗಿದೆ–

ದೇವತೆಗಳು ಸಾಂತಜೀವರು. ಅಂದರೆ ಅವರ ಪ್ರಕಾಶವ್ಯಾಪ್ತಿ ದೊಡ್ಡದು. ಏಕಕಾಲದಲ್ಲಿ ಲೆಕ್ಕವಿಲ್ಲದಷ್ಟು ದೇಹದಲ್ಲಿ ಅವರು ಇರಬಲ್ಲರು. ನಿರಂತಜೀವರೆಂದರೆ ಒಂದೇ ದೇಹಮಟ್ಟಿಗೆ ಪ್ರಕಾಶವ್ಯಾಪ್ತಿ ಹೊಂದಿ ಭೋಗಾನುಭವ ಪಡೆಯಬಲ್ಲರು. ಇದನ್ನು ಬೃಹದ್ ಭಾಷ್ಯದಲ್ಲಿ ಶ್ರೀಮದಾಚಾರ್ಯರು ವಿವರಿಸಿದ್ದಾರೆ-

'ಹೃದಯೇ ಸಂಸ್ಥಿತೋ ಜೀವಃ ವಿಶೇಷೇಣ ಹರಿಸ್ತಥಾ।
ಚಕ್ಷುರಾದಿಷು ರೂಪಾಣಿ ಜಾಗ್ರತ್ಕಾಲೇ ತಯೋಸ್ತಥಾ।
ಬಹೂನಿ ಸಂತಿ ತಾನ್ಯೇವ ಯದೈಕೀಭಾವಮಾಪ್ನುಯುಃ।
ಹೃದಯಸ್ಥೇನ ರೂಪೇಣ ತದಾ ಜೀವೋ ನ ಕಿಂಚನ।
ಜಾನಾತೀತಿ ವಿದುಃ ಪ್ರಾಜ್ಞಾ..... ॥' (ಬೃ.ಭಾ. 6.4.1)

ಇಲ್ಲಿ ಚಕ್ಷುರಾದಿ ಇಂದ್ರಿಯಗಳಲ್ಲಿ ಪರಮಾತ್ಮನ ಹಾಗೂ ಜೀವನ ಬಹುರೂಪಗಳಿವೆ ಎಂಬ ಮಾತಿದೆ. ಇದು ದೇವತಾಜೀವರಿಗೆ ಸಂಬಂಧಿಸಿದ ವಿಷಯವಾಗಿದೆ. ಅನೇಕ ಜೀವರಲ್ಲಿ ನಿಯಾಮಕರಾಗಿರುವ ಇಂದ್ರಾದಿ ತತ್ತ್ವಾಭಿಮಾನಿದೇವತೆಗಳು ಸಾಂತರೆನಿಸಿದ್ದು ಪ್ರತಿಯೊಂದು ದೇಹಗಳಲ್ಲಿ ಅಥವಾ ನಿಯಮ್ಯವಾದ ಇಂದ್ರಿಯಗಳಲ್ಲಿ ಭಿನ್ನ ಭಿನ್ನ ರೂಪ(ಶರೀರ)ಗಳಿಂದ ಅವರು ಇರುತ್ತಾರೆ.

ಹೀಗೆ ಒಪ್ಪಿದರೆ, ಐತರೇಯಭಷ್ಯವಿರೋಧವು ಕಾಣುವುದು. ಅಲ್ಲಿ- 'ಜೀವನಿಗೆ ಕಣ್ಣಿನಲ್ಲಿ ಪ್ರತ್ಯೇಕವಾದ ಕಣ್ಣು-ತಲೆ ಇತ್ಯಾದಿ ಇಂದ್ರಿಯಗಳಿರುವುದಿಲ್ಲ ಎನ್ನಲಾಗಿದೆ. - 'ನ ಹಿ ಜೀವಸ್ಯ ಅಕ್ಷ್ಯಾದಿಷು ಪೃಥಕ್ ಶಿರೋಬಾಹ್ವಾದಿಕಂ ವಿದ್ಯತೇ ಹೃದಿಸ್ಥಮೇವ ಓ ತಸ್ಯ ರೂಪಮ್'.

ದೇವತಾಜೀವರಿಗೆ ಸಂಬಂಧಿಸಿದಂತೆ ಈ ವಾಕ್ಯವನ್ನು ಹೀಗೆ ಅರ್ಥ ಮಾಡಿಕೊಳ್ಳಬೇಕು. ಇಲ್ಲಿ 'ಪೃಥಕ್' ಎಂದರೆ ಸ್ವರೂಪಕ್ಕಿಂತ ಭಿನ್ನವಾದ ಶಿರ ಆದಿ ಇಂದ್ರಿಯಗಳು ಇಲ್ಲ, ಎಂದರೆ ನಿಯಮ್ಯವಾದ ಪ್ರತಿಶರೀರದಲ್ಲೂ ತಮ್ಮ ತೇಜೋಮಯ ಶರೀರದಿಂದಲೇ ದೇವತೆಗಳಿದ್ದು ಕಾರ್ಯ ಮಾಡುವರು. ಆದ್ದರಿಂದಲೇ 'ಬಹೂನಿ ಸಂತಿ ರೂಪಾಣಿ' ಎಂಬ ಪ್ರಮಾಣವಚನವು ಸಂಗತವಾಗುವುದು. ನಿರಂತಜೀವರ ಪ್ರಕಾಶವ್ಯಾಪ್ತಿ ಆಯಾ ದೇಹಕ್ಕೆ ಮಾತ್ರ ಸಂಬಂಧಿಸಿದರೆ, ಸಾಂತಜೀವರ ಪ್ರಕಾಶವ್ಯಾಪ್ತಿ ಅನೇಕ ದೇಹಗಳಲ್ಲಿ ಇರುತ್ತದೆ.

ಇನ್ನು ನಿರಂತರಾದ ಜೀವರ ವಿಷಯದಲ್ಲಿ ಈ ವಾಕ್ಯವನ್ನು ಹೀಗೆ ಯೋಜಿಸಬೇಕು- ನಿರಂತಜೀವನು ಹೃದಯಪ್ರದೇಶದಲ್ಲೇ ಇರುವನಾದರೂ ಕಣ್ಣಿನಲ್ಲಿ ಪ್ರಕಾಶರೂಪದಿಂದ ವ್ಯಾಪ್ತಿ ಇದೆ. ಉದಾ- ದೀಪವು ಕೋಣೆಯ ಒಂದು ಪ್ರದೇಶದಲ್ಲಿದ್ದರೂ ಅದರ ಬೆಳಕು ಎಲ್ಲೆಡೆ ಹರಡುವಂತೆ ಜೀವನಿಗೆ ಪ್ರಕಾಶವ್ಯಾಪ್ತಿ ಇದೆ. ಜೀವನ ವಿಶೇಷ ಅಭಿಮಾನವು ಎಚ್ಚರದಲ್ಲಿ ಕಣ್ಣಿನಲ್ಲಿ ಇದೆಯೆಂದೂ ಅರ್ಥ ಮಾಡಿಕೊಳ್ಳಬಹುದು. ಆದರೆ ಕಣ್ಣಿನಲ್ಲಿ ಅವನ ಪ್ರತ್ಯೇಕವಾದ ಶರೀರ ಇರುವುದಿಲ್ಲವೆಂದೇ ಐತರೇಯಭಾಷ್ಯದ ಆಶಯವಾಗಿದೆ. ಹೀಗೆ ಅನೇಕ

ಸೂಕ್ಷ್ಮವಿಷಯಗಳನ್ನು ಉಲ್ಲೇಖಿಸಿ ಅವುಗಳ ಆಂತರ್ಯವನ್ನು ವಿವರಿಸುವ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳ ಈ ಕೃತಿ ಪರಮೋಪಕಾರಿಯಾಗಿದೆ.

ಧ್ಯಾನಸ್ವರೂಪವಿಮರ್ಶೆ-

ಪ್ರಜ್ಞಾಂತರಾಧಿಕರಣ ಪೂರ್ವಪಕ್ಷ-ಸಿದ್ಧಾಂತಗಳು ಹೀಗಿವೆ-

'ದೃಷ್ಟ್ವೈವ ತಂ ಮುಚ್ಯತೇ ನಾಪರೇಣ' ಎಂಬ ಶ್ರುತಿಯು ಜ್ಞಾನದಿಂದ ಮುಕ್ತಿಯನ್ನು ವಿಧಿಸುತ್ತಿದೆ. ಎಲ್ಲರಿಗೂ ದೊರಕುವ ಪರಮಾತ್ಮದರ್ಶನವು ಸಮಾನವಾಗಿದೆ. ಆದ್ದರಿಂದ ಫಲದಲ್ಲಿ ತಾರತಮ್ಯವನ್ನು ಅಂಗೀಕರಿಸುವುದು ಯುಕ್ತವಲ್ಲ. ಇದು ಪೂರ್ವಪಕ್ಷ.

ಸಿದ್ಧಾಂತ ಹೀಗಿದೆ-

ಪರಮಾತ್ಮನ ಸಾಕ್ಷಾತ್ಕಾರ (ಅಪರೋಕ್ಷಜ್ಞಾನ) ಮುಕ್ತಿಸಾಧನವಾದರೂ ಎಲ್ಲ ಜ್ಞಾನಿಗಳ ಬ್ರಹ್ಮಾಪರೋಕ್ಷವು ಏಕರೂಪವಲ್ಲ. ಸಾಧನೆಯಲ್ಲಿ (ಉಪಾಸನೆಯಲ್ಲಿ) ತಾರತಮ್ಯ ವಿರುವುದರಿಂದ ಸಾಕ್ಷಾತ್ಕಾರದಲ್ಲೂ ತಾರತಮ್ಯವಿರುವುದು ಸಹಜವಾಗಿದೆ. ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಮುಕ್ತಿಯಲ್ಲೂ ತಾರತಮ್ಯವು ಉಪಪನ್ನವಾಗಿದೆ. ಇದಿಷ್ಟು ಸಿದ್ಧಾಂತಸಾರ.

ಸೂತ್ರದಲ್ಲಿರುವ 'ಪ್ರಜ್ಞಾಂತರಮ್' ಎಂಬ ಪದಕ್ಕೆ ಪ್ರಜ್ಞಾವಿಶೇಷ (ವೈಶಿಷ್ಟ್ಯೋಪೇತವಾದ ಜ್ಞಾನ) ಎಂದು ಅರ್ಥ. ಪ್ರಕೃತ ಅದು ಧ್ಯಾನರೂಪವಾಗಿದೆ. ಧ್ಯಾನವೆಂದರೆ, ಅವಿಚ್ಛಿನ್ನವಾದ ಪರೋಕ್ಷಜ್ಞಾನಸಂತತಿಯಾಗಿದೆ. (ಅವಿಚ್ಛಿನ್ನಪರೋಕ್ಷಜ್ಞಾನಸಂತತಿರ್ಹಿ ಧ್ಯಾನಮ್'. ಇದು ಟೀಕಾಚಾರ್ಯರು ಧ್ಯಾನಶಬ್ದಕ್ಕೆ ಇಲ್ಲಿ ನೀಡಿದ ಅರ್ಥ. ಈ ಅರ್ಥವನ್ನು ಸ್ವೀಕರಿಸಿದಾಗ ನ್ಯಾಯಸುಧೆಯ ವಿರೋಧ ಬರುವುದೆಂದು ಶಂಕಿಸಿ ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ಅದನ್ನು ಹೃದಯಂಗಮವಾಗಿ ಪರಿಹರಿಸಿದ್ದಾರೆ. ಇಲ್ಲಿ ಎರಡು ಆಕ್ಷೇಪಗಳಿವೆ-

1. ನ್ಯಾಯಸುಧೆಯ ಜಿಜ್ಞಾಸಾಧಿಕರಣದಲ್ಲಿ ಮನಸ್ಸಿನಲ್ಲಿರುವ ವಾಸನಾಮಯವಸ್ತುವಿನ ಅವಲೋಕನ (ಮನಸ್ಸಿನ ಮೂಲಕ ದರ್ಶನ) ವೇ ಧ್ಯಾನವೆಂದು ನಿರೂಪಿಸಲಾಗಿದೆ- 'ಮಾನಸವಾಸನಾಮಯಸ್ಯ ವಸ್ತುನೋ ಮನಸಾऽವಲೋಕನಂ ಧ್ಯಾನಮಿತ್ಯಂಗೀಕಾರಾತ್'.

2. ಇಲ್ಲಿ ಪ್ರಜ್ಞಾವಿಶೇಷಪದದಿಂದ ಧ್ಯಾನವನ್ನು ತೆಗೆದುಕೊಳ್ಳುವುದು ಎಷ್ಟು ಉಚಿತ? ಏಕೆಂದರೆ ಧ್ಯಾನವು ಮನಸ್ಸಿನಲ್ಲಿ ನಡೆಯುವ ಕ್ರಿಯೆ. ಜ್ಞಾನವು ಹೀಗಲ್ಲ. ಆದ್ದರಿಂದ ಜ್ಞಾನವಿಶೇಷಪದದಿಂದ ಧ್ಯಾನವನ್ನು ತೆಗೆದುಕೊಳ್ಳುವುದು ಹೇಗೆ?

ಮೊದಲ ಶಂಕೆಗೆ ಉತ್ತರ ಹೀಗಿದೆ- ಶ್ರವಣಾದಿಗಳಿಂದ ಉಂಟಾದ ಅವಿಚ್ಛಿನ್ನ ಜ್ಞಾನಸಂತತಿಯು ಧ್ಯಾನ. ಪರಮಾತ್ಮನ ಸ್ವರೂಪವಿಷಯದಲ್ಲಿ ಅಪರೋಕ್ಷವಲ್ಲದಿದ್ದರೂ

ಮಾನಸವಾಸನಾಮಯಮೂರ್ತಿವಿಷಯಕವಾದುದರಿಂದ ಅಪರೋಕ್ಷವೆನಿಸಬಲ್ಲದು. ಆದ್ದರಿಂದ ಇಲ್ಲಿ ಮಾನಸವಾಸನಾಮಯವಸ್ತುವಿನ (ಮೂರ್ತಿಯ) ಅಪರೋಕ್ಷವಿರುವ ಕಾರಣ ಸುಧೆಯಲ್ಲಿ ನಿರೂಪಿಸಿದ ಧ್ಯಾನಲಕ್ಷಣವನ್ನು ಪ್ರಕೃತದಲ್ಲಿ ಸಮನ್ವಯಿಸಬಹುದಾಗಿದೆ.

ಉಪನಯಮರ್ಯಾದಯಾ 'ಸುರಭಿಃ ಚಂದನಖಿಂಡಃ' ಎಂಬಲ್ಲಿ ಚಂದನಖಿಂಡದಲ್ಲಿ ಸೌರಭ್ಯವು ತೋರಿದಂತೆ, ಪ್ರಕೃತ ಧ್ಯಾನದಲ್ಲಿ ಪರಮಾತ್ಮನಿಗೆ ಅಪರೋಕ್ಷತ್ವವನ್ನು ಹೇಳಬಹುದಲ್ಲವೇ ? ಎಂಬ ಶಂಕೆ ಸಹಜ. ಉಪನಯಮರ್ಯಾದಯಾ ತೋರುವಾಗ ಲೌಕಿಕಾಪರೋಕ್ಷಪ್ರತ್ಯಾಸತ್ತಿಯ ಅನಿವಾರ್ಯತೆ ಇದೆ. ಪ್ರಕೃತ ಶ್ರವಣ-ಮನನಾದಿರೂಪವಾದ ಪರೋಕ್ಷಜ್ಞಾನಕ್ಕೆ ಪರಮಾತ್ಮನು ವಿಷಯನಾದ ಕಾರಣ ಇಲ್ಲಿ ಅಪರೋಕ್ಷವೆಂದು ವ್ಯವಹರಿಸದೆಯೇ 'ಪರೋಕ್ಷಜ್ಞಾನಸಂತತಿಯೇ ಧ್ಯಾನ' ಎನ್ನಲಾಗಿದೆ.

ಕೆಲವರು ಧ್ಯಾನವೆಂದರೆ ಪರಮಾತ್ಮನ ಗುಣಗಳ ಧ್ಯಾನವೂ ವಿವಕ್ಷಿತವಾಗಿದೆ, ಗುಣಗಳ ಚಿಂತನೆ ಪರೋಕ್ಷವಾಗಬಲ್ಲದು ಎನ್ನುತ್ತಾರೆ.

ಆದರೆ ಈ ವಾದವು ಸಮಂಜಸವಲ್ಲ- ಗುಣಗಳ ಚಿಂತನೆಯೆಂದರೆ ಅದೇನೂ ಸಾಕ್ಷಾತ್ಕಾರದ ರೂಪವಾಗಿರದೇ ಸ್ಮರಣರೂಪವೇ ಆಗಿರುತ್ತದೆ. ಆದ್ದರಿಂದ ಇದು ಮನೋರೂಪ ಇಂದ್ರಿಯಜನ್ಯವಾಗಿದ್ದು ಅಪರೋಕ್ಷವೆನಿಸಬಹುದಲ್ಲದೇ ಪರೋಕ್ಷವೆನಿಸಲಾರದು.

ಇನ್ನು ಧ್ಯಾನವು ಮಾನಸಕ್ರಿಯೆ, ಅದು ಜ್ಞಾನವಲ್ಲವೆಂಬ ಎರಡನೆಯ ಪ್ರಶ್ನೆಯ ಉತ್ತರ ಹೀಗೆ ತಿಳಿಯಬೇಕು-

ಪೂರ್ವಪಕ್ಷದ ಹಂತದಲ್ಲಿ ಶಂಕಿಸಿದಂತೆ, ಧ್ಯಾನವು ಮಾನಸಕ್ರಿಯೆಯಲ್ಲ. ಹಾಗೆ ಒಪ್ಪಿದರೆ ಅತೀಂದ್ರಿಯವಾದ ಮನಸ್ಸಿನಲ್ಲಿರುವ ಕ್ರಿಯೆಯೂ ಅತೀಂದ್ರಿಯವಾದ ಕಾರಣ ಇದನ್ನು ಸಾಕ್ಷಾತ್ಕಾರವೆಂದೇ ವ್ಯವಹರಿಸಲಾಗದು. ಇದಲ್ಲದೇ ಕ್ರಿಯೆಯು ರೂಪರಹಿತವಾದುದರಿಂದ ಮಾನಸಕ್ರಿಯಾರೂಪಧ್ಯಾನದಲ್ಲಿ ಪರಮಾತ್ಮನ ಮೂರ್ತಿಯು ಪ್ರತಿಭಾತವಾಗಲಾರದು. ಆದ್ದರಿಂದ ಜ್ಞಾನವಿಶೇಷವೇ ಧ್ಯಾನವೆಂದು ಅಂಗೀಕರಿಸಿರುವುದು ಸಮಂಜಸವಾಗಿದೆ.

ಈ ಕೃತಿಯ ಯಥಾಮತಿ ಸಂಶೋಧನೆಯನ್ನು ನಡೆಸಿದ್ದೇನೆ. ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠದಲ್ಲಿ ಶಾಸ್ತ್ರಶಿಕ್ಷಣವನ್ನು ನೀಡಿ, ಕೃಪೆಯಿಂದ ಶ್ರೀಸುಧಾಗ್ರಂಥವನ್ನು ಪಾಠ ಮಾಡಿ ಅನುಗ್ರಹಿಸಿದ ಶ್ರೀಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರ ವಾತ್ಸಲ್ಯವನ್ನು ಕೃತಜ್ಞತಾಪೂರ್ವಕವಾಗಿ ನೆನೆಯುತ್ತ, ಅವರಿಗೆ ಭಕ್ತಿಪೂರ್ವಕ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತಿದ್ದೇನೆ.

ಸಂಶೋಧನ ಮಂದಿರದ ಅಧ್ಯಕ್ಷರೂ, ಪೂಜ್ಯ ಗುರುಗಳೂ ಆದ ಪ್ರೊ। ಡಿ. ಪ್ರಹ್ಲಾದಾಚಾರ್ಯರು ಈ ಕೃತಿಯನ್ನು ಹೊರತರುವಲ್ಲಿ ಎಲ್ಲ ಹಂತದಲ್ಲಿಯೂ ಪ್ರೋತ್ಸಾಹಿಸಿದ್ದಾರೆ. ಅವರಿಗೆ ನನ್ನ ಗೌರವಪೂರ್ವಕ ನಮಸ್ಕಾರಗಳು.

3ನೇ ಅಧ್ಯಾಯದ ಸೂತ್ರದೀಪಿಕಾಕೃತಿಯನ್ನು ಸಂಶೋಧಿಸಿ ಮುದ್ರಣಕ್ಕೆ ನೀಡಿದವರು ವಿ। ಕಡ್ಡಿಬದರೀನಾರಾಯಣಾಚಾರ್ಯರು. ಅವರ ನಿಸ್ವಾರ್ಥ ಸೇವೆಗೆ ನಾನು ಚಿರಋಣಿ.

ಈ ಕೃತಿಯ ಅಮೂಲ್ಯ ಹಸ್ತಪ್ರತಿ ನೀಡಿ ನಮ್ಮನ್ನು ಪ್ರೋತ್ಸಾಹಿಸಿದ ಪಂ. ಗೋವಿಂದರಾವ್ ನವಲಗುಂದ, ಧಾರವಾಡ ಇವರಿಗೆ ನನ್ನ ಆದರಪೂರ್ವಕ ವಂದನೆಗಳು.

ಅಕ್ಷರಸಂಯೋಜನೆ ಕಾರ್ಯವನ್ನು ನೆರವೇರಿಸಿದ ಶ್ರೀ ಹೆಚ್.ಎಸ್. ಅಂಜನಪ್ರಸಾದ ಹಾಗೂ ವಿ। ವ್ಯಾಸರಾಜ ಜೋಶಿಯವರಿಗೆ ನನ್ನ ಅಭಿನಂದನೆಗಳು.

ಬೃಂದಾವನ್ ಮುದ್ರಣಾಲಯದ ಅಧಿಕಾರಿಗಳು ಈ ಕೃತಿಯನ್ನು ಉತ್ತಮವಾಗಿ ಮುದ್ರಣ ಮಾಡಿ ನೀಡಿದ್ದಾರೆ. ಅವರನ್ನು ಅಭಿನಂದಿಸುತ್ತೇನೆ.

ವಿದ್ವಾಂಸರು ಹಂಸಕ್ಷೀರನ್ಯಾಯದಿಂದ ಈ ಪ್ರಯತ್ನವನ್ನು ಸ್ವಾಗತಿಸುವರೆಂದು ನಂಬುತ್ತೇನೆ.

ಡಾ। ಎ.ವಿ. ನಾಗಸಂಪಿಗೆ

पीठिका

श्रीमद्व्यासराजविद्यासिंहासनाधीश्वराः पद-वाक्य-प्रमाणपारावार-पारीणाः श्रीमन्तः जगन्नाथयतयः (१७५५-१७७०) माध्ववाङ्मये अद्यापि स्वीयापूर्वप्रबन्धैः यशःकायेन जीवन्ति। तेषामियं भाष्यदीपिका तृतीयाध्यायात्मिका इदानीं विदुषां करकमलयोः समर्प्यते। परविद्याशब्द-मुख्यार्थानां ब्रह्मसूत्राणां वैशिष्ट्यमधिकृत्य विदुषां न किमपि वक्तव्यम् अस्ति। तदिदानीं माध्वभाष्यानुसारेण तृतीयाध्यायसारः (साधनस्वरूपं) सङ्ग्रहेण निरूप्यते।

तृतीयाध्यायसारः

विदितमेवेदं समेषां विदुषां यत् साधनजातमवलम्ब्यैव बद्धो जीवः संसाराद् अपारात् मुच्यत इति। बद्धानां जीवानां मुक्तिः यथायोग्यं भवतीति निश्चप्रचम्। तत्र तु कानि साधनानि सम्पादनीयानि इति अवश्यं विचारणीयम्। अस्ति हि दार्शनिकेषु बहोः कालात् विप्रतिपत्तिः साधनस्वरूपविषये। केचन ब्रुवते ज्ञानेन केवलेन भवति मुक्तिरिति। अपरे तु यागादिवेदोक्तकर्मणा मुक्तिर्जायत इति सङ्गिरन्ते। अन्ये केचन रथस्य चक्रद्वयमिव ज्ञानं कर्म च उभयमपि आवश्यकमिति मन्वते। भगवान् बादरायणस्तु श्रौतीं प्रतिपत्तिं मानयानः ज्ञानेनैव परं पदमिति स्वाशयमाविश्चकार सूत्रेषु। सूत्रव्याख्यातार अपि तत्तत् समयसंस्कारवशात् दर्शनान्तरवासनया च भिन्नामेव विचारप्रणालीं प्रदर्शयामासुः। अतः साधनानि किंलक्षणकानि कथं च सम्पादनीयानीति माध्वीं विचार-प्रणालीमनुसृत्य विमर्शोऽत्र विधीयते।

वैराग्यस्वरूपम् -

ब्रह्मसूत्रेषु तृतीयाध्याये प्रथमपादे वैराग्यजनकसामग्रीविशेषनिरूपणं कृतम्। द्वितीये पुनर्भक्तिजननार्थम् अपेक्षिता सामग्री विव्रियते। तृतीये पुनरुपासनायाः स्वरूपं सविस्तरमुपवर्ण्यते। तुरीये पादे ज्ञानमाहात्म्यमिति चतुर्ष्वपि पादेषु चतुरङ्गं साधनं सूक्ष्मेक्षिकया विमृश्यते।

अत्रेदं न विस्मर्तव्यं यत् वैराग्यं नोपदेशेन सम्पादयितुं शक्यत इति। अतः यस्य यत्र संसारे वैराग्यमभिलषितं तस्य संसारे विद्यमाना असङ्ख्याः दोषाः जिज्ञासूनां व्युत्पादनीयाः। तेन च संसारे जिहासा प्रजन्यते। न हि मुक्तिर्नाम भूतबन्धात् कादाचित्कात् विनिर्मुक्तिः। अपि तु भौतिकात् परमसूक्ष्माच्च लिङ्गशरीरादपि। सा च न मरणमात्रेण सम्भवति अपि तु ज्ञानजनकविरक्त्यैकसाध्या। तस्मात् मृतिसमनन्तरं जनिपर्यन्तमपि संसारस्वरूपं कथं क्लेशावहमिति विवेचनीयम्। उक्तं हि भगवता बादरायणेन- 'तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्' (ब्र.सू. ३.१.१) इति।

अस्य चायमाशयः- न कदाचित् देहवियोगे भूतानां विनिवृत्तिर्भवति। अपि तु देहिनः देहान्तरेऽपि सूक्ष्मरूपेण भूतानि अनुवर्तन्त एव। तस्माद् आमुक्ति न तेषां भवति वियुक्तिः। अतः अनादिबन्धस्य विनिवृत्तये सम्पादनीया असारेऽस्मिन् संसारे विरक्तिः। न हि जननमरणचक्रात् अनादिकालादपि प्रवर्तमानात् वैराग्यमन्तरा विनिवृत्तिः कल्पयितुमपि शक्यते। जीवस्य चास्मात् शरीरात् विनिर्गतस्य यथाकर्म स्वर्गनरकादि-प्राप्तिः भविष्यति। प्रायः अस्माभिः बहूनि पापकर्माणि क्रियन्त इति तु विदितमेव। तेषां तु अनुभवेन विनाशः अत्यन्तमसम्भावितः। उक्तं हि भगवता मध्वदेवेन-

'आचतुर्दशमात् वर्षात् कर्माणि नियमेन तु ।
दशावराणां देहानां कारणानि करोत्ययम् ॥' (ब्र.सू.भा. ३.१)

अनेन चेदं विज्ञायते रक्तबीजासुरसन्ततिरिव कर्मसन्ततिरपि नितान्तं प्रवर्धतैव । न हि तस्य भोगेन क्षयः सम्भवति । सन्ति हि महापातक-सुमहत्तरपातकादीनि आमन्वन्तरमादिनकल्पं च नरकप्रदायीनि नृणाम् । सति चैवं कथं कर्मणा जीवस्य विमुक्तिरिति सन्देहः शिष्यत एव । पापं ह्यनुतापवतः ज्ञानपूर्वं प्रायश्चित्तविधिमाचरतः कथञ्चिन्निवर्तेताऽपि । तथाऽपि अनन्तजन्मसु कृतं पापं न केवलं प्रायश्चित्तविधिनाशयं किन्तु विरागजातात् सुदृढात् ज्ञानादेवेति निर्विवादम् । सहस्रलक्षाधिकवत्सरपर्यन्तं नरके वसन् जीवः पुण्यपापशेषवानेव मातृशरीरं प्रविष्टः तत्रापि गर्भे जन्मशतदुःखं स्मरन् नानाविधयातनामनुभवंश्च नितान्तं क्लिश्यति । उपरमश्चैवंविधात् संसारकूपारात् वैराग्यमन्तरा नैव सम्भवतीति वैराग्यजननार्थं संसारस्य असारता दुःखप्रचुरता च जिज्ञासूनां प्रथमे पादेऽत्र विविच्यते ।

द्वितीयः पादः (भक्तिस्वरूपम्) -

यथा विरक्तिः वस्तुदोषविज्ञानाज्जायते तथैव क्वापि प्रीतिरपि भक्त्यपर-नामिका वस्तुसौन्दर्यगुणविज्ञानसापेक्षा जायते । अत एवेह न भक्तिलक्षणं विस्तरेण विमृष्टमपि तु भक्तिजनकोपायः विस्तरेण निरूपितः । यस्मिन् पुरुषे भक्तिरभिलषिता तस्य गुणाः ज्ञातव्याः । यावन्तः गुणाः विज्ञायन्ते तावती भक्तिरभिवर्धत इत्यनुभवसिद्धम् । अत एव भगवती श्रुतिः परमपुरुषे नारायणे समादरजननाय गुणततिं ब्रवीति- 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति । यत् प्रयन्ति अभिसंविशन्ति । तद्विजिज्ञासस्व । तद् ब्रह्म' इति । (तै.उ. ३.१) 'सत्यं ज्ञानमनन्तं

ब्रह्म' (तै.उ. २.२.)। 'यः सर्वज्ञः स सर्ववित्' (आथर्व.उ. १.९)। 'कविर्मनीषी परिभूः स्वयम्भूः याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः'(इश.उ.८)। 'सत्यकामः सत्यसङ्कल्पः' (छा.उ.८.५.१)। भगवति गुणगणान् विदितवतः पुरुषस्य स्वारसिकी प्रीतिः तत्र जायते। इयमेव हि भक्तिशब्देन व्यवह्रियमाणास्ति। लक्षणं च भगवता मध्वदेवेन इत्थं निरटङ्कि-

'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्न चान्यथा॥'

(म.ता.नि. अ.१-८५)

अस्य चाशयविशेषः प्रादर्शि सर्वज्ञकल्पैः श्रीमट्टीकाकृत्पादैः- 'परमेश्वर-भक्तिर्नाम अनन्तानवद्यकल्याणगुणत्वज्ञानपूर्वकः स्वात्मात्मीयसमस्त-वस्तुभ्योऽनेकगुणाधिकः अनन्तरायसहस्रेणापि अप्रतिबद्धः निरन्तर-प्रेमप्रवाहः' (न्या.सु. १.१.१) इति।

भगवति आदरजननोपयोगितया आदाविह भगवान् बादरायणः स्वप्न-कर्तृत्वरूपमाहात्म्यं हरेः प्रज्ञापयति- 'सन्ध्ये सृष्टिराह हि' (ब्र.सू. ३.२.१), 'निर्मातारं चैके पुत्रादयश्च' (ब्र.सू. ३.२.२), 'मायामात्रं तु कात्स्न्र्येन अनभिव्यक्तस्वरूपत्वात्' (ब्र.सू. ३.२.३) इत्यादिना। न केवलं हरिः जाग्रत्सुषुप्त्यवस्थाप्रेरकोऽपि तु स्वप्नावस्थाया अपि स एव नियन्ता। स्वप्नसुषुप्त्यवस्थयोः कात्स्न्र्येन पारतन्त्र्यमनुभवन् जीवः जाग्रदवस्थायां तु स्वातन्त्र्यमस्तीति यद्विजानाति तदतीव मन्दमिति प्रज्ञापयति सूत्रकारः। एवं चावस्थात्रयेऽपि जीवस्य भगवानेव प्रेरक इति विज्ञाय तत्र प्रज्ञां कुर्वीत।

ज्ञानानन्दस्वरूपोऽपि शारीरः तस्याभिव्यक्त्यर्थं कुर्यादेव भक्तिम्।

अव्यक्तोऽपि भगवान् जैवभक्त्या प्रसन्नः स्वात्मानमादर्शयति । साक्षात्कारप्रदो विष्णुर्हि लोकविलक्षणज्ञानानन्दादिगुणपूर्णः, स्वगतभेद-विवर्जितः । ध्यानकाले च प्रतीयमानं न तद्रूपम् । यतो हि मानसवासनामयं ध्यानकालीनं रूपमिति तदन्तः अप्राकृतगुणः भगवान् विचिन्तनीयः ।

एवं न केवलं भगवान् विष्णुः स्थितिकर्ता अपि तु सृष्टिलयावपि तेनैव भवतः । य एवं भगवतः जडजीवादत्यन्तविलक्षणं वेदैकसमधिगम्यं गुणात्मकं स्वरूपं पश्यति सदा संसारान्मुच्यते तदुक्तम्-

'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥'
(आथर्व.उ. ५.३)

इति 'तमेवं विद्वान् अमृत इह भवति । नान्यः पन्था अयनाय विद्यते' (तै.आ. ३.१२) इति च ।

उपासनानिरूपणम् -

तृतीये पादे उपासनायाः स्वरूपमुपवर्णितम् । उपासना च ध्यानरूपा शास्त्राभ्यासरूपा चेति द्विविधा । तदुक्तं भगवत्पादाचार्यैः-

'सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी ।
ध्यानरूपा परा चैव' (अनुव्या. ३.३.५५) इति ।

ध्याने हि भवति भगवतः साक्षात्कारः । तच्च ध्यानं मननवत एव सम्भवति । मननं च निरन्तरं शास्त्राध्ययनशीलस्य जिज्ञासोरेव सम्भवति । तदर्थं 'स्वध्यायोऽध्येतव्यः' इति विधिमनुस्मरन् सर्वदाऽपि वेदाध्ययनं कुर्वीत । नात्राध्ययनं गुरूच्चारणानूच्चारणरूपमपि तु वेदार्थज्ञानपर्यन्तमेव विवक्षितम् । उक्तं च-

'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना।' (भाष्योदाहृता श्रुतिः)

'अद्यापि तेन देवाद्याः शृण्वते मन्वते सदा।' (अनु. ३.३.७४)

'श्रवणादि विना नैव क्षणं तिष्ठेदपि क्वचित्।' (अनु. ३.३.७८)

'अत्यशक्ये तु निद्रादौ पुनरेव समभ्यसेत्।' (अनु. ३.३.७९)

इति। एवं च यावच्छक्ति निखिलान् वेदानधीत्य भगवतः गुणान् विज्ञाय ध्यानं कर्तव्यम्। तत्रापि देवोत्तमो चतुराननः सकलवेदोक्तगुणोपासना-योग्यः। देवास्तु यथायोग्यं बहुगुणोपासकाः। मनुष्योत्तमास्तु सत्-चित्-आनन्द-आत्मेति चतुर्गुणोपासकाः। तत्रापि अवराः स्वामित्वरूपैक-गुणोपसकाः भवन्ति। तदुक्तम्-

'आत्मेत्येव परं देवमुपास्य हरिमव्ययम्।
केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन॥' (ब्र.सू.भा. ४.४.)

इति। उपासनावैचित्र्येण साधनतारतम्यानुगुण्येन च मुक्तावानन्दातिशयो भवति जीवानाम्। नित्यमुक्ता अपि श्रीः भगवतः गुणगणान् उपासती निजममन्दमानन्दमनुभवर्तीति स्मृतय उद्घोषयन्ति। अतः भगवान् यथायोग्यं सर्वैरुपास्य इति स्थितम्।

साक्षात्कारनिरूपणम्-

उपासनापरिपाकात् भगवतः साक्षात्कारो भवति। तेन च जीवः इह विशिष्टमानन्दमनुभवति परत्र चामन्दमानन्दमनुभवति। उक्तं च भगवता व्यासेन-'पुरुषार्थोऽतःशब्दात् इति बादरायणः' (ब्र.सू. ३.४.१)इति। उक्तं चाथर्वणे-

'यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामान् तस्माद् आत्मज्ञं ह्यर्चयेत् भूतिकामः॥'
(आथर्व.उ. ५.१०)

इति । अपरोक्षज्ञानानन्तरमपि वर्णाश्रमोचितकर्माणि श्रीशतुष्टये कर्तव्यानि । हरितुष्टये पूर्वमनुष्ठितानि विहितकर्माणि अपरोक्षज्ञानोत्पादकानि । अनन्तरं च क्रियमाणानि मुक्तौ यावद्योग्यानन्दाभिव्यञ्जकानि । अत एव जीवन्मुक्तोऽपि मुक्तावानन्दातिशयार्थं लोकसङ्ग्रहार्थं च कर्म कुर्यादेव । तदुक्तम्-

'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः ।
एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत् ॥' (ब्र.सू.भा. ३.४)

इति ।

तत्रापि उत्तमाधिकारिणां पदमधर्मैः नाकाङ्क्षत्वं न प्राप्यते च । नियतगुरूपदेशानुसारेण यथायोग्यमुपासना कर्तव्या । अनुष्ठितेऽपि कर्मणि महत्फलं प्रेरकाणां तत्त्वाभिमानिदेवानामेव भवति । यथायोग्यफलं च साधकानां लभ्यते । असति प्रतिबन्धे शीघ्रमेव भवत्यापरोक्ष्यम् । ज्ञानिनोऽपि प्रारब्धप्रतिबन्धाभावेऽधमानां तच्छरीरपातानन्तरमेव भवति मोक्षः । 'केचिदत्रैव मुच्यन्ते' इत्युक्तेः ।

उपसंहारः -

एवं पादचतुष्टयात्मकेऽस्मिन् तृतीयेऽध्याये वैराग्य-भक्ति-उपासना-ज्ञानयोगाः प्रतिपादं तत्तत्समयप्रक्रियाविमर्शपूर्वकं निरूपिताः ।

एवमत्र माध्वभाष्यानुसारेण तृतीयाध्यायसारः दिङ्मात्रेणोपदर्शितः । अथात्र भाष्यानुभाष्ये उपजीव्य सन्ध्याधिकरणस्वरूपं निरूप्यते । अनेन च माध्वव्याख्यानानुसारेण कथं विचारप्रणाली प्रत्यधिकरणं प्रवर्तत इति विज्ञातुं शक्यते । ततः भाष्यदीपिकावैशिष्ट्यम् अधिकृत्य किञ्चिद् विलिख्यते ।

सन्ध्याधिकरणम्

शाङ्करमते 'सन्ध्ये सृष्टिराह हि' (३.२.१) इति सूत्रार्थः-

'स यत्र प्रस्वपिति' (बृ. ४.३.९) इत्युपक्रम्य 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ पथः सृजते' (बृ. ४.३.१०) इति श्रूयते। तत्र संशयः- किं प्रबोध इव पारमार्थिकी सृष्टिरुत मायामयीति। 'रथान् रथयोगान् पथः सृजते' इति स्वाप्नार्थसृष्टिमभिधाय 'स हि सर्वस्य कर्ता' इत्युपसंहाराच्च स्वाप्नसृष्टिः पारमार्थिकी इति।

'निर्मातारं चैके पुत्रादयश्च' (३.२.२.) इति सूत्रार्थः

प्राज्ञकर्तृकेयं सृष्टिरिति चैके शाखिनः पठन्ति। 'य एष सुप्तेषु जागर्तीति' (कठ. ५.८) ईश्वरलिङ्गश्रवणात्। 'तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते' (कठ. ५.८) इति वाक्यशेषाच्च।

इमे पूर्वपक्षसूत्रे। सिद्धान्तमाह बादरायणः-

'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' (३.२.३) इति।

तुशब्दः पूर्वपक्षं व्यावर्तयति- मायेत्यनादिरनिर्वाच्या अविद्योच्यते। मायैव सन्ध्ये सृष्टिः। न परमार्थगन्धोऽप्यस्ति। कुतः ? कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्। देशकालनिमित्तसम्पत्तिरबाधश्च कात्स्न्र्यम्। तेनाभिव्यक्तस्वरूपत्वाभावात्। (कात्स्न्र्यं नाम- १. देशसम्पत्तिः, २. कालसम्पत्तिः, ३. निमित्तसम्पत्तिः, ४. अबाधश्च।)

१. न तावत् रथादीनां समुचितो देशः स्वप्ने विद्यते न हि संवृते देशे रथादयोऽवकाशं लभेरन्।

२. कालसम्पत्तिरपि नास्ति। रजन्यां सुप्तो वासरं भारते वर्षे मन्यते। तथा मुहूर्तमात्रवर्तिनि स्वप्ने कदाचित् बहुवर्षपूगानतिवाहयति।

३. निमित्तानि च स्वाप्नपदार्थज्ञानकरणानि चक्षुरादीनि न विद्यन्ते । तेषामुपरतत्वात् ।

स्वाप्नपदार्थनिर्माणकारणमपि निमित्तकारणम् उपादानकारणं वा नास्ति ।

४. स्वाप्नदृष्टार्थानां बाधात् न स्वप्नः पारमार्थिकः ।

रामानुजमते 'सन्ध्ये सृष्टिराह हि' इति सूत्रार्थः

'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' इत्यत्र स्वप्नसृष्टिः प्रतीयते । इयं स्वाप्नसृष्टिः जीवकर्तृका वा परमात्मकर्तृका वा इति संशये 'स्वप्नं पश्यति' इति प्रकृतो जीवः स्रष्टा इत्युच्यते । न च स्वप्नस्रष्टुः सत्यकामत्वसत्यसङ्कल्पत्वादि श्रूयते, तत्कथं जीवकर्तृकेयं सृष्टिरिति चेत् न, जीवस्य सत्यसङ्कल्पत्वं प्रजापतिवाक्येऽभिहितम् । प्रतिबन्धकसत्त्वादिदानीं तिरोहितमिति । तस्मात् जीव एव स्वाप्नार्थस्रष्टा । सन्ध्ये= स्वप्ने श्रूयमाणा सृष्टिः जीवकृता 'आह हि' - 'स हि सर्वस्य कर्ता' इति परामर्शाद् इति सूत्रार्थः ।

निर्मातारं चैके पुत्रादयश्च

एके शाखिनो जीवं स्वप्ननिर्मातारं पठन्ति- 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' इति पुत्रादीन् (काम्यमानतया पुत्रादयः कामशब्देनोच्यन्ते) जीवः सृजति इत्युच्यते ।

मायामात्रं तु -

स्वप्ने पुष्करिण्याद्यर्थजातम्, मायामात्रम्= परमपुरुषसृष्टमित्यर्थः । 'मायाशब्दो ह्याश्चर्यवाची' । 'जनकस्य कुले जाता देवमायेव निर्मिता' इत्यादिषु तथा दर्शनात् ।

'कामं कामम्' इत्यत्र 'तदेव शुक्रं तद् ब्रह्म तदेवामृतमश्नुते' इत्यमृतत्वादिब्रह्मलिङ्गश्रवणात् 'स हि सर्वस्य कर्ता' इति स्वप्नस्रष्टृत्वमपि भगवत एव ।

तदुक्तं भाष्यवार्तिके -

न रथास्तत्र न रथयोगा इत्यादिवाक्यतः ।
रथादिसृष्टिं किं जीवः करोतीश्वर एव वा ।
युक्तं स्वप्ने जीव एव सृष्टेः कर्ता हि स्वप्नदृक् ।
एकेऽत्र शाखिनो जीवं निर्मातारं वदन्ति हि ।
एवं प्राप्ते समाधानं मायामात्रेति सूत्रतः ।
जनकस्य कुले जाता देवमायेव निर्मिता ।
इत्यादिवचनान्मायाशब्दो ह्याश्चर्यवाचकः ।
अतो रथाद्यर्थजातं स्वप्नद्रष्ट्रैव दृश्यते ।
तत्कालमात्रसत्ताकं परमाश्चर्यरूपकम् ।
करोति परमात्मैव सत्यसङ्कल्पतो हरिः ।
न तु जीवोऽनभिव्यक्तस्वरूपत्वात् कृत्स्नतोऽपि हि ॥

माध्वभाष्यदिशा 'सन्ध्ये सृष्टिराह हि' इति सूत्रार्थः निरूप्यते-

'योनेः शरीरम्' इत्येतदवसानैः सूत्रैर्जीवस्य जन्मावगतम् । जातस्य स्वप्नाद्यवस्थासम्बन्धः प्रसिद्धः । तत्र स्वप्नावस्थाप्रवर्तकत्वलक्षणो महिमा भगवतोऽत्राधिकरणे निरूप्यते ।

पूर्वपक्षः-

१. अर्थज्ञानोभयात्मकः स्वप्नः । तत्र स्वाप्नार्थानां करितुरगादीनां परमेश्वरायत्तता नोपपद्यते । असत्यत्वात् ।

२. न तावदिमे अनादिनित्याः प्रागूर्ध्वं चोपलब्धिप्रसङ्गात् ।

३. नाप्युत्पत्तिविनाशवन्तः तथात्वेऽपि प्रागूर्ध्वमुपलम्भप्रसक्तेः ।

४. न च वाच्यं विद्युदादिवत्तदैवोत्पत्तिर्विनाशश्चेति । प्रमाणाभावात् ।

५. न चैतेषामर्थानां निमित्तकारणमुपादानं वा पश्यामः ।

६. न तावज्जीवः कर्ता । द्रष्टुर्निर्व्यापारत्वात् ।

७. नापीश्वरः प्रमाणाभावात् ।

८. 'स्वप्नमायासरूपा' (माण्डूक्य. १३) 'अविद्यमानो ह्यवभाति ... स्वप्नमनोरथो यथा' (भाग. ११.२.३८) इति श्रुतिस्मृत्या भ्रान्तित्वमवगम्यते ।

सिद्धान्तः-

१. अर्थज्ञानोभयात्मकस्वप्नसत्यत्वमभ्युपेयम् । स्वप्ने प्रतीयमाना अर्था अनादिमनसि स्थितवासनोपादानकाः । संस्कारैः भगवान् नानाविधं जगत् सृष्ट्वा जीवाय प्रदर्शयति । अतः स्वाप्नार्थानां वासनोपादानकत्वम् ईश्वरेच्छानिमित्तत्वं चास्तीति न मिथ्यात्वप्रसक्तिः ।

२. दर्शनसाधनं मन एव । दर्शनं चानुभवो विवक्षितः ।

३. यथा मनोरथे ध्याने वा संस्कारयोनीनर्थान् मनसा अनुभवत्येवं स्वप्नेऽपीति किमनुपपन्नम् । इयांस्तु विशेषः मनोरथादौ प्रयत्नपूर्विका पदार्थसृष्टिः स्वप्ने पुनरीश्वराधीनैव ।

४. स्वप्ने स्वशरीरच्छेदादयोऽपि प्रतीयन्ते । न च तदुत्पत्तौ उपादानम् अस्ति । अननुभूतत्वेन संस्कारोदयाऽयोगाद् इत्यप्यसाधु । संसारस्यानादित्वेन कस्मिंश्चिज्जन्मनि स्वशिरश्छेदादेरप्यनुभवसम्भवेन संस्कारोपपत्तेः ।

स्वप्ने ऐषमदेहच्छेददर्शनं तु 'त्वदीयं शिरश्छिन्नं भवतु' इति कस्यचिद्वचनश्रवणजनितसंस्कारेणेति न दोषः। तदुक्तम्- 'अदृष्टे चाश्रुते भावे न भाव उपजायते' इति।

५. भवान्तरेऽपि शशविषाणाभावेन सामानाधिकरण्यप्रतीतिः स्वप्ने कथमुपपाद्यत इति चेत्, शब्दादिना भ्रान्तिसम्भवेन संस्कारोपपत्तेः। न केवलं जाग्रत्त्वं स्वप्ने भ्रमः। किन्तु यत्र यस्योपादानं नास्ति बाधश्चास्ति तत्र सामानाधिकरण्यस्यापि भ्रमत्वमेव।

६. वासनामयानां मेरुमन्दरादीनां शरीरादनिर्गत्यैव मनसा अनुपरतेन दर्शनसम्भवात्।

७. 'त्रिगुणात्मिकार्थज्ञानं विष्णुशक्तिस्तथैव च। मायाशब्देन भण्यन्ते', 'महामायेत्यविद्येति नियतिर्मोहिनीति च। प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यते' इति स्मृत्युक्तेः मायाशब्दस्येच्छायां प्रसिद्धेः।

८. न स्वप्ने दृश्यमानसर्वपदार्थानां मिथ्यात्वम्। तथात्वे आत्मनोऽपि मिथ्यात्वप्रसक्तिः।

९. अभ्युपगतं च शङ्कराचार्यैः स्वाप्नार्थानां वासनोपादानकत्वं यथा- 'तद्वासनामात्रम्, वेशान्तादीन् सृजते वासनामात्ररूपात्' (बृ.भा. ४.३.१०)।

१०. 'सूचकश्च श्रुतेराचक्षते च तद्विदः' इति सूत्रार्थस्त्वेवम् उक्तः- मायामात्रत्वात्तर्हि न कश्चित् स्वप्ने परमार्थगन्धोऽस्तीति। नेत्युच्यते। सूचकश्च स्वप्नो भवति। भविष्यतोः साध्वसाधुनोः। तथा हि- 'यदा कर्मसु काम्येषु ....', 'पुरुषं कृष्णं कृष्णदन्तं पश्यति' ... तत्रापि सूच्यमानस्य भवतु सत्यत्वम्। सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यम्।' इति।

एवं च शाङ्करभाष्ये स्वाप्नार्थानां वासनोपादानकत्वमुररीकृतम्। विशिष्य मध्वभाष्ये ईश्वरेच्छानिमित्तत्वं स्वाप्नार्थद्रष्टृत्वं च जीवस्योपपादितम्। रामानुजसिद्धान्तेऽपि स्वाप्नार्थाः मिथ्येति नोच्यते। तथा च अर्थ-ज्ञानोभयात्मकस्वप्नस्य माध्वभाष्यानुभाष्ययोः सत्यत्वं समर्थितम्, परिहृतानि च बाधकानीति स्वप्नादिकर्तृत्वरूपमहिमातिशयवति हरौ आदरातिशयः कर्तव्य इत्यधिकरणमथितार्थः।

भाष्यदीपिकावैशिष्ट्यम् -

भाष्यदीपिकास्थाः द्वित्रा विषयाः निरूप्यन्ते। अस्य च वैशिष्ट्यमेवं सङ्ग्रहेण निरूप्यते-

१. भाष्यगतपाठभेदसूचनं तदर्थविवरणं च।

२. तत्त्वप्रकाशिकोक्तवाक्यार्थसंयोजनपुरस्सरं तत्त्वप्रदीपोक्त-वर्णकान्तरसङ्ग्रहणम्।

३. भाष्योदाहृतश्रुतिस्मृतीनां प्रतिपदार्थविवरणम्।

५. क्वचित् टिप्पण्यन्तराशयानुवदनम्। क्वचिच्चाभिप्रायभेदप्रकाशनम्।

६. सर्वमूलटीकाग्रन्थेषु आपाततः प्रतीयमानविरोधपरिहरणम्।

भाक्ताधिकरणम्-

तत्त्वप्रकाशिका-तत्त्वप्रदीपादिविषयसङ्ग्रहः प्रायः प्रत्यधिकरणं विधीयते। तत्र निदर्शनरूपेण भाष्यदीपिकोक्तदिशा भाक्ताधिकरणं विव्रियते-

'अपाम सोममृता अभूम' (ऋ. ८.४८.३) इति श्रुतौ 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' (आप.श्रौ.सू.) सूत्रे च वैराग्यादिकं विनैव सोमयागादिकर्मानुष्ठानेन मुक्तिः श्रूयते। 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायेन अनायाससाध्येन कर्मणा मोक्षसम्भवे

क्लेशप्रदवैराग्यसम्पादने को वाऽमन्दधीर्यतेत । अतः नास्ति वैराग्यसम्पादनस्य कृत्यम् इति पूर्वः पक्षः । अयं च टीकोक्तः पूर्वपक्षक्रमः ।

तत्त्वप्रदीपे तु,

'तदन्तरप्रतिपत्तौ' (ब्र.सू. ३.२.१) इत्यादौ यज्ञादिकर्मानुष्ठानपराणां धूमादिमार्गेण स्वर्गं गतानां पुनरावृत्तिः प्रतिपादिता । अत्र तु 'अपाम सोममृता अभूम' इति श्रुतिविरोधः । एवं चात्राभ्यधिकाशङ्कापरिहारार्थ-मधिकरणान्तरं प्रवृत्तम् । अत्र पूर्वपक्षरीत्या 'अपाम' इति श्रुत्यर्थस्त्वेवम्-'हुतशेषेण वर्तयेत्' इति विध्यनुसारेण इष्टशेषं सोममपिबाम । तेनामृता भवेम इति ।

अत्रोक्तं सूत्रकृता- 'भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति' (ब्र.सू. ३.१.७) अत्र टीकोक्तरीत्या योजनात्रयं प्राकाशि ।

'नान्यः पन्थाः अयनाय विद्यते' (तै.आ. ३.१२.७) इति श्रुत्या आत्मविद एव मुख्यामृतत्वप्रतिपादनाद् अत्रोक्तममृतत्वमल्पकालीनमिति अमुख्यार्थः श्रुतेर्ग्राह्यः । तदुक्तम्- 'अमृतो वा व सोमपो भविति यावदिन्द्रो यावन्मनुरादित्यः' इति । एवं च काम्यकर्मिणां फलमल्पमेव भवति न शाश्वतमिति तदर्थं सम्पाद्यमेव वैराग्यादिकम् ।

यद्यत्र श्रुतावकाम्यं कर्म विवक्षितम्, तदा तदपि जिज्ञासु-ज्ञानि-भेदेनोभयविधम् । द्विविधमपि न साक्षान्मोक्षसाधनम् । जिज्ञासुकृताकाम्य-कर्मणा मुख्यामृतत्वमेव (संसारबन्धमोचनम्) भवति । तदपि कर्मणा निर्मलमनसः, विरक्ति-ज्ञानद्वारैव । एवं च सोमयागादीनां (कर्मणां) ज्ञानद्वारैवेति परम्परया मोक्षसाधनत्वमुक्तं भवति ।

अथापरोक्षज्ञानिकृताकाम्यकर्मणां मुक्तावानन्दातिशय एव भवत्यतो

नाकाम्यकर्मणः साक्षान्मोक्षहेतुत्वम् । एवं चोक्तदिशा वैराग्यमवश्यं सम्पादनीयमेव ।

अत्रान्तिमयोजनाद्वयेऽमृतशब्दस्य मुख्यामृतत्वमेवार्थ इति मुख्यार्थ एवात्र स्वीकृत इति ज्ञेयम् ।

एवं टीकोक्तसङ्ग्रहसमनन्तरं भाष्यदीपिकायां तत्त्वप्रदीपाशयोऽनूदितः- परम्परयाऽमृतत्वकारणत्वं च कर्मणः नाज्ञकृतस्य किन्तु ज्ञानिकृतस्यैव । आत्मविदनुष्ठितानां कर्मणामपि पक्वज्ञानोत्पत्तिद्वाराऽमृतत्वसाधनत्वम् । कर्मिणामपि ज्ञानोत्पत्तिद्वारैवामृतत्वसाधकत्वम् । अत एवोक्तम्- 'कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभति' इति । एवं चात्र टीकोक्तप्रकारत्रयमुपलक्षणविधयोक्तमिति ज्ञेयम् । एतदनन्तरं सिद्धान्तरीत्या श्रुत्यर्थः विवृतः ।

यद्यपि टीकायाम्- 'अमृता इवामृता इति गौण्या वृत्त्या मन्वन्तरापेक्षयाऽमृतशब्दस्य तत्साधनज्ञानलक्षणया ('अमृत' इत्यस्यामृतत्वहेतुज्ञानवन्तोऽभूमेत्यर्थः), तदेकदेशलक्षणया च (अमृतपदस्यामृतैकदेशतिरोहितभागाभिव्यक्तिमन्तोऽभूमेत्यर्थः), ज्ञानसाधनत्वापेक्षया ज्ञानसहकार्यपेक्षया च योजनात्' इत्युक्तेः कर्मनिर्णयटीकाया ममृतशब्दस्यामुख्यार्थत्वोक्तेः । अत्र तु मुख्यत्वोक्तेर्विरोध इव भाति । तथाऽपि श्रुतेरविरुद्धार्थोपवर्णन एव उभयोस्तात्पर्यम् । कर्मनिर्णयटीकायामपि मुख्यत्वस्यैवाभिप्रेतत्वान्न विरोधः ।

अथवा 'वाचनिकार्थत्यागेन' इति कर्मनिर्णयगतवाचनिकपदं न मुख्यार्थमात्रपरम्, किन्तु प्रतिपाद्यपरमिति सूचनाय कर्मनिर्णयेऽमुख्यार्थत्वोक्तावप्यत्र मुख्यत्वोक्तिरिति वा तत्त्वप्रदीपरीत्याऽत्राप्यमुख्यार्थत्व-

मिति वा समाधानमभिहितम्। एवमियं भाष्यदीपिका प्रत्यधिकरणं टीका-प्राचीनटीकोक्तवर्णकान्तरसङ्ग्रहरूपा ग्रन्थान्तरविरोध-परिहारदक्षा स्वाचार्याशयविशदनदीक्षा च विराजतेतमाम्।

२. भाष्योदाहृतश्रुतिस्मृतीनां पूर्वापरसङ्गतिप्रदर्शनपूर्वकं प्रतिपदार्थ-विवरणमत्र कृतं विदुषामतीव तोषाय कल्पते। विशिष्य 'मानस्वेनेभ्यः' (ऋ. २.२३.१६, ब्र.सू.भा. ३.४.४९, पृ.३४८) इत्यादिकं पश्यत। तथैव स्मृतिव्याख्यानवैभवमपि पश्यन्तु। अत्र तु तदीयान्येव वाक्यानि उल्लिख्यन्ते-

'' 'क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्।
तापापनोदः॥' (३.२७.४५) इति भागवतवाक्यम्॥

'क्लेदनम्' आर्द्रीकरणं 'पिण्डनं' पिण्डीकरणं 'तृप्तिः' तर्पकत्वं 'प्राणनं' चेष्टाकारणत्वम् 'आप्यायनं' सुखकरत्वम् 'उन्दनं' बिन्दु-भावः 'उन्दनं बिन्दुभावस्स्यात्' इत्युक्तेः, 'तापापनोदः' तापनिवर्तकत्वं 'भूयस्त्वम्' अन्येभ्यो भूतेभ्यः कार्येषु भागाधिक्यम्। इमा अष्टौ 'अम्भसो' जलस्य 'वृत्तयः' स्वरूपलक्षणभूता धर्मा इत्यर्थः। भागवते 'तृतीयस्कन्धे' इत्यस्य भूयस्त्वादित्यनेन अन्वयः। अनेन भूयस्त्वादि-त्येतद्भूयस्त्वावगमादित्यपि व्याख्या-तम्।''

एवमन्यदपि निदर्शनं पश्यन्तु सूरयः 'न स्थानतोऽपि' (३.२.११) इति सूत्रभाष्यव्याख्यानावसरे-

'' 'प्रतिदृशमपि नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः।'
(भाग. १.९.४९)

सूर्यदृष्टान्तं स्पष्टयन् उक्तार्थे स्मृतिं चाह - **प्रतिदृशमिति॥** इदं च -

'तमिममहमजं शरीरभाजां हृदि हृदि विष्ठितमात्मकल्पितानाम्।'

इति पूर्वार्धेन सह व्याख्येयम् । तथाहि- 'प्रतिदृशं' दृशं दृशं प्रति चक्षुरभिमानितया तन्नियामकत्वेनैश्वर्यवशात् 'नैकधा' नसमासः । अनेकरूपेण स्थितमर्कमिव तं यथा एकमेव समधिगच्छति ज्ञानी, तथा अहमपि 'आत्मकल्पितानां', परमात्मसृष्टानां 'शरीरभाजां' जीवानां 'हृदि हृदि' प्रतिहृदयं 'विष्ठितं' समग्ररूपेणैव विविधतया स्थितं 'तम्' ईश्वरं 'इममजं' कृष्णम् एकत्वसङ्ख्याविशिष्टमभिन्नम् भेदमोहो भेदोऽस्तीति व्यामोहो विधूतः अवतारगुणादिषु निरस्तो भेदभ्रमो यस्य सः, समधिगतोऽस्मीत्यर्थः । करचरणादिरूपसामग्र्यमात्रेऽयं दृष्टान्तः न तु द्रव्यपूर्तिरूपेऽपि । सूर्यस्य ईश्वरवच्चक्षुरादिषु द्रव्यपूर्त्या स्थित्यभावादिति ध्येयम् । यद्वा- 'प्रतिदृशं' दृशं दृशं प्रति मां प्रति मां प्रत्ययं वर्तत इति नैकधा बहूनामाभिमुख्येन स्थितमर्कमेकमेकमिव ईश्वरमप्यहं एकं समधिगतोऽस्मीत्यर्थः । न चास्मिन् पक्षे सूर्यस्य वस्तुतोऽनेकस्थानत्वाभावात्कथमस्य पूर्वप्रमाणगतसूर्यदृष्टान्तस्पष्टनरूपत्वमिति वाच्यम् । मां प्रति मां प्रतीति भ्रान्त्या बहुधा व्यवस्थितस्य सूर्यस्य यथैकत्वज्ञानमित्येवं स्पष्टनरूपत्वसम्भवात् । इति चेति न केवलं मात्स्ये, किन्तु भागवते चोक्तार्थोऽभिहित इति चशब्दार्थः । प्रथमस्कन्धे युधिष्ठिरं प्रति भीष्मवाक्यमेतत् ।''

३. विरोधपरिहारः

'तदभावो नाडीषु तच्छ्रुतेरात्मनि ह' (३.२.७) इति सूत्रव्याख्यानावसरे भाष्यदीपिकायां श्रुतिद्वयानुपपत्तिपरिहाराय नाडीस्थे परमात्मनि जीवस्य सुप्तिरिति समर्थितम् । अत्र 'ह' इति शब्दः प्रमाणप्रसिद्धिं द्योतयतीत्युक्त्वा अत्रार्थे 'तन्नाडीसंस्थितं विष्णुं मध्ये जीवः प्रपद्यते' इति छान्दोग्यभाष्यवचनमुदाहृतम् । अत्राप्यनुपपत्तिपरिहारावभिहितौ ।

'अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।
प्रविशन्ति सुषुप्तौ च प्रबुध्यन्ते ततस्तथा ॥ (६.६.८)

इति बृहद्भाष्ये कर्णिकाग्रस्थतयाऽवगतस्य हरेः कथं नाडीस्थता इत्याशङ्क्य 'मन्दिरे मणिमाला' इति न्यायेन नाडी-कर्णिकाग्रोभयस्थितत्वमुपपादितम् ।

अत्रापि पुनः काठकाभाष्यविरोधः परिहृतः ।

'देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि' इति काठकभाष्ये जीवस्य (स्वरूप)शरीराङ्गुष्ठमितत्वप्रतीतेः कथमतिसूक्ष्मनाडीस्थत्वमिति शङ्का तु ईश्वराचिन्त्यशक्त्यैवोपपादनीयेत्युक्तम् ।

४. सङ्ग्रहकौशलम् -

'कुर्वन्नेवेह कर्माणि' इति ईशोपनिषद्द्वितीयमन्त्रः 'नियमाच्च' (ब्र.सू. ३.४.७) इति सूत्रव्याख्यानावसरे भगवत्पादैरुदाहृतः । अस्य ईशोपनिषद्भाष्यटीका-तत्त्वप्रकाशिका-तत्त्वप्रदीपोक्ता अर्थाः सङ्गृहीताः । तदीयवाक्यान्येव पश्यन्तु कोविदाः-

'' 'कुर्वन्' इति मन्त्रार्थस्तु- 'शतं समाः' शतंवर्षाणि 'इह' मानुषादिजन्मनि यावत् 'जिजीविषेत्' जीवितुमिच्छेत् तावत् 'कर्माणि' स्वोचितानि 'कुर्वन्नेव' आमरणं भगवत्पूजात्मकानि असङ्कल्पितफलानि स्वोचितानि कर्माणि सर्वथा कुर्यादिति यावत् । 'एवं' कर्माणि कुर्वति 'नरे' मनुष्यमात्रेऽपि 'कर्म' पापं 'न लिप्यते' स्वोचितेनासङ्गकर्मणा भगवत्पूजां कुर्वन्तमल्पाधिकारिणमपि प्रागुत्तराणि पापानि न बाधन्ते । ततश्च ज्ञानाधिकारी भवतीति यावत् । 'इतः' कर्मकरणात् 'अन्यथा' कर्माकरणे 'न लिप्यते इति नास्ति' भगवत्पूजामकुर्वन्तं पापानि बाधन्त एव, ततश्च

नासौ ज्ञानेऽधिक्रियते, अतः कर्माणि कार्याणीति ईशावास्यटीकाया-मुक्तम्। **तत्त्वप्रकाशिकायां तु**- 'एवं' कर्मकरणे त्वयि कर्म न लिप्यते। 'इतोऽन्यथा' अकरणे 'नरे' न क्षीयत इति नरं ज्ञानं तद्वानपि नरः तस्मिन् ज्ञानिन्यपि त्वयि पापं कर्म न लिप्यत इति नास्तीत्यर्थ उक्तः। **तत्त्वप्रदीपे तु** - 'इह' परमेश्वरे अर्पितानि कर्माणि कुर्वन्नेव शतं समाः जिजीविषेत्। एवं त्वयि नरे न कर्म लिप्यते, इतोऽन्यथा कर्म न लिप्यत इति नास्तीत्यर्थ उक्तः। सः ईशावास्यटीकोक्तान्न भिद्यत इति ध्येयम्।''

५. आकरसंयोजनम् -

'अधिकोपदेशात्तु' (३.४.८) इति सूत्रव्याख्यानावसरे भाष्यकृता भविष्यत्पर्ववचनमुदाहृतम्-

'स्वयं तु भगवान् व्यासो व्याप्तज्ञानमहांशुमान्।
अनन्ताकाशवत्पश्यन् निखिलं पुरुषोत्तमः॥' इति।

अत्राकाशवद् व्याप्तज्ञानमहांशुमान् व्यास इति यथाश्रुतान्वयो न सम्भवति। व्याप्तज्ञानवत्त्वरूपविधेयधर्मस्य पक्षदृष्टान्तोभयान्वयाभावात्। तस्मात् टीकाकृद्व्याख्यानसरणिमनुसृत्य अनन्वयदृष्टान्तोऽयमिति वक्तव्यम्। तथा च यथाऽऽकाशो व्याप्तस्तथा ज्ञानमित्येकदेशान्वयो प्रदर्शनीयः। अत्र भाष्यदीपिकाकारैः भागवततात्पर्यवचनमुद्धृत्य दृष्टान्तानामनेकविधत्वमुपपादितम्। यथा-

''न च दृष्टान्तस्य अेनकविधत्वाभावः।

'व्यत्यासासोऽनन्वयश्चैव प्रसिद्धोऽभूत एव च।
सर्वसांहारिकश्चेति दृष्टान्तः पञ्चधा स्मृतः।'

(भा.ता.नि. १.१०.७५) इत्युक्तेः।

'रमादिवन्नास्वतन्त्रो हरिः' इति व्यत्यासदृष्टान्तः ।

अनन्वयस्य तु प्रकृतमेवोदाहरणम् ।

प्रसिद्धो महानसादिः । 'यथोर्णनाभिः' (मु.१-१-७) इति च ।

अभूतस्य 'दिवि सूर्यसहस्रस्य' इत्याद्युदाहरणम् ।

सर्वसांहारिकस्य 'कृष्णो नारायणवत्, रामः कृष्णवत्' इत्यादि । सर्वेषां नारायणकृष्णधर्माणां कृष्णे रामे चोपसंहारात् ।

'गगनं गगनाकारम्' इत्यादि सर्वसंहारिकस्योदाहरणमिति केचिदाहुः ।

एवमनेकेऽपूर्वाः विषया अस्मिन् व्याख्याने लभन्त इत्यर्थवानयं मुद्रणप्रयासः । अस्याध्ययनं विद्यार्थिनां विदुषां च महते उपकाराय कल्पत इति विश्वसिमः ।

ग्रन्थस्यास्य संशोधने ब्रह्मविद्याप्रदानेन समनुग्राहकेभ्यः पदवाक्यप्रमाण-पारावारपारीणेभ्यः पेजावरमठाधिपेभ्यः श्रीमद्भ्यः श्रीविश्वेशतीर्थ-श्रीमच्चरणेभ्यः सभक्तिश्रद्धं प्रणतिततीः समर्पये ।

ग्रन्थस्यास्य प्रकाशनार्थं समुचितवित्तदानादिना प्रेरकेभ्यः नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानकुलपतिपदमलङ्कुर्वाणेभ्यः विद्वत्प्रवरेभ्यः राधावल्लभ-त्रिपाठीमहाभागेभ्यः सादरं प्रणामाः समर्प्यन्ते ।

सर्वदापि संशोधनमन्दिरकार्येषु स्वीयाभिमानं प्रकाश्य मार्गदर्शनेन प्रोत्साहकेभ्यः सि.एस्. कनियाल्महाभागेभ्यः वन्दनानि समर्पये ।

पूर्णप्रज्ञसंशोधनमन्दिरस्याध्यक्षपदमलङ्कुर्वाणेभ्यः अस्मद्गुरुवर्येभ्यः डि. प्रह्लादाचार्येभ्यः तदीयं मार्गदर्शनम् अनुग्रहं च परमादरेण संस्मरन् वन्दनानि समर्पये ।

ग्रन्थस्यास्य संशोधने मातृकाप्रदानेन शोधनकर्मणि उपकारं विहित-वद्भ्यः विद्वद्भ्यः धारवाडग्रामस्थगोविन्दराव् नवलगुन्दमहाभागेभ्यः वन्दनानि ।

डा. ए.वि. नागसम्पिगे

विषयानुक्रमणिका

विषयः पृ.सं.

तृतीयाध्याये प्रथमः पादः

१.तदन्तराधिकरणम्

देहनाशेऽपि जीवस्य भूतसम्बन्धः न निवर्तते १

भाष्यम् १

भाष्यदीपिका १

२. त्र्यात्मकत्वाधिकरणम्

समस्तभूतविशिष्ट एव जीवः गच्छति ५

३. प्राणगत्यधिकरणम्

भूतानां जीवेन सह गमनम् ७

४. अग्र्याद्यधिकरणम्

प्राणाः जीवेन सह भागतः गच्छन्ति ८

५. प्रथमाधिकरणम्

भूतानां जीवेन सह गमनविषये आक्षेपपरिहारः ११

६. अश्रुतत्वाधिकरणम्

भूतानां जीवेन सह गमनविषये प्रत्यक्षश्रुतिः

नास्तीत्याक्षेपपरिहारः १३

७. भाक्ताधिकरणम्

कर्मणा जायमानः मोक्षः गौणः १४

८. कृतात्ययाधिकरणम्

कर्म अनुभवेन निश्शेषं न नश्यति २१

९. यथेताधिकरणम्

स्वर्गादिकं प्रति येन पथा गमनं तेनैवागमनं न २३

विषयः पृ.सं.

१०. चरणाधिकरणम्

जीवस्य गमनागमनं कर्मणैव न आचारमात्रेण २५

११. अनिष्टाधिकरणम्

पापकर्मकृतामपि गमनागमने ३०

१२. अपिसप्ताधिकरणम्

नरकाणि सप्त ३५

१३. तत्राप्यधिकरणम्

नरके वसन्नपीशः न दुःखभुक् ३६

१४. विद्याधिकरणम्

देवयानपितृयानमार्गे जीवानां न गतिस्वातन्त्र्यम् ३९

१५. न तृतीयाधिकरणम्

तमसि सुखलेशोऽपि नास्ति ४२

१६. तत्स्वाभाव्याधिकरणम्

जीवः धूमादिदेवतारूपं तत्पदं वा न प्राप्नोति ४८

१७. नातिचिरेणाधिकरणम्

जीवः पुण्यमनुभूय धूममार्गेण अविलम्बेन संवत्सरात् प्रागेव

मातृदेहं प्रविशति ५१

१८. अन्याधिकरणम्

कर्मिणां स्वर्गादवरोहणे दुःखानुभवः नास्ति ५२

१९. रेतोऽधिकरणम्

जीवः प्रथमतः पितृदेहं प्रविश्य अनन्तरं मातृयोनिं प्रविशति ५६

२०. योन्यधिकरणम्

'योनिप्रवेशानन्तरं शरीरप्राप्तिः' इत्येतद् औत्सर्गिकम् ५८

विषयः पृ.सं.

॥ द्वितीयः पादः ॥

१. सन्ध्याधिकरणम्
अर्थज्ञानोभयात्मकः स्वप्नः सत्य एव ६३

२. पराभिध्यानाधिकरणम्
स्वप्नपदार्थस्य अदर्शनमपि परमात्माधीनमेव ७०

३. देहयोगाधिकरणम्
जाग्रदवस्था परमात्मनैव भवति ७२

४. तदभावाधिकरणम्
नाडीस्थपरमात्मनि जीवस्य प्रवेशः सुषुप्तिः ७४

५. प्रबोधाधिकरणम्
ब्रह्मैव सुप्तपुरुषं प्रबोधयति ७५

६.कर्मानुस्मृत्यधिकरणम्
सर्वेषां सर्वकालेष्वपि ब्रह्मैव स्वप्नादिकारणम् ७६

७. सम्पत्त्यधिकरणम्
जीवस्य परमात्मनि अर्धप्रवेशे मूर्च्छा सम्भवति ७८

८ ॥ न स्थानतोऽप्यधिकरणम्
जाग्रत्स्वप्नसुषुप्तिषु प्रवर्तकः विश्वतैजसप्राज्ञरूपी
परमात्मा एक एव ८२

९. अरूपाधिकरणम्
परमात्मा अप्राकृतज्ञानानन्दादिरूपवान् ९१

१०. उपमाधिकरणम्
यथा सूर्यात् सूर्यप्रतिविम्बः भिन्नः,
तथा परमात्मनः जीवः भिन्नः ९९

विषयः	पृ.सं.
११. अम्बुवदधिकरणम्	
जैवज्ञानानन्दाद्यभिव्यक्त्यर्थं भक्तिरावश्यकी	१०३
१२. वृद्धिह्रासाधिकरणम्	
साधनतारतम्यात् फलेऽपि तत्	१०६
१३. प्रकृत्यधिकरणम्	
परमात्मनः पालनकर्तृत्वमप्यस्ति	१११
१४. अव्यक्तत्वाधिकरणम्	
परमात्मा अव्यक्तोऽपि स्वप्रसादाद् व्यक्तो भवति	११५
१५. अहिकुण्डलाधिकरणम्	
परमात्मनि गुणत्वं गुणित्वं च वर्तते	१२४
१६. परमताधिकरणम्	
परमात्मन आनन्दादिकं लौकिकानन्दादिभ्यः विलक्षणम्	१२९
१७. स्थानविशेषाधिकरणम्	
परमात्मनः रूपगुणेषु भेदो नास्ति	१३५
१८. तथान्यत्वाधिकरणम्	
ध्यानकाले यद्रूपं प्रतीयते तत् ब्रह्मस्वरूपं न	१३८
१९. सर्वगतत्वाधिकरणम्	
सर्वत्र सर्वदा सृष्ट्यादिकर्ता हरिरेव	१४१
२०. फलाधिकरणम्	
परमात्मैव कर्मणः फलस्य च हेतुः	१४३
॥ अथ तृतीयः पादः ॥	
१. सर्ववेदाधिकरणम्	
सर्ववेदार्थविचारेण ब्रह्म ज्ञेयम्	१४८

विषयः	पृ.सं.
२. उपसंहाराधिकरणम्	
सर्ववेदोक्तगुणान् प्रकारणानुसारेण उपसंहृत्य उपासना कार्या	१५७
३. प्राप्त्यधिकरणम्	
विरिञ्च एव सर्ववेदोक्तसर्वगुणैः उपासनां कर्तुं योग्यः, अन्ये यथायोग्यम्	१६५
४. सर्वाभेदाधिकरणम्	
उपासनाधिक्येन फलाधिक्यम्	१६७
५. आनन्दाधिकरणम्	
सत्-चित्-आनन्द-आत्मेति चतुर्गुणोपासा विहिता	१६८
६. प्रियशिरस्त्वाधिकरणम्	
प्रियशिरस्त्वादिगुणाः सर्वैः नोपास्याः	१७०
७. इतराधिकरणम्	
देवाः बहुगुणोपासकाः	१७२
८. आध्यानाधिकरणम्	
सर्वगुणोपसंहारानुपसंहारयोः कर्तव्यत्वे प्रमाणम्	१७३
९. आत्मगृहीत्यधिकरणम्	
चतुर्गुणा उपास्या एव	१७७
११. कार्याधिकरणम्	
मोक्षार्थम् उपास्यमानगुणाः लोकविलक्षणाः	१८०
१२. समानाधिकरणम्	
वाण्याः त्रिविक्रमत्वादिक्रियाणां पृथक् उपासना नास्ति	१८२
१३. नवाधिकरणम्	
आत्मशब्दः तत्तदधिकारियोग्यगुणाभिधायकः	१८४

विषयः	पृ.सं.
१४. सम्भृत्यधिकरणम्	
सम्यग्भरणम्, अन्तरिक्षादिलोकव्यापनं च देवादिभिरुपास्यम्	१८६
१५. पुरुषाधिकरणम्	
सर्ववेदोक्तगुणैरेव उपासना कर्तव्या	१८८
१६. वेधाधिकरणम्	
सर्वैः भेदनादिगुणा नोपास्याः	१९०
१७. हान्यधिकरणम्	
मोक्षे मुक्तानाम् उपासना ऐच्छिकी	१९१
१८. छन्दाधिकरणम्	
मोक्षे मुक्ताः स्वेच्छया कर्म कुर्वन्ति	१९७
१९. अनियमाधिकरणम्	
सर्वेषां ज्ञानिनां मुक्तिरस्ति	२००
२०. यावदधिकरणम्	
मुक्तानां योग्यतातारतम्यानुसारेणऽऽनन्दानुभवः	२०२
२१. इयदामननाधिकरणम्	
मुख्यप्राणादूर्ध्वम् अधिकारिणोऽभावात्	
प्राणावसानमेवाधिकारितारतम्यम्	२०६
२२. व्यतिहाराधिकरणम्	
परमात्मा प्राणादधिकः	२०९
२३. सत्याधिकरणम्	
छान्दोग्ये सत्यादिप्रकरणोक्ताः सत्यादयः भगवत्स्वरूपभूताः	२१२
२४. कामाधिकरणम्	
लक्ष्मीः नित्यमुक्ताऽपि भक्तिविशेषाद् उपासनां करोति	२१५

विषयः	पृ.सं.
२५. निर्धारणाधिकरणम्	
ब्रह्मसाक्षात्कारार्थं श्रवणमननध्यानरूपोपासना कर्तव्या	२२२
२६. प्रदानाधिकरणम्	
गुरुप्रसादपूर्वकश्रवणेनैव ज्ञानमिति निरूपणम्	२२६
२७. लिङ्गभूयस्त्वाधिकरणम्	
गुरुप्रसादः बलीयान्	२२७
२८. पूर्वविकल्पाधिकरणम्	
पूर्वगुरुसमानश्चेत् गुर्वनुज्ञयाऽन्यगुरुः स्वीकार्यः, अधिकश्चेत् पूर्वानुज्ञां विनैवान्यगुरुः स्वीकार्यः	२३१
२९. विद्याधिकरणम्	
अपरोक्षज्ञानमेव मोक्षकारणम्	२३६
३०. श्रुत्यधिकरणम्	
'ज्ञानात् मोक्षः' इति वचनं 'कर्मणा मोक्षः' इति वचनेन न बाधितम्	२३८
३१. अनुबन्धाधिकरणम्	
ब्रह्मदर्शनं श्रवणादिमात्रेण न, किन्तु हरिगुरुभक्तिशमदमादिभिश्च	२४०
३२. प्रज्ञान्तराधिकरणम्	
यथायथा उपासनाभेदः तथातथा दर्शनभेदः	२४२
३३. न सामान्याधिकरणम्	
स्वयोग्यरूपदर्शनादेव मुक्तिः	२४५
३४. परेणाधिकरणम्	
परमात्मप्रसादादेव अपरोक्षज्ञानम्, न भक्तिमात्रेण	२४८

विषयः	पृ.सं.
३५. एकाधिकरणम्	
उपासना तत्तज्जीवयोग्यतानुसारिणी	२५२
३६. अङ्गाववद्धाधिकरणम्	
अप्रधानत्वेन अन्यदेवता अपि उपास्याः	२५४
३७. भूमाधिकरणम्	
पूर्णत्वरूपगुणेन परमात्मा उपास्यः	२५८
३८. नानाशब्दाधिकरणम्	
परमात्मगुणेषु पूर्णत्वं जीवानां योग्यतानुसारेण प्रतीयते	२६०
३९. विकल्पाधिकरणम्	
विशिष्टफलापेक्षया विम्वातिरिक्तरूपोपासना कर्तव्या	२६१
४० . कामाधिकरणम्	
काम्यापेक्षी कामानुसारेण कामसाधनगुणविशिष्टतया उपासनां कुर्यात्	२६३
४१. अङ्गाधिकरणम्	
देवैः स्वोत्पादकाङ्गवत्त्वेन परमात्मा उपास्यः	२६५
४२. नवाधिकरणम्	
पूर्वोक्ताङ्गोपासना देवव्यतिरिक्तैः न कर्तव्या	२६९
॥ अथ चतुर्थ पादः ॥	
१. पुरुषार्थाधिकरणम्	
अपरोक्षज्ञानात् सर्वपुरुषार्थप्राप्तिः	२७१
२. असार्वत्रिकाधिकरणम्	
सर्वेषां ज्ञानेऽधिकारो नास्ति	२८३

विषयः	पृ.सं.
३. अविशेषाधिकरणम्	
सर्वेषामपि एकप्रकारेण ज्ञानाधिकारः न,	
किन्तु योग्यतातारतम्यानुसारेण	२८६
४. स्तुत्यधिकरणम्	
ज्ञानिनामपि यथेष्टाचरणं न विहितम्,	
सत्कर्मानुष्ठानेन फलाधिक्यं भवति।	
अनियता हि देवाः, विरिञ्चस्तु यथेच्छाचरणविधिमान्	२८८
५. उभयलिङ्गाधिकरणम्	
श्रवणमननादिषु यत्नवतामपि ज्ञानयोग्यानामेव ज्ञानं जायते	३१७
६. आधिकारिकाधिकरणम्	
उत्तमाधिकारिणां पदम् अधमाधिकारिभिः नापेक्षणीयम्	३२८
७. फलश्रुत्यधिकरणम्	
ज्ञानादिफलम् इन्द्रियाद्यभिमानिदेवानामेव	
मुख्यं प्रजानाम् अल्पम्	३३७
८. कृत्स्नभावाधिकरणम्	
आश्रमिषु यतय एव उत्तमाः	३४३
९. अन्वयाधिकरणम्	
अयोग्यानाम् उपदेशः न कर्तव्यः	३४७
१०. ऐहिकाधिकरणम्	
प्रारब्धकर्मप्रतिबन्धाभावे श्रवणमननादिभिः	
तज्जन्मन्येव ज्ञानं सम्भवति, अन्यथा जन्मान्तरे	३५१
११. मुक्तिफलाधिकरणम्	
ज्ञानिनोऽपि प्रारब्धकर्मप्रतिबन्धाभावे	
तच्छरीरपातानन्तरमेव मोक्षः	३५४

विषयः	पृ.सं.
सूत्रदीपिका	३५७
परिशिष्टम्- १	
ब्रह्मसूत्रानुक्रमणिका	४०९
परिशिष्टम्- २	
श्रीविजयीन्द्रतीर्थकृतब्रह्मसूत्रन्यायसङ्ग्रहः	४१९
परिशिष्टम्- ३	
श्रीधीरेन्द्रयतिविरचितः विषयवाक्यसङ्ग्रहः	४२२
परिशिष्टम्- ४	
श्रीसुधीन्द्रतीर्थविरचिता श्रीमद्ब्रह्मसूत्राधिकरणरत्नमाला	४२७
परिशिष्टम्- ५	
एतद्ग्रन्थोदाहृतप्रमाणवचनानां वर्णानुक्रमसूचिका	४३३
परिशिष्टम्- ६	
अद्वैत-विशिष्टाद्वैत-द्वैतदर्शनानुसारेण	
अधिकरणसूत्रसङ्ख्यासूचिका	४५३

सङ्केताक्षरसूची

आ.श्रौ.	-	आपस्तम्बश्रौतसूत्रम्
ऋ.	-	ऋग्वेदः
ऐ.आ.	-	ऐतरेयारण्यकम्
ऐ.भा.	-	ऐतरेयभाष्यम्
ऐ.भा.द्वि.प्र.	-	ऐतरेयभाष्यद्वितीयप्रघट्टके प्रथमाध्यायान्ते
कठ.	-	कठोपनिषत्
केन.	-	केनोपनिषत्
केन.भा.	-	केनभाष्यम्
कौ.	-	कौपीतक्युपनिषत्
गी.ता.	-	गीतातात्पर्यनिर्णयः
गी.भा.	-	गीताभाष्यम्
छां.	-	छान्दोग्योपनिषत्
जै.सू.	-	जैमिनिसूत्राणि
तै.	-	तैत्तिरीयोपनिषत्
तै.आ.	-	तैत्तिरीयारण्यकम्
तै.सं.	-	तैत्तिरीयसंहिता
तं.सं.	-	तन्त्रसारसङ्ग्रहः
प्र.		पट्प्रश्नोपनिषत्
वृ.भा.	-	वृहदारण्यकभाष्यम्
ब्र.सू.अनु.	-	ब्रह्मसूत्रानुव्याख्यानम्
भ.गी.	-	भगवद्गीता
भाग.	-	भागवतम्
भा.ता.	-	भागवततात्पर्यम्
म.ता.नि.	-	महाभारततात्पर्यनिर्णयः

म.भा.	-	महाभारतम्
महा.	-	महानारायणोपनिषत्
मां.उ., मा.		माण्डूक्योपनिषत्
मुं.	-	मुण्डकोपनिषत्
वि.त.उ.व.	-	विष्णुतत्त्वनिर्णयोदाहृतवचनम्
श्वे.	-	श्वेताश्वतरोपनिषत्
स.स्मृ.	-	सदाचारस्मृतिः

॥ श्रीगुरुभ्यो नमः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

ब्रह्मसूत्रभाष्यम्

(श्रीजगन्नाथयतिविरचितभाष्यदीपिकायुतम्)

॥ अथ तृतीयाध्याये प्रथमः पादः ॥

॥ १.तदन्तराधिकरणम् ॥

(देहनाशेऽपि जीवस्य भूतसम्बन्धः न निवर्तते)

(भाष्यम्)

साधनविचारोऽयमध्यायः । वैराग्यार्थे गत्यादिनिरूपणा प्रथमपादे ।

(भाष्यदीपिका)

वृत्तवर्तिष्यमाणयोरध्याययोः सङ्गत्यर्थमेतदध्यायप्रतिपाद्यं दर्शयति- **साधनेति** ॥ वैराग्यादिमोक्षसाधनानि विचार्यन्ते अवश्यानुष्ठेयत्वेन निरुप्यन्ते अत्रेति **साधनविचार** इत्यर्थः । '**अयम्**' उपक्रम्यमाणः । अनेन समन्वयाविरोधार्थकाभ्याम् अध्यायाभ्यामस्यानन्तर्यलक्षणा सङ्गतिरुक्ता भवति । तथाहि- यद्यप्याद्यसूत्रे ससाधनफलो ब्रह्मविचारः कर्तव्यतयोक्तः । तच्च ब्रह्म पूर्वद्विके सम्यक्त्वविरोधपरिहारं विचारितम् । तथापि कृतब्रह्मविचारस्याधिकारिणो यन्मया कार्यं साधनं तत्किं कथं भूतमिति जिज्ञासा भवत्येवेति तदर्थं तृतीयाध्यायः प्रवृत्त इति । प्रथमपादार्थं दर्शयति– **वैराग्यार्थ इति** ॥ ब्रह्मेतरविषय-भोगरागोच्छेदायेत्यर्थः । गतिः स्वर्गं प्रति । आदिपदेन स्वर्गाद्भूमिं प्रत्यागतिः । नरकगर्भवासादि च गृह्यते । एतेषां '**निरूपणा**'

दुःखरूपत्वप्रतिपादनं 'प्रथमपादे' तृतीयस्याद्यपादे क्रियत इत्यर्थः। अस्मिन् पादे गत्यादिनिरूपणे सति तस्य दुःखरूपतां श्रुत्वा चिन्तयतोऽधिकारिणः पुमर्थत्वेन सिद्धेऽपि स्वर्गादौ रागो विच्छिद्यत एवेति तस्याः तादर्थ्यं युज्यत इति भावः। 'वैराग्यनिरूपणा' इत्यनुक्त्वा 'वैराग्यार्थे गत्यादी'त्युक्त्या वैराग्यस्य विषयासौन्दर्यज्ञानाधीनत्वेन पुरुषप्रयत्नाविषयत्वान्न साक्षात्तस्यानुष्ठेयत्वेन निरूपणं युज्यत इति सूचितम्। अनेनैव वैराग्यसाधनबोधविषयगत्यादि-स्वरूपस्यैवात्र निरूपणेन मुखतो लक्षणप्रमाणाभ्यां वैराग्यस्यानिरूपणाद-सङ्गतिरिति चोद्यं निरस्तम्। गत्यादिनिरूपणे सति तच्छ्रोतुस्तत्र वैराग्यस्य स्वत एवोत्पादेन तस्य तदुपयोगितया तन्निरूपणस्य वैराग्यपादे सङ्गतत्वात्।

भूतबन्धो हि बन्धः। 'भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विमोचनम्' इति च वाराहे॥

अत्राधिकरणे भगवत्प्राप्तिसाधनवैराग्याय जीवस्य भूताविर्योगः समर्थ्यते। पूर्वपक्षयति– **भूतेति॥** यन्निवृत्त्यर्थं वैराग्यादि साधनमिष्यते स बन्धो नाम पञ्चभिः भूतैर्बन्ध इत्यर्थः। उपलक्षणमेतत्। बन्धनिवृत्तिर्मुक्तिरित्यपि द्रष्ट-व्यम्। हिशब्दो यत इत्यर्थे। 'अतः' इत्युत्तरेणान्वेति। कुत एतदुभयमवगत-मित्यत आह– **भूतबन्धस्त्विति॥** तुः एवार्थः। यस्संसाराख्यो बन्धः स भूतबन्ध एवेत्यर्थः। 'मुक्तिस्त्विति' वाऽन्वयः। तथाच या बन्धनिवृत्त्याख्या मुक्तिः सा तेभ्यो भूतेभ्य आत्यन्तिकविमोचनमेव, नान्येत्यर्थः। वाराहे पुराणवचने 'उक्तम्' इति शेषः। न केवलमस्माभिरिति चार्थः।

तच्च मरणे भवति।

'भूतानां विनिवृत्तिस्तु मरणं समुदाहृतम्।
भूतानां सम्प्रयोगश्च जनिरित्येव पण्डितैः॥'

इति भारते। अतः किं साधनैरिति।

ततः किमित्यत आह- **तच्चेति** ॥ चस्त्वर्थः । तथाच तद्भूतविमोचनं तु **'मरणे'** प्राणत्यागे सति तन्निमित्तं भवतीत्यर्थः । यद्वा 'मरणं समुदाहृतम्' इत्यभेदोक्तेर्मरणशब्दार्थेऽन्तर्भवति तद्रूपं **भवतीत्यर्थः** । भूतविमोचनं मरणे भवतीत्येतत्कुत इत्यत आह– **भूतानामिति** ॥ तुः अवधारणे । चः समुच्चये । तथाच पूर्वपक्षे भूतनिवृत्तिरात्यन्तिक्यभिमता । सा च तद्वियोगः स च मरणाविनाभावीति वा भूतसंयोगवियोगावेव जनिमरणे **इति वा पण्डितैः समुदाहृत**मित्यर्थः । 'भारते' इत्यनन्तरं 'पूर्ववच्छेषश्चार्थश्च बोध्यः । किञ्चाऽत इत्यत आह- **अत इति** ॥ तथा च यतो बन्धनिवृत्त्यर्थं साधनान्यनुष्ठेयानि, सा च मरणमेव तत्कारणकं वा, मरणं च नियतत्वान्न साधनसापेक्षम्, अतो वैराग्यादिसाधनैः किं कृत्यं, न किमपीति न तान्यनुष्ठेयानीति योजना । 'साधनैरिति'सामान्योक्त्या वैराग्यादि सर्वसाधनविचारारम्भप्रयोजकतया जिज्ञासासूत्रस्य शास्त्रेणवास्याधिकरणस्य साधनाध्यायेनौपोद्घातिकी सङ्गतिरुक्ता भवति । अत एवास्य वैराग्यप्रतिपादनारम्भप्रयोजकत्वादेतत्पादेनाप्यस्ति सङ्गतिरित्यभिप्रैति । उक्तं हि तत्त्वप्रदीपे- **'मोक्षस्य मरणातिरिक्तकारणायत्तत्वं प्रदर्श्य साधनविचारस्य प्रयोजकत्वप्रतिपादनात्मकमिदमधिकरणं स्वर्गादिगतिनिरुपणया वैराग्याख्यप्रथमसाधनप्रतिपादनारम्भात्मकं च भवति'** इति । अत एवास्य प्रथमपादादौ निवेशः । प्रथमातिक्रमे कारणाभावात् ।

अत आह – सू —

ॐ ॥ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः
प्रश्ननिरूपणाभ्याम् ॥ ॐ॥ १ ॥

शरीरान्तरप्रतिपत्तौ भूतसम्परिष्वक्त एव गच्छति ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे - **अत इति** ॥ शरीरेत्यनेन 'मांसादि' इति

पूर्वसूत्रे प्रकृतं शरीरमिह तच्छब्देन ग्राह्यमिति सूचितम् । ऐहिकशरीरादन्यच्छरीरं शरीरान्तरम्,भूतपरिष्वङ्गेणेहागतिवैयर्थ्यपरिहारायोक्तम्- तदन्तरप्रतिपत्तौ प्राप्ताविति तादर्थ्ये सप्तमीयम् । 'भूतसम्परिष्वक्तः' इत्यनेन तत्तच्छरीरारम्भकत्वेन प्रस्तुतभूतसंयुक्त इत्येवं सम्परिष्वक्तपदं व्याख्यातम् । समित्युक्त्या मुक्तिपर्यन्तं परिष्वक्त एव, न मध्ये वियुक्त इत्याह । तदनूद्य व्याख्यातम्- 'एव' इति । **रंहतीत्यस्यार्थो- गच्छतीति** । 'ज्ञो जीव' इत्यस्ति । 'यतोऽतः' इति शेषः । अस्य 'न मरणे आत्यन्तिकः भूतवियोगः' इत्याध्यहृतसाध्येनान्वयः । अनेन 'भूतानां विनिवृत्तिः' इत्येतद्भागनिवृत्तिपरम् । एवं भूतसम्प्रयोगोऽपीत्युक्तं भवति ॥

'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.५.३. २) इति तु 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.५.३. ९) इति प्रश्नपरिहाराभ्याम् ।

भूतसंयुक्तस्यैवं गतिरसिद्धेत्यतः प्रवृत्तं प्रश्नेत्यादिकं व्याचष्टे- वेत्थेति ॥ छान्दोग्यस्थाविमौ प्रश्नपरिहारौ । श्वेतकेतुर्नाम ऋषिः स्वपितृसमीपेऽभ्यस्तविद्यः पाञ्चालानां समितिं जगाम । तत्र तद्देशाधिपतिः प्रवाहणो नाम राजा पण्डितंमन्यस्यास्याहङ्कारशान्त्यै परीक्षार्थं पञ्च प्रश्नानप्राक्षीत् । तत्र 'वेत्थ' इति पञ्चमप्रश्नवाक्यम् । तस्यायमर्थः- हे श्वेतकेतो 'यथा' येन क्रमेण येन प्रकारेण च द्युपर्जन्यधरापुरुषयोषाख्येषु पञ्चस्वग्निषु आहुत्यधिकरणत्वेन अग्निशब्दवाच्येषु मध्ये योषाख्याग्नौ रेतोरूपायां पञ्चम्यामाहुतौ हुतायां 'आपः' अद्भिः सम्परिष्वक्तो जीवो लब्धदेहः 'पुरुषवचसः' पुरुषनामवान् भवति, तं क्रमं प्रकारं च वेत्थ किमिति । एवं पृष्टः श्वेतकेतुः 'नैव भगव इति' (छा. ५.३.३) अहं नैव वेदेत्यवोचत् । 'तर्हि कथं विद्धानिति ब्रवीषि' इति राज्ञा साक्षेपमप्रतिष्ठितः स्वपितुः स्थानमागत्य तत्सर्वं यथावदवदत् । श्वेतकेतुर्नैवमुक्तस्तत्पितोद्दालकः स्वयमपि राजकृतप्रश्नोत्तरासमर्थस्तज्ज्ञातुकामः

स्वयमेव राजस्थानं प्रत्यागत्य 'एतद् विद्यां मे ब्रूहि' इति प्रार्थयामास। अथ प्रवाहणो राजोद्दालकं प्रति पञ्चप्रश्नपरिहारानवदत् - 'असौ लोको गौतमाग्निः' इत्यादिना। तत्र स्वर्गपर्जन्यभूमिपुरुषयोषिदन्तर्गतेषु नारायणवासुदेवसङ्कर्षण-प्रद्युम्नानिरुद्धाख्येषु पञ्चाग्निविषयप्रश्नपरिहारेषु अभिहितेषु, 'किं ततः' इत्यतः पञ्चमप्रश्नोत्तरं जातमित्याह- **इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति** ॥ तस्यार्थस्तु इत्येवं प्रकारेण रेतोरूपायां 'पञ्चम्यामाहुतौ' योषाख्यायां हुतायां प्रक्षिप्तायां मरणानन्तरं जीवेन सह गताः पुनः सहागताः भूतत्रयात्मिका आपः 'पुरुषवचसः' तच्छब्दवाच्या भवन्तीति। **इतीति** ॥ अयमितिशब्दो भाष्यकारीयः, न तु प्रश्नोत्तरयोरन्यतरः। सूत्रे पित्रसामर्थ्य-ज्ञापनाय ज्ञापनापरपर्यायनिरूपणशब्देऽभिहितेऽपि पर्यवसितार्थाभिप्रायेण परिहारेति तद्विवरणं कृतम्।

॥ इति तदन्तराधिकरणम् ॥ १ ॥

॥ २. त्र्यात्मकत्वाधिकरणम् ॥

(समस्तभूतविशिष्ट एव जीवः गच्छति)

सू — ॐ ॥ त्र्यात्मकत्त्वात्तु भूयस्त्वात् ॥ ॐ ॥ २ ॥

अप्छब्दस्तु त्र्यात्मकत्वाद्युज्यते, भूयस्त्वाच्चापाम्।

अत्र भगवत्प्राप्तिसाधनवैराग्यार्थं जीवस्य समस्तभूतपरिष्वक्तस्य गतिः समर्थ्यते। सौत्रतुशब्देनैव 'आपः' इति श्रवणाज्जीवोऽम्मात्रपरिष्वक्त एव गच्छति, न सर्वभूतैरिति पूर्वपक्षसूचनात् तमनुपन्यस्य सिद्धान्तयत्सूत्रमेवोप-न्यस्य व्याचष्टे- **त्र्यात्मकत्वादिति** ॥ '**अप्छब्दः**' श्रुतावाप इति विशेषनाम-ग्रणं '**त्र्यात्मकत्वात्**' क्षितिसलिलानलात्मकत्वात्। अपामित्यत्रापि सम्ब-ध्यते। अप्छब्दस्तु युज्यत इत्यनेन तुशब्दोऽध्याहृतान्वयी सन् 'नाप्छब्द-विरोधः' इति साध्यसूचक इत्युक्तं भवति। 'त्र्यात्मकत्वादपाम्' इत्यनेन

श्रुतावब्ग्रहणे अन्यभूतानामप्यर्थात् प्राप्तेर्न तद्विरोध इति हेतुस्सूचितः । न च जीवेन सहागतानां त्रिवृत्करणशून्यत्वान्न त्र्यात्मकत्वमिति वाच्यम् । आदिकाले मिश्रत्वेन सृष्टानां भूतानां त्रिवृत्करणेन पुनर्मिश्रीकृतानां जीवशरीरस्थत्वेन तेन सहागतानामपि तेषां त्रिवृत्कृतत्वाविरोधात्, त्रिवृत्कृतजातीयत्वाद्वा । ननु यद्यापो भूतत्रयात्मिक्यः कथं तर्हि तत्र विशिष्याप्छब्दप्रयोग इत्यतस्तत्रोत्तरतया भूयस्त्वादित्यंशो योज्य इत्याशयेनाह- **भूयस्त्वादिति** ॥ आधिक्यादित्यर्थः । चस्त्वर्थेऽवधारणे च । तथा च अप्छब्दस्त्वप्सु युज्यते यतोऽतो न तत्र तदुक्तिविरोधः । कुतः ? अपां भूयस्त्वादेवेति योजना । अनेन हेतुद्वयस्यापि तुशब्दसूचितसाध्येनान्वयो दर्शितः । श्रुत्युदकरूपधर्मिभेदात्साध्यभेद इति ज्ञातव्यम् । यद्वा- अस्त्वपां क्षितिसलिलानलात्मकत्वेन श्रुतौ तद्ग्रहणेऽन्यभूतानामपि प्राप्तिः । तथापि अपामिव भूतान्तरस्यापि सर्वभूतात्मकत्वात् अपामेव ग्रहणे को विशेषहेतुरित्यत आह- **भूयस्त्वादिति** ॥ 'पार्थिवानां शरीराणामर्धेन' इत्युक्तप्रकारेण सर्वदेहेषु सम्भूय भूतेजसोरप्यपां दशभागयुक्तत्वेन भूयस्त्वात्तद्ग्रहणं युज्यत इत्यर्थः । तत्त्वप्रदीपे तु 'अनाप्यशरीरेष्वप्यपां भूयस्त्वम्' इत्युक्तम् ।

'तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः' इति भागवते । (भाग ३.२७.४५)

अपां भूयस्त्वधर्मकत्वे प्रमाणमाह- तापेति ॥

'क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम् ।
तापापनोदः ॥' (३.२७.४५) इति भागवतवाक्यम् ॥

'क्लेदनम्' आर्द्रीकरणं 'पिण्डनं' पिण्डीकरणं 'तृप्तिः' तर्पकत्वं 'प्राणनं' चेष्टाकारणत्वम् 'आप्यायनं' सुखकरत्वम् 'उन्दनं' बिन्दुभावः 'उन्दनं बिन्दुभावस्स्यात्' इत्युक्तेः, 'तापापनोदः' तापनिवर्तकत्वं 'भूयस्त्वम्' अन्येभ्यो भूतेभ्यः कार्येषु भागाधिक्यम् । इमा अष्टौ 'अम्भसो' जलस्य 'वृत्तयः'

स्वरूपलक्षणभूता धर्मा इत्यर्थः। भागवते 'तृतीयस्कन्धे' इत्यस्य भूयस्त्वादित्यनेन अन्वयः। अनेन भूयस्त्वादित्येतद्भूयस्त्वावगमादित्यपि व्याख्यातम्।

॥ इति व्यात्मकत्वाधिकरणम् ॥ २ ॥

॥ ३. प्राणगत्यधिकरणम् ॥

(भूतानां जीवेन सह गमनम्)

सू— ॐ ॥ प्राणगतेश्च ॥ ॐ ॥ ३ ॥

'यत्र वाव भूतानि तत्र करणानि नित्यानि ह वा एतानि भूतानि करणानि न चैतानि कदाचिद्वियुज्यन्ते न च विलीयन्ते' इति भाल्लवेयश्रुतेः प्राणगतेर्भूतान्यपि सह गच्छन्तीति सिद्धम्।

अत्राधिकरणे वैराग्यसिद्ध्यर्थं जीवस्य भूतैः सह गतिः समर्थ्यते। सूत्रे हेतूक्त्वा 'भूतसम्परिष्वक्त एव रंहति जीवः' इति साध्यानुवृत्तिसूचनात् तत एव 'न भूतानि सह गच्छन्ति' इति तद्विरोधिपूर्वपक्षस्य सिद्धत्वात्तमनुपन्यस्य सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **प्राणेति** ॥ सूत्रे चशब्दः प्राणानां भूतैः सहाविनाभावार्थक इत्यभिप्रेत्य तदसिद्धिपरिहाराय तत्र श्रुतिमुदाहरति- **यत्रेति** ॥ व्याप्तेरागमिकत्वान्नात्र दृष्टान्तो मृग्यः। यद्यपि टीकायां प्राणपदोक्तेन्द्रियाणां व्यापकतावगतेः श्रुत्याऽपि तथैव प्रतीतेः सूत्रभाष्ययोश्च तेषां व्याप्यताबोधाद् विरोधो भाति। तथापि यत्रैव भूतानि तत्रैव करणानि इत्येवकारशिरस्कतया श्रुतिव्याख्यानात्, तत्सहगन्तृप्राणा अविनाभूता यैः' इति टीकाविवरणाच्च भूतानां व्यापकतोपपत्तेः। समव्याप्त्यभिप्रायेण वा श्रुतिटीकाप्रवृत्तेर्न विरोधः। 'प्राणगतेः' इत्यतः प्राक् 'व्यापकत्वेनावगतेः इत्युपस्कार्यम्। अनेन [1]श्रुतेर्व्यापिग्राहकत्वमभिप्रैति। श्रुतेः सिद्धमिति वाऽन्वयः। अस्मिन्

१. श्रुतेर्व्यापकत्वम्।

पक्षे नोपस्कारः । हेत्वसिद्धिपरिहारस्तु 'ये प्राणमनूत्क्रामन्ति' इत्यादि तत्त्वप्रदीपोदाहृतश्रुत्या लोकप्रसिद्धितश्च कर्तव्यः । **भाष्ये भूतान्यपि सन्तीति पाठे** गन्तृजीवेन सह गतिमन्ति वर्तन्ते सह गच्छन्तीति यावदिति व्याख्येयम् । श्रुत्यनुसार्ययम् । न केवलं प्राणाः किन्तु भूतान्यपि जीवेन सह गच्छन्ती-त्यपिशब्दार्थः । यद्यपि वह्निगमनेऽपि धूमगमनाभावाद्व्यभिचारः । तथापि नियमेन संयुक्तयोर्मध्ये व्यापकगमने व्याप्यगमनमवश्यं भावि । प्राणभूतयोर्यथा नियतसंयोगः न तथा वह्निधूमसामान्ययोरिति न व्यभिचारः । श्रुतौ 'वाव' इत्यवधरणे । 'भूतानि' पृथिव्यादीनि 'करणानि' चक्षुरादीन्द्रियाणि । न केवलं भूतेन्द्रिययोर्दैशिकी व्याप्तिः, कालतोऽप्यस्तीत्याह- **नित्यानीति** ॥ उभयविधां व्याप्तिमुपपादयति– **न चैतानीति** ॥ भूतानि करणानि चेत्यर्थः । आमोक्षमिति भावः ।

॥ इति **प्राणगत्यधिकरणम्** ॥ ३ ॥

॥ ४. अग्र्याद्यधिकरणम् ॥

(प्राणाः जीवेन सह भागतः गच्छन्ति)

सू — ॐ ॥ अग्र्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ॐ ॥ ४ ॥

'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः' (बृ. ५.२.१३) इत्यादिश्रुतेः न प्राणानां जीवेन सह गतिरिति चेत् -

अत्राधिकरणे प्राणानां जीवेन सह गतिः समर्थ्यते । सूत्र एव पूर्वपक्ष-स्योक्तत्वात् तदुपन्यस्य पूर्वपक्षांशं तावद्व्याचष्टे– **अग्र्यादीति** ॥ बृहदारण्यके 'यत्रास्य' इत्यादावग्र्यादीन् प्रति प्राणानां गतिश्रुतेरित्यर्थः । आदिशब्देन 'चक्षुरादित्यं मनश्चन्द्रमसं दिशः श्रोत्रम्' (बृ. ५-२-१३) इत्यादिर्गृह्यते ।

पूर्वपक्षहेतुभागं व्याख्याय 'न' इत्यस्यावृत्त्या 'प्राणगतेः' इत्यस्यानुवृत्त्या च लब्धं साध्यं दर्शयति- नेति ॥ प्राणानामिन्द्रियाणां जीवेन सह गमनं- नेति ॥ अनेन पूर्वहेतोरसिद्धिरुक्ता भवति । 'यत्र' यदा मरणकाले 'मृतस्य' म्रियमाणस्य 'अस्य' पुरुषस्य जीवस्य सम्बन्धिनी 'वाक्' वागिन्द्रियमग्निमप्येति । 'वातम्' वायुं 'प्राणः' श्वासादिरूपो जडवायुस्तदभिमानी मुख्यप्राणश्च प्राप्नोति । 'श्रोत्रम्' एकेन रूपेण 'दिशो' दिग्देवानप्येतीत्यर्थः । अत्र विष्णोस्तत्त्वदेवानां चैकांशेन जीवं त्यक्त्वा स्वस्वमूलरूपप्राप्तिः । अंशान्तरेण तु जीवेन सह गमनमभिप्रेतम् । यथोक्तमैतरेयभाष्ये -

'म्रियमाणमिमं जीवं वासुदेवादिदेवताः ।
त्यक्त्वा भागेन गच्छन्ति भागतोऽनुव्रजन्ति तम् ॥' (ऐ.भा. २.१.८)

इति । तथा बृहद्भाष्ये -

'आकाशाख्यं स्वरूपं तु विष्णुस्तद् हृदि संस्थितः ।
भागतो भागतश्चैताननुयाति जनार्दनः ॥' (बृ.भा.५.२.१३)

इति । पूर्वपक्षे तु सामस्त्येन गतिः श्रुत्यर्थः । न च मुख्यप्राणस्याप्यंशेन गमने 'अनावृत्तिर्देहिनां देहपाते' इत्युक्तिविरोध इति वाच्यम् । वायुः अनावृत्तिमोक्षप्रद इति वा अनस्य मुख्यप्राणस्य अवृत्तिः असत्त्वमिति वा देहपाते अनस्यावृत्तिः कारणमिति वा तस्य व्याख्यानात् ।

न, भागतोऽग्र्यादिप्राप्तेः ।

सिद्धान्तांशं व्याचष्टे- नेति ॥ न प्राणानां श्रुतिबलादसहगतिर्वक्तव्येत्यर्थः । कुतो नेत्यतस्तद्धेतुत्वेन उक्तश्रुतेः सावकाशत्वादित्याशयेन तदुक्त्यर्थं प्रवृत्तस्य 'भाक्तत्वात्' इत्यंशस्याग्र्यादिगतिश्रुतेः भाक्तत्वात् गतिश्रुत्योर्भाक्तत्वादित्युभयत्र अन्वयमभिप्रेत्याह- भागत इति ॥ भागेनेत्यर्थः । 'प्राणानाम्' इत्यनुवर्तते । 'श्रुतेः' इति शेषः । तथा च प्राणानामग्र्यादीन् प्रति भागतः प्राप्तेः श्रुतेरपि प्राणानामग्र्यादीन् प्रति भागतः प्राप्तिविषयत्वादित्यावृत्त्या योजना ।

'पुरुषस्य मृतौ ब्रह्मन् प्राणा भागत एव तु ।
अधिदैवं प्राप्नुवन्ति भागतोऽनुव्रजन्ति तम् ॥
पुनश्शरीरसम्प्राप्तौ तमेवानुविशन्ति च ॥' इति ब्राह्मे ॥

जीवेन सह केचन प्राणभागा गच्छन्ति, अग्न्यादीन् प्रति तु केचेनेत्ययं विभागः कुतोऽवगत इत्यत आह- **पुरुषस्येति ॥** जीवस्येत्यर्थः । उभयान्वयी-दम्- पुरुषस्य मृतौ सत्यां पुरुषस्य प्राणा इति । 'ब्रह्मन्' हे ज्ञानिवृद्धेति चतुर्मुखो नारदं प्रति वक्ति । 'प्राणाः' इन्द्रियाणि तद्देवाश्च । एवेति समस्तभागं व्यवर्तयति । तुशब्दो 'मृतौ तु' इति वा 'प्राणास्तु' इति वाऽन्वेति । द्वितीयान्वयेनोपचितेष्वेवायं विवेक इति सूचितम् । 'अधिदैवम्' अग्न्यादीन् 'तं' पुरुषम् । ननु प्रतिमरणं अधिदैवमिन्द्रियभागापगमे कालतः सर्वापगमः स्यात् । तथा च सर्वभूतापगमः प्राप्त इत्यत आह- **पुनरिति ॥** स्वर्गादि-भोगानन्तरं भूलोकं प्राप्तस्य शरीरान्तरप्राप्तौ सत्यां यमनुव्रजन्ति 'तमेव' पुरुषं जीवमनुसृत्य तेन सह शरीरान्तरं प्रविशन्तीत्यर्थः । गमनप्रवेशयोः समुच्चये चशब्दः । अत्र जीवानां भूलोके शरीरत्यागप्राप्त्योरेवेन्द्रियाणां गमनागमन-योरभिप्रेतत्वेन स्वर्गादिभोगाय पूर्वशरीरत्यागेन ज्योतिर्मयादिशरीरान्तरप्राप्तौ गमनागमनयोरभावात्तदुक्त्यनुपपत्तिरिति चोद्यानवकाशः ।

'गतैर्भोगैरपि पुनः विशेयुर्भोगसिद्धये । भोग्यलाकमनुप्राप्तम् ॥'

इत्यैतरेयभाष्यस्याप्ययमेवाभिप्रायः । अत्र एकादशेन्द्रियाणां पञ्चभूतानां च लिङ्गशरीरात्मना अनादितो जीवेन सह विद्यमानानामपि प्रतिसृष्टिकालं 'तेषां भूतैरुपचयः सृष्टिकाले 'विधीयते' इत्युक्तरीत्या उपचयो भवति । प्रलये च तदपचयः । उपचितभागेष्वपि मरणकाले केषाञ्चिद्भागानां गमनम् । पुनः शरीरप्राप्तावागमनं चेति विशेषः तुशब्देन चशब्देन च सूचितो द्रष्टव्यः ।

---

१. 'उदाहृतः' इति मातृकायाम् ।

ब्रह्माण्डे च –

'मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च ।
भागतो भागतस्त्वेनमनुगच्छन्ति सर्वशः ।।' इति ।।

ननु भागतोऽग्न्यादीन् प्रति गच्छद्भिः प्राणैस्सह भूतानां गतिरस्ति न वा । अस्ति चेत् न जीवेन सह गतिः, सामस्त्येन तान् प्रत्येव गतत्वात् । न चेत्, प्राणभूतयोः समव्याप्त्यभाव इत्यत आह- **ब्रह्माण्डे चेति** ।। न केवलं ब्राह्मे अग्न्यादिप्राप्तेरुक्तिः, किन्तु ब्रह्माण्डे चेति समुच्चये चशब्दः । का उक्तिरित्यतः तां पठति- **मृतीति** ।। 'एनं' पुरुषं 'भागतो जहति' त्यजन्तीत्यर्थः । 'सर्वशो भूतानि' पृथिव्यादिसर्वभूतानि प्राणाश्चैनमनुगच्छन्तीत्यर्थः । तथा च प्राणैः सह भूतानां भागतो गतिसत्त्वेऽपि न सर्वशो गमनमिति जीवेन सहापि भागतो गतिर्युक्तेति भावः । आद्यश्चशब्दः समुच्चये । द्वितीयस्तुशब्दार्थो विशेषद्योतकः ।

।। इत्यग्न्याद्यधिकरणम् ।। ४ ।।

।। ५. प्रथमाधिकरणम् ।।

(भूतानां जीवेन सह गमनविषये आक्षेपपरिहारः)

सू— ॐ ।। प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ।। ॐ ।। ५ ।।

'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' (छा.५-४-२) इति प्रथमाग्नौ श्रूयते न भूतानि जुह्वतीति । अतो नेति चेत् -

अत्राधिकरणे भूतानां जीवेन सह गतिराक्षिप्य समाधीयते । पूर्वपक्षस्य सूत्र एवोक्तत्वात् तत्पठित्वा पूर्वपक्षांशं तावद् व्याचष्टे- **प्रथम इति** ।। 'तस्मिन्' (छा.५-४-२) इति छान्दोग्यवाक्योदाहरणेन 'प्रथमे' इत्यस्यावृतिस्सूचिता । 'जुह्वति' इत्यनन्तरं 'श्रूयते' इत्यनुवर्तते । 'यतः' इति शेषः । 'श्रूयते' 'न

श्रूयते' इत्यनेन 'श्रवणादश्रवणात्' इत्युभयथा पदच्छेदस्सूचितः। **नेति** ॥ न भूतानां जीवेन सह गतिरित्यर्थः। अनेन 'ने'त्यस्य आवृत्तिस्सूचिता। तथाच यतः 'प्रथमे' 'तस्मिन्' इत्युपक्रमवाक्ये 'प्रथमे' स्वर्गाख्यप्रथमाग्नौ श्रद्धासहितस्य जीवस्य होमः श्रूयते, यतश्च भूतानि जुह्वतीति न श्रूयते, अतो नेति योजना। श्रुतौ श्रद्धाशब्दः पूर्वपक्षे श्रद्धामात्रयुक्तजीवपरः। सिद्धान्ते त्वजहल्लक्षणया श्रद्धयाऽन्वितश्च सम्परिष्वक्तं जीवमाह। तथाच 'तस्मिन्' द्युलोकाख्ये 'एतस्मिन्' आदित्यादिसमिदादिविशिष्टे 'द्वयादीनां देवताभोगस्थानत्वात् अग्नित्वम्' इति तत्त्वप्रदीपोक्तेः देवताभोगस्थानत्वात् अग्निशब्दवाच्ये नारायणाधिष्ठाने द्युपर्जन्यधरापुंस्त्र्याख्यपञ्चाग्निषु मध्ये प्रथमाग्नौ द्युलोकाधिपतयो 'देवाः' 'श्रद्धां' तर्पेष्टवन्तं यजमानं 'श्रद्धासोमवर्षान्नादीनां देवभोग्यत्वादाहुतित्वम्' इति तत्त्वप्रदीपोक्तरीत्या आहुतिरूपं 'जुह्वति' निक्षिपन्तीत्यर्थः।

न, ता एव प्रस्तुता आपः श्रद्धारूपेण हूयन्ते 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छा.५.९.१) इत्युपसंहारोपपत्तेः।

सिद्धान्तांशं व्याचष्टे– **नेति** ॥ प्रथमाग्नौ भूतसहितस्य होमाश्रवणात् न भूतानामसहगतिः कल्पनीयेत्यर्थः। कुतो नेत्यतस्तत्रोक्तहेत्वसिद्धेरिति हेतुमभिप्रेत्य कुतः सेत्यतस्तत्र हेतुत्वेन 'ता एव हि' इति सूत्रखण्डं व्याचष्टे- **ता इति** ॥ यत इत्यादौ संयोज्यम्। अनेन सौत्रो हिर्व्याख्यातः। 'ताः' इत्यनूद्य 'प्रस्तुताः' इति व्याख्यानम्। 'वेत्थ' इति गाक्ये प्रकृता इत्यर्थः। 'आप एवे'त्यन्वयः। न श्रद्धामात्रमित्येवार्थः। 'श्रद्धारूपेण' श्रद्धाशब्दार्थरूपतया 'हूयन्ते' होम्यतया श्रूयन्ते श्रद्धाशब्दस्याजहल्लक्षणया श्रद्धोपयुक्तजीवपरत्वादिति भावः। अपां श्रद्धाशब्दार्थत्वं कुत इत्यतस्तत्र हेतुत्वेनोपपत्तेरिति सूत्रखण्डं व्याचष्टे- **इतीति** ॥ **इत्युपसंहार इति** ॥ एवं सति एवं रूपोपसंहारवाक्यस्योपपन्नत्वादविरुद्धत्वादित्यर्थः। अन्यथोपसंहारानुसारेणोपक्रमार्था-

कल्पने उपसंहारानुपपत्तेस्तद्विरोधेनोपक्रमस्य प्रबलप्रमाणविरुद्धार्थबोधकत्व-रूपाप्रामाण्यप्रसङ्गादिति भावः ।

॥ प्रथमाधिकरणम् ॥ ५ ॥

॥ ६. अश्रुतत्वाधिकरणम् ॥

(भूतानां जीवेन सह गमनविषये प्रत्यक्षश्रुतिः नास्तीत्याक्षेपपरिहारः)

सू — ॐ ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ॐ ॥ ६ ॥

अग्न्यादिगतिः प्रत्यक्षतः श्रूयते । अतः प्रत्यक्षाश्रवणान्न युक्तमिति चेत् –

अत्राधिकरणे जीवस्य भूतैः सह गतिस्समर्थ्यते । पूर्वपक्षस्य सूत्र एवोक्त-त्वात्तदुपन्यस्य पूर्वपक्षांशं तावद् व्याचष्टे- **अश्रुतत्वादिति** ॥ अतश्शब्द-स्तथाशब्दार्थे । तेन यथेत्यप्यादौ सिध्यति । हेत्वर्थे च । 'न भूतानाम्' इत्यध्याहियते । अतः शब्दस्य हेत्वर्थत्वं च–

'अतः शब्दस्तु हेत्वर्थे तथेत्यर्थे च वर्तते ।
उभयार्थे च भवति यथाशब्दविदो विदुः ॥' (भा.ता. १०.९४.१५)

इति श्रुतिगीतातात्पर्योदाहृतवचनसिद्धम् । शब्दस्वरूपमनतिक्रम्य वर्तमानं यथाशब्दं, तद्विद इत्यर्थः । हेत्वर्थकातःशब्दस्य विवरणम्– **प्रत्यक्षेति** ॥ 'न युक्तम्' इत्यनेन नञावृत्तिः सूचिता । तथा च यथा प्राणानामग्न्यादीन् प्रति गतिः 'प्रत्यक्षतः' 'अग्निं वाक्' (बृ. ५-२-१३) इति साक्षात् श्रूयते न तथा भूतानां गतिः प्रत्यक्षतः श्रूयते । अतः प्रत्यक्षाश्रवणाद्भूतानां जीवेन सह गतेर्विशेषतोऽश्रवणात् अतः नियमेन प्रत्यक्षाश्रवणस्यार्थिकश्रवणादपि बलवत्त्वात् 'न युक्तम्' न जीवो रंहति सम्परिष्वक्तः' इत्युक्तं युक्तमिति योजना ।

न, 'अथैनं यजमानं किं न जहाति भूतान्येव भूतैरेव गच्छति भूतैर्भुङ्क्ते भूतैरुत्पद्यते भूतैश्चरति भूतैर्विचरति' इति कौण्डिन्यश्रुतौ प्रतीतेः ।

सिद्धान्तांशं व्याचष्टे- नेति ॥ न प्रत्यक्षश्रुत्यभावादसहगतिर्भूतानां वक्तव्येत्यर्थः । कुतो नेत्यतोऽस्यासिद्धेरिति भावेन तद्विरोधिप्रतीत्या तामुपपादयति- **अथेति** ॥ प्रमेयान्तरप्रश्नारम्भेऽथशब्दः । 'मृतिकाले सदा' इति वा शेषः । 'यजमानं' यागादिकर्तारम् 'एनं' पुरुषं 'किं' वस्तु न जहातीति । अस्योत्तरमाह- **भूतानीति** ॥ एवशब्दो विपरिणतेन जहतीत्यनेन सम्बध्यते । तत्र हेतुः- **भूतैरित्यादि** ॥ भूतैः सहैव परं लोकं गच्छतीत्यर्थः । एवमुत्तरत्रापि सहैवेत्यर्थः । 'भुङ्क्ते' पुण्यफलं 'उत्पद्यते' भूमौ 'चरति' सञ्चरति सत्कर्म करोतीति वा 'विचरति' विरुद्धं दुष्टं कर्माचरति करोतीत्यर्थः । सौत्रादिपदार्थेऽप्येषैव श्रुतिः प्रमाणम् । यद्वा - आदिपदोपात्तपूर्तादिकृतामपि भूतैस्सह गतौ श्रुत्यन्तरमस्तीति ज्ञातव्यम् । 'प्रतीते'रित्यनेन इष्टादिकारिणामिति सौत्रपदं संयोज्यम् । तथाच इष्टादिकारिणां यागपूर्तादिकृतां भूतैः सहैव गतेः 'प्रतीतेः' प्रत्यक्षत एव श्रवणादित्यर्थः ।

॥ इत्यश्रुतत्वाधिकरणम् ॥ ६ ॥

॥ ७. भाक्ताधिकरणम् ॥

(कर्मणा जायमानः मोक्षः गौणः)

'अपामसोममममृता अभूम' (ऋ. ८-४८-३) इत्यादि श्रुतिविरोध इति ।

अत्राधिकरणे भगवत्प्राप्त्यर्थं कर्मणामस्थिरफलकत्वोक्त्या वैराग्यादेरावश्यकसाधनत्वं समर्थ्यते । पूर्वपक्षयति **अपामेति** ॥ 'तर्ही'त्यादौ अध्याहार्यम् । तत एव 'यदि' इति लभ्यते । आदिपदेन 'अक्षय्यं ह वै चातुर्मास्ययाजिनः

सुकृतं भवति' (आप.श्रौ. ८.१.१) इत्यादिकं गृह्यते। तथा च यद्यधिकरण-षट्कोक्तरीत्या मरणमात्रेण मोक्षाभावात्तदर्थं मुमुक्षुणाऽवश्यमनुष्ठेयं वैराग्यादिसाधनम्, तर्हि 'अपाम' इत्यादिश्रुतिविरोधः। तत्र विना वैराग्यादिकं कर्मादिनैव मोक्षोक्तेरित्यर्थः। तत्त्वप्रदीपे तु 'तदन्तरप्रतिपत्तौ' इत्यादौ इष्टादिकारिणां धूमादिमार्गेण स्वर्गं गतानां पुनरावृत्तिरभिप्रेता, तर्हि 'अपाम' इत्यादिश्रुतिविरोध इत्याक्षेपाभिप्राय उक्तः। इष्टशेषं सोमं 'अपाम' अपिबाम, अतोऽमृताः मुक्ता अभूम। सुकृतमक्षय्यं मोक्षमिति पूर्वपक्षे श्रुत्यर्थः।

अतो वक्ति - सू—

ॐ ॥ भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयति ॥ ॐ ॥ ७ ॥

भागतस्तदमृतत्वं 'नान्यः पन्था अयनाय विद्यते' (तै.आ. ३.१२.७) इति श्रुतेरात्मविद एव हि मुख्यम्। वाशब्दात् पारम्पर्येणात्मविदपेक्षया वा।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ 'तदमृतत्व'मिति द्वे पदे। तथाच यस्मात् 'तदमृतत्वम्' अपामेति श्रुत्युक्तममृतत्वं काम्यसोमयागादि-साध्यं मुक्तत्वं 'भागतः' कालभागतः तमपेक्ष्याल्पकालीनममुख्यमिति यावत्। 'तस्मान्न श्रुतिविरोधः' इति योजना। 'भागतः' इत्यनेन 'भाक्तम्' इति व्याख्यातम्। 'तत्' इत्यनेन सूत्रे तत्पदाध्याहारः सूचितः। मुख्यामृतत्वमेव श्रुत्यर्थः किं न स्यादित्यतः तदुत्तरत्वेन 'तथाहि दर्शयति' इति सूत्रखण्ड-सूचितां श्रुतिमाह- **नेति** ॥ 'श्रुतेः' इत्यनेन सौत्रो हिशब्दो हेत्वर्थतया व्याख्यातः। योजना तु यतो 'नान्यः' इति श्रुतेर्मुख्यामृतत्वं न काम्य-कर्मसाध्यमित्यन्वयव्यतिरेकोक्त्याऽवगतम्, अतस्तदमृतत्वं भागत एवेति। श्रुतिस्तु जिज्ञासानये व्याख्याता। काम्यकर्मिणां कुतो मुख्यामृतत्वा-भाव इत्यतस्तदुत्तरत्वेन अनात्मवित्त्वादित्यंशं व्यतिरेकमुखेन योजयति-

आत्मेति ॥ न त्वनात्मविद इत्येवशब्दार्थः । हिशब्दो हेतौ । तदमृतत्वम् । ननु काम्यकर्मिणां मुख्यामृतत्वाभावेऽपि अकाम्यकर्मिणां तदस्त्वित्याशङ्का-परिहाराय प्रवृत्तं सौत्रं वाशब्दं व्यवस्थितविकल्पार्थतया व्याख्याति- **वा-शब्दादिति** ॥ 'इति सूचितम्' इति शेषः । तदमृतत्वमित्युभयत्रानुवर्तते । योजना तु 'अपाम' इति श्रुतौ यद्यकाम्यं कर्म विवक्षितम्, तदा तज्जिज्ञासूनां चेत्तदमृतत्वं मुख्यामृतत्वमेव, परं तु तत् कर्मणा न साक्षाद्भवति, किन्तु कर्मणा शुद्धान्तःकरणस्य वैराग्यादि । अथ तद्वतः श्रवणादिरूपा जिज्ञासा, जिज्ञासोर्ज्ञानम्, ज्ञानिनो मोक्ष इति 'पारम्पर्येण' परम्परयैव लभ्यमिति परम्पराविवक्षयैवैषा श्रुतिः प्रवृत्तेति वक्तुं युक्तम् । अपरोक्षज्ञानिनामकाम्यं कर्म चेत्तदा तच्छ्रुत्युक्तममृतत्वं न ज्ञानसाध्यसंसारनिवृत्तिरूपं, किन्तु 'आत्मविद-पेक्षया' परमात्मापरोक्षज्ञानिनमपेक्ष्यैव तत्कर्मफलमपेक्ष्यैव आत्मज्ञानलभ्ये मोक्षे प्रचुरानन्दव्यक्तिवैचित्र्याख्या-तिशयमपेक्ष्यैवोक्तं तद्रूपमेवोक्तमिति यावदिति वाशब्दात्सूत्रकृत्सूचयतीति । तथाच न सर्वथा संसारनिवृत्ति-रूपमोक्षः कर्मसाध्य इति तदर्थं वैराग्यादिकमावश्यकमिति नोक्तविरोध इति भावः ।

अत्र तत्त्वप्रदीपे- परम्परयाऽमृतत्वफलकत्वमपि नाज्ञकृतकर्मणः, किन्तु ज्ञानिकृतस्यैवेत्याशयेन पारम्पर्येणात्मविदपेक्षया वा तदमृतत्वमिति एक-वाक्यतया भाष्यं व्याख्याय, 'कर्मणा ज्ञानमातनोति' इत्यादिश्रुत्यनुसारेण वाशब्दादित्यादेरन्यश्चार्थः- वाशब्दात् पारम्पर्येण कर्मिणाममृतत्वं ज्ञानो-त्पत्तिद्वारेणेतीदं प्रकारान्तरेणापि व्याख्यातम् । तथा च तत्त्वप्रदीपे टीकोक्त-प्रकारत्रयं विनाऽस्याप्युक्तत्वात् टीकायां 'प्रकारत्रये'त्युपलक्षणम् ।

सिद्धान्ते 'अपामे'ति श्रुतेरयमर्थः - यस्मात्सोमरसमपाम, सोमादिकर्मणा चान्तःकरणशुद्धिद्वारा देवान् विष्ण्वादींस्तारतम्येन 'अविदाम' व्यजिज्ञा-सिष्म । अथ 'ज्योतिः' ब्रह्म 'अगन्म' अद्राक्ष्म, तस्मात् 'अमृताः' मुक्ता अभूमेति । यथोक्तं तत्त्वप्रदीपे- **'सोममपाम, देवानविदाम, ज्योतिरगन्म,**

अमृता अभूमेति । ज्योतिर्ब्रह्मेत्युदितमिति च । 'ज्योतिश्चरणाभिधानात्' इत्यादौ ज्योतिर्ब्रह्मेत्युदितमित्यर्थः' । यद्वा- काम्यकर्मभिर्ज्योतिर्ब्रह्म 'अगन्म' अज्ञासिष्म, 'ज्योतिः' ब्रह्मज्ञानं 'अगन्म' प्राप्नुम इति वा । तेन च 'देवान्' अर्चिरादिमार्गस्थान् 'अविदाम' प्राप्नुम इत्यर्थः । एवं चान्द्रमसं ज्योतिरगन्म, ततो मार्गरूपान् धूमादिदेवान् अविदाम, ततोऽल्पकालममृता अभूमेति । प्रथमपक्षे यतः पूर्वकल्पे मनुष्याः सन्तो ज्योतिरपरोक्षतोऽगन्म, अतो देवान् यथायोग्यं देवादिरूपमविदामेति । तृतीयपक्षे च वाक्यशेषार्थो द्रष्टव्यः । यद्यपि कर्मनिर्णयटीकायाम् 'अमृता इवामृता इति गौण्या वृत्त्या मन्वन्तरापेक्षयाऽमृतशब्दस्य तत्साधनज्ञानलक्षणया तदेकदेशलक्षणया चेति त्रेधाऽमृतशब्दस्यामुख्यत्वरूपभाक्तत्वोक्तेः अत्र चाकाम्यकर्मणां पारम्पर्येण मोक्षसाधनत्वपक्षेऽमृतशब्दस्य मुख्यत्वोक्तेर्विरोधः । तथापि यथाकथञ्चित् श्रुतेरविरुद्धार्थोक्तौ तात्पर्यात्तत्रापि मुख्यत्वस्येवाभिप्रेतत्वादविरोधः । यद्वा- 'वाचनिकार्थत्यागेन' इति कर्मनिर्णयगतवाचनिकपदं न मुख्यार्थमात्रपरम्, किन्तु प्रतिपाद्यपरमिति सूचनाय तत्रामुख्यत्वोक्तावप्यत्र मुख्यत्वोक्तिरिति वा तत्त्वप्रदीपरीत्याऽत्राप्यमुख्यत्वाद्वा न विरोधः ।

तथा हि श्रुतिः– 'स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतं यदि ह वा अप्यनेवं विन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत् सृजते' (बृ.३-४-१५)

यदुक्तमनात्मवित्त्वान्न कर्मिणो मुख्यामृतत्वमिति । तदयुक्तम् । तेषामपि तदभ्युपगमे विरोधाभावादित्याशङ्कापरिहारायास्याः श्रुतेरुक्तार्थत्रयसमर्थनाय च 'तथा हि दर्शयति' इत्यनेन ज्ञापिताः श्रुतीरुदाहर्तुं प्रति जानीते- तथा

हीति ॥ 'दर्शयति' इत्यस्ति । तथाच 'हि' यतः 'तथा' भाक्तं वेत्युक्तप्रकारेण श्रुतिः 'दर्शयति' प्रतिपादयतीत्यर्थः । अस्यात 'उक्तं युक्तम्' इत्यध्याहृतेनान्वयः । 'श्रुतिः' इति समुदायैकवचनम् । यद्यप्यनात्मविदां न मोक्ष इत्यस्मिन्नर्थे 'नान्यः' इति श्रुतिरुदाहृता । न च तत्रैव श्रुत्यन्तरमेतदिति वाच्यम् । तस्यापि पूर्वमेवोदाहर्तव्यत्वात् । तथापि 'स य आत्मानम्' (बृ. ३.४.१५) इत्यादेः 'आत्मविदपेक्षया' इत्युक्तार्थसाधकत्वस्यापि सत्त्वात् अत्रोदाहरणम् । अत्रात्मविदामेव मुख्यामृतत्वं न अनात्मविदामित्यर्थे 'स एनम्' इत्यारभ्य 'तत्तत्सृजते' इत्यन्तं बृहदारण्यकवाक्यं प्रमाणम् । आत्मविदां कर्मापेक्षया तदमृतत्वमित्यर्थे 'आत्मानमेव' इत्यादि 'भागस्तदमृतत्वम्' इत्यस्मिन्नर्थे 'अमृतः' इति श्रुत्यन्तरम्, 'पाराम्पर्येणे'त्यर्थे 'कर्मणा' इत्यन्या श्रुतिः प्रमाणमिति विवेकः । 'इति चे'त्यस्य 'श्रुतिः' इति पूर्वेणान्वयः । चशब्दोऽनेकश्रुतिसमुच्चये । अनेनेतिशब्दः प्रत्येकं संयोज्य इति सूचितम् । श्रुत्यर्थस्तु- 'अथ यो ह वा अस्माल्लोकमदृष्ट्वा प्रैति' (बृ.३.४.१५) इति वाक्ये प्रकृतो योऽग्निविप्रार्चकोऽधिकारी अखिलाश्रयत्वाल्लोकशब्दितं परमात्मानमदृष्ट्वाऽस्माद्देहात् प्रैति तमेनं 'सः' हरिः 'अविदितः' तेनादृष्टो 'न भुनक्ति' नामृतत्वं भोजयति न पालयति चेति । अत्र दृष्टान्तमाह- **यथेति** ॥ यथा वेदः 'अननूक्तो' यथाविध्यनधीत ईश्वरज्ञानादिजननेनैनं श्रोत्रियं न भुनक्ति । अन्यद्वा निदर्शनं, यथा वा 'अकृतं' यथावदननुष्ठितं कर्म न फलप्रदं तथेत्यर्थः । ननु विप्राग्र्यादिपूजनादिना मोक्षाभावेऽपि अश्वमेधादिमहत्कर्मानुष्ठानेन स भविष्यतीत्यत आह- **यदि हेति** ॥ यदि 'अनैवंवित्' उक्तप्रकारेण परमात्मानपरोक्षज्ञानी महदपि 'पुण्यं' पुण्यसाधनं अश्वमेधादि कर्म करोति, तदा 'अस्य' अज्ञानिनः 'तत्' कर्म 'अन्ततः' अन्ते स्वर्गादिफलभोगावसाने स्वल्पफलदानान्त इति वा 'क्षीयते' 'एव' 'ह' निश्चितम्, न तु पुनरक्षयमोक्षफलसाधनं, तस्मान्मुमुक्षुः लोकं सर्वाश्रयं ज्ञानरूपं वा 'आत्मानं' विष्णुम् 'उपासीत' जानीयाच्चेत्यर्थः । यद्वा 'लोक्यत इति लोकशब्दः स्वरूपवाची

'आत्मानमेव लोकमुपासीत (बृ. ३-४-१५) इतिवत्' इत्यैतरेयभाष्योक्तः परमात्माख्यं प्रकाशमानस्वरूपमित्यर्थः । ननु जिज्ञासुज्ञानिकृतकर्मणोरपि अज्ञकर्मवत्क्षये किं ज्ञानसम्पादनेन इत्यत आह - **स य इति** ॥ 'सः' प्रसिद्धो 'यो' जिज्ञासुः 'आत्मानं' परमुपास्ते तस्य 'कर्म' अकाम्यं पुण्यं 'न क्षीयते' ज्ञानद्वारेणाक्षयमोक्षदं भवति । तथा यः 'उपास्ते' जानीतेऽस्य पुण्यं कर्म 'न क्षीयते' अक्षयमोक्षातिशयाय भवतीत्यर्थः । ननु कर्मण आशुतरविनाशित्वान्न क्षीयते' इति कथमित्यत आह- **अस्मादिति** ॥ 'हि' यस्मादेवमुपासना-परोक्षज्ञानाभ्यां मुक्तौ मोक्षे यद्यद्वैषयिकं फलं कामयते तत्सर्वं 'तस्मादेव' अपरोक्षीकृतात्मनः तत्प्रसादादेव कर्म सृजते' इत्यर्थः । यद्वा- यद्यत्कामयते मुक्तस्तत्तत्सृजते कर्मेति यत् तत् 'अस्मात्' आत्मनोऽनुग्रहाद्धि, कर्मणा प्रसन्नः परमात्मैव सृजतीत्यर्थः । तथाच कर्मण आशुतरविनाशित्वेऽपि तज्ज्ञातभगवत्प्रसादस्य नित्यत्वेन तद्विवक्षया 'न तस्य कर्म क्षीयत' इत्युक्तिरिति भावः । केचित्तु- 'तत्कर्म सृजति' इत्युक्त्या ज्ञानोत्तरानुष्ठित-कर्मजातपुण्यस्य जीवस्वरूपतया मुक्ताववस्थानं सिद्ध्यति । अन्यथा कर्मण एव प्रसाद-जनकत्वापत्त्याऽदृष्टासिद्धिप्रसङ्गादित्याहुः ।

'अमृतो वाव सोमपो भवति यावदिन्द्रो यावन्मनुर्यावदादित्यः'

'अमृतः' इति श्रुतौ 'वावेति' निपातौ प्रसिद्धौ । तथाच 'सोमपः' सोमयाजी 'अमृतः' अमुख्यामृतत्ववान् भवति । तस्यामुख्यत्वं कुत इत्यतोऽनित्यत्वादित्याह- **यावदिति** ॥ 'इन्द्रः' स्वपदे 'यावत्' कालमास्ते, एवं मनुः सूर्यश्च, अयं तावदमृतो भवतीत्यर्थः ।

'कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणि यत एनममृतत्वं नयन्ति' इति च ।

अधिकारी अकाम्येन कर्मणा ज्ञानम् 'आतनोति' उत्पादयति । तेन 'अमृती' मुक्तो भवतीत्यर्थः । कर्मणां पारम्पर्येण मुक्तिसाधनत्वे युक्तिमाह- **अथेति** ॥ यतः कर्माणि 'एनं' जिज्ञासुं 'अमृतत्वं' मोक्षं 'नयन्ति' प्रापयन्ति । 'अथ' तस्मादेवामृतानीत्युच्यन्ते, अतस्तेषां तत्साधनत्वं युक्तमिति भावः । नन्वेवं श्रुत्यादिबलात् 'अपाम' इत्यस्य त्रेधा स्वार्थपरत्वोक्तौ

'यानि तीर्थादिवाक्यानि कर्मादि विषयाणि च ।
स्तावकान्येव तानि स्युरज्ञानां मोहकानि च ॥' (गी.भा. ३.२०)

इति गीताभाष्यवचनविरोध इति चेन्न, 'रोचनार्थं फलश्रुतिः' इत्युक्तेः फलवचनवदल्पाधिकार्यपेक्षया तदुपपत्तेः, श्रुतीनां स्वार्थपरत्वस्यात्यागात् । अन्यथा 'प्रशंसादीनां तात्पर्यं वाचनिकार्थात्यागेनैवोक्तं स्वयं भगवता भाक्तं वेति' इति कर्मनिर्णयविरोधात् ।

सूत्रार्थस्तु- यतः 'तत्' अमृतत्वम् 'अपाम' इति श्रुतौ काम्यकर्मिण उक्तममृतत्वं 'भाक्तं' कालभागतोऽल्पकालीनमिति यावत् । 'वा' अथवा जिज्ञासोरकाम्यकर्मिणः पारम्पर्येण तदमृतत्वं श्रुतावुक्तम् । यद्वा- परमात्मविदां कर्मापेक्षया तदमृतत्वमुक्तम् । अतो मुमुक्षुणाऽवश्यानुष्ठेयमेव वैराग्यादीत्युक्तार्थे न श्रुतिविरोधः । काम्यकर्मभिरपि मुख्यामृतत्वमेव प्राप्यमिति श्रुत्यर्थः किं न स्यादित्यत आह- **अनात्मवित्त्वादिति** ॥ काम्यकर्मिणां परमात्मानपरोक्षज्ञानित्वादित्यर्थः । अनात्मवित्त्वेऽपि कुतो न तेषां मुख्यामृतत्वलाभः । तथा 'अपाम' इत्यादेरुक्तानेकार्थकत्वे च किं प्रमाणमित्यत आह-**तथा हीति** ॥ 'हि' यतः 'नान्यः' इति 'स एनम्' इति श्रुतिश्च 'तथा' आत्मविदामेव मुख्यामृतत्वं न अनात्मविदामित्यर्थम्, 'आत्मानमेव' इति श्रुतिर्ज्ञानोत्तरकर्मापेक्षयेत्यर्थम् 'अमृतः' इति श्रुतिर्भाक्तमित्यर्थं 'कर्मणा' इति श्रुतिः पारम्पर्येणेत्यर्थं च 'दर्शयति' प्रतिपादयत्यत इति ।

॥ इति भाक्ताधिकरणम् ॥

॥ ८. कृतात्ययाधिकरणम् ॥

(कर्म अनुभवेन निश्शेषं न नश्यति)

कृतस्य कर्मणो भोगेन क्षयान्मुक्तिरिति ।

अत्राधिकरणे वैराग्यादिसाधनस्यावश्यानुष्ठेयत्वं समर्थ्यते । 'कृतात्यये' इत्यनेन सूचितं पूर्वपक्षं दर्शयति- कृतस्येति ॥ कृतस्येत्यनुवादेन 'कर्मणः' इति व्याख्यानम् । 'भोगेन' फलानुभवेन 'क्षयात्' नाशात् । अनेन निमित्त-सप्तमीति सूचितम् । 'कर्मणः क्षयात्' इत्यावर्तते । तथा च जीवेन सहागतस्य कृतस्य कर्मणः स्वर्गादिष्वेव भोगेन निश्शेषमत्ययान्नाशात् तत एव कर्मणस्तन्मूलबन्धस्यापि[1] क्षयादुच्छेदात् तदुच्छेदरूपा मुक्तिः स्वत एव भवतीति न तदर्थं वैराग्यादिकमनुष्ठेयमिति योजना । 'मुक्तिः' इति सूत्रे शेषोक्तिः ।

अत आह-

ॐ ॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्याम् ॐ ॥ ८ ॥

'ततः शेषेणेमं लोकमायाति पुनः कर्म कुरुते पुनर्गच्छति पुनरागच्छति' इति श्रुतेः ।

'भुक्तशेषानुशयवानिमां प्राप्य भुवं पुनः ।
कर्म कृत्वा पुनर्गच्छेत्पुनरायति नित्यशः ।
आ चतुर्दशमाद्वर्षात्कर्माणि नियमेन तु ।
दशावराणां देहानां कारणानि करोत्ययम् ॥
अतः कर्मक्षयान्मुक्तिः कुत एव भविष्यति ॥'

इत्यादिस्मृतेश्च शेषवानेवायाति ॥ ८ ॥

---

१. 'तन्मूलकप्रतिबन्धस्यापि' इति कोशे ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति ॥** श्रुतेरित्यनेन भावार्थकदृष्ट-पदं व्याख्यातम् । चः समुच्चये । 'शेषवान्' भुक्तकर्मशेषवानेव, न तु निश्शेष इत्येवशब्दार्थः । अनेन अनुशयपदं कर्ममात्रवाचकमपि स्मृत्यनुसारादेवं व्याख्यातम् । सूत्रे 'न' इति 'आयाति' इति च शेषः । तथा च भोगेन कृतात्ययान्निमित्तात्तन्मूलबन्धात्ययात्स्वत एव मुक्तिः स्यादिति किं वैराग्यादि-साधनैरिति चेन्न, यतोऽयं जीवः कृतानां मध्ये कतिपयात्ययेऽपि 'अनुशय-वान्' भुक्तशिष्टकर्मवानेव परलोकादायाति भुवम् । न चास्यासिद्धिः । 'दृष्टस्मृतिभ्यां' श्रुतिस्मृतिभ्यां तत्सिद्धेरिति सूत्रार्थः ।

'ततः' स्वर्गादेः 'शेषेण' कर्मशेषेण तद्युक्त एव 'इमं लोकं' भूलोकं प्रत्यायाति कर्मी, पुनर्भूमौ कर्म कुरुते, पुनः स्वर्गं प्रति गच्छति पुनरायाति भुवमित्यर्थः । स्मृतावनुशयशब्दः कर्मार्थकः । तथा च कर्मी जीवो भुक्तशिष्ट-कर्मवानिमां भुवं प्राप्य पुनस्तत्र कर्म कृत्वा पुनस्स्वर्गं गच्छेत् । पुनस्ततो भुवं 'नित्यशः' नियमेन करोत्यायाति [1]आगच्छतीत्यर्थः । अनेन श्रुतौ पुनः कर्म कुरुते, स्मृतौ पुनः कर्म कृत्वेत्युक्त्या एवं द्वित्रिचतुरावर्तने अशेषकर्मनिवृत्तिः स्यादिति शङ्का निरस्ता । अल्पापादने कर्मसमाप्तिरित्याशङ्कानिरासायाह- **आचतुर्दशमाद्वर्षादिति ॥** अत्राङ् पूर्वावधिरूपमर्यादार्थकः आजन्मेत्यादि-वत् । न त्वामुक्तीत्यादाविवोत्तरावधिरूपमर्यादार्थकः । 'नान्तादसङ्ख्यादेः' इति निषेधस्त्विह न प्रवर्तते, निपातनादेव । तथाच चतुर्दशमं वर्षमारभ्ये-त्यर्थः । 'अयं' बद्धजीवः 'नियमेन तु' नियमेनैव 'दशावरणां' दशसङ्ख्याका देहा येषु प्राप्तव्येषु देहेष्ववरकक्ष्यात्वमापन्नास्ते दशावरास्तेषाम् । अत्रावर-पदबलादारब्धव्येषु देहेषु दशकस्य पृथक्कक्ष्यात्वसिद्धिः । इतोऽधिकानामेका-दशादीनामपि बहुव्रीहिणैव सिद्धिः । अत एव प्रमेयदीपे 'स्त्री वाऽप्यनून-दशकम्' इत्यत्र दशानां सङ्घो दशकः, अनूनो दशको यस्येति विग्रहप्रदर्शनेन दशकस्य ततोऽधिकसङ्ख्यानां चान्यपदार्थत्वमाश्रितम् । न च 'जीवंश्चतुर्दशा-

१. 'गच्छतीत्यर्थः' मुद्रितपुस्तकस्थः पाठः ।

दूर्ध्वम्' इति वचनविरोधः । अत्र चतुर्दशमं वर्षं तत्समाप्तिमारभ्येत्यर्थाश्रयणात् । उभयत्रापि तदुत्पत्तिमारभ्य तदुत्पत्तेरुर्ध्वमित्यर्थाश्रयणाद्वा न विरोधः । केचित्त्वेतद्वचनविरोधाद्भिन्नतो 'दशावरा' इत्यत्र दश वरा येषु न भवंति किन्तु समकक्ष्यात्वं वाऽवरकक्ष्यात्वं वाऽऽपन्ना येषु देहेषु तेषां कारणानीति व्याचख्युः । तन्न, उक्तरीत्योक्तवचनविरोधाभावेन कौटिल्यकल्पनायोगात् । दशकस्य वरत्वमात्रनिषेधेऽपि समकक्ष्यात्वस्य वाऽवरकक्ष्यात्वस्य वाऽनुक्तेः, 'अनूनदशकम्' इत्युक्तिविरोधाच्च । 'मुनिस्सुकर्मशीलोऽपि' इति वचनान्मुनिविषयमेतदित्यपि न, मुनिरपीति कैमुत्यस्यैवोक्त्याऽस्य सर्वविषयत्वात् । **कर्मक्षयात् मुक्तिरिति** । बन्धककर्मणो निश्शेषक्षयान्निमित्तात् कर्ममूलकबन्धनिवृत्तिरूपामुक्तिः 'कुतः' न कुतोऽपीत्यर्थः ।

॥ इति कृतात्ययाधिकरणम् ॥ ८ ॥

॥ ९. यथेताधिकरणम् ॥

(स्वर्गादिकं प्रति येन पथा गमनं तेनैवागमनं न)

'यथेतमेव गच्छति यथेतमागच्छति स भुङ्क्ते स कर्म कुरुते स परिवर्तते' इति गतिप्रकारेणागतिः प्रतीयते ।

अत्राधिकरणे स्वर्गादागतिप्रकारो निरूप्यते । तत्रानेवमित्यनेन सूचितं पूर्वपक्षं दर्शयति- **यथेति** ॥ 'गतिप्रकारेण' इत्याद्यावर्तते । तथाच 'इति' श्रुतौ यतो जीवस्यैवं गतिप्रकारेणागतिः प्रतीयते अतो गतिप्रकारेणैव आगतिः, न त्वनेवमपीति योजना । पूर्वमन्यैः स्वेन वा यथा येन मार्गेण स्वर्गादिमं लोकं प्रति 'इतम्' आगतं तथा तेन स्वर्गं प्रति गच्छति । यथाऽस्माल्लोकात्स्वर्गम् 'इतं' गतं तथा भुवमागच्छतीत्यर्थः । गमने फलमाह- **स इति** ॥ 'सः' जीवः कर्मफलं स्वर्गादौ भुङ्क्ते इत्यर्थः । आगमने फलमाह- **स इति** ॥ कुरुते भूमौ । गमनागमनयोरामुत्स्मुच्छित्तिर्नास्तीत्याह- **स इति** ॥ 'परिवर्तते' आवर्तत इत्यर्थः । जीवविषयमेतदिति ज्ञापनाय वाक्यशेषोदाहरणम् ।

अतो ब्रूते –

सू — ॐ ॥ यथेतमनेवं च ॥ ॐ ॥ ९ ॥

'धूमादभ्रमभ्रादाकाशमाकाशाच्चन्द्रलोकं यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति' इति काषायणश्रुतेर्यथागतमन्यथा च ॥ ९ ॥

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- अत इति ॥ 'काषायणश्रुते'रित्यनेन सूत्रे हेत्वनुक्तिदोषः परिहृतः । प्रतिज्ञोक्तयैव तत्सूचनात् । जीवः पूर्वमन्यैः स्वेन वा 'यथा' येन पथा वा स्वर्गं प्रति गतस्तथाऽऽकाशपर्यन्तमागच्छति ततोऽर्वाक् भुवं प्रत्यन्यथा चागच्छतीत्यर्थः । यथोक्तं **तत्त्वप्रदीपे**- यथागतं तथाऽऽकाशपर्यन्तमागच्छति, ततोऽर्वाग्यथा चेति । चः प्रकारसमुच्चये । अनेन 'यथेतमनेवं' चेति प्रतिज्ञावाक्यं व्याख्यातम् । यद्यपि 'यथा' इत्यादि छन्दोगा अपि पठन्ति । तथापि 'धूमात्' इत्यादेस्तैरपाठाच्छाखान्तरवाक्यमुदाहृतम् । तदर्थस्तु- धूमदेवतालोकादभ्रदेवलोकं गच्छति, अभ्रादाकाशम्, आकाशाच्चन्द्रलोकं गच्छति । 'यथा' येन पथा आकाशं प्रति 'इतं' गतं तथा तेनैव पथा तावत्पर्यन्तं गतिप्रकारेणैव आगच्छतीत्यर्थः । आकाशलोकानन्तरमागमने प्रदेशविशेषेऽप्यन्यथात्वमाह- **आकाशाद्वायुमिति** ॥ 'वायुर्भूत्वा इत्यादेः कर्मणः तत्स्वाभाव्यापत्तिरेवार्थो, न तु तदैक्यम्, तत्पदप्राप्तिर्वा । धूमादिस्वाभाव्यापत्तिर्नाम धूमादिदेवतास्वभावसदृश स्वभाववत्त्वप्राप्तिः । सादृश्यं च तद्देहप्रवेशेन तद्गतौ गतिः तत्स्थितौ स्थितिरित्येवंरूपम् । अभ्रमेघयोः अवान्तरभेदात् तद्देवलोकयोरपि भेदोक्तिः । **प्रवर्षतीति** ॥ प्रवर्षणान्तर्गतो भवतीत्यर्थः ।

॥ इति यथेताधिकरणम् ॥ ९ ॥

॥ १०. चरणाधिकरणम् ॥

(जीवस्य गमनागमनं कर्मणैव न आचारमात्रेण)

सू—

ॐ ॥ चरणादिति चेन्न तदुपलक्षणार्थेति काष्णाजिनिः ॥ ॐ ॥ १० ॥

'तद्य इह रमणीयचरणा रमणीयां योनिमापद्यन्ते कपूय-चरणाः कपूयाम्' (छा. ५-१०-७) इति श्रुतेश्च रमण-फलमेव गमनागमनं न यज्ञादिकृतः ।

अत्राधिकरणे गतागतस्य कर्मफलत्वं समर्थ्यते । पूर्वपक्षस्य सूत्र एवोक्त-त्वात्तदुपन्यस्य पूर्वपक्षांशं तावद्व्याचष्टे- **चरणादिति** ॥ 'श्रुतेः' इत्यनेन 'चरणात्' इत्यस्य चरणश्रुतेरित्यर्थ उक्तः । यद्यपि छन्दोगा आपद्येरन्निति पठन्ति । तथापि तदंशेऽर्थतोऽनुवादः **शाखान्तरपाठो वेत्यदोषः** । 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा । अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' इति छन्दोग-वाक्यम् । प्रमेयान्तरारम्भेऽथशब्दः । 'तत्' तत्र कर्मिषु मध्ये ये 'रमणीय-चरणाः' सदाचारपूर्वकसाधुयज्ञादिमन्तस्ते 'इह' भूमौ संसारे 'रमणीयां' साधु 'योनिं' जन्म 'आपद्येरन्' आपद्यन्ते । आपद्यन्त इति यत् तच्च । 'अभ्याशः' समीपं कालसामीप्येन. न तु विलम्बेन 'ह' प्रसिद्धमित्यर्थः । **तत्त्वप्रदीपे तु-** 'अभ्याशो ह यत्' यथा योन्यापत्तौ कालतः सन्निकर्षो भवति तथा 'योनि-मापद्यन्ते' इत्युक्तम् । अत्र तत्वप्रदीपटीकापक्षयोः यदित्यस्य यथाशब्दार्थ-त्वानुवादकत्वाभ्यां अभ्याश इत्यस्य प्रथमातृतीयाविभक्त्यर्थत्वाभ्यां आपद्यन्त इत्यस्यावृत्त्यनुवृत्तिभ्यां च भेद इति ध्येयम् । रमणीयामित्युक्तं विवृणोति-

ब्राह्मणयोनिमित्यादिना ॥ 'कपूयचरणाः' असाधुयज्ञादिमन्तः । अन्यत् समम् । 'चरणफलम्' आचारफलमित्यर्थः । गमनं चागमनं च तत्तथेति द्वन्द्वैकवद्भावः । एवकारव्यावर्त्यार्थं दर्शयति- **नेति** ॥ न यज्ञादिकर्मण इत्यर्थः। यद्वा- यागादिकर्तुः फलं नेत्यर्थः । 'इति ज्ञायते' इति शेषः । न च श्रुतौ चरणस्य गमनागमनसाधकता न प्रतीयत इति वाच्यम् । रमणीयस्वर्गादिगतेरपि तत्तत्कर्मफलत्वेनात्राभिप्रेतत्वात् । 'चरणफलम्' इत्यादिना सूत्रे चरणात्' इत्यस्यावृत्तिः सूचिता । तथा च तत्र गतागतं चरणादेव भवतीत्यनेन पूर्वपक्षप्रतिज्ञा सूचिता ।

'आचार इति सम्प्रोक्तः कर्माङ्गत्वेन शुद्धिदः ।
अशुद्धिदस्त्वनाचारः चरणं तूभयं मतम् ॥'
इति स्मृतेरिति चेन्न, यज्ञाद्युपलक्षणार्था चरणादि-
श्रुतिरिति काष्णाजिनिर्मन्यते ॥ १० ॥

ननु यज्ञादिकर्मण एव श्रुतिस्थचरणशब्दोक्तत्वात् कथं इति श्रुतेश्चरणफलं गतागतं, न यज्ञादिफलमित्युक्तिरित्यत आह- **आचार इति** ॥ 'यः' कर्माङ्गत्वेन 'प्रोक्तः' स 'आचारः' स क्रियाद्रव्यतत्कर्तृशुद्धिदः अनाचारस्त्वशुद्धिदः । आचारानाचाराख्यं तदुभयमपि चरणशब्दवाच्यं मतमित्यर्थः । 'इति स्मृतेरित्यस्य इति' श्रुतेश्चरणफलमेवेति सहेतुकप्रतिज्ञयोक्तं 'युक्तम्' इत्यध्याहारेणान्वयः । सिद्धान्तांशं व्याचष्टे- **नेति** ॥ गतागतस्य कर्मफलत्वाभावो नेत्यर्थः । किन्तु 'यज्ञादिकर्मफलमेव गतागत'मिति वाक्यशेषः । कुत इत्यतस्तत्र 'नान्यः पन्था अयनाय विद्यते' (तै. आ. ३-१२-७) इति श्रुत्या गतागतशून्यफलस्य कर्मसाध्यत्वनिषेधात्तत्फलस्य च परिशेषाद्गतागतवत्फलत्वाप्राप्तेः 'इष्टापूर्तम्' (मु.१-२-१०) इत्यादिवचनाच्चेति हेतुं बहिरेवाभिप्रेत्य तर्हि 'रमणीय' इति श्रुतिविरोध इत्यतस्तदुत्तरत्वेन श्रुतिगतिप्रदर्शकतया तदित्यादिकं योजयति- **यज्ञादीति** ॥ तच्छब्दार्थोक्तिरियम् ।

आदिपदात्पूर्तादिग्रहणम् । **चरणादिश्रुतिरिति** ॥ चरणादिपदघटितश्रुतिरित्यर्थः । आदिपदात् 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' (छा. ५-१०-३) इति श्रुतिर्गृह्यते । 'श्रुतिः' इत्यनन्तरम् 'अतो न विरोधः' इति शेषः । तथाच यतश्चरणादिश्रुतिः 'तदुपलक्षणार्था' तस्य यज्ञादेरुपलक्षणं ज्ञापनमर्थः प्रयोजनं यस्याः सा तथोक्ता । अजहल्लक्षणया यज्ञादिकर्मप्रतिपादिकाऽतो गतागतस्य यज्ञादिफलत्वेन न चरणश्रुतिविरोध इति योजना । यद्यपि विष्णुतत्त्वनिर्णयटीकायां 'इष्टं यजनं पूर्तमन्नदानादिकं' 'अन्येषामपि दृश्यते' इति दीर्घ इति व्याख्यातम् । तथापि 'अथ य इमे' इति श्रुतौ दत्तमिति पृथक् श्रवणात्पूर्तं तटाकादीति व्याख्येयम् । इतिशब्द आद्यर्थे । तथाच ये स्वस्वग्रामे इष्टापूर्ते दत्तं दानं एवमादि कर्म 'उपासते' अनुतिष्ठन्तीति सिद्धान्तरीत्या श्रुत्यर्थः । 'इति' इति सूत्रपदानुवादः । एवमित्यर्थः । 'काष्णाजिनि'रिति कश्चिदाचार्यः, 'मन्यते' इति शेषोक्तिः ।

सू —

ॐ ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ ॐ ॥ ११ ॥

तर्हि रमणीयाः कपूया इत्येव स्यात् । चरणशब्दस्यानर्थक्यमिति चेत् –

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे- **आनर्थक्यमिति** ॥ 'तर्हि' इत्युक्ते 'यदीति लभ्यते । यज्ञादीत्यादिकमत्रापि सम्बध्यते । तथाच यदि 'रमणीयचरणाः' (छा. ५-१०-७) इत्यादिश्रुतिर्यज्ञाद्युपलक्षणार्था, तर्हि श्रुतौ चरणशब्दस्य 'आनर्थक्यं' तत्प्रयोगवैयर्थ्यम्, किन्तु रमणीयाः कपूया इत्येव प्रयोज्यं स्यात् न तु चरणशब्दोऽपीत्यर्थः । यज्ञादिकारिणां पूर्वं प्रकृतत्वेन ये यज्ञादिकारिणो रमणीयाः कपूयाश्चेति रमणीयकपूयपदाभ्यामेव यज्ञाद्युपलक्षणसम्भवात् 'चरणशब्दानर्थक्यं' तच्च न युक्तमिति भावः ।

न, चरणापेक्षत्वाद्रमणीयत्वादेस्तज्ज्ञापनार्थत्वेनोपपत्तेः ॥ ११ ॥

परिहारांश व्याचष्टे- **नेति** ॥ वैयर्थ्यप्रसङ्गादुपलक्षकत्वमेव नास्तीति पक्षो नेत्यर्थः। तथा सति 'इष्टापूर्तं मन्यमानाः' (मु. १-२-१०) 'त्रैविद्याः' इत्यागमविरोधः स्यादिति भावः। यद्वा उपलक्षणत्वमङ्गीकृत्य पदान्तरेणाप्युपलक्षणसम्भवाच्चरणपदेनैवोपलक्षणे किं प्रयोजनं न किमपीति पक्षो नेत्यर्थः। कुतो नेत्यतश्चरणपदसार्थक्योपपादकतयातदपेक्षत्वादित्येतद्योजयति- **चरणापेक्षत्वादिति** ॥ 'रमणीयत्वादेः' साध्वसाधुयज्ञादिमत्त्वस्य 'चरणापेक्षत्वात्' स्नानाचमनाद्याचारापेक्षत्वादित्यर्थः। ततः किमित्यत आह- **तदिति** ॥ 'तत्' इत्यावर्तते। 'सार्थक्य' इत्युपस्कार्यम्। एवं सूत्रेऽपि। तस्य रमणीयत्वादेर्ज्ञापनमर्थः प्रयोजनं यस्य तस्य भावस्तत्त्वं तेनेति विग्रहः। इत्थंभूतलक्षणे तृतीया। तथा च रमणीयचरणत्वेन ये साधवो यज्ञादिकृतः 'ते रमणीया' इति श्रुतियोजनायां तेषां यज्ञादिकारिणामपि रमणीयकपूयाचाराभ्यामेतद्रमणीयत्वादि इति ज्ञापनार्थत्वेन तस्य चरणशब्दस्य सार्थक्योपपत्तेरिति योजना। अनेन- यदि चरणादिश्रुतिर्यज्ञाद्युपलक्षणार्था, तर्हि चरणशब्दस्यानर्थक्यं, रमणीयकपूयपदाभ्यामेव केवलाभ्यां यज्ञाद्युपलक्षणसम्भवादिति चेन्न, कुतः ? 'तदपेक्षत्वात्' तस्य यज्ञादेस्तस्य रमणीयत्वादेस्तदपेक्षत्वात्साध्वसाध्वाचारापेक्षत्वात्। ततश्च तेषां यज्ञादिकृतां रमणीयकपूयाचाराभ्यामेव रमणीयत्वादि नान्यत इति ज्ञापनाय तस्य चरणशब्दस्य सार्थक्योपपत्तेरिति सूत्रार्थ उक्तो भवति।

सू —

ॐ ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ ॐ ॥ १२ ॥

'धर्मं चरत माऽधर्मम्' इत्यादिप्रयोगात्सुकृतदुष्कृते एव

चरणशब्दोक्ते इति बादरिर्मन्यते । तुशब्दात् स्वसिद्धान्तोऽपि स एवेति सूचयति । तुशब्दस्तु विशेषे स्यात्स्वसिद्धान्तेऽवधारणे ॥ इति नाममहोदधौ ॥ १२ ॥

प्रकारान्तरेण चरणश्रुतिं पठित्वा व्याचष्टे- सुकृतेति ॥ इत्यादिप्रयोगादिति ॥ 'कुरुत' इत्यर्थे 'चरत' इति प्रयोगादित्यर्थः । 'सुकृतदुष्कृते' साध्वसाध्वाचाराङ्गविशिष्टे एव यज्ञादिकर्मणी इत्यर्थः । न तु सदसदाचाराङ्गमात्रमित्येवशब्दार्थः । 'चरणशब्दोक्ते' एव श्रुतिस्थचरणशब्दवाच्ये एवेत्यर्थः । ('चरणशब्दोक्ते' एतच्छ्रुतिस्थचरणशब्दवाच्ये अपीत्यर्थः । न केवलमुपलक्ष्ये इत्यपिपदार्थः । भाष्ये अपिपदाध्याहारेण सूत्रगततुशब्दो व्याख्यातः) चरणशब्दोक्ते इत्यनेन सूत्रे चरणे इति विपरिणतपदानुवृत्तिः सूचिता । एवकारस्योभयत्रान्वयश्च । न चाङ्गविशिष्टकर्मण एव चरणशब्दवाच्यत्वे केवलाचारे तत्प्रयोगानुपपत्तिरिति वाच्यम् । अन्यत्राङ्गमात्रवाचित्वस्याप्यभ्युपगमात् । अत एव टीकायां 'साधारणश्रुतेश्च अत्र बाधकवशात् साङ्गकर्मार्थत्वस्यैवोपपत्तेः' इत्युक्तम् । 'नान्यः पन्थाः' (तै.आ. ३-१३) 'इष्टापूर्तम्' (मु.१-२-१०) इत्यादिबाधकवशादित्यर्थः । न च शक्यानेकत्वं स्यादिति वाच्यम् । इष्टापत्तेः । अत एव **तत्त्वप्रदीपे**- 'चरणशब्दस्यानुष्ठानमात्रेऽपि प्रवृत्तिमत्त्वात्सदाचारादेः सुकृतादावन्तर्भावाच्च' इत्युक्तम् । सुकृतशब्दार्थेऽन्तर्भावादित्यर्थः । टीकायामपि 'साधारणश्रुतेश्च' इत्युक्तम् । [१](एतेनैवकारस्य भिन्नक्रमत्वमुपेत्य सुकृतदुष्कृते चरणपदोक्ते एव न तु लक्ष्ये इति भाष्यव्याख्यानं निरस्तम् । न चरणश्रुतिः यज्ञाद्युपलक्षत्वेनैवोक्ताविरोधिनी, किं नाम यज्ञादिकर्मवाचिनी चेति टीकाविरोधात्, तत्त्वप्रदीपविरोधाच्च ।) 'बादरिः' शुकाचार्यः । 'मन्यते' इति शेषोक्तिः । परमतमभिधाय सूत्रकारः स्वमतं कुतो न वक्तीत्यत आह- तुशब्दादिति ॥ 'स्वः' सूत्रकृत् । न केवलमन्यसिद्धान्त

---

१. न दृश्यते ।

इत्यपेरर्थः। 'स एव' बादरिसिद्धान्त एव। न त्वन्य इत्येवार्थः। 'सूचयति' सूत्रकृत्। अनेन तुशब्दार्थस्यापेः बादरिरपीत्यन्वयो दर्शितः। यद्वा– निर्दिष्ट-सिद्धान्तस्य स्वसिद्धान्तस्य चैक्यं तुशब्दार्थ इति भावः। तुशब्दस्यैतदभि-धायकत्वं कुत इत्यत आह - **तुशब्द इति**॥ 'नाममहोदधौ' ग्रन्थे। 'उक्तम्' इति शेषः॥ १०॥

॥ इति चरणाधिकरणम्॥

॥ ११. अनिष्टाधिकरणम्॥

(पापकर्मकृतामपि गमनागमने)

पुण्यकृतामेव गमनागमने नेतरेषामिति।

अत्राधिकरणेऽनिष्टादिकारिणामपि गतागतादिदुःखमस्तीति समर्थ्यते। पूर्वपक्षयति- **पुण्येति**॥ इष्टादिपुण्यकर्मकृतामेवेत्यर्थः। स्वप्रयुक्तैवशब्द-व्यावर्त्यं दर्शयति- **नेति**॥ 'इतरेषां' पापकर्मकारिणामपि नेत्यर्थः। 'अनात्मविदाम्' इति शेषः। तथा च अनिष्टादिकारिणामज्ञानां गतागतयोर-भावात्तेषां तच्छून्यो मोक्ष एवेति पुण्यतत्फलयोरेव विरक्त्या भाव्यं, नान्यत्रानिष्टादावपीति भावः।

अत आह —

सू —

ॐ॥ अनिष्टादिकारिणामपि च श्रुतम्॥ ॐ॥ १३॥

'तद्य इह शुभाकृतो ये चाशुभकृतस्तेऽशुभमनुभूयावर्तन्ते पुनः कर्म कुर्वन्ति पुनर्गच्छन्ति पुनरागच्छन्ति' इति भाल्लवेयश्रुतौ॥ १३॥

सिद्धान्तयत्सूत्रमवतार्य तदुपात्तश्रुतिमेवोदाहरति- **अत इति**॥ श्रुता-

वित्यस्य सूत्रेणान्वयः। 'गमनागमने' इत्यनुषज्यते। अनेन सूत्रे 'यथा' इत्यत 'इतमनितं' चेति पदद्वयानुवृत्तिस्सूचिता। 'पुण्यकृताम्' इत्यनेनापिशब्दार्थः सूचितः। सूत्रे संयमनसूत्रोक्तदुःखान्तरसमुच्चायकश्चशब्दः। तथा च 'इतं' गमनम् 'अनितं' आगमनं च न केवलमिष्टादिकारिणां, किं नाम ? 'अनिष्टादिकारिणामपि' यागाद्यकारिणां तद्विरुद्धपापकर्मकारिणां चास्ति। न केवलमनिष्टादिकारिणां गतागतमात्रम्, किं नाम? संयमनाख्यं प्रबलदुःखान्तरं चास्ति। कुतो ? यतः 'तद्य इह' इति श्रुतौ यथा श्रुतम् 'अतः' इति योजना। 'इह' भूमौ 'ये शुभाकृतो' यागादिपुण्यकर्माकारिणः ये च 'अशुभकृतः' इष्टादिविरुद्धपापादिकारिणः ते लोकान्तरं गतास्तत्र 'अशुभं' पापफलमनुभूय पुनः आवर्तन्ते, भुवमागच्छन्ति। आगत्य च पुनः तत्र कर्म कुर्वन्ति, पुनः परलोकं गच्छन्ति, पुनर्भुवमागच्छन्तीत्यर्थः। 'शुभकृतः' इति पाठे 'ये चाशुभकृतः' इत्यस्य द्वेधाऽर्थः। 'तेऽशुभम्' इत्यत्रापि द्वेधा पदच्छेदः।

सू —

ॐ ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ ॐ ॥ १४ ॥

संयमनमनुभूय केषाञ्चिदारोहः केषाञ्चिदवरोहः। तुशब्दोऽवधारणे। 'सर्वे वा एतेऽशुभकृतः संयमने प्रपतन्ति तत्र ये परद्विषो गुरुद्विपः श्रुतिद्विषस्तदवमन्तारः शठा मूर्खा इति ते वै ततोऽवरुह्य तमसि प्रपतन्ति तैवेत उत्तिष्ठन्तेऽपि कर्हिचित् वव्रं वा एतदित्याहुरथ येऽन्ये ब्रह्मद्विषः स्तेनाः सुरापा इति ते वै तदनुभूयेमं लोकमनुव्रजन्ति' इति कौण्ठरव्यश्रुतेः ॥ १४ ॥

न केवलमनिष्टादिकारिणां गतागतमात्रम्, किं नाम? अतिदुःखं पूर्वसूत्रे

चशब्देन सूचितमन्यदस्तीत्यर्थप्रतिपादकं सूत्रमुपन्यस्य व्याचष्टे- **संयमने त्विति** ॥ अत्र 'संयमने' इत्यावर्तते । तत्रैकमधिकरणसप्तम्यन्तं नरकवाचि, अपरं कर्मवाचि सप्तम्यन्तमित्याशयेन संयमनमिति व्याख्यातम् । सम्यग्यमनं नियमनं शासनं संयमनं 'यमस्य' इति शेषः । अत एव तत्त्वप्रदीपे 'यम उपरमे' इतिधातोः पापोपरमणं संयमनमित्युक्तम् । तत्र यमशासनमेव पापोपरमशब्दार्थ इति । तच्चेदं चार्थत एकरूपमेव । **अनुभूयेति** ॥ यमशासननिमित्तदुःखमनुभूयैवेत्यर्थः । संयमन इति तात्पर्यम् । अत एव **तत्त्वप्रदीपे**- 'संयमने नरके' इत्युक्तम् । केषाञ्चिदित्यनेन 'इतरेषाम्' इष्टादिकारिभ्योऽन्येषामनिष्टादिकारिणां मध्ये केषाञ्चिदिति व्याख्यातम् । 'आरोहः' नरकादुत्थानं 'अवरोहः' ततोऽतिनीचस्थाने नित्यनरके पातो 'भवति' इति शेषः ।

न च तमसः पृथिव्यां लोकालोकगिरेः परस्तात्सत्त्वेन पृथिवीसमानदेशत्वात् संयमनस्य च पातालस्थत्वेन चतुरशीतिसहस्रयोजनादधस्तनत्वात्कथमूर्ध्वगते तमस्यवरोहोक्तिरिति वाच्यम् । तमसः अतिगम्भीरत्वेन पातालस्थितबिलद्वारागतानां क्रमेण पातालगतनरकादपि नीचस्थाने तमस अधोभागे पातसम्भवेन विरोधाभावात् ।

यथा भगवद्द्वेषादियुतानामेव नित्यनरकपातलक्षणोऽवरोहः, अन्येषां ततो व्युत्थानलक्षण आरोह इति व्यवस्थितविकल्पः तथा संयमनेऽप्यस्तीति शङ्कानिरासकत्वेन तुशब्दं व्याचष्टे- **तुशब्द इति** ॥ स च 'अनुभूय' इत्यनेन सङ्गमनीय इति हृदयम् । श्रुतेरित्यनेन तद्गतीति हेत्वंशः तेषां तद्गतेः एवंविधगतेः श्रुतिसिद्धत्वादित्येवं तच्छब्दावृत्त्या व्याख्यातो भवति । श्रुतौ अशुभकृत इत्यस्य शुभकर्माकारिणस्तद्विरुद्धाशुभकर्मकारिणश्चेत्यर्थः । एतेन 'सर्वे' इत्यनेनाज्ञानात्रस्य नरकपातो न तत्र नियम इति सूचितम् । संयमने प्रपतन्तीत्यनेन सौत्रसप्तम्यर्थो दर्शितः । 'तत्र' तेषु 'मध्ये' इत्यनेनेतरेषामिति व्याख्यातम् । 'परद्विषः' हरिद्विषः । विष्णुद्वेषो नाम तत्र प्रतीपबुद्धिः । सा च 'जीवाभेदो निर्गुणत्वम्' (म.ता.नि) इत्याद्यागमादनेकविधा द्रष्टव्या । 'श्रुतिद्विषः' वेद-

द्वेषिणः तदप्रामाण्यवादिनः तदनभिमतवक्तारश्च । 'तदवमन्तारः' हरिगुरु-श्रुत्यवमन्तारः । विष्णावबमतिर्नाम अवमत्वेन नीचतया विज्ञानमिति न्याय-दीपिकाटीकयोरुक्तिः ।

ब्रह्मरुद्रमादीनां साम्यदृष्टिरनन्यता ।
प्रादुर्भावगतस्यापि दोषदृष्टिरपूर्णता ॥
धर्मदेहावतारादेर्भेददृष्टिश्च सङ्करः ।
अवतारेष्विति ज्ञेयमवज्ञानं जनार्दने ॥ (गी.ता. ९.११)

इति गीतातात्पर्यवचनानुसारेण विष्णावन्यसाम्यादिदृष्टिर्वा । 'शठाः' गूढ-द्वेषिणः 'मूर्खाः' तत्त्वज्ञानशून्याः विपरीतज्ञानिनश्च । 'इति' इत्यस्य 'इति ये प्रसिद्धाः' इत्यन्वयः । 'ते' अज्ञाः 'ततः' संयमनीपुरात् 'अवरुह्य' इत्यनन्तरं 'ततोऽपि नीचस्थानं' इति शेषः । 'इतः' तमसः 'कर्हिचिदपि' कदाचिदपि नोत्तिष्ठन्ते एवेत्यन्वयः । 'नैवेते' इत्यनेन यत्तमसः पुनरावृत्तिराहित्यमुक्तम्, तत्कुत इत्यत आह- **वव्रमिति** ॥ स्वस्थितान् वारयति गन्तुं न विमुञ्चतीति वव्रम् । न्यायदीपिकायां तु स्वगतानां गमनं वारयतीति टीकोक्तमुक्त्वा सदा आवृणोतीति वा वरमानन्दं वारयतीति वा वव्रमित्यर्थान्तरं चोक्तम् । वै-शब्दोऽवधारणार्थः । 'एतत्' तमः 'आहुः' 'वव्रानन्तान्' इत्याद्यागमाः । 'अथ' इत्यर्थान्तरारम्भे । 'अन्ये' परद्विडादिभ्यः षड्भ्योऽन्ये 'ब्रह्मद्विषो' ब्राह्मणद्वेषिणः 'स्तेनाः' चोराः 'सुरापाः' मद्यपायिन इति ये वै प्रसिद्धाः 'ते' सर्वे 'तत्' संयमनदुःखमनुभूयैव 'अनु' अनन्तरं तत उपरि आरुह्य 'इमं' भूलोकं व्रजन्तीत्यर्थः ।

सू — ॐ ॥ स्मरन्ति च ॥ ॐ ॥ १५ ॥

गच्छन्ति पापिनस्सर्वे नरकं नात्र संशयः ।
तत्र भुक्त्वा पतन्त्येव ये द्विषन्ति जनार्दनम् ॥

महातमसि मग्नानां न तेषामुत्थितिः क्वचित् ।
इतरेषां तु पापानां व्युत्थानं विद्यतेऽपि च ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
इति सर्वत्र नियमः पञ्चकष्टे तु तत्सदा ॥ इत्यादि ॥ १५ ॥

उक्तार्थं स्मृत्या समर्थयत्सूत्रं पठित्वा तां स्मृतिमुदाहरति- **स्मरन्ति चेति ॥** सूत्रे दर्शनपदोक्तश्रुतिस्मरणयोः समुच्चये चशब्दः । 'इत्यादि स्मरन्ति' इत्यन्वयः । स्मृतिकर्तार एवम्भूतां स्मृतिं कुर्वन्तीत्यर्थः । 'इत्यादि' इत्यनेन सूत्रगतबहुवचनकृत्यमुक्तं भवति । आदिपदेन

'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥' (भ.गी. १६.१९)

इत्यस्याः-

'सर्वदेववरत्वेन यो न जानाति केशवम् ।
तस्य पुण्यानि मोघानि याति चान्धन्तमो ध्रुवम् ॥'

इत्यादेश्च सङ्ग्रहः । यत इत्यादि स्मरन्ति, अतोऽप्युक्तं युक्तमिति सूत्रार्थः । स्मृत्यर्थस्तु- सर्वेऽपि पापिनो नरकं गच्छन्ति । तत्र संयमनं चानुभवन्ति नात्र संशयः । 'तत्र' पापिषु ये जनार्दनं द्विषन्ति । उपलक्षणमेतत् । पूर्वश्रुत्युदाहृतं सर्वं ग्राह्यम् । ते नरके किञ्चित्कालं दुःखं भुक्त्वा ततोऽवरुह्य महातमसि पतन्त्येव । तत्र मग्नानां तेषां च क्वचिदपि 'नैवोत्थितिः' नारोहोऽस्ति वज्राभिधत्वादिति भावः । द्वेषिभ्य इतरेषां 'पापानां' पापवतां तु 'व्युत्थानं' पापस्थानादारोहः फलतो निवृत्तिश्च कदाचिद्विद्यते । नैवं तमसि मग्नानाम् । अपि च- 'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्' इति सर्वत्रानित्यनरके नियमोऽस्ति । रौरवादिभ्यः पञ्चभ्योऽपि कष्टे पञ्चेन्द्रियाणि प्रति कष्टे दुस्सह-शब्दादिपञ्चकयुक्तत्वात्पञ्चकष्टे इति वा एतादृशे नित्यनरके तु 'तत्' दुःखं सदाऽस्तीति ॥ ११ ॥

॥ इति अनिष्टाधिकरणम् ॥ ११ ॥

॥ १२. अपिसप्ताधिकरणम् ॥

(नरकाणि सप्त)

सू — ॐ ॥ अपि सप्त ॥ ॐ ॥ १६ ॥

'रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा ।
कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि च ॥
तामिस्रश्चान्धतामिस्रौ द्वौ नित्यौ सम्प्रकीर्तितौ ।
इति सप्त प्रधानानि बलीयस्तूत्तरोत्तरम् ।
एतानि क्रमशो गत्वैवारोहोऽथावरोहणम् ॥'
इति भारते ॥ १६ ॥

अत्र भगवद्द्वेषादिफलस्य नरकस्य नित्यत्वं समर्थ्यते । नरकभोगोऽनित्य एवेति पूर्वपक्षे सिद्धान्तयत्सूत्रं पठति- **अपीति** ॥ अत्र 'नैवेत उत्तिष्ठन्ते' (कौण्ठरव्य) इति श्रुतेर्नरकभोगो भवत्येव नित्य इति सहेतुकसिद्धान्तप्रतिज्ञां बहिरेवाभिप्रेत्य तर्हि 'यावदिन्द्राश्चतुर्दश' 'यावदाभूतसंप्लव' इति वचनविरोध इत्याशङ्कापरिहाराय प्रवृत्तं सूत्रं स्मृत्युदाहरणेन व्याचष्टे- **रौरव इति** ॥ 'भारते' इत्यस्यापिपदेनानुकृष्टेन 'स्मरन्ती'त्यनेनान्वयः । तथा च यतः स्मृतिकर्तारः संयमनानि सप्तापि नरकान् तेषु नित्यानित्यविभागं च स्मरन्ति । अतो न नरकसप्तत्वे तदवान्तरविभागे च प्रमाणाभावो न वा नरकानित्यत्वोक्तिविरोधस्तस्य अनित्यविषयत्वादिति सूत्रार्थः । तत्त्वप्रदीपे तु- यद्यपि बहुकोटयो नरकाः, तथापि सप्त प्रधानानीत्यपिशब्दार्थः । दर्शयति च आचार्यः 'इति सप्त प्रधानानि' इति । सौत्रापिशब्दस्यार्थान्तरप्रतिपादनपरेति सप्तप्रधानानीति भाष्यानुसारेणापिपदं बहुनरकाभिधायकपुराणविरोधपरिहाराय यद्यपि तथापीत्यर्थकतया व्याख्यातम् । एतदपि टीकाकृदनुमतमेव । 'सप्त प्रधानान्' इत्यनेन पुराणविरोधोऽपि परिहृत इत्युक्तेः । अनेन भाष्ये भारतोदाहरणमुपलक्षणम् ।

अत एवापिपदात् 'स्मरन्ति' इति बहुस्मृतिसूचक-बहुवचनान्तपदमाकृष्टम्। स्मृतावथेत्यर्थान्तरे। तदेवाह- **महानीति** ॥ महारौरव इत्यर्थः। चः समुच्चये। 'तथैवे'त्यन्वयः। उपमार्थस्तथाशब्दः। तुरेवार्थः। ननु 'तत्र हैके नरकानेक-विंशतिं गणयन्ति अष्टाविंशतिनरका एवं विधा नरका यमालये सन्ति शतशः सहस्रशः' इत्यादिना भागवतादौ नरकाबाहुल्योक्तेस्तद्विरोधोऽस्येत्यत आह - **इति सप्त प्रधानानि नरकाणीति** ॥ एतेषूत्तरोत्तरं पूर्वपूर्वनिर्दिष्टापेक्षया 'बलीयः' दुःखाधिक्ययुक्तम्। 'क्रमशः' पापाधिक्यक्रमात् निर्दिष्टक्रमानु-सारेण च। अधिकारिभेदज्ञापनायारोहावरोहयोर्मध्येऽथेत्युक्तिः ॥ १२ ॥

॥ इति अपिसप्ताधिकरणम् ॥ १२ ॥

॥ १३. तत्राप्यधिकरणम् ॥

(नरके वसन्नपीशः न दुःखभुक्)

ईश्वरस्य नरकायुक्तेः 'सर्वं विसृजति सर्वं विलापयति सर्वं रमयति सर्वं न रमयति सर्वं प्रवर्तयत्यन्तरस्मिन्निविष्टः' इति कौषारवश्रुतिविरोध इति।

अत्राधिकरणे नरकस्य सदुःखत्वं समर्थ्यते। पूर्वपक्षमाह- **ईश्वरस्येति** ॥ हेतुगर्भमेतत्। 'न तत्र दुःखम्' इति शेषः। तथाच यदि नरके दुःखमङ्गीक्रियते तदा तत्र नारकिजनप्रेरकतया ईश्वरोऽप्यङ्गीकार्यः। तथाच तस्य जीववद्दुःख-मप्यङ्गीकार्यम्, तच्चायुक्तम्। ईश्वरत्वविरोधात्। अतो न तत्र दुःखमस्ती-त्यङ्गीकार्यमिति भावः। ननु नरके प्रेरकतया ईश्वरसत्त्वं नोपेयते, अतो नोक्तदोष इत्यत आह- **सर्वमिति** ॥ 'सर्व'मित्यतः प्राग् 'अन्यथेत्युपस्कार्यम्। ईश्वरस्य प्रेरकतया नरके सत्त्वानभ्युपगम इति तदर्थः। ईश्वरः सर्वं जगत् 'विसृजति' विविधाकारेण सृजति 'विलापयति' नाशयति। यो जनो रमणयोग्यस्तं सर्वं रमयति यस्तदयोग्यस्तं न रमयतीत्यर्थः। 'अस्मिन्' सर्वस्मिन् अन्तर्निविष्टो रमयति। प्रवृत्तिकृदित्यनेन प्रेरकत्वमुक्तं भवति।

अतो वक्ति –

सू —

॥ ॐ तत्रापि च तद्व्यापारादविरोधः ॥ ॐ ॥ १७ ॥

च शब्दाददुःखानुभवेन ।

सिद्धान्तयत्सूत्रमवतारयति- **अत इति** ॥ नरकस्य सदुःखत्वमुपेत्य तत्र प्रवर्तकतया ईश्वरसत्त्वाभ्युपगमे दुःखप्राप्तेः ईश्वरत्वव्याकोप इति यो विरोध उक्तः तत्परिहारः कुतो न सूत्रित इत्यत आह- **चशब्दादिति ॥ अदुःखेति ॥** नीचोच्चतापर्यवसितदुःखानुभवाभावेनेत्यर्थः । 'इति समुच्चिनोति' इति शेषः । सूत्रे 'तदि'ति व्यस्तं समस्तं च । तथाच न केवलं स्वर्गादौ, किन्तु 'तत्रापि' नरकेऽपि अदुःखानुभवेन 'तद्व्यापारात्' तस्येश्वरस्य प्रेरणाख्यव्यापाराभ्युपगमात् श्रुतियुक्तिविरोधाभाव इति सूत्रार्थः ॥

'स स्वर्गे स भूमौ स नरके सोऽन्धे तमसि प्रवृत्तिकृदेक एवानुविष्टो नासौ दुःखभुगीश्वरः प्रभुत्वात्सर्वं पश्यति सर्वं कारयति नासौ दुःखभुग्य एवं वेद' इति पौत्रायणश्रुतेरविरोधः ।

भवेदयमुभयविरोधाभावो यद्यस्यार्थस्य प्रामाणिकत्वं स्यात् , तदेव कुत इत्यत आह- **स इति** ॥ 'इति श्रुतेः' इत्यस्य न सन्निहितेनाविरोधपदेनान्वयः, किं त्वदुःखेन । 'तद्व्यापारात्' इत्यस्य 'नासिद्धिः' इत्युपस्कृतसाध्येन, अस्य चाविरोध इत्यनेनान्वयः । अविरोधः नरके दुःखमङ्गीकृत्य ईश्वरस्य नारकिप्रेरकत्वपक्षोक्तदोषो नेत्यर्थः । प्रेरकत्वपक्षमङ्गीकृत्य तत्र दुःखाननुभवेन तत्रोक्तदोषपरिहारादिति भावः । 'स' ईश्वरः स्वर्गादावनुविष्टस्सन् एक एव स्वतः प्रवृत्तिकृदित्यर्थः । ननु स्वर्गनरकादौ जीवेन सहावस्थानात्तद्वदीश्वरस्यापि तत्तद्गतसुखदुःखभोगः स्यादित्यत आह- **नेति** ॥ 'असौ' ईश्वरः ।

नेत्यत्र हेतुः- **प्रभुत्वादिति** ॥ तथात्वे असार्वज्ञं स्यात् यतो दुःखाभोगो दुःखाननुभव इत्यत उक्तम् - **सर्वं पश्यतीति** ॥ तत्र हेतुः- **सर्वं कारयतीति** ॥ कैमुत्यन्यायेनेश्वरस्य दुःखाभोगमाह- **नेति** ॥ 'य एवं वेद' असावधिकार्यपि न दुःखभुक्, किमीश्वर इत्यर्थः ॥

'नरकेऽपि वसन्नीशो नासौ दुःखभुगुच्यते ।
नीचोच्चतैव दुःखादेर्भोग इत्यभिधीयते ॥
नासौ नीचोच्चतां याति पश्यत्येव प्रभुत्वतः ॥'
इति भागवततन्त्रे ॥ १७ ॥

सर्वं पश्यतीत्युक्तार्थे स्मृतिं चाह– **नरकेऽपीति** ॥ तर्हि सर्वज्ञस्य कथं दुःखाभोगः, अनुभवस्यैव भोगत्वादित्यत आह- **नीचेति** ॥

'अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ ।
तदेव सुमहत्तेजः करोति भगवान् महत् ॥' (बृ.भा. ६.४.४)

इति बृहद्भाष्योक्तदिशा तूलपिण्डस्येव स्वरूपसङ्कोचविकासावेव दुःखादेर्भोग इत्युच्यते, न तत्साक्षात्कारमात्रमित्यर्थः । न च

तद्व्रतानां तु दुःखानां भोगोऽभिमतिरुच्यते ।
तदभावान्नाभिमानी भगवान् पुरुषोत्तमः ॥ (गी.ता. १३.३२)

इति गीतातात्पर्यवचनविरोधः । तथा 'भोगोऽनुभवः स्वीयतया साक्षात्कारः' इति गीताभाष्यप्रमेयदीपविरोधः । अत्रोभयत्राभिमानरूपसम्बन्धेन स्वीयतया सुखादिसाक्षात्कारो भोग इत्युक्तत्वादिति वाच्यम् । अस्य लक्षणान्तर-परत्वात् , एवकारेण च केवलसाक्षात्कारव्यावर्तनात् । एवं जीवस्वरूपभूत-साक्ष्यनुभवप्रयोज्यत्वात् तयोरीश्वरे वाऽभावान्नासौ दुःखभुगिति । ततः किमित्यत आह - **नेति** ॥ 'असौ ' ईश्वरः 'पश्यति' दुःखादिकं सर्वम्, तथा च दुःखादि-साक्षात्कारमात्रस्य भोगत्वाभावान्नीचोच्चतयोरेव भोगत्वात्तयोश्च

दुःखादिविषयक-जीवस्वरूपभूतसाक्ष्यनुभवप्रयोज्यत्वादीश्वरे तदभावे तयोरप्यभावात् सर्वज्ञत्वेऽपीश्वरस्य न दुःखभोग इति भावः । जीवसहभूतस्यापीश्वरस्य दुःखादिसाक्षात्कार एव, न तु भोग इत्यत्र हेतुमाह- **प्रभुत्वत** इति ॥ 'भागवतन्त्रे' इत्यस्य 'सर्वं पश्यतीत्याद्युक्तम्' इत्यध्याहृतेनान्वयः ॥ १३ ॥

॥ इति तत्राप्यधिकरणम् ॥ १३ ॥

॥ १४. विद्याधिकरणम् ॥

(देवयानपितृयानमार्गे जीवानां न गतिस्वातन्त्र्यम्)

'अथैतयोः पथोर्न कतरेण तानीमानि क्षुद्रमिश्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम्' (छा. ५-१०-८) इति गतिस्वातन्त्र्यं भूतानां प्रतीयत इति ।

अत्राधिकरणे जीवानां गतिस्वातन्त्र्यं निराक्रियते । पूर्वपक्षयति- **अथेति** ॥ 'इती'त्यनन्तरं 'छन्दोगश्रुता'विति शेषः । गतिः मार्गरूपं फलम् । तत्र स्वातन्त्र्यमित्यर्थः । 'भूतानाम्' जीवानां 'प्रतीयते' प्रतिपाद्यते 'यतः' इति शेषः । अस्य अतोऽस्त्येव भूतानां गतिस्वातन्त्र्यमित्यनुवृत्तसाध्येनान्वयः । श्रुतौ 'गच्छन्ति' इति शेषः । तथाच 'अथ' यदि 'एतयोः पथोः' 'तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति. अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' (छा. ५-१०.३) इति पूर्ववाक्ये प्रकृतयोर्ज्ञानिकर्मिप्राप्ययोरर्चिरादिधूमादिमार्गयोर्मध्ये सिद्धान्तरीत्या ज्ञानकर्मणोर्मध्य इति वा यानि [1]'कतरेण च न' कतरेणापि पथा न गच्छन्ति, तदा तानीमानि 'क्षुद्रमिश्राणि' क्षुद्राण्यल्पानि सुखदुःखाभ्यां मिश्राणि च 'असकृदावृत्तीनि' सदा गत्यादिमन्ति भवन्ति । 'जायस्व म्रियस्व'

---

१. मुद्रितपुस्तके 'कतरेण च' इत्येव दृश्यते ।

क्रियासमभिव्याहारे लोट् , पौनःपुन्यं भृशार्थो वा क्रियासमभिव्यहारः, लोटः स्वप्रत्ययः । तथाच पुनःपुनः जायन्ते म्रियन्ते चेत्यर्थः । 'इत्येतत्' इत्येवं रूपं स्वर्गापवर्गयोरन्यत्तृतीयं स्थानं प्राणिनामावासस्थलमित्यर्थः । केचित्तु- 'नैकतरेण च गच्छन्ति चेत्' इति श्रुतिपाठमाहुः । तच्छन्दोगसम्प्रदायपाठविरुद्धम् । 'न गच्छन्ति चेत्' इति प्रयोगो 'युज्यते' इति टीका तु अथशब्दस्य चेदर्थकत्वं गच्छन्तीत्यध्याहारं चाभिप्रेत्य । अत एव छान्दोग्यव्यासतीर्थीये 'गच्छन्तीति शेषः' इत्युक्तमिति ध्येयम् ।

अत आह –

सू —

ॐ ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ ॐ ॥ १८ ॥

विद्याकर्मापेक्षयैतद्वचनम् । तयोरपि प्रकृतत्वात् ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे– **अत इति** ॥ 'विद्ये'ति सावधारणम् । ज्ञानकर्माख्यार्थमपेक्ष्यैवेत्यर्थः । 'एतद्वचनम्' एतयोरिति पदम् । 'यतः' इति शेषः । कुतोऽयमस्यार्थ इत्यत आह– **तयोरिति** ॥ न केवलमर्चिर्धूमादिमार्गयोरित्यपिशब्दार्थः । अनेन सूत्रे 'विद्ये'त्यस्यावृत्तिः । इति शब्दो वचनविशेषद्योतकः । तुशब्द एवार्थोऽप्यर्थश्च । कर्मणि च षष्ठी । साध्यं चाध्याहार्यम् । तथा च यतः देवयानपितृयानरूपफलयोरिव विद्याकर्माख्यसाधनयोरपि 'तद्य इत्थं विदुः' (छा. ५-१०-१) इति पूर्ववाक्ये प्रकृतत्वादेतयोरिति पदं 'विद्याकर्मणोः स्यात्' तत्परामर्शकमेव भवेत्, न तु मार्गरूपफलपरामर्शकम् । अतो न तद्बलाद्भूतानां गतिस्वातन्त्र्यं मन्तव्यमिति सूत्रार्थ उक्तो भवति ।

'विद्यापथः कर्मपथौ द्वौ पन्थानौ प्रकीर्तितौ ।
तद्वर्जितस्त्रिधा याति तिरयग् वा नरकं तमः ॥' इति ॥ १८ ॥

ननु 'एतयोः' इत्यस्य मार्गतत्साधनरूपार्थद्वये सम्भवति सति किं साधन-मात्रार्थग्रहणे कारणमित्यतः श्रुतिसमाख्यैवेति भावेन विद्याकर्मपदसूचितां स्मृतिमाह- **विद्येति** ॥ 'विद्यापथः' विद्यामार्गः । 'कर्मपथः' कर्ममार्गः । तदुभयात्मकं साधनमिति यावत् । 'प्रकीर्तितौ' एतयोरिति शब्दबोध्याविति यावत् । यद्वा- 'आत्मा वा अरे द्रष्टव्यः' (बृ. ४-४-५) 'तद्विजिज्ञासस्व' (तै. ३-१) 'ज्योतिष्टोमेन यजेत' (आप. श्रौ १०-२-१) इत्यादौ विहिता-वित्यर्थः । विद्यापथः कर्मपथ इत्यकारन्तौ शब्दौ । 'तद्वर्जितः' तदुभयवर्जितो जनः 'त्रिधा' प्रकारत्रयेण याति प्रकारत्रयोपेतं फलं प्राप्नोतीत्यर्थः । तानेव प्रकारानाह- **तिर्यगिति** ॥ भावनिर्देशोऽयम् । जायस्व म्रियस्वेत्युक्तगति-रित्यर्थः । उक्तं हि तत्त्वप्रदीपे- तिर्यङ्नरकं तम इति । तत्र प्रथमं स्पष्टमुक्तम्- जायस्व म्रियस्वेति । इतरे चोक्ते 'संयमने' इत्यादिनेति । अनेन नरकार्थतया यातनापदमपि व्याख्यातम् । वाशब्द उभयत्र सम्बध्यते । 'भारते' इत्यनन्तरं 'वचनात्' इति शेषः । अस्य 'विद्याकर्मापेक्षये'ति पूर्वेणान्वयः । केचित्तु- सूत्रे इतिशब्दः सौत्रपदार्थोक्तिपरः अर्थशब्दश्चाध्याहार्यः । तथा 'चैतयो'रित्यस्य 'विद्याकर्मणोरिति तु' विद्याकर्मणोरेवार्थः, न तु मार्गयोरित्यपीति सूत्रार्थमाहुः ॥ १४ ॥

॥ इति विद्याधिकरणम् ॥ १४ ॥

॥ १५. न तृतीयाधिकरणम् ॥

(तमसि सुखलेशोऽपि नास्ति)

'यत्र दुःखं सुखं तत्र सर्वत्रापि प्रतीयते ।
अपि नीचगतौ किञ्चित्किमु मानुषदेहिनः ॥'
इति वचनान्महातमस्यापि सुखप्राप्तिरिति ।

अत्राधिकरणेऽन्धतमसः दुःखमात्रत्वं समर्थ्यते । पूर्वपक्षयति - **यत्रेति** ॥ **इति वचनादिति** ॥ इत्येतद्वचनगृहीतव्याप्तिकदुःखयुक्तत्वहेतोरित्यर्थः । तथा

च परसुखदुःखयोरप्रत्यक्षत्वाद्व्याप्तिग्रहणायोग इति चोद्यानवकाशः । अत्र यस्मिन् यस्मिन् दुःखं तत्र सर्वत्रापि सुखमस्ति न तु क्वचिदिति नियतसहचार-प्रतीतेरिति भावः । 'सर्वत्र' इत्युक्तमुपपादयति- **अपीति** ॥ विशेषणसमुच्चयार्थोऽपिः । तथा च यदा दुःखाकरत्वेन प्रसिद्धायामपि' 'नीचगतौ' नरके किञ्चित्सुखमस्ति तदा मानुषदेहिनो गतौ सुखमस्तीति किमु वक्तव्यमित्यर्थः । तथा च न कुत्रापि व्यभिचार इति भावः । महातमस्यपीति । त्रिविधाधोगतिषु मध्ये न केवलं मानुषादौ नरके च, किन्तु महादुःखत्वेन प्रसिद्धे तमस्यपीत्यर्थः । **प्राप्तिरिति** ॥ 'अस्ति तमोयोग्यस्य' इति शेषः । अनेनान्धं तमोऽपि सुखयुक्तमेवेति पूर्वपक्षसाध्यं दर्शितं सुखप्राप्तिरपीत्यन्वये सति दुःखयुक्तत्वादिति हेतुरपि दर्शितः ।

(२) अत आह–

सू— ॐ ॥ न तृतीये तथोपलब्धेः ॐ ॥ १९ ॥

'अथाविद्वानकर्माऽवाग्गच्छति । त्रिधा ह वाऽवाग्गतिस्तिर्यग्यातना तम इति । द्वे वाव सुखानुवृत्ते न तमस्सुखानुवृत्तं केवलं ह्येवात्र दुःखं भवति' इति श्रुतेर्न तृतीयावाग्गतौ सुखम् ॥ १९ ॥

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ अर्थान्तरारम्भेऽथशब्दः । 'अविद्वान्' मुक्तिहेतुज्ञानरहितः 'अकर्मा' स्वर्गाद्यापादककर्मरहितो दुष्टकर्मा सात्त्विकतामसो राजसतामसश्च 'अवाक्' अधोगतिं 'गच्छति' प्राप्नोति । तां विभजते- **त्रिधेति** ॥ 'त्रिधा ह वाऽवाग्गच्छति' इति श्रुतिपाठः । हेति प्रसिद्धौ । 'वाव' इत्यवधारणे । तत्त्वप्रदीपोक्तरीत्या समाने लोप इति एकवकारलोपः । अवाग्गच्छतीति यत्तत्त्रिधैवेत्यर्थः । त्रैविध्यमेव दर्शयति- **तिर्यगिति** ॥ तिर्यक्त्वमित्यर्थः । सा च नानायोनिप्राप्तिरूपा 'जायस्व म्रियस्व'

इत्युक्ता तृतीया गतिः। 'यातना' नरको दुर्नरत्वं वा। यथोक्तं गीतातात्पर्ये- 'दुर्नरत्वं च तिर्यक्त्वं तमश्चेति फलं क्रमात्' इति। 'इति त्रिधैव' इत्यन्वयः। तासां लक्षणमाह- **द्वे इति** ॥ 'अनुवृत्ते' युक्ते। न तमः सुखयुक्तमित्यत्र हेतुमाह- 'हि' यतः 'केवलम्' अत्यन्तम् 'अत्र' तमसि दुःखं 'भवति' प्राप्यते। 'इति श्रुतेः' इत्यनेन 'तथोपलब्धेः' इति हेतुर्व्याख्यातः। **न तृतीयेति** ॥ 'तिर्यग्वा नरकं तमः' इत्युक्ताधोगतिषु 'तृतीये' तमसि न सुखमस्तीत्यर्थः। अनेन सुखमस्तीत्यध्याहृतसाध्यभागो व्याख्यातः।

सू— ॐ ॥ स्मर्यतेऽपि च लोके ॥ ॐ ॥ २० ॥

'तिर्यक्षु नरके चैव सुखलेशो विधीयते। नान्धे तमसि मग्नानां सुखलेशोऽपि कश्चन ॥' इति भविष्यत्पर्वणि।

एतमेवार्थं स्मृत्यनुमानाभ्यां च साधयत्सूत्रमुपपन्यस्य तां स्मृतिमुदाहरति- **स्मर्यत इति** ॥ **तिर्यक्ष्विति** ॥ 'क्षुद्रमिश्राणि' इत्युक्ततृतीयगतावित्यर्थः। 'विधीयते' अस्तीत्युच्यते आगमेषु। 'मग्नानां' स्थितानां 'कश्चन' किंनिमित्तोऽपीत्यर्थः। किमु यथेष्टमित्यपेरर्थः। 'भविष्यत्पर्वणि' इत्यस्य 'स्मर्यते' इत्यनेनान्वयः॥

लोकसिद्धं चैतत्। चशब्दाल्लोकसिद्धिरपि स्मार्तेत्याह।

'लोके' इत्येतदनुमानसूचकतया व्याख्याति– **लोकसिद्धमिति** ॥ 'एतत्' अन्धे तमसि सुखराहित्यं लौकिकदृष्टान्तयुक्तानुमानसिद्धं चेत्यर्थः। न केवलं स्मृतिसिद्धमिति चार्थः। 'च' इत्यनेन अपिः व्याख्यातः। अनुमानप्राबल्यहेतुस्मृतिसिद्धत्वसूचकतया चशब्दं व्याख्याति- **चशब्दादिति** ॥ न केवलं तमसः सुखराहित्यं श्रुतिसिद्धं, किन्तु 'लोकसिद्धिः' लौकिकदृष्टान्तवदनुमानेन तमसः सुखराहित्यसिद्धिरपि 'स्मार्ता' स्मृतिसिद्धेति चशब्दात् सूत्रकारः 'आह' सूचयतीत्यर्थः। तथा च 'लोकसिद्धत्वं च स्मर्यते' इति चशब्दान्वय इति भावः।

'अतिप्रिये यथा राजा न दुःखं सहते क्वचित् ।
अत्यप्रिये सुखमपि तथैव परमेश्वरः ॥' इति हि ब्राह्मे ॥ २० ॥

काऽसौ स्मृतिरित्यत आह– **अतीति** ॥ राजा यथा अतिप्रिये पुरुषे क्वचित्कालेऽपि दुःखं न सहते, किन्तु सुखमेव । यथा चात्यप्रिये सुखं न सहते, किन्तु दुःखमेव, तथा परमेश्वरोऽपीत्यर्थः । अनेन विप्रतिपन्नास्तामसाः न सुखित्वेन ईश्वरेष्टाः अप्रियत्वादिति सूत्रकृदभिप्रेतानुमाने पादद्वयेन राजप्रिये व्यतिरेकव्याप्तिः तृतीयेन तु राजविप्रियेऽन्वयव्याप्तिश्च दर्शिता भवति । अथवा-पूर्वं सदसज्ज्ञानां प्रकृतत्वात्तेषां प्रकृतिः स्वरूपमत्रोच्यते । न चासङ्गतिः । प्रियत्वाप्रियत्वाभ्यां हेतुभ्यां सदसज्ज्ञेषु दुःखसुखासहने साध्ये अनुमान-द्वयेऽप्यन्वयव्याप्तेः दृष्टान्तप्रदर्शनार्थत्वेन सङ्गतत्वात् । यद्यपि नानेनानुमानेन तमसः सुखराहित्यसिद्धिः । तथाऽप्यनेन सिद्धेन सुखित्वेनेश्वरानिष्टत्वेन हेतुना तामसानां सुखराहित्यसिद्धौ तमसस्तद्रहितत्वमपि सिद्ध्यतीति तात्पर्यम् । इति **हीति** ॥ 'हि' शब्दो यत इत्यर्थे । तथा च 'ब्राह्मे' पुराणवचने यत इत्युक्तं अतः चशब्दादित्युक्तं युक्तमित्यन्वयः ॥

सू— ॐ ॥ दर्शनाच्च ॥ ॐ ॥ २१ ॥

'नारायणप्रसादेन समिद्ध(समृद्ध)ज्ञानचक्षुषा ।
अत्यन्तदुःखसंलीनान्निश्शेषसुखवर्जितान् ॥
नित्यमेव तथाभूतान् विमिश्रांश्च गणान् बहून् ।
निरस्ताशेषदुःखांश्च नित्यानन्दैकभागिनः ॥
अपश्यन्निविधान् ब्रह्मा साक्षादेव चतुर्मुखः ।'
इति दर्शनवचनाच्च पाद्मे ॥ २१ ॥

प्रत्यक्षेणाप्येतमर्थं साधयत्सूत्रमुपन्यस्य व्याचष्टे- **दर्शनाच्चेति** ॥ 'दर्शन-वचनात्' इत्यनेन 'दर्शनात्' इत्येतद्दर्शनवचनादिति व्याख्यातम् । अनेन

हेत्वसिद्धिः परिहता। 'पाद्मे दर्शनप्रतिपादकवचनात्' इत्यन्वयः। चशब्दस्तु न वचनान्वितः, किन्तु दर्शनान्वितः। तस्य तमसः सुखराहित्ये साध्ये हिरण्यगर्भकर्तृकप्रत्यक्षाख्यहेतुसमुच्चयार्थत्वात्। सम्यगिद्धं दीप्तं समिद्धं, **समृद्धमिति पाठे** सम्यगभिवृद्धमित्यर्थः। समिद्धं च तत् ज्ञानचक्षुश्चेति विग्रहः। चक्षुर्दृष्टिः। तथा च चतुर्मुखो नारायणप्रसादेन समृद्धज्ञानचक्षुषा 'साक्षात्' परमुखमन्तरेण स्वयमेव त्रिविधान् जीवानपश्यदित्यन्वयः। तानेव प्रकारिणो दर्शयति- **अत्यन्तेति** ॥ 'संलीनान्' मग्नान्। अनेन पादद्वयेन तमोयोग्याः सङ्गृहीताः। 'नित्यमेवे'ति पादद्वयेन नित्यसंसारिणः। 'तथाभूतान्' मिश्रभूतान्। 'निरस्ते'ति पादद्वयेन मोक्षयोग्याः। 'जीवान्' इति शेषः। चौ परस्परसमुच्चये।

अत्र तत्त्वप्रदीपे- 'अपश्यत्त्रिविधान् ब्रह्मा' इत्युक्तम्। त्रैविध्यं त्रिष्वपि तेषु नित्यदुःखिषु विमिश्रेषु नित्यसुखिषु च अवान्तरभेदादवगन्तव्यम्। 'महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम्' इति हि वक्ष्यति। दुःखतारतम्येन भेदं तदायतनानाम्। विमिश्रभेदस्तु अल्पसुखसममिश्राल्पदुःखभेदान्नारकिणो मानुषाः स्वर्गिण इति। मनुष्योत्तमा ऋषिगन्धर्वा देवा इति मुक्तेषु नित्यसुखिषु च सुखतारतम्याद्भेद उक्तः। एतेषु नित्यमेव तथाभूतत्वं च समानम्। विमिश्रेषु नित्यमतथाभाविनश्च सन्ति। स्वरूपस्थितमध्यम एव नित्यं तथा भावात्सर्वेषां च जीवानां आस्वरूपावस्थानाद्विमिश्रत्वमेवेत्यनेकशो विमिश्राः। अत एव तदाह- **विमिश्रांश्च गणानूवहूनिति** ॥ तच्च विमिश्रत्वमनन्तविधमिति सूचयति- **'विमिश्रानिति'** इत्युक्तम्। अनेन त्रिविधानित्यस्य प्रत्येकं त्रिविधानित्यर्थः सूचितः। 'तदायतनानाम्' नित्यदुःखस्थानाम् इत्यर्थः। [१]'विमिश्रभेदस्तु नारकिणो मानुषाः स्वर्गिण इत्युक्त इत्यन्वयः। कथम् ? अल्पसुखादिभेदात्। अल्पसुखमिश्राः सुखदुःखसाम्येन मिश्राः अल्पदुःखमिश्राश्चेति भेदादित्यर्थः। 'नारकिणः' नरकप्रचुराः 'मानुषाः' भूप्रचुराः

१. 'विमिश्रभेदस्तु' इत्यतः 'भेदादित्यर्थः' इत्यन्तो भागः मातृकायां न दृश्यते।

'स्वर्गिणः' स्वर्गप्रचुराः। भेदः उक्त इति ॥ 'तत्र मन्दा मनुष्येषु' इत्यादि-प्रमाणेषूक्त इत्यर्थः। 'एतेषु' त्रिषु तमोयोग्यादिषु नित्यमेव 'तथाभूतत्वं' स्वस्वरूपावस्थितत्वम्। समानमित्यनेनित्यमेव तथाभूतानित्येतत् त्रिविधानामपि विशेषणमिति सूचितम्। विमिश्रेषु नित्यमतथाभाविनश्च सन्तीत्यनेन मुक्तियोग्यादीनां त्रयाणामपि विमिश्रत्वं सूचितम्। परन्तु मुक्तियोग्यतमोयोग्ययोः 'आस्वरूपावस्थानात्' स्वरूपाविर्भावपर्यन्तमेव, न तु ततः परमपि विमिश्रत्वम्। 'स्वरूपस्थितमध्यमे' नित्यसंसारिण्येव नित्यं मिश्रभाव इति ते नित्यमेव तथाभूताः। **अनेकश** इति। मुक्तियोग्यतमोयोग्यनित्यसंसारिभेदेन अनेकरूपा इत्यर्थः। **अनन्तविधमिति** ॥ प्रतिजीवं सुखवैचित्र्येणानन्तविधत्वमित्यर्थः। अत्र केचित्- 'सर्वेषां च जीवानामास्वरूपावस्थानाद्विमिश्रत्वम्' इति तत्त्वप्रदीपोक्तेः नित्यसंसारिणामपि मुक्तिरस्तीत्याहुः। तन्न, मुक्तिपर्यन्तं त्रितयनिष्ठं, ततः परं विमिश्रत्वं नित्यसंसारिमात्रनिष्ठमिति तद्वाक्यार्थाभ्युपगमात्। अन्यथा 'त्रिदिवनिरयभूगोचरान्नित्यबद्धान्' इति तद्ग्रन्थकारोक्तिविरोधापत्तेः॥

सू—

ॐ ॥ तृतीये शब्दावरोधः संशोकजस्य ॥ ॐ ॥ २२ ॥

तृतीये तृतीयतमसः श्रवणादेव शब्दानुसारेण संशोकज-मोहप्राप्तिः ॥ २२ ॥

अर्थापत्त्याऽप्येतमर्थं समर्थयत्सूत्रं पठित्वा व्याचष्टे- **तृतीय इति** ॥ अत्र तृतीयपदेन नाधोगतिषु तृतीयं विवक्षितम्, तस्य 'न तृतीये' इति प्रथमसूत्र एवोक्तत्वात्; अत्र पुनस्तृतीयग्रहणवैयर्थ्यात्। किन्तु तमसस्तृतीयं ग्राह्यमित्याशयेन तृतीयपदमनूद्य विवृणोति- **तृतीय इति** ॥ 'तमसि' इत्यादावुपस्कार्यम्। कर्मणि षष्ठीयम्। तृतीये विषयसप्तमीं मत्वाऽऽह- **तमस इति** ॥ 'श्रवणात्'

प्रतिपादकशब्दश्रवणादिति सावधारणमेतत् । श्रवणादेव, किम्वनुभवादिनेति कैमुत्यद्योतक एवकारः । अनेन सूत्रे शब्दपदं श्रवणोपलक्षकम् । विषयसप्तमीयम्, तृतीयतत्पुरुषः , संशोकजस्यावरोधः प्राप्तिरित्यन्वयसूचितः । तथा च तृतीयविषये यः शब्दस्तेनावरोधः प्राप्तिर्भवति । कस्य? 'संशोकोजस्य' सम्यक् शोकः संशोकोऽतिदुःखं तज्जन्यस्य मोहस्य मूर्छाया इति सूत्रार्थः । 'शब्दानुसारेणं' इत्यनेन शब्दश्रवणेन भवन्ती मोहप्राप्तिरपि न सर्वेषामेकविधा, किन्तु स्वकारण-श्रवणविषयवक्तृशब्दानुसारेणेत्युक्तं भवति । तथा च तृतीयतमःस्वरूपप्रति-पादकवक्तृशब्दविस्तरानुसारात्तदानुगुण्यादित्यर्थः । विस्तुरस्तु व्याख्यानसम्य-ग्व्याख्यानातिसम्यग्व्याख्यानादिरूपः । फलमपि सम्यग्व्याख्यानेऽतिमूर्छेत्यादि-रूपम् । तदुक्तिविस्तरानुसारेण मूर्छादि समासतो व्यासतो वा भवतीति तत्त्व-प्रदीपवाक्यस्य एकस्य द्वयोर्वा प्राप्तिस्समासः, सर्वेषां प्राप्तिर्व्यास इत्यर्थः । 'प्राप्तिः' इत्यनन्तरं'अतोऽपि' इत्यध्याहारेण न तृतीये सुखमिति प्रधान-साध्येनान्वयः । अनेन यतस्तृतीयतमस्सु विषये वक्तृशब्दानुसारात् संशोकजा-देरवरोधः प्राप्तिर्भवति, अतश्च न तृतीये सुखमिति चशब्दानुषङ्गेण सूत्र-योजनान्तरमुक्तं भवति ।

सू— ॐ ॥ स्मरणाच्च ॥ ॐ ॥ २३ ॥

'महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम् ।
श्रवणादेव मूर्छादिरधरस्य यतो भवेत् ॥
तस्मान्न विस्तरेणैतत्कथ्यते राजसत्तम ।' इति कौर्मे ॥ २३ ॥

तृतीयतमःस्वरूपश्रवणे श्रोतृणां मोहप्राप्तिरित्येत्कुतोऽवगम्यते । यदन्य-थाऽनुपपत्त्या तत्र सुखाभावावगम इत्याशङ्कां स्मृत्या परिहरत्सूत्रं पठित्वा तां स्मृतिमुदाहरति- **स्मरणाच्चेति** ॥ अत्र चशब्दो 'नाक्षेपकस्यासिद्धिः' इति साध्यसमुच्चायकः । 'तस्य' इति शेषः । तथा च तस्य तृतीये शब्दावरोधस्य 'स्मरणात्' न अर्थापत्तावाक्षेपकस्यासिद्धिरिति सूत्रार्थः । स्मृतौ 'महातमः'

अन्धतामिस्राख्यम् । 'अधरस्य' तमसः शब्दश्रवणेन तस्मान्निमित्ताच्छ्रोतॄणां मूर्छादिर्भवेदित्यर्थः । आदिशब्दाट्टीकारीत्याऽतिमूर्छादि ग्राह्यम् । तत्त्वप्रदीपरीत्या तु उन्मादमरणयोर्ग्रहणम् । 'विस्तरेण' सम्यग्व्याख्यानेन 'एतत्' अन्धतमसः, विस्तारो न क्रियत इति यावत् । 'राजसत्तम' इति कस्यचित्सम्बुद्धिः । 'कौर्मे स्मरणात्' इत्यन्वयः ॥ १५ ॥

॥ इति न तृतीयाधिकरणम् ॥

॥ १६. तत्स्वाभाव्याधिकरणम् ॥

(जीवः धूमादिदेवतारूपं तत्पदं वा न प्राप्नोति)

'धूमो भूत्वाऽभ्रं भवति' (छा. ५-१०-५ काषायणश्रुतौ) इत्याद्यन्यभावः श्रूयते । स कथमिति ।

अत्राधिकरणे कर्मिणो धूमादिभावो निवार्यते । तत्र विषयं दर्शयति- धूम इति ॥ इत्यादीति लुप्तविभक्तिकम् । तथा च छन्दोगश्रुतौ काषायणश्रुतौ च 'धूमो भूत्वा' इत्यादौ धूमादिदेवताभ्योऽन्यस्य कर्मिणो धूमादिदेवताभावः श्रूयत इत्यर्थः । अनेन धूमादिदेवताभावाख्यविषयो दर्शितः । सन्देहप्रकारं दर्शयति- **स इति** ॥ धूमादिभावः 'कथं' किं प्रकारः, किं कर्मिणो धूमादिदेवतैक्यम् ? किं वा तत्पदप्राप्तिः ? प्रकारान्तरं वेत्यर्थः ।

अतो ब्रवीति –

सू— ॐ ॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ ॐ ॥ २४ ॥

धूमादिषु प्रविश्य तद्भतौ गतिः तत्स्थितौ स्थितिरित्यादिरेव तद्भावापत्तिः । न ह्यन्यस्यान्यभावो युज्यते । न च तत्पदप्राप्तिः ।

धूमादिदेवतैक्यं तत्पदप्राप्तिर्वा धूमादिभाव इति पूर्वपक्षस्य 'अन्यभावः

प्रतीयते' इत्यनेनैव प्रदर्शितत्वात्तमप्रदर्श्य सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे - **अत इति ॥ धूमादिष्विति ॥** धूमादिदेवतादेहेष्वित्यर्थः । कर्मणि सप्तमी । 'तद्गतौ' धूमादिगतौ । 'स्थिताः' वित्यत्रापि तच्छब्दान्वयः । आदिशब्दाल्लघुत्वम् अन्यदेहाविष्टग्रहवत्तद्देह एवाभिमानः पृथगभिमानाभावश्च गृह्यते । 'तद्भावापत्तिः' तत्स्वभावापत्तिः । तथा च तत्स्वभावैकदेशसादृश्यनिबन्धनो गौणोऽयं निर्देश इति भावः । यद्वा- आदिशब्देन स्थानैक्यं गृह्यते । तेन लाक्षणिकोऽयं प्रयोग इति सूचयति । एवं टीकाभिप्रेतं तदधीनत्वनिमित्तं चादिपदार्थतया ग्राह्यम् । अत एव स्मृतौ 'ब्रह्मेदं जगदित्यपि' इति दृष्टान्तोक्तिः । अन्यथाऽसङ्गतेः, अस्मिन् पक्षे श्रौतनिर्देशो मुख्यः । अनेन सूत्रे तत्त्वप्रदीपोक्तरीत्या गजमुख इतिवत्तस्य धूमादेः स्वभावपदोक्तधर्मसदृशः स्वभावो यस्य सः तत्स्वभावः, तस्य भावः तत्स्वाभाव्यम्, तस्यापत्तिरिति विग्रहः । लाक्षणिकत्वपक्षे तस्य स्वभावस्य तद्देहस्थितत्वस्यापत्तिरिति विग्रहः । मुख्यत्वपक्षे तदधीनस्वभावस्यापत्तिरिति । पक्षद्वयेऽपि स्वार्थे ष्यञ् । तथा च 'तस्यां' 'धूमो भूत्वा' इति श्रुतौ श्रुता 'तद्भावापत्तिः' धूमादिभावप्राप्तिर्नाम तत्स्वाभाव्यापत्तिरेव, न त्वैक्यम्, तत्पदप्राप्तिर्वेति प्रतिज्ञार्थ उक्तो भवति । कुतोऽर्थोऽयं श्रुतेः स्यादित्यतः प्रवृत्तमुपपत्तेरिति हेतुं व्याचष्टे- **न हीति ॥** हिशब्दो 'यस्मात्' इत्यर्थे । 'अन्यस्य' कर्मिणः 'अन्यभावः' धूमादिभावः । कुतो नेत्यतोऽप्याह- **न हीति ॥** 'दृश्यत' इति शेषः । **तत्पदेति ॥** धूमादिपदप्राप्तिरित्यर्थः । 'युज्यते' इत्यनुषज्यते । अत्र युक्तिस्तु स्मृत्युक्तेति हृदयम् । अनेन स्वप्रयुक्तैवकारव्यावर्त्यं दर्शितं भवति ।

गारुडे च –

'धूमादिभावप्राप्तिश्च तद्गतौ गतिरेव तु ।
स्थितौ स्थितिः प्रवेशश्च लघुत्वादिस्तथैव च ॥
न ह्यन्यस्यान्यथाभावो न च तत्पदमिष्यते ।
विद्यागम्यं पदं यस्मान्न तत्प्राप्यं हि कर्मणा ॥'

एवं न्यायप्राप्तेऽर्थे स्मृतिं चाह- **गारुडे चेति** ॥ अस्य उक्तमित्यध्याहारेण 'इत्यपि' इत्यनेनान्वयः । न केवलं न्यायलब्धमेतदिति चशब्दार्थः । किमुक्तमित्यतस्तत्पठति- **धूमादीति** ॥ 'श्रुत्युक्त' इति शेषः । चशब्दतुशब्दयोः 'प्राप्तिस्तु' 'स्थितिश्चे'ति भिन्नक्रमेणान्वयः । अत्र प्रवेशो न गौणत्वार्थमुक्तः, किन्तु स्थानैक्यरूपपक्षान्तरोपन्यासार्थम् । अत एव स्ववाक्ये 'प्रविश्य' इत्युक्तम् । अनेन श्रौततदापत्तेः गौणत्वलाक्षणिकत्वे ज्ञापिते । आदिपदात् पृथगभिमानाभावो गृह्यते। कुत इयं श्रुतेरमुख्यार्थकल्पनेत्यतो मुख्यार्थानुपपत्तेरेवेत्याह- **न ह्यन्यस्येति** ॥ व्याख्यातमेतत् । 'तत्पदम्' अन्यस्य, 'प्राप्तम्' इतिशेषः । कर्तरि षष्ठी । 'इष्यते' अङ्गीक्रियते प्रामाणिकैः । कुतो नेत्यत आह - **विद्येति** ॥ 'हि' यस्मात्तत्पदं 'विद्यया' ब्रह्मदर्शनेनैव गम्यम् । 'तत्' तस्मात्तेन कर्मणा प्राप्यं नेत्यर्थः । हिशब्दोऽस्य श्रुतिप्रसिद्धतामाह । यद्वा - युगपदनेककर्मिसमवायेऽनेकेषामेकपदप्राप्त्ययोग इति न्यायसूचको हिशब्दः । 'कर्मणा' काम्यकर्मणा ।

'एकदेशस्वभावेन वागभेदाऽपि युज्यते ।
यथा जीवः परं ब्रह्म ब्रह्मेदं जगदित्यपि ॥' इति ॥ २४ ॥

न च 'धूमो भूत्वा' इति सामानाधिकरण्यश्रुतिविरोध इत्यत आह - **एकदेशेति** ॥ स्वभावैकदेशसादृश्येनेत्यर्थः । 'अभेदा' न विद्यते भेदः प्रतिपाद्यो यस्यां सा अभेदा अभेदवादिनी वागित्यर्थः । यथोक्तं तत्त्वप्रदीपे- 'भेदरहिता वाक्' इति । केचित्तु- अर्शा आद्यजन्तोऽयं शब्द इत्याहुः । अपिर्निमित्तान्तरसमुच्चये । पूर्वपादेनान्वेति । नन्वदर्शनादयुक्तोऽयमर्थ इत्यत एकदेशसादृश्येनाभेदप्रयोगं दर्शयति- **यथेति** ॥ 'तत्त्वमसि' (छा.६-८-७) इत्यादावित्यर्थः । श्रुतियुक्त्यनुभवसप्रतिपत्तिबलादयं दृष्टान्त उपात्तः । यत्प्राक्सूचितं तदधीनत्वादप्ययं प्रयोग इति, तत्र दृष्टान्तमाह– **ब्रह्मेदमिति** ॥ 'सर्वं खल्विदं ब्रह्म' (छा.३.१४.१) इत्यादावित्यर्थः । सर्वस्य ब्रह्माधीनत्वादयं व्यपदेशः । यद्वा -

'तद्गुणसारत्वात्' इत्यत्रोक्तदिशाऽयमपि दृष्टान्तः सकलजगद्गुणसदृशगुणात्मकत्वेन ब्रह्म जगदित्युच्यत इति सादृश्यनिमित्तक एव योजनीयः । अपिर्दृष्टान्तसमुच्चये ॥

॥ इति तत्स्वाभाव्याधिकरणम् ॥ १६ ॥

॥ १७. नातिचिरेणाधिकरणम् ॥

(जीवः पुण्यमनुभूय धूममार्गेण अविळम्बेन संवत्सरात् प्रागेव मातृदेहं प्रविशति)

बहुस्थानगमनात्कल्पान्तमप्येवं स्यादिति ।

अत्राधिकरणे स्वर्गादवरूढस्य कर्मिणोऽचिरेण गर्भवासादिप्राप्तिः समर्थ्यते । तत्र कर्मी स्वर्गान्निर्गतश्चिरेणैव देहं प्राप्नोतीति पूर्वपक्षप्रतिज्ञाया नातिचिरेणेति सूत्रांशेन ज्ञापितत्वात्तमप्रदर्श्य तद्धेतुं दर्शयति- **बहुस्थानेति** ॥ गमनं प्राप्तिः । तेन च तच्छ्रवणमुपलक्ष्यते । तथा च 'यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति' (छा.५.१०.५) इत्यादौ कर्मिणो बहुस्थानप्राप्तिश्रवणादित्यर्थः । बहुस्थानगमनं च नाचिरेण सम्भवति । तत्र तत्र तत्स्वाभाव्येनातिमहासुखे च सम्भवति तद्विहायागमने प्रयोजनाभावात् । अतस्तदन्यथानुपपत्त्याऽगतौ विलम्बोऽङ्गीकार्य इति भावः । तावता स्वर्गादागमने विलम्बः कुत इत्यत आह- **कल्पान्तमिति** ॥ ब्रह्मकल्पपर्यन्तमित्यर्थः । 'एवं' तत्तद्देवतास्वाभाव्यं 'स्यात्' असकृदनुष्ठितयज्ञस्य मध्ये मार्गमितिभावः । सदेत्यनुक्त्वा कल्पान्तमित्यवध्युक्तिः कल्पावसाने देवानां पदपर्यवसानादित्यभिप्रायेण ॥

अत आह –

सू— ॐ ॥ नातिचिरेण विशेषात् ॥ ॐ ॥ २५ ॥

'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्यन्ते' (छा.५-१०-७) इति विशेषान्नातिचिरेण ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे– **अत इति ॥ विशेषादिति ॥** कालसामीप्यबोधकविशेषश्रुतेरित्यर्थः । सौत्रप्रतिज्ञामनुकरोति– **नेति ॥** कर्मी स्वर्गान्न चिरेणेमं लोकमागच्छति, किन्त्वचिरेणैव । तर्हि बहुस्थानगमनविरोध इति न वाच्यम् । यतः कल्पान्तरूपातिचिरेण गमनाभावेऽपि बहुस्थानप्राप्तिप्रयुक्तचिरगमनमस्त्येवेत्याशयेन– **अतीत्याह ॥** व्याख्यातेयं श्रुतिश्चरणनये ।

'स्वर्गाल्लोकादवाक्प्राप्तो वत्सरात्पूर्वमेव तु ।
मानुश्शरीरमाप्नोति पर्यटन् यत्र तत्र च ॥'
इति च नारदीये ॥ २५ ॥

ननु 'अभ्याशो ह' (छा.५-१०-७) इति श्रुतिर्न निर्णायिका, कल्पान्तकालस्यापि ततोऽधिककालापेक्षया समीपत्वादित्यतः श्रुत्यर्थनिर्णयाय स्मृतिमुदाहरति– **स्वर्गादिति ॥** 'अवाक्' अधोदेशं प्राप्तः 'वत्सरात्' संवत्सरात्तत्समाप्तेः पूर्वमेव, न त्वधिककालमित्येवशब्दार्थः । तुशब्दः संवत्सरे मानुषत्वरूपविशेषद्योतकः । 'यत्र तत्र च' यत्र कुत्र चेत्यर्थः । अनेकस्थानेष्विति यावत् । 'पर्यटन्' सञ्चरन् । 'इति च' इति चशब्दो 'नारदीये च' इति सम्बध्यते । न केवलं श्रुतिवचनात्, किन्तु नारदीये पुराणे उक्तमित्यर्थः ।

॥ इति नातिचिरेणाधिकरणम् ॥ १७ ॥

॥ १८. अन्याधिकरणम् ॥

(कर्मिणां स्वर्गादवरोहणे दुःखानुभवः नास्ति)

'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' (छा.५-१०-६) इति श्रवणादनर्थफलत्वं यज्ञादेरिति ।

अत्राधिकरणे कर्मिणां व्रीह्यादिभावनिमित्तकदुःखाभावः प्रतिपाद्यते । पूर्वपक्षयति– **त इति ॥ इतीति ॥** एवंरूपछन्दोगश्रुतेरित्यर्थः । 'अनर्थफलत्वं'

दुःखफलकत्वमेव 'यज्ञादेः' 'अन्ततः प्राप्नोति' इति शेषः । अत्र श्रुतिर्न दुःखफलकत्वे साक्षाद्धेतुः, किन्तु स्वावगतव्रीह्यादिभावकृतच्छेदनादिनिमित्तेन योनिप्रवेशप्राक्कालीनस्थावरजातिनिमित्तेन वेति द्रष्टव्यम् । तथा च सुख-साधनतया वेदोक्तस्यापि कर्मणो दुःखसाधनत्वे मोक्षसाधनत्वेनोपदिष्ट-वैराग्यादावपि विश्वासाभावादननुष्ठेयत्वं तस्येति भावः । 'ते' भुक्तपुण्याः कर्मिणः स्वर्गादागच्छन्तो मेघपर्यन्तेन पथा वर्षेण सहावनितलमापन्नाः 'इह' भूमौ केचिद् व्रीहियवाः केचिद्व्रीषधिवनस्पतयः केचित्तिलमाषाः 'जायन्ते' अन्यजीवाधिष्ठिते व्रीह्यादिशरीरे प्रविशन्तीत्यर्थः । इतिशब्दः आद्यर्थकः श्यामाकादिधान्योपलक्षणार्थकः ।

अतो वक्ति –

सू— ॐ ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ ॐ ॥ २६ ॥

अन्याधिष्ठिते व्रीह्यादिशरीरे प्रवेशः । न तु भोगोऽस्य । 'धूमो भूत्वाऽभ्रं भवति' (छा. ५-१०-५) इत्यादि-पूर्वोक्तिवत् ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- अत इति ॥ अन्येति ॥ अन्येन व्रीह्यादिशरीराभिमानिजीवेन भोक्तृतयाऽधिष्ठितव्रीह्यादिशरीरे इत्यर्थः । सूत्रेऽ-पेक्षितशेषं दर्शयति- प्रवेश इति ॥ सावधारणमेतत् । न त्वभिमानित्वमिति तदर्थः । 'श्रुतावुच्यते यतः' इति शेषः । अस्यातो मानाभावान्न कर्मिणो व्रीह्यादिभावो न वा तत्कृतदुःखमित्युपस्कृतवाक्येनान्वयः । ननु माभूदभि-मानित्वं कर्मिणः, तथापि व्रीह्यादिसहावस्थानेऽपि दुःखं स्यादित्यत आह– नत्विति ॥ 'अस्य' कर्मिणः । तुशब्दो भोगस्यानवसरप्राप्तत्वरूपविशेप-द्योतकः । यदि कर्मिणो व्रीह्यादिप्रवेश एव, न तद्भावः, तर्हि कथं सामानाधिकरण्यमित्यतस्तत्परिहारत्वेन पूर्ववदित्यंशं व्याचष्टे– धूम इति ॥

यथा तत्स्वाभाव्यापत्तिरिति पूर्वसूत्रे प्रकृता 'त इह' इत्युक्त्यपेक्षया पूर्वा 'धूमो भूत्वा' इत्यादिरूपोक्तिः धूमादिदेवतादेहप्रवेशेन स्थानैक्याद्यभिप्राया, तथा 'त इह व्रीहियवाः' इति सामानाधिकरणत्वोक्तिरपीत्यर्थः । **पूर्वोक्तवदिति** पाठे यथा धूमादिषु पूर्वोक्तेषु तद्भावोक्त्या प्रवेशादिः विवक्षित इति तत्त्व-प्रदीपोक्तार्थो द्रष्टव्यः ।

'सोऽवाग्गतः स्थावरान् प्रविश्याभोगेनैव व्रजन् स्थूलं शरीरमेति स्थूलाच्छरीराद्भोगाननुभुङ्क्ते' इत्यभिलापात् कौषारवश्रुतौ ।

ननु कर्मिणो व्रीह्यादिशरीरप्रवेश एव, न तु तदभिमतिकृततद्भावः । प्रवेशेऽपि न भोग इत्येतत्कुतो ज्ञायते, येन श्रुतेरर्थान्तरकल्पनेत्यतः प्रवृत्त-मभिलापादित्यंशं व्याचष्टे- **स इति** ॥ 'सः' कर्मी स्वर्गादवाग्गतः 'स्थावरान्' व्रीह्यादिरूपान् 'प्रविश्याभोगेनैव व्रजन्' इतरजीवेन सहावस्थानेऽपि दुःखाननुभवेन वर्तमानः पितृमातृद्वारा 'स्थूलं' मानुषादिशरीरमाप्नोति । 'स्थूलाच्छरीरात्' स्थूलशरीरेण 'भोगान्' भोग्यान् सुखादीननुभवतीत्यर्थः । अभिलापो वचनम् । कौषारवश्रुतौ 'इत्यभिलापात्' इत्यन्वयः । 'अभिलापात्' इत्यस्य चान्याधिष्ठिते प्रवेश एवेति प्रतिज्ञयाऽन्वयः ।

'स्वर्गादवाग्गतो देही व्रीह्यादीतरदेहगः ।
अभुञ्जंस्तु क्रमेणैव देहमाप्नोति कालतः ॥' इति वाराहे ॥ २६ ॥

अत्रार्थे स्मृतिं चाह - **स्वर्गादिति ॥ व्रीह्यादीति ॥** इतरस्य देहः इतरदेहः व्रीह्यादिरूपश्चासावितरदेहश्चेति स तथोक्तः । तत्र स्थित इत्यर्थः । **अभुञ्ज-न्निति ॥** सहावस्थानेऽपि तद्देहकृतदुःखमननुभवन्नित्यर्थः । 'कालतः' अल्प-कालेनैव 'क्रमेण' मातापितृक्रमेण 'देहं' स्थूलदेहमाप्नोतीत्यर्थः । 'अभुञ्ज-न्निति परस्मैपदमार्षम् वाराहे' इत्यस्याभिलापादित्यनेनान्वयः ।

सू— ॐ ॥ अशुद्धमिति चेन्न शब्दात् ॥ २७ ॥

हिंसारूपत्वात्पापस्यापि सम्भवाद्दुःखं च भवत्विति चेन्न, शब्दविहितत्वात् ।

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे- **अशुद्धमिति** ॥ 'हिंसारूपत्वात्' तद्युक्तत्वात् । 'यज्ञादिकर्मणः इति शेषः । 'पापस्य' इत्यतः 'प्राक् ततः' इति संयोज्यम् । न केवलं पुण्यस्येत्यपेरर्थः । 'दुःखं चे'त्यत्रापि 'ततः' इति वर्तते । 'न केवलं पापम्' इति चशब्दार्थः । अत्रोत्तरं प्रति पूर्वो हेतुतया योज्यः । अनेन यज्ञादिकर्म 'अशुद्धं' दुःखहेतुः । कुतः ? यतः 'अशुद्धं' पापापादकम् । तत्त्वमपि कुतः ? यतः 'अशुद्धं' हिंसारूपमिति पूर्वपक्षांश आवृत्त्या व्याख्यातः । परिहारांशं व्याचष्टे- **नेति** ॥ इदं चावर्तनीयम् । यज्ञादिकं न दुःखसाधनं, कुतः ? यतो न पापसाधनमिति । कुतो नेत्यत आह- **शब्देति** ॥ 'वायव्यं श्वेतमालभेत' (तै. सं. २-१-१) इत्यादि श्रुतिविहितत्वादित्यर्थः । अनेन सूत्रे 'शब्दात्' इत्यनन्तरं विहितत्वादिति शेषः कार्य इति सूचितम् । हिंसारूपत्वात्कथं न पापसाधनत्वमित्यतोऽप्याह- **शब्देति** ॥ तथाच अनुमानस्य निषिद्धत्वोपाधिदुष्टत्वमितिभावः ।

'हिंसा त्ववैदिका या तु तयाऽनर्थो ध्रुवं भवेत् ।
वेदोक्तया हिंसया तु नैवानर्थः कथञ्चन ॥'
इति वाराहे ॥ २७ ॥

स्मृतिविरोधं चाह - **हिंसेति** ॥ 'अवैदिका' वेदाविहिता । ङीबभाव आर्षः । 'ठकूठञ्ञ्यामन्यो वा प्रत्ययः' इति प्रमेयदीपोक्तिवत् । यद्वा - वैदिकाः शब्दाः अस्यां सन्ति ज्ञापका इति ' अर्शआदिभ्योऽच्', इति अचि कृते वैदिकेति भवति । न वैदिकाऽवैदिकेत्यर्थः । अथ वा– अय गताविति्यस्मात्कर्मणि घञ् ।

---

१. प्राकृत' इति मुद्रितपुस्तके ।

तथाच वैदिकशब्देराया वैदिकाया ततो नञ्समासः । अत्र च पक्षे तच्छब्द-बलाद्यच्छब्दलाभः । इदं च समाधानत्रयं 'विद्वद्रूढिर्वैदिका स्यात्' इत्येतत्सुधा-रित्या कृतम् । **अवैदिकीति पाठः स्वरसः** । 'तया' अवैदिकहिंसया 'अनर्थः' पापं दुःखं 'ध्रुवं' निश्चितं भवेत् । तुशब्दो विशेषार्थः । 'कथञ्चन' कमपि प्रकारं प्राप्तोऽल्पो वा महान् वा न भवेदिति यावत् । वाराहे 'उक्तम्' इति शेषः ॥

॥ इत्यन्याधिकरणम् ॥ १८ ॥

॥ १९. रेतोऽधिकरणम् ॥

(जीवः प्रथमतः पितृदेहं प्रविश्य अनन्तरं मातृयोनिं प्रविशति)

'स्वर्गादवाग्गतश्चापि मातुरेवोदरं व्रजेत् ।'
इति वचनात् 'य एव गृही भवति यो वा रेतस्सिञ्चति
तमेवानुविशति' इति श्रुतिः कथमिति ।

अत्राधिकरणे स्वर्गादवतीर्णस्य पितृप्रवेशः समर्थ्यते । तत्र रेतस्सिक्पद-सूचितं पूर्वपक्षं दर्शयति - **स्वर्गादिति** ॥ स्वर्गादवाग्गतो भूमिं प्रत्यागतश्चेति विशेषसमुच्चये चशब्दः । न केवलं स्वर्गादागतः कर्मी किन्तु नरकादपीत्य-पेरर्थः । एवकारः पूर्वपक्षे अन्ययोगव्यवच्छेदकः । सिद्धान्ते त्वयोगव्यवछेदकः । **इतीति** ॥ इति स्मृतिवचनादित्यर्थः । 'वचनात्' इत्यस्य 'न जीवस्य पितृ-प्रवेशोऽस्तीति ज्ञायते' इत्यध्याहृतप्रतिज्ञयाऽन्वयः । न चास्य पितृप्रवेश-श्रुतिविरोधः । वचनस्य युक्तिसाहित्येन बलवत्त्वादित्याह- **य एवेति** ॥ यद्यपीयं श्रुतिः शाखान्तरस्थत्वान्नोदाहर्तुमुचिता, किन्तु 'यो यो ह्यन्नमत्ति यो वा रेतः सिञ्चति तद्भूय एव भवति' (छां. ५-१०-६) इति छन्दोगश्रुति-रेवोदाहार्या स्यात्, 'त इह' (छां. ५-१०-६) इत्यादिवाक्येन सह एक-प्रकरणस्थत्वात् । तथापि 'इति श्रुतिश्च' इति चशब्देनास्या अपि समुच्चि-तत्वात् । श्रुत्यन्तरस्य स्पष्टार्थत्वाच्चोदाहरणं युक्तम् । अत एव तत्त्वप्रदीपे 'य एव गृही भवति यो वा रेतः सिञ्चति' इत्यादिश्रुतिः । 'यो यो ह्यन्नमत्ति यो वा

रेतः सिञ्चति' इत्यादिकया समानप्रकरणपठितया च सह कथं युज्यते' इत्युक्तम्। 'समानप्रकरणपठितया' इत्यस्य 'त इह' इत्यादिवाक्येन सहैक-प्रकरणपठितयेत्यर्थः। 'यः' पुरुषो 'गृहस्थाश्रमी भवति, यो वा रेतः सिञ्चति तं पितरमेव प्रविशति जीव इति श्रुत्यर्थः। **श्रुतिरिति** ॥ श्रुत्युक्ता पितृशरीर-प्राप्तिरित्यर्थः। 'कथम्' इत्याक्षेपे। किमर्था निष्प्रयोजनेत्यर्थः। अनेन स्मृतेः पितृप्रवेशे प्रयोजनाभावादिति युक्तियुक्तत्वेन प्राबल्यमुक्तं भवति। ननु श्रुतेर्युक्त्ययुक्तत्वेऽपि श्रुतित्वेन स्वभावतः प्रबलत्वात्साम्यमित्यतोऽप्याह- **श्रुतिः कथमिति** ॥ आक्षेपोऽयम्। 'प्रतीतार्थे प्रमाणम्' इति शेषः। कुत इत्यतोऽत्रापि 'इति वचनात्' वचनविरोधादित्युक्त एव हेतुर्योज्यः। तथा च श्रुतेरर्थान्तरपरतया सावकाशत्वेन दुर्बलत्वान्न तद्विरोधः स्मृतेरिति भावः। ननु सावकाशत्वं ममासिद्धमित्यतोऽप्याह- **श्रुतिः कथमिति** ॥ प्रश्नोऽयं, किमर्थेत्यर्थः। 'वचनात्' वचनविरोधादित्यत्रापि सम्बध्यते। तथा च श्रुतिर्यत उक्तवचनविरुद्धाऽतः प्रतीतार्थायोगादर्थान्तर-स्यावश्यंभावात्किमर्था श्रुतिः श्रुत्यर्थः क इति सिद्धान्तिनं प्रति वादिना पृष्टे तदा तेनापि श्रुतेरर्थान्तरमेव वक्तव्यम्, न प्रतीतार्थ एवाग्रहः कार्य इति नासिद्धिरिति भावः। 'हि' यतः 'अन्नम्' अद्यमत्ति अत एव यो वै रेतः सिञ्चति अतस्तद्भूय एव भवति तद्भाव एव तन्मयो वा भवति। अद्यमानान्नानुगतः कर्मी 'तमेव' रेतस्सिचमेव पुरुषं प्रविशतीति श्रुत्यर्थः।

अत आह –

सू— ॐ ॥ रेतस्सिग्योगोऽथ ॥ ॐ ॥ २८ ॥

'ततो रेतस्सिचमेवानुप्रविशत्यथ मातरमथ प्रसूयते स कर्म कुरुते' इति कौण्ठरव्यश्रुतेः पितरमेव प्रथमतः प्रविशति। मातृप्राप्तेः पश्चादपि भाव्यत्वात् ॥ २८ ॥

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ 'श्रुतेः इत्यनेन 'पूर्वस्माच्छब्दात्' इत्यनुवर्तनीयमिति सूचितम् । 'पितरं प्रविशति' इत्यनेन रेतःसिग्योग इति पदं व्याख्यातम् । सूत्रे 'पितृयोग इत्यनुक्त्वा रेतस्सिग्योगः' इत्युक्तिः शरीरपरिणामाय रेतसोऽपेक्षितत्वात्तस्य च सेचकपुरुषं विनाऽयोगात् पितुरेवानुपयोग इति चोद्यानवकाश इति ज्ञापनाय पितृप्रवेशस्त्वीशकृप्तत्वान्न व्यर्थ इति भावः । पितरमेवेत्यनेन रेतस्सिक्पदं सावधारणमिति सूचितम् । 'प्रथमतः' इति सूत्रे शेषोक्तिः । एवकारोऽन्यप्रवेशस्य प्राथम्यव्यवच्छेदकः । श्रुत्यर्थस्तु - स इत्यस्याकर्षणेन अन्नशब्दस्य चाध्याहारेण 'सः' व्रीह्यादिस्थो जीवः 'ततः' 'अथान्नेन सह पितरमेव प्रविशति' इति तत्त्वप्रदीपोक्तो बोध्यः । 'अयं' पितृप्रवेशानन्तरं 'प्रसूयते' उत्पद्यते । एवं चेत् मातुरेवोदरं व्रजेत्' इति वचनमप्रमाणं प्राप्तमित्यत आह- **अथेति** ॥ तद्व्याख्यानं- **मात्रिति** ॥ अपिः मातृप्राप्तेः प्रथममभावेऽपीत्यर्थे । तथा च 'मातृप्राप्तेः' प्रथममभावेऽपि 'पश्चात्' पितृप्रवेशानन्तरं 'भाव्यत्वात्' विद्यमानत्वादित्यर्थः । अनेन सूत्रे 'अथ' इत्यनन्तरं 'मातृप्राप्तिः' इति शेषः सूचितः । तथा च स्मृतेः पश्चात्तनविषयत्वात् नाप्रामाण्यं न वा तद्विरोधः श्रुतेः । स्मृतेः सावकाशत्वादिति भावः । स्मृतिगतैवकारस्तु व्रजेदेवेत्यन्वितोऽयोगव्यवच्छेदकः । अन्ययोगव्यवच्छेदकत्वेऽप्यास्तिकादिविशेषविषयम् । उक्तं हि तत्त्वप्रदीपे- **मातुरेवङ्गतः** ॥ अतश्चैतदाह- 'स्वर्गादवाग्गतो देही मातुरेवोदरं व्रजेत्' इतीति ।

॥ इति रेतोऽधिकरणम् ॥ १९ ॥

॥ २०. योन्यधिकरणम् ॥

('योनिप्रवेशानन्तरं शरीरप्राप्तिः' इत्येतद् औत्सर्गिकम्)

'देहं गर्भस्थितं कापि प्रविशेत्स्वर्गतो गतः ।'
इति वचनात्पश्चादेव प्रविशतीति ।

अत्राधिकरणे जीवस्य पितृद्वारा योनिं प्रविश्य शरीरप्राप्तिः समर्थ्यते ।

पूर्वपक्षयति- **देहमिति** ॥ कर्मी 'रेतो रक्तसंयोगात्पश्चात्' मातृयोनौ पित्रा सिक्तस्य रेतसो रक्तसंयुक्तस्य देहाकारेण परिणामानन्तरमेव मातृगर्भस्थं पूर्वसिद्धं देहमन्त्रादिद्वारेण प्रविशतीत्यर्थः । न तु पितृशरीराद्रेतसा सह योनिद्वारा मातृशरीरं प्रविश्याथ तत्र देहं प्राप्नोतीति नियम इत्येवकारार्थः । अनेन पूर्वपक्षे योनिप्रवेशो न विद्यते, व्यर्थश्च योनिप्रवेशः, पितृप्रवेशोऽप्ययुक्तः, शरीरप्राप्तिरप्यनुपपन्नेत्यनेकप्रतिज्ञा सूचिता । सर्वत्रापि 'देहं गर्भस्थितं कापि' इति वचनादिति हेतुर्योज्यः । तद्वचनस्य स्वर्गाद्भूमिं गतो जीवः पितृगर्भस्थितं पितुः सकाशात्संस्पर्शद्वारेण मातुरुदरस्थगर्भस्थितं वा प्रागसिद्धशरीरं 'कापि' कचिन्मातृस्थरेतसैव परिणतं मातृगर्भस्थितं वा प्राक्सिद्धशरीरं मात्रुपभुक्तान्नादिद्वारेण पितुर्मातुरुदरस्थगर्भस्थितं वा प्रागसिद्धशरीरं प्रविशेदिति व्याख्यानेनोक्तसाध्यचतुष्टयेऽपि हेतुबोधकता द्रष्टव्या ।

अत आह–

सू— ॐ ॥ योनेः शरीम् ॥ ॐ ॥ २९ ॥

पितृशरीरान्मातृयोनिमनुप्रविश्य तत एव शरीरमाप्नोति ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे - **अत इति** ॥ पितृशब्दो रेतस्सिक्परः । अनेन सौत्रो योनिशब्दो बीजपुरुषाद्युपलक्षक इति सूचितम्। 'पितृशरीरात्' इति ल्यब्लोपनिमित्ता पञ्चमी । 'प्रथमतः' इति शेषः । 'योनिमनुप्रविश्य' इत्यनेन सौत्री पञ्चमी ल्यब्लोपनिमित्तेति ज्ञापितम् । 'ततः' अनन्तरम् । अनेन सूत्रेऽथशब्दानुवृत्तिस्सूचिता । एवकारो भिन्नक्रमः । तथा च स्वर्गादवाग्गतो जीवो वृष्टिद्वारा व्रीह्यादिबीजेषु सङ्क्रान्तो रेतस्सिक्पुरुषस्य शरीरं प्रविश्यैव अथ ततो रेतसा सह मातृयोनिद्वारा तदुदरमनुप्रविश्य ततस्तत्रैव प्रागसिद्ध कललबुद्बुदादिक्रमेणोत्पन्न शरीरं प्राप्नोति, न तूक्तक्रमातिक्रमेणेति सावधारणप्रतिज्ञार्थः ।

'दिवः स्थास्नून् गच्छति स्थास्नुभ्यः पितरं पितुर्मातरं मातुः शरीरं शरीरेण जायत इति सम्मितम् । अथासम्मितं स्थास्नुभ्यो जायते पितुर्मातुरन्तरे वा गर्भे वा बहिर्वा' इति पौष्यायणश्रुतेः ।

यथोक्तं सुधायाम्- नैतद्युक्तमप्रामाणिकत्वादिति । अतोऽत्र प्रमाणमाह- **दिव इति** ॥ 'दिवः' स्वर्गाद्भूमिं प्रत्यागतो जीवः 'स्थास्नून्' स्थावराणि व्रीह्यादिशरीराणि 'गच्छति' प्राप्नोति । स्थास्नुभ्यः पितरं गच्छति । पितृसकाशात् यौनिद्वारा मातरं गच्छति । मातुस्सकाशाच्छरीरं 'प्रागसिद्धं गच्छति । ततः शरीरेण युक्तो जायत इत्येवं 'सम्मितं' विद्यातप आदिविशेषकारणमन्तरेण साधारणं जन्मोक्तमित्यर्थः । सूत्रेऽनुवृत्तस्याथशब्दस्य योनेःशरीरमापद्यते नापद्यते च क्वचिदित्यर्थान्तरार्थत्वमभिप्रेत्य तत्र प्रमाणमाह- **अथेति** ॥ अथान्यत् 'असम्मितं' तपोज्ञानादिविशेषकारणकमुत्तममुत्तमाधिकारिभिरेव लभ्यमसाधारणं जन्मेत्यर्थः । 'इति सम्मितम्' इत्यादिशेषवाक्योदाहरणेन 'देहं गर्भस्थितम्' इत्यादि प्रागुदाहृतवचनस्य साधारणजन्मविषयत्वेन गतिरुक्ता भवति । 'स्थास्नुभ्यः स्थावरेभ्यः । 'कश्चिज्जीवः' इति शेषः । यथा शुकादिः अरण्यादेः । 'पितुः जायते कश्चित्, यथा मान्धातृप्रमुखाः । 'मातुः' जायते, यथा जरत्कार्वाद्यनुग्रहादास्तिकादिः । 'अन्तरे' स्थानन्तरे, यथा धृष्टद्युम्नादिरग्नौ । यद्वा - 'अन्तरे' मातापित्रोर्मध्ये अन्योन्यदर्शनमात्रेणेत्यर्थः । उदाहरणं तूक्तमेव । तत्त्वप्रदीपे तु 'अन्तरे द्रुपदादयः' इत्युक्तम् । 'गर्भे' पूर्वमेव सिद्धं शरीरं केचित्प्रविशन्ति यथा श्रीमध्वाचार्याद्याः । तदुक्तं मध्वविजये 'सम्पूर्णलक्षणचणम्' इत्यादिनेति केचिदाहुः । तच्च तत्त्वप्रदीपे तेषां बहिः प्रवेशात्त्या विरुद्धम् । अत एव तत्वप्रदीपे अत्यन्तविशिष्टविषयं बहिः प्रवेशवचनमवगम्यत इत्युक्तम् । अत्यन्तविशिष्टास्तु ऋजव एव । न च

---

१. 'प्रक्सिद्धमिति मातृकायाम् ।

टीकायां 'बहिर्द्रुपदादयः' इत्युक्तिविरोधः। तस्याः पितृमात्रपेक्षया मातुरुदराद् बहिरित्यर्थाश्रयेण प्रवृत्तत्वात्। तत्त्वप्रदीपस्य च मातापित्रुभयबहिर्गतोभय-निरपेक्षदेहविषयत्वात्। यथोक्तं तत्त्वप्रदीपे- सञ्जाते शरीरे प्रवेष्टुर्गर्भवासप्रसू-त्यादिदुःखग्रामलेशस्पर्शाद्विनैव' यथाकामं देहग्रहणसम्भवात्तस्य च जन्म-भाजामतिदुर्लभत्वादतो नारायणपरायणस्य कस्यचित् तत्प्रसादसामग्री-समुद्भूतप्रभावस्यैव तत्सुलभमुपलभामहे। स्वयं चावोचत् 'बीजपूरुष-योनीनाम्' इत्यादि। तद्बहिर्निर्गतशरीरप्रवेशेन जननमित्यर्थः। तस्मात् ऋजु-व्यतिरिक्ता एव गर्भ इत्यत्रोदाहरणीयाः। अत एव टीकायां 'गर्भे पूर्वसिद्धशरीरं केचित्' इति सामान्येनोक्तं, न त्वाचार्या इति। तस्माद्गर्भ इत्येतत् ऋजु-व्यतिरिक्तजीवविषयं, बहिरित्येतत् ऋजुविषयमिति विवेको द्रष्टव्यः। 'श्रुतेः' इत्यस्य पितृशरीरादिति प्रतिज्ञयाऽन्वयः।

'स्थावराणि दिवः प्राप्तः स्थावरेभ्यश्च पूरुषम्।
पुरुषात् स्त्रियमापन्नस्ततो देहं यथाक्रमम्॥
देहेन जायते जन्तुरिति सामान्यतो जनिः।
विशेषजननं चापि प्रोच्यमानं निबोध मे॥
स्थास्नुष्वथापि पुरुषे प्रमदायामथापि वा।
गर्भे वा बहिरेवाथ क्वचित्स्थानान्तरेषु च॥'
इति ब्राह्मे॥ २९॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये तृतीयाध्यायस्य प्रथमः पादः॥

श्रुत्यर्थनिर्णयायात्र स्मृतिं चाह- **स्थावराणीति॥** 'जन्तुः' कर्मी जीवः' 'दिवः' स्वर्गात् 'स्थावराणि' व्रीह्यादीनि प्राप्तो भवतीत्यन्वयः। एवमुत्तरत्रापि 'यथाक्रमम्' उक्तक्रममनतिक्रम्य 'देहेन' तद्विशिष्टः 'सामान्यतः' साधा-

रणम् । 'विशेषजननम्' असाधारणं जन्म 'प्रोच्यमानं' प्रवक्ष्यमाणं 'मे' सकाशान्मयेति वा 'निबोध' जानीहि । 'प्रमदायां' भार्यायां जरत्कार्वादौ । स्थास्नुष्वित्यादेरुदाहरणानि तु पूर्वोक्तान्येव द्रष्टव्यानि । 'ब्राह्मे' 'उक्तत्वात्' इति शेषः । अस्यापि 'पितृशरीरात्' इति प्रतिज्ञयाऽन्वयः ।

॥ इति योन्यधिकरणम् ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां तृतीयाध्यायस्य प्रथमः पादः ॥

॥ अथ द्वितीयः पादः ॥

॥ १. सन्ध्याधिकरणम् ॥

(अर्थज्ञानोभयात्मकः स्वप्नः सत्य एव)

भक्तिरस्मिन् पाद उच्यते । भक्त्यर्थं भगवन्महिमोक्तिः ।

सू— ॐ ॥ सन्ध्ये सृष्टिराह हि ॥ ॐ ॥ १ ॥

न स्वप्नोऽपि तं विना प्रतीयते ।

एतत्पादप्रतिपाद्यं दर्शयति– **भक्तिरिति** ॥ यद्दाढ्यार्थं वैराग्यं निरूपितं पूर्वपादे, या चोपासनस्याङ्गं भक्तिरवसरप्राप्ता 'अस्मिन्' तृतीयस्य द्वितीयपादे 'उच्यते' निरूप्यत इत्यर्थः । ननु भक्तिरुच्यत इति कोऽर्थः ? किं तत्स्वरूपं निरूप्यते ? उत तत्कर्तव्यता विधीयते ? । नाद्योऽनुपलम्भात् । न द्वितीयः, स्नेहरूपायास्तस्याः पुरुषप्रयत्नायोग्यत्वेन तत्कर्तव्यताविधेरयोगादित्यत आह- **भक्त्यर्थमिति** ॥ माहात्म्यज्ञानपूर्वकस्नेहो भक्तिः, तदुपपादनार्थमित्यर्थः । तथा च 'भक्तिरुच्यत' इत्यस्य भक्त्यैकदेशोपायज्ञानविषयमाहात्म्यमुच्यत इति वा, भक्त्यैकदेशोत्पादनार्थं माहात्म्यमुच्यत इति वाऽर्थाश्रयणान्नानुपपत्तिरिति भावः । ननु सर्वस्यापि माहात्म्यस्य प्रथमाध्याय एवोक्तत्वात् कथमत्रोक्तिरिति । सत्यम्, 'उक्ति'रित्यस्य क्वचिद्विवेचनं क्वचित्समर्थनमित्यर्थाश्रयणात् । 'क्रियते' इति शेषः । अत्राधिकरणे भगवत्प्राप्तिसाधनभक्त्यर्थमर्थज्ञानात्मकस्य स्वाप्नप्रपञ्चस्य भगवदधीनत्वमहिमा वर्ण्यते । मरुमरीचिकाजलादिवत्प्रातीतिकत्वेनासत्त्वान्न स्वप्नविषयस्येश्वराधीनत्वमिति न तस्य महामहिमत्वमिति प्राप्ते सिद्धान्तयत्सूत्रं पठित्वा अधिकरणतात्पर्यं तावदाह- **सन्ध्य इति** ॥ 'स्वप्न' इत्यनेन जाग्रत्सुषुप्तिसन्धौ भवं सन्ध्यं स्वप्न इति सन्ध्यशब्दो व्याख्यातः । अपीत्यनेनोत्तरसूत्राच्चशब्दस्यानुकर्षः सूचितः । न केवलं जाग्रदादिप्रतीतिः किन्तु स्वप्नोऽपीत्यपि शब्दार्थः । 'तं' प्रस्तुतं

परमात्मानमेवेति। अनेन सूत्रे 'परमात्मन एव' इति शेषो दर्शितः। 'प्रतीयते' इत्यनेन सृष्टिशब्दो व्याख्यातः। यथोक्तं **तत्त्वप्रदीपे**- तत्प्रत्यायनस्यैव सृष्टित्वात् सृष्टिशब्दः प्रतीयत इति व्याख्यात इति। तथा च न केवलं जाग्रदादिप्रतीतिः, किन्तु स्वप्नोऽपि तं विना न प्रतीयते इति योजना। अनेन न केवलं जाग्रदादिप्रतीतिः, किन्तु 'सन्ध्ये' तद्विषये 'सृष्टिः' प्रतीतिश्च स्वप्नोऽपीति यावत्, परमात्मनस्सकाशादेव भवति, 'न तं विना' तदधीनैवेति परमसाध्यं दर्शितं भवति।

'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ.६-३-१०) इत्यादिश्रुतेः ॥१॥

ननु न स्वप्नस्य भगवदधीनत्वं युक्तम्। 'पश्चादद्दृष्टेः' इत्यतस्तत्परिहारत्वेन आवृत्त्या अन्वितस्य सन्ध्ये सृष्टिर्हीत्यंशस्य 'हि' यतः सन्ध्ये प्रागसतां पदार्थानां परमात्मनः सृष्टिर्निरोधश्चाङ्गीक्रियते, अतो नोक्तदोष इत्यर्थमभिप्रेत्यास्या- प्रामाणिकत्वशङ्कापरिहारकतया प्रवृत्तं 'सृष्टिमाह हि' इति सूत्रांशं व्याचष्टे- **नेति** ॥ 'श्रुतेरित्यनेन हिशब्दो वचनकर्तुः शब्दस्य हेतुत्वसूचकतया व्याख्यातः। तस्यावृत्तिरपि सूचिता। आदिशब्देन 'न तत्रानन्दा मुदः प्रमुदो भवन्ति। अथानन्दान्मुदः प्रमुदः सृजते। न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्ताः पुष्करिण्यः स्रवन्त्यः सृजते स हि सर्वस्य कर्ता (बृ.६-३-१०) इति समग्रवाक्यं निरोधवाक्यं च गृह्यते। बृहदारण्यकश्रुतिरियम्। 'तत्र' स्वप्नावस्थायां अन्तरिक्षे स्वर्गे मोक्षे वा 'रथा न भवन्ति' पूर्वं नासन्'। रथैर्युज्यन्त इति रथयोगा अश्वादयश्च पुरा नासन्। तथा 'पन्थानो' मार्गाश्च न प्रागासन्। किन्तु तदैव स आत्मा तत्तत्कर्मानुसारेण रथान् रथयोगान् पथश्च सृजते। तथा आनन्दमुत्प्रमुदः सुखविशेषा न प्राक्स्थिताः, तांश्च सृजते। वेश्यायै दीयमानं वेशं तत्सम्बन्धिनी वेश्यापि वेशेत्युच्यते। तस्या अन्तः प्रवेश्या गृहाः 'अन्तस्स्थानं स्थलं वासः' इति वचनात्। 'पुष्करिण्यः' सरांसि

'स्रवन्त्यः' नद्यस्ताश्च सृजते। न केवलं स्वाप्नादीनामेव कर्ता स परमात्मा, किन्तु सर्वस्य जगतोऽपि हीति श्रुत्यर्थः।

सू— ॐ ॥ निर्मातारं चैके पुत्रादयश्च ॥ ॐ ॥ २ ॥

'य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' (कठ. ५-८.) इति च। 'एतस्माद्धयेव पुत्रो जायते एतास्माद्भातैतस्माद्भार्या यदैनं पुरुषमेष स्वप्नेनाभिहन्ति' इति गौपवनश्रुतिश्च ॥ २ ॥

ननु कर्तुरभावान्न स्वप्नकालीनसृष्टिर्युक्ता। न हि जीवस्तत्कर्ता। सुप्तत्वात्तस्य नापीश्वरः। तत्प्रमाणाभावात्। न च पक्षद्वयेऽपि सृष्टिरुपपन्ना। तत्काल एवोत्पत्तिविनाशकर्तुरदर्शनादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य तत्सूचितश्रुतीरुदाहरति- **निर्मातारमिति ॥** 'इति च' इत्यस्य इत्येके शाखिनः ईश्वरं निर्मातारं सन्ध्यकर्तारं आहुरिति सौत्रपदेनान्वयः। चशब्दः 'आह हि' इत्युक्तप्रमाणसमुच्चयार्थः। 'यतः' इत्यर्थे वा। 'अतो नेश्वरस्य स्वप्नकर्तृत्वे प्रमाणाभावः' इति वाक्यशेषः। 'यः' पुरुषः पूर्णषड्गुणः पुरि शयो वा 'एषु' जीवेषु सुप्तेषु सत्सु, तदा 'कामं' स्वेच्छानुसारेण 'कामं' काम्यं स्वाप्नरथादीन् निर्मिमाणो जागर्ति, तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते (कठ. ५-८) 'शुक्रं' शोकरहितं 'ब्रह्म' पूर्णं 'अमृतं' नित्यमुक्तमित्युच्यते इति कठश्रुत्यर्थः। 'गौपवनश्रुतिश्च' इत्यनन्तरम् 'ईश्वरं सन्ध्यकर्तारमाह' इति शेषः। अनेन निर्मेयभूताः स्वाप्नपुत्रादयो हरेरेव जायन्ते इति 'एके शाखिनो' गौपवनाः स्पष्टं 'एतस्मात्' इत्यादिना आहुरित्यध्याहारावृत्तिभ्यां पुत्रादयश्चेत्यस्यान्वय उक्तः। यदा 'एनं पुरुषं' जीवम् 'एषः' परमात्मा 'स्वप्नेनाभिहन्ति' संयोजयति तदा स्वप्नावस्थायाम् एतस्माद्धरेरेव पुत्रादयश्च स्वाप्ना जायन्ते। हि प्रसिद्धमिति श्रुत्यर्थः।

केन साधनेन ?

सू—

ॐ ॥ मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॥ ॐ ॥ ३ ॥

अनादिमनोगतान् संस्कारान् स्वेच्छामात्रेण प्रदर्शयति । नान्येन साधनेन । सम्यगनभिव्यक्तत्वात् ।

उपादाननिमित्तयोरभावात्स्वाप्नसृष्टिरनुपपन्नेत्याक्षिपति- **केनेति** ॥ 'सन्ध्ये सृष्टिः' इत्यनुवर्तते । तथा च साधनाभावान्न सन्ध्ये सृष्टिर्युक्तेत्यर्थः । एतदाक्षेप-परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **मायेति** ॥ **अनादीति** ॥ अनादिभूतं यन्मनस्त्रिगुणात्मकं तद्गतान् तदुपादानकान् 'संस्कारान्' पूर्वानुभूतवस्तु-विषयकान् वासनाख्यसंस्कारान् उपादानीकृत्य **'स्वेच्छामात्रेण'** निमित्त-भूतया स्वेच्छयैव, न तु परापेक्षया मनसा 'प्रदर्शयति' सन्ध्यमीश्वरो जीवायेति योजना । स्वाप्नशिरश्छेदादीनामसत्त्वपरिहाराय अनादिमनोग्रहणम् । तेषामपि इह जन्मनि जन्मान्तरे वा कदाचिदनुभवसम्भवेन तज्जन्यसंस्कारस्यापि अनादिमनसि स्थितिसम्भवादिति भावः । 'संस्कारान्' इत्यनेन जैवप्रज्ञापरतया मायाशब्दार्थो व्याख्यातः ।

'त्रिगुणात्मिकाऽथ ज्ञानं च विष्णुशक्तिस्तथैव च ।
मायाशब्देन भण्यन्ते शब्दतत्त्वार्थवेदिभिः ॥'

इति वचनात् । स्वेच्छयेति मायाशब्दस्यार्थान्तरोक्तिः ।

'महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते ॥'[१]

इतिवचनात् । अनेन मायाभ्यां निर्मितं मायामात्रमिति विग्रहस्सूचितः ।

---

१. तत्त्व.नि. p. 111, VMSP Edition, Vol. VII

'मनसा प्रदर्शयति' इत्यनेन यथा घटादीनां मृदादिभिः सृष्टिश्चक्षुरादिभिः प्रदर्शनं नात्र तथा, किन्तु मनसैव तदुभयमिति सूचितम् । प्रेत्यनेन सन्ध्यस्येश्वरकर्तृकत्वेनाबाधितप्रमाविषयत्वात्सत्यत्वमेवेति सूचितम् । 'कुतोऽस्य वासनामयत्वं, बाह्यकारणकत्वं किं न स्यादित्याशङ्कोत्तरत्वेन प्रवृत्तं तुशब्दमवधारणार्थमभिप्रेत्य तस्य बुद्ध्या विविक्तमायाशब्दार्थेनान्वयं प्रदर्श्य तद्व्यावर्त्यं च दर्शयति- **नेति** ॥ आन्तरवासनादन्येन 'साधनेन' मृदादिरूपबाह्यकारणेन न प्रदर्शयति न तदुपादानीकृत्य सन्ध्यं सृजतीत्यर्थः । कुतो नेत्यतस्तत्र हेतुत्वेन कात्स्न्र्येनेत्यंशं योजयति- **सम्यगिति** ॥ जागरितार्थवत् स्वाप्नानां सम्यगभिव्यक्तिरहितस्वरूपत्वादित्यर्थः । अनेन सन्ध्यं 'मायामात्रं तु' मायाभ्यामेव निर्मितं, न बाह्यकारणकम् । कुतः 'कात्स्न्र्येन' सम्यगनभिव्यक्तस्वरूपत्वात् । यत एवमतो नोपादानाद्यभावेन सन्ध्यस्य सृष्ट्यभावः शङ्कच इति सूत्रयोजना दर्शिता भवति ।

ब्रह्माण्डे च –

'मनोगतांस्तु संस्कारान् स्वेच्छया परमेश्वरः ।
प्रदर्शयति जीवाय स स्वप्न इति गीयते ॥
यदन्यथात्वं जाग्रत्वं सा भ्रान्तिस्तत्र तत्कृता ।
अनभिव्यक्तरूपत्वान्नान्यसाधनजं भवेत् ॥' इति ॥३॥

सूत्रार्थे स्मृतिसम्मतिं च दर्शयति- **ब्रह्माण्डे चेति** ॥ अवधारणार्थस्तुशब्दः 'स्वेच्छया' इत्यनेन सम्बध्यते । तेन बाह्यसाधनव्यावृत्तिः । 'संस्कारान्' तदुपादानकार्थान् तानुपादानीकृत्य स्वनिर्मितं सन्ध्यमिति शेषो वा । **स इति** ॥ यत्प्रदर्शनं यत्प्रयोज्यज्ञानमर्थश्च स इत्यर्थः । ननु स्वप्नोत्थितस्याविद्यमानानेव करितुरगादीनहमपश्यमित्यनुभावात् कथमुत्पत्तिस्स्वाप्नस्योच्यत इत्यत आह- **यदिति** ॥ तत्र स्वाप्नपदार्थेषु 'यज्जाग्रत्वं अहं जाग्रत् जाग्रदिदमिति प्रतीतं यज्जाग्रत्वजागरानुभूतपदार्थैरकत्वं घटादीनां मृदाद्युपादानकत्वं जलाहरणा-

द्यर्थक्रियाकारित्वं चेत्यादि तस्य यतोऽन्यथात्वं बाध्यत्वं 'तदन्यथात्वम्' अन्यथा बाध्यमिति केचित्। अतस्तत्प्रतीतिरेव भ्रान्तिर्न स्वप्नप्रतीतिः। न च जाग्रत्त्वप्रतीतेः भ्रान्तित्वे मानाभाव इत्यतो विषयान्यथात्वमेव तत्र मानम्, न पृथङ्मानं गवेषणीयमित्याह- **सा च तत्कृतेति**॥ 'सा' भ्रान्तिता अन्यथात्व-हेतुकृतेत्यर्थः। यद्वा - भ्रान्तिकारणाभावान्न तदुत्पत्तिसम्भव इत्यत आह- **सा च तत्कृता ईश्वरकृतेति**॥ अन्यकारणकत्वाभावे अनभिव्यक्तस्वरूपत्वादिति हेतुः। 'सम्यग्' इत्यादौ योज्यम्। 'सन्ध्यम्' इति शेषः। 'इति' ब्रह्माण्डे 'उक्तम्' इति शेषः। न केवलं सूत्रकृतेति चार्थः।

सू—

ॐ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः॥ ॐ॥ ४॥

साधनानन्तराभावेऽपि भावाभावसूचकत्वेनेश्वरो दर्शयति॥

ननु अनादिसत्यताशून्यानां स्वाप्नानां बाह्यार्थजन्यत्वाभावाच्छुक्ति-रजतादिवदसत्त्वं स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे-**सूचकश्चेति**॥ 'साधनान्तराभावेऽपि' बाह्यकारणजन्यत्वाभावेऽपीत्यर्थः। अनेन वक्ष्य-माणानुमाने उपाधिशङ्का निरस्ता। परोक्तहेतोरप्रयोजकत्वं चोक्तं भवति। अपिः यद्यपि तथापीत्यर्थे। अनेन सौत्राद्यश्चशब्दो व्याख्यातः। 'स्वाप्नानां न सत्त्वहानिरिति शेषः। कुत इत्यत आह- '**भावाभावसूचकत्वेन**' शुभाशुभ-सूचकत्वेन हेतुनेति। 'सन्ध्यस्य' इति शेषः। अनेन सन्ध्यः सन्नेव नासन्, कुतः? यतो भावभावसूचकः। न ह्यविद्यमानं शाकुनं कस्यचित्सूचकं भवति। न च बाह्यार्थजन्यत्वमुपाधिः। तदभावेऽपि सन्ध्यस्य शुभाशुभसूचकत्वेन सत्त्व-स्यैव निश्चिततया साध्याव्यापकत्वेन तदभावेनासत्त्वसाधनायोगात्। किञ्च-यतः ईश्वरः सन्ध्यं जीवस्य 'दर्शयति' ज्ञापयति। अतोऽपि नासन्। न हीश्वरेण सम्यक्प्रदर्शितस्यासत्त्वं शङ्कार्हम्। न च प्रदर्शनेन प्रयोजनाभावः, यतस्सन्ध्यं भावाभावसूचकत्वेन शुभाशुभसूचनाय दर्शयत्यत इति सूत्रखण्डो व्याख्यातः।

'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेऽभिपश्यति ।
समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने ॥'(छा.५-२-१)
इत्यादिश्रुतेः । हिशब्दाद्दर्शनाच्च ।

स्वाप्नपदार्थानां भावाभावसूचकत्वमेव कुत इत्यतः प्रवृत्तं 'श्रुतेः' इत्यंशं व्याचष्टे - **यदेति** ॥ छन्दोगश्रुतिरियम् । आदिशब्देन 'पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति ..... मर्कट एनं हन्ति' (ऐ.आ.३-२-४) इत्यैतरेयादिश्रुतिर्गृह्यते । 'श्रुतेः' इत्यस्य 'सूचकः' इति साध्येनान्वयः । अत्रैव प्रमाणान्तरपरतया हिशब्दं योजयति- **हिशब्दादिति** ॥ 'इति सूचितम्' इति शेषः । न केवलं श्रुतेः, किन्तु 'दर्शनात्' साक्षिप्रत्यक्षाच्च प्रत्यक्षतः फलदर्शनाद्वा सन्ध्यस्सूचक इति योजना । अनेनाद्यश्चशब्दः श्रुतिप्रत्यक्षयोः समुच्चायकोऽपीत्युक्तं भवति । अत एव प्राक् शुभाशुभसूचकत्वेनेश्वरो दर्शयतीत्येतावदेवोक्त्वा अत्रैव चशब्दः पठित इति ध्येयम् । काम्येषु कर्मसु क्रियमाणेषु 'यदा' यदि स्त्रियमभिपश्यति पुरुषः 'तत्र' तर्हि 'तस्मिन् स्वप्ननिदर्शने' स्वाप्नाख्यनिदर्शने जाते सति स्वस्य 'समृद्धिं' श्रेयोलाभं जानीयादित्यर्थः । कृष्णं कृष्णदन्तं वा पुरुषं मर्कटं वा यदि स्वप्ने पश्यति जीवस्तदा 'सः' स्वप्नदृष्टपदार्थः 'एनं' द्रष्टारं 'हन्ति' हननसूचको भवतीत्यर्थः । यद्यप्यत्र ज्ञानस्यैव शुभाशुभसूचकत्वं प्रतीयते न त्वर्थस्य । उक्तं हि न्यायामृते- 'पुरुषं कृष्णं कृष्णदन्तं पश्यति' इत्यादिश्रुत्या ज्ञानमेव सूचकम् । स्वाप्नज्ञानमेव अर्थक्रियाकारि' इति च । तथापि अर्थावच्छिन्नज्ञानस्य सूचकत्वे विशेषणतयाऽर्थस्यापि सूचकत्वलाभादेवमुक्तम् । स्वप्नसत्यतासाधकार्थसत्त्वमन्तरेण वचनसत्यताऽयोगात् अनेन स्वाप्नसत्यतासिद्धिः ।

'यद्वाव (यद्वाऽपि) ब्राह्मणो ब्रूयादेवता वृषभोऽपि वा ।
स्वप्नस्थमथ वा राजा तत्तथैव भविष्यति ॥' इत्याचक्षते च
स्वप्नविदो व्यासादयः ॥ ४ ॥

स्मृतिपरतया 'आचक्षते च तद्विदः' इति सूत्रांशं व्याचष्टे- **यदिति** ॥ 'वाव' इत्यवधारणे। वाऽपीत्यपि पाठः। 'यत्' यदि ब्राह्मणो वा देवता वा 'वृषभो' देवश्रेष्ठो वा वृषं बिभर्तीति वृषभो रुद्रो वा अथ राजा वा 'स्वप्नस्थं' स्वप्नावस्थापन्नं जनं प्रति 'यत्' यदेव कार्यं ब्रूयात् 'तत' तद्वचनं 'तथैव' तथ्यमेव 'भविष्यति' भवेदित्यर्थः। 'इत्याचक्षते' वदन्ति चेति। चो हेतु-समुच्चये। 'स्वप्नविद' इत्यनेन 'तद्विदः' इति व्याख्यातम्। 'व्यासादयः' इत्यादिशब्दात् मन्वादयो गृह्यन्ते। अनेन यतो व्यासादय इत्याचक्षते अतोऽपि सन्ध्यः सूचकः। न चाप्रयोजकता। यतस्ते तद्विदः अत इति सूत्रखण्डो व्याख्यातः।

॥ इति सन्ध्याधिकरणम् ॥ १ ॥

॥ २. पराभिध्यानाधिकरणम् ॥

(स्वप्नपदार्थस्य अदर्शनमपि परमात्माधीनमेव)

सू—

ॐ ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ॐ ॥ ५ ॥

बन्धमोक्षप्रदत्वात्स एव स्वप्नतिरस्कर्ता।

अत्राधिकरणे भगवतः स्वप्नतिरोधायकत्वमहिमा वर्ण्यते। सौत्र-तुशब्देनैव बाह्यार्थज्ञानादेव स्वप्नतिरोधानं नाशः, तस्य तदज्ञानकृतत्वादिति सयुक्तिक-पूर्वपक्षस्य सूचनात् सिद्धान्तयत्सूत्रमेवोपन्यस्य व्याचष्टे- **परेति** ॥ बन्धमोक्ष-प्रदातृत्वादित्यनेन हिशब्दो हेत्वर्थतया व्याख्यातः। मोक्षेति विपर्ययपदार्थ-कथनम्। सूत्रे 'पराभिध्यानात्' इति इच्छाग्रहणेऽपि इच्छेश्वरयोरैक्यात्स पर ईश्वर एवेत्युक्तम्। न ज्ञानमित्येवशब्दार्थः। अनेन तुशब्दो व्याख्यातः। **स्वप्नतिरस्कर्तेति** ॥ जीवस्य स्वाप्नपदार्थज्ञानकर्ता तत्तिरस्कर्ता चेत्यर्थः। अनेन

सूत्रे 'तिरोहितम्' इत्युपलक्षणम्। 'आविर्भूतम्' इति च द्रष्टव्यम्। 'सन्ध्यम्' इति संयोज्यम्। कर्मणि क्तः। स्वप्नस्य तिरस्कर्ता इति विग्रहे भावे क्तः। अस्येति स्वप्नजीवयोरित्युक्तं भवति। न च बन्धमोक्षप्रदातृत्वेन कथं स्वप्नतिरोधायकत्वसिद्धिः व्याप्त्यभावादिति वाच्यम्। यदभिध्याननिबन्धनोऽनादिबन्धः तद्विमोक्षश्चातिदुरापोऽनन्तकालीनः, स्वप्नतिरोधानादिकशक्तिः किं तस्य वर्णनीयेति तत्त्वप्रदीपोक्तरीत्याऽस्य कैमुत्यपरत्वेन व्याप्यनभ्युपगमात्। टीकायां तु यथा 'अस्य' जीवस्य बन्धमोक्षावज्ञानज्ञानकृतत्वेन सुप्रसिद्धावपि हि 'बन्धको भवपाशेन भवपाशाच्च मोचकः' इति वचनात् 'पराभिध्यानात्तु' परमेश्वरेच्छया एव तदधीनावेव। नाज्ञानाज्ञानकृतौ तयोरचेतनत्वेनास्वातन्त्र्यात्। तथा 'अस्य' स्वप्नस्य तिरोधानम्। उपलक्षणमेतत्। आविर्भावश्च 'पराभिध्यानात्' इच्छाऽभिन्नपरमेश्वरादेव जायते, न ज्ञानाज्ञानाभ्याम्। ते तु निमित्तमात्रमिति दृष्टान्तदार्ष्टान्तिकभावपरतया सूत्रं व्याख्यातम्। अनेन ज्ञानाज्ञाने न स्वातन्त्र्येण तिरोभावादिहेतू, अचेतनत्वात्तन्निमित्तमात्रत्वेन प्रसिद्धत्वादित्यनुमानं सूचितम्।

'स्वप्नादिबुद्धिकर्ता च तिरस्कर्ता स एव च।
तदिच्छया यतो ह्यस्य बन्धमोक्षौ प्रतिष्ठितौ॥'
इति कौर्मे च॥ ५॥

नेदं दृष्टान्तमूलकानुमानमात्रमिति भावेन सूत्रार्थे स्मृतिं चोदाहरति - **स्वप्नादीति॥** स्वप्नः अर्थात्मा, तद्बुद्धेः पृथगुक्तत्वात्, आदिपदाज्जाग्रत्। 'तिरस्कर्ता' स्वप्नादिबुद्धेः। चौ परस्परसमुच्चये। 'सः' ईश्वरः। 'तदिच्छया' ईश्वरेच्छया। 'हिः' प्रसिद्धौ। 'अस्य' जीवस्य। अत्र दृष्टान्तदार्ष्टान्तिकभावः कैमुत्यं वा, आगमाद्व्याप्तेरेव निश्चयोपपत्तेः साऽप्यभिप्रेयते। इति कौर्मे चोक्तमित्यन्वयः। न केवलं सूत्रकृतेति चार्थः।

॥ इति पराभिध्यानाधिकरणम्॥ २॥

॥ ३. देहयोगाधिकरणम् ॥

(जाग्रदवस्था परमात्मनैव भवति)

सू— ॐ ॥ देहयोगाद्वासोऽपि ॥ ॐ ॥ ६ ॥

देहयोगेन वासो जाग्रदपि तत एव ।

अत्राधिकरणे विष्णोर्जाग्रत्प्रवर्तकत्वमहिमा निरूप्यते । जागरणस्य कालाधीनतायाः प्रत्यक्षसिद्धत्वात् । तस्य च बाधकाभावेन भ्रान्तित्वायोगात् नेश्वराधीनत्वमिति पूर्वपक्षे सिद्धान्तयत्सूत्रं पठित्वा व्याचष्टे- **देहेति** ॥ 'देहयोगेन' स्वदेहाभिमानेन तद्विशिष्टतया वासः स्थितिरित्यर्थः । अनेन पञ्चमी तृतीयार्थतया व्याख्याता । फलितार्थमाह 'जाग्रत्' जाग्रत्त्वं जाग्रदवस्थेति यावदिति । **तत एवेति** । पराभिध्यानादेवेत्यर्थः । 'भवति' इति शेषः । 'न कालजीवादेः' इत्येवार्थः । 'तत एव' इत्यनेनापेः 'पराभिध्यानात्' इति पदानुकर्षकत्वं सूचितम् । यद्वा- अनुक्तसमुच्चायकोऽपिः । तथा च न केवलं जाग्रदेव, किन्तु स्वप्नसुषुप्ती अपीति । अत एव 'स स्वप्ने' इति श्रुतिशेषोदाहरणम् । पदद्वयानुवादेन सूत्रे जाग्रदपीति वाच्ये 'देहयोगाद्वासः' इत्युक्तिः जाग्रत्त्वेन देहाभिमानेन अवस्थितिः जाग्रदवस्थेति जाग्रत्स्वरूपनिर्वचनायेति सूचितम् ।

'स एव जागरिते स्थापयति स स्वप्ने स प्रभुस्तुरापाट् स एको वहुधा भवति' इति कौण्ठरव्यश्रुतेः ॥ ६ ॥

ननु जाग्रदवस्थायाः प्रत्यक्षत एवाहरादिकालाधीनत्वप्रतीतेः कथमीश्वराधीनत्वमुच्यत इत्यतः पूर्वस्माद्धिशब्दमनुवर्त्य तेन अपिना सूचितां स्मृतिमुदाहरति– **स इति** ॥ 'सः' ईश्वर एव, न कालजीवादिरित्यर्थः । 'जागरिते' जाग्रदवस्थायां, जीवमिति शेषः । असामर्थ्यमाशङ्क्याह- **प्रभुरिति** ॥ तदुपपादनम्- **तुरापाडिति** । वैरिवेगसह इत्यर्थः । 'तुरं भगस्य धीमहि'

(ऋ.५-८२-१) इति तुरशब्दस्य वायौ प्रयोगात् वायुसह इति वा। नन्वेकस्यानेकावस्थाप्रेरकत्वं कथमित्यत आह- स इति ॥ 'बहुधा' विश्वतैजसादिरूपेण। 'श्रुतेः' इत्यस्य 'देहयोगेन' इत्यादिनाऽन्वयः। तथा च कालस्यैव तत्प्रवर्तकत्वे श्रुतिविरोधान्निमित्तमात्रविषयं प्रत्यक्षमिति भावः ॥

॥ इति देहयोगाधिकरणम् ॥ ३ ॥

॥ ४. तदभावाधिकरणम् ॥

(नाडीस्थपरमात्मनि जीवस्य प्रवेशः सुषुप्तिः)

सू—

ॐ ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॥ ॐ ॥ ७ ॥

जाग्रत्स्वप्नाभावः सुप्तिः नाडीस्थे परमात्मनि।

'आसु तदा नाडीषु सृप्तो भवति' (छा. ८.६.३) 'सता सोम्य तदा सम्पन्नो भवति' (छा. ६.८.१) इति श्रुतेः ॥ ७ ॥

अत्राधिकरणे सुप्तप्राप्यत्वमहिमा वर्ण्यते। 'नाडीषु' इति पदेन परमात्मन्येव सुप्तिः, न तु नाडीष्वपीति पूर्वपक्षस्य सूचितत्वात् तमनुपन्यस्य सिद्धान्तयत् सूत्रमेवोपन्यस्य व्याचष्टे- तदिति ॥ न च केवलपरमात्मनि सुप्तिरिति पूर्वपक्षे भगवतो माहात्म्याक्षेपाभावेन भक्त्यनाक्षेपात्कथमयं विरोधीति वाच्यम्। तथासति नाडीसुप्तिप्रतिपादकश्रुतेरप्रामाण्यापातेन तन्न्यायेन भक्तेः मोक्षसाधनत्वश्रुतेरीश्वरमाहात्म्यप्रतिपादकश्रुतेश्चाप्रामाण्यापातादित्येवं विरोधित्वात्। जाग्रदिति भावप्रधानः। अनेन तयोः जाग्रत्त्वस्वप्नयोरभावः तदभाव इति तदभावपदं व्याख्यातम्। फलितार्थमाह- सुप्तिरिति ॥ 'अस्य जीवस्य' इति वर्तते। अनेन सूत्रे 'सुप्तिः' इति वक्तव्ये 'तदभावः' इत्युक्तिः 'सर्वेन्द्रियव्यापारोपरतिः सुप्तिः' इति सुप्तिस्वरूपनिर्वचनार्थेति सूचितम्। एवं तदभाव इति पक्षवचनं व्याख्याय नाडीष्वात्मनीति साध्यांशं व्याचष्टे- नाडीस्थ इति ॥

अत्र सूत्रे न श्रुतपदार्थयोरेवाभेदेनान्वयः, नापि प्रत्येकमन्वयः, किन्तु स्थित इति पदाध्याहारेण सामानाधिकरण्येनान्वयः, मन्दिरे मञ्जूषायां मणिमालेत्यत्रेवाधाराधेयभावो वाऽभिप्रेत इति सूचितम्। 'परमात्मनि' भवतीति शेषः। ननु परमात्मन्येव सुप्तिरस्तु, किं नाडीस्थत्वविशेषणेनेत्यतः प्रवृत्तं तच्छ्रुतेरिति हेत्वंशं परमात्मनो नाडीस्थत्वप्रतिपादकश्रुतिपरतया जीवस्य परमात्मनि सुप्तिप्रतिपादकश्रुतिपरतया च व्याचष्टे- **आस्विति** ॥ 'इति श्रुतेः' इति। इति छान्दोग्यश्रुतिवचनद्वयादित्यर्थः। श्रुतिद्वयोदाहरणेन नाडीस्थे परमात्मन्येव सुप्तिः न तु केवलयोः। अन्यथा श्रुतिद्वयानुपपत्तेरिति सूचितम्। 'तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति' (छा. ८-६-३) इति पूर्ववाक्ये 'तत्' तदा स्वप्नकाले 'यत्र' प्राज्ञे परमात्मनि 'एतत्सुप्तः' एष सुप्तः 'समस्तः' उपसंहृतेन्द्रियव्यापारः 'सम्प्रसन्नः' स्वरूपसुखानुभववान् 'स्वप्नं' स्वाप्नमेव वस्तु न विजानाति, किमु जाग्रद्वस्त्विति प्रकृतो जीवः 'आसु नाडीषु' स्वप्नवहन्नाडीषु नाडीं सुषुम्नाख्यां 'सृप्तः' प्राप्तो भवतीत्यर्थः। प्रतिशरीरं नाडीभेदाद्बहुवचनम्। यत्रैतत्पुरुषः स्वपिति नाम 'तदा' सुप्तिकाले एष पुरुषः 'सता' परमात्मना 'सम्पन्नः' सङ्गतो भवतीति द्वितीयस्यार्थः। सोम्येति श्वेतकेतुसम्बुद्धिः। सूत्रे हेतिशब्दः 'तन्नाडीसंस्थितं विष्णुं मध्ये जीवः प्रपद्यते' इति छान्दोग्यभाष्योदाहृतप्रमाणप्रसिद्धिद्योतकः। अत एव तत्त्वप्रदीपे तदुपन्यासः। न च

'अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ।
प्रविशन्ति सुषुप्तौ तु प्रबुध्यन्ते ततस्तथा ॥' (बृ.भा. ६.६.८)

इति बृहद्भाष्योदाहृतप्रमाणात्कर्णिकाग्रस्थतयाऽवगतस्य हरेः कथं नाडीस्थतेति वाच्यम्। मन्दिरे मणिमालेतिवन्नाडीकर्णिकोभयस्थत्वोपपत्तेः। न च 'देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि' इति काठकभाष्योक्तेः देहेऽङ्गुष्ठमितस्य कथमतिसूक्ष्मनाडीस्थकर्णिकागस्थत्वमिति वाच्यम्। अचिन्त्यत्वादीश्वरशक्तेः।

॥ इति तदभावाधिकरणम् ॥ ४ ॥

॥ ५. प्रबोधाधिकरणम् ॥

(ब्रह्मैव सुप्तपुरुषं प्रबोधयति)

सू— ॐ ॥ अतः प्रबोधोऽस्मात् ॥ ॐ ॥ ८ ॥

यतस्तस्मिन् सुप्तिः ।

अत्राधिकरणे हरेः सुप्तप्रबोधकत्वमाहात्म्यं वर्ण्यते । भेरीताडनादेरेव सुप्तस्य प्रबोधो नेश्वरादिति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **अत इति ॥** तस्मिन्निति सावधारणम् । तथा च नाडीस्थे परमात्मन्येवेत्यर्थः । उपलक्षणं चैतत् । 'तदभिध्यानादेव' इति तत्त्वप्रदीपोक्तं द्रष्टव्यम् । 'सुप्तिः' इत्यनन्तरं 'उक्त' इति शेषः । 'अस्य' इत्यनुवृत्तिश्च कार्या । अनेन यतोऽस्य जीवस्य तस्मिन्नेव तदिच्छयैव सुप्तिरुक्ता, अतोऽस्यास्मात्परमात्मन एव तदिच्छयैव सुप्तेः प्रबोधोऽपि, नान्यस्मादिति सूत्रयोजनोक्ता भवति । न चात्राप्रयोजकता ।

'अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।
प्रविशन्ति सुषुप्तौ तु प्रबुध्यन्ते ततस्तथा ॥' (बृ.भा. ६.६.८)

इति वचनविरोधात् ।

'देहाद्देहान्तरगते प्रविशेत्प्राणमेव तु ।
जीवः प्राणः परात्मानमेवं सुप्तौ.....॥' (भा.ता. ११.३.३९)

इति वचनाच्च । मुख्यप्राणद्वारेण स्वान्तर्निविशितस्य जीवस्य तत्प्रेरणामन्तरेण स्वत एव सुप्त्युद्बोधनशक्त्यभावाच्च ॥

'एष एव सुप्तं प्रबोधयत्येतस्माज्जीव उत्तिष्ठत्येष प्रमातैष परमः' इति कौण्डिन्यश्रुतिः ॥ ८ ॥

ननु भेरीताडनाद्यनन्तरं प्रबोधदर्शनात्तेषामपि सुप्तप्रबोधहेतुत्वं सिद्धमिति कथं प्रबोधस्य भगवदेकाधीनत्वं प्रत्यक्षविरोधादित्याशङ्कापरिहारायातश्शब्दं

श्रुतिपरतयाऽपि व्याचष्टे- एष इति ॥ 'श्रुतिः' इत्यनन्तरं 'यतः', इत्यनुवर्तते । तथा च 'यतः' एवं कौण्डिन्यश्रुतिरतोऽस्मादेव प्रबोधो भवतीत्यन्वयः । अनेनातश्शब्दस्य 'तदभावो नाडीष्वात्मनि' इत्युक्त-परामर्शकत्वं 'तच्छ्रुते'रिति प्रकृतश्रुतिपरामार्शकत्वं चोक्तं भवति । प्रत्यक्षं तु निमित्तमात्रविषयम्, अन्यथा सावधारणश्रुतिविरोधादिति भावः । 'एषः' परमात्मैव 'सुप्तं' जीवं सुप्तेः प्रबोधयति नान्यः । एतस्मादीशादेव जीव उत्तिष्ठति सुप्तेः । एष एव 'प्रमाता' सुप्तस्य प्रबोधकः । एष परम इति तदुपपादनमिति श्रुत्यर्थः ॥

॥ इति प्रबोधाधिकरणम् ॥ ५ ॥

॥ ६.कर्मानुस्मृत्यधिकरणम् ॥

(सर्वेषां सर्वकालेष्वपि ब्रह्मैव स्वप्नादिकारणम्)

सू—

ॐ ॥ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॥ ॐ ॥ ९ ॥

न च केषाञ्चित्स्वप्नादिकर्ता न तु सर्वेषामिति । 'एष ह्येव साधु कर्म कारयति' (कौ. ३.८) इति कर्मण्यवधारणात् ।

अत्राधिकरणे सर्वपुरुषीयसार्वकालिकसर्वावस्थानां भगवदधीनत्वमहिमा वर्ण्यते[१] । न सर्वेषां सार्वकालीनावस्थाः भगवदधीनाः, किं नाम ? केषाञ्चित् किञ्चित्कालीनैवेति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **स एवेति ॥** चशब्दः शङ्कापरिहारसमुच्चये । केषाञ्चित् 'पुरुषाणाम्' इत्युपलक्षणम् । 'कदाचित्' इत्यपि द्रष्टव्यम् । 'सः' ईश्वरः । स्वप्नादीत्यादिशब्देन सुषुप्तिः

---

१. 'वर्ण्यते' इत्यनन्तरं 'सिद्धान्तयत्सूत्रमुपन्यस्य पूर्वपक्षप्रतिषेधरूपचशब्दार्थं विवृण्वन् व्याचष्टे- स एवेति ॥ केषाञ्चित्पुरुषाणां केषाञ्चित्स्वप्नादीनां इत्युपलक्ष-णम् । इति मातृकायां दृश्यते ।

गृह्यते । तुशब्दोऽवधारणे । केषाञ्चिदेवेति । तद्व्यावर्त्यमाह– **नेति** ॥ 'सर्वेषाम्' इत्युपलक्षणम् । 'सर्वदे'त्यपि द्रष्टव्यम् । न कदाचित् केषाञ्चित् , किन्तु सर्वदा सर्वपुरुषाणां स परमात्मैव स्वप्रादिकर्तेति सौत्रचशब्द. साध्य-धर्मसमुच्चायकः । यद्वा सौत्रैवशब्दः पुरुषान्तरे कालान्तरे अवस्थाप्रेरकत्व-व्यवच्छेदकः । चशब्दस्तु अवधारणार्थः परमात्मनः ईश्वरान्तरसाहित्येन सर्वावस्थाप्रेरकत्वव्यवच्छेदकः । अत एव टीकायां पक्षान्तरनिषेधार्थश्चशब्द इत्युक्तम् । तत्त्वप्रदीपरीत्या हेतौ वा चशब्दः । तस्मात्स एव परमात्मा सर्वकर्ता, नान्यो न च किञ्चित्स्वभावत एव । स्वभावस्यापि परमात्माधीन-त्वादित्यभिप्राय इत्युक्तम् । 'इति न च मन्तव्यम्' इत्यन्वयः । कुत इत्यतस्तत्र हेतुत्वेन कर्मेत्याद्यंशं योजयति- **एष ह्येवेति** ॥ 'श्रुता'वितिं शेषः । 'कर्मणि' सर्वक्रियाहेतुत्वेन । तथा च 'एष ह्येव' इति श्रुतावीशस्यैव सर्वकर्महेतुत्वं, नान्यस्येत्येवकारेणान्यत्र क्रियाहेतुत्वस्य' 'अवधारणात्' व्यवच्छेदात्स्वप्रादि-प्राप्तेरपि क्रियारूपत्वात्स एव सर्वेषां सर्वावस्थाप्रेरको, न केषाञ्चिदिति भावः । अनेन सौत्रकर्मशब्दो लक्षणया कर्मणामीशैकाधीनत्वश्रुतिपर इत्युक्तं भवति । यद्यपि **सुधायां** श्रुतिस्थः साधुकर्मशब्दो मोक्षजनकज्ञानाद्युपलक्षकः । असाधु-कर्मशब्दश्च मिथ्याज्ञानाद्युपलक्षक इत्युक्तम् । तथापि कर्मशब्दस्यात्रोक्तक्रिया-वाचित्वापरित्यागेन उन्निनीषतिवाक्यपर्यालोचनया उपलक्षणोक्तेरदोषः । व्याख्यातेयं श्रुतिर्वैषम्याधिकरणे ॥

'प्रदर्शकस्तु सर्वेषां स्वप्रादेरेक एव तु ।
परमः पुरुषो विष्णुस्ततोऽन्यो नास्ति कश्चन ॥'

इत्यनुसारिस्मृतेश्च । 'एष स्वप्रान् प्रदर्शयत्येष प्रबोधयत्येष एव परम आनन्दः' इति च श्रुतिः 'आत्मानमेव लोकमुपासीत' (बृ.उ.१५) इति च विधिः ॥ ९ ॥

प्रदर्शक इति ॥ 'स्मृतेः' इत्यनेन स्मृतेरित्यंशोऽनुसारीत्यनेनान्वित्यंशो

व्याख्यातः । स्फुटमभिमतार्थाभिधायकत्वमनुसारित्वम् । हेतुसमुच्चये चः । स्मृतौ तुशब्दश्चार्थः । यतः स्वप्नादेर्जनकश्चेति तत्त्वप्रदीपोक्तेः । द्वितीयो मुख्यत्वविशेषद्योतकः । 'सर्वदा' इति शेषः । तथाच विष्णुरेव मुख्यतः सर्वदा सर्वेषां स्वप्नादेरवस्थानस्य 'प्रदर्शकः' तत्प्रेरकः तज्जनकश्च एक एव, न तु सद्वितीयः पुरुषान्तरसहितः । स च विष्णुरेव भवेत् , नान्यः, कुतः ? यतस्ततः 'कश्चन' कोऽपि परमपुरुषो नास्त्यत इत्यर्थः । 'इति श्रुतिश्च' इत्यन्वयः । 'यतः' इति शेषः । अनेन 'शब्दात्' इत्यंशो व्याख्यातः । श्रुतावेवशब्दः सर्वत्र सम्बध्यते । अन्यथा स्वप्नानिति बहुवचनेन सर्वपुरुषसम्बन्धिसार्वकालिकावस्थाप्रेरकत्वलाभेऽपि तस्यान्यस्यापि सर्वावस्थाप्रेरकस्य सत्त्वेऽपि सम्भवेन तद्व्यावृत्त्यलाभात्परमात्मन एव सर्वावस्थाप्रेरकत्वरूपविवक्षितार्थासिद्धिप्रसङ्गात् । न चावधारणस्य पूर्वसम्बन्धस्य प्रयोजनवत्त्वेऽपि 'परमः' इति वाक्ये सम्बन्धो व्यर्थ इति वाच्यम् । अन्यस्यापि सर्वावस्थाप्रेरकस्य सत्त्वे तस्यापि परमत्वप्राप्त्या 'एष ह्येव परमः' इत्यवधारणासम्भव इति बाधकोपन्यासार्थत्वात् । तथा च यतः 'एषः' परमात्मैव 'स्वप्नान्' स्वप्नावस्थाः 'प्रदर्शयति' संयोजयति जीवान् , यतश्चैष एव सुप्तजीवान् प्रबोधयति अत एष एव 'परमः' सर्वोत्तमः 'आनन्दः' पूर्णानन्द इति श्रुत्यर्थः । 'विधिः' परमात्मन एवोपास्यत्वविधायकश्रुतिरिति । अनेन विधेरित्यंशो व्याख्यातः । अत्रापि चशब्दो योज्यः । 'यतः' इति शेषः । अन्यस्यापि प्रेरकस्य सद्भावे तस्याप्युपास्यत्वप्राप्त्या श्रुतौ परमात्मन एवोपास्यत्वावधारणानुपपत्तिरिति भावः । श्रुतिस्तु भाक्तनये (३.१.७) व्याख्याता ।

॥ इति कर्मानुस्मृत्यधिकरणम् ॥ ६ ॥

॥ ७. सम्पत्त्यधिकरणम् ॥

(जीवस्य परमात्मनि अर्धप्रवेशे मूर्च्छा सम्भवति)

सू — ॐ ॥ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ ॐ ॥ १० ॥

मोहवस्थायां परमेश्वरेऽर्धप्राप्तिर्जीवस्य ।

अत्राधिकरणे ईश्वरस्यावन्तरावस्थासंस्थितजीवप्राप्यत्वमहिमा निरूप्यते। भगवत्येव मोह इति पूर्वपक्षे मोहावस्थायाः सुषुप्त्यन्तर्भावापत्त्या पृथगवस्था-संस्थितजीवप्राप्यत्वमहिमालाभात् मोहावस्थाया अर्धप्राप्तिरूपत्वेन ईश्वर-तदितराधिकरकत्वमिति समर्थनेन पृथगवस्थात्वसमर्थनमपि तन्निरूपणोपयुक्तमेव भवति। अत्र भगवत्येव मोहो न तदितरत्रापीति पूर्वपक्षे, सिद्धान्त-यत्सूत्रमुपन्यस्य प्रतिज्ञांशं तावद्व्याचष्टे- **मुग्ध इति** ॥ 'मोह' इत्यनेन 'मुग्धे मूर्छायाम्' इति मुग्धपदं भावार्थकक्तप्रत्ययान्ततया व्याख्यातम्। 'परमेश्वर' इत्यनेन तदभावसूत्रादात्मनीत्यस्यानुवृत्तिः सूचिता । **अर्धप्राप्तिरिति** । भगवदुदरे अर्धप्रवेश एवेत्यर्थः। अनेनार्धसम्पत्तिपदं व्याख्यातम्। 'परे' इति सूत्रादनुवृत्तस्य अस्येत्यस्यार्थो- **जीवस्येति** ॥ अनेन न मोह ईश्वर एव, नापि तदितरत्रैव, किन्त्वीश्वरे तदितरत्र चेति सिद्धान्तप्रतिज्ञा प्रदर्शिता भवति ॥

'हृदयस्थात्पराज्जीवो दूरस्थो जाग्रदेष्यति ।
समीपस्थस्तथा स्वप्नं स्वपित्यस्मिन् लयं व्रजन् ॥
यत एवं त्रयोऽवस्था मोहस्तु परिशेषतः ।
अर्धप्राप्तिरिति ज्ञेयो दुःखमात्रप्रतिस्मृतेः ॥' इति वाराहे च ॥

एवं प्रतिज्ञांशं व्याख्याय परिशेषादिति हेत्वंशं व्याख्यातुं प्रतिज्ञा-हेत्वात्मकसमस्तसूत्रार्थे स्मृतिमुदाहरति- **हृदयस्थादिति** ॥ ल्यब्लोपनिमित्ते पञ्चम्यौ। तथाशब्दस्समुच्चये। तथाच यदा जीवः 'परात्' परमात्मानमपेक्ष्य 'दूरस्थः' अक्षिस्थो भवति तदा 'जाग्रत्' जाग्रत्त्वमेष्यति। यदा तु 'समीपस्थः' कण्ठदेशस्थस्तदा स्वप्नावस्थामेष्यति। यदा च 'अस्मिन्' परमात्मनि 'लयं' मक्षिकाणां ग्रहगोधिकादेहान्तःप्रवेशवत्प्रवेशं व्रजन् भवति तदा 'स्वपिति' सुप्तावस्था प्राप्नोतीत्यर्थः। ननु जीवस्य दक्षिणाक्षिस्थत्वे दूरस्थत्वं कुतः? उच्यते दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः' (मां.उ २-२)

इति श्रुतेः विश्वनामकपरमात्मसामीप्यसत्त्वादित्यत उक्तम्- **हृदयस्थादिति** ॥ तथा च नेह यत्किञ्चिद्रूपात्सामीप्यमभिप्रेतम्, किन्तु हृदयस्थप्राज्ञनामक-परमात्मानमपेक्ष्य, तच्च नातिप्रसङ्गीति भावः । 'त्रयः' इत्यावर्तते । लिङ्ग-व्यत्ययः । 'अवस्थाः' इति बहुवचनम् । 'न तथेति' शेषः । तथाच 'यत एवं' उक्तप्रकारेण 'त्रयः' तिस्रः 'अवस्थाः' जाग्रदाद्याः परमात्मविदूरत्व-तत्सामीप्यतत्प्रवेशरूपप्रकारत्रययुताः, मोहस्तु न तथा, अतः 'परिशेषतः' प्रसक्तप्रतिषेधे परिशिष्यमाणे बुद्धिः परिशेषः, तेन तत्कारणानुमानं गृह्यते । तस्मात् मोहः 'अर्धप्राप्तिः' अर्धप्रवेशाख्यप्रकारयुक्त इति ज्ञेय इत्यर्थः । यद्वा-दूरस्थत्वादित्रयः प्रकाराः यत एवमवस्थात्रयेऽपि नियुक्ता अतः परिशेषात् 'अवस्था' अवान्तरावस्थारूपो मोहोऽर्धप्राप्तिरिति ज्ञेय इत्यर्थः । अस्मिन् पक्षे न लिङ्गव्यत्ययः । अवस्थापदं चैकवचनान्तम् । अवस्थात्रये विनियुक्ता इति प्रकारा इति च शेष इति ध्येयम् । न च 'हृदि ह्येष आत्मा' (प्र. ३-६) इति श्रुतेर्हृदिस्थानां जीवानां कथमक्ष्यादिस्थत्वमिति वाच्यम् । देवानामंशेन तदितरेषामभिमानातिशयेन प्रकाशगुणेन वा हृदयस्थत्वोपपत्तेः ।

उक्तं हि देवताविषये बृहदारण्यकभाष्ये -

'हृदये संस्थितो जीवो विशेषेण हरिस्तथा ।
चक्षुरादिषु रूपाणि जाग्रत्काले तयोस्सदा ॥
बहूनि सन्ति तान्येव यदैकीभावमाप्नुयुः ।
हृदयस्थेन रूपेण तदा जीवो न किञ्चन ॥'
जानातीति विदुः प्राज्ञाः ॥ (बृ.भा.६.४.१) इति ॥

न चैवमैतरेयभाष्ये **'न हि जीवस्याक्ष्यादिषु पृथक्शिरोबाह्वादिकं विद्यते'** 'हृदिस्थमेव हि तस्य रूपम्' इत्युक्तिविरोधः । 'पृथक्' स्वरूपाद्भिन्नं शिर आदिकं नास्तीति विशिष्टनिषेधाभ्युपगमात् । अन्यथा तयोः 'चक्षुरादिषु बहूनि रूपाणि सन्ति' इत्युक्तिविरोधात् । रूपशब्दितशरीरस्य शिर आदिकं

विनाऽयोगात् । अत एव तत्र जागरितेऽप्यक्ष्यादिषु विशेषसन्निहितं भवतीत्युक्तम् । देवेतरजीवविषयं वा तद्भाष्यं, तथात्वे शिरोबाह्वादिकमित्यस्य शिरआदिमद्रूपमित्यर्थः ।

ननु मोहस्यावस्थात्रयातिरेकित्वे परं दूरस्थत्वादिप्रकारत्रयस्यावस्थात्रये विनियुक्तत्वात्परिशिष्टोऽर्धप्रवेशो मोहे भवेत्,- तदेव कुत इत्यत आह- **दुःखेति** ॥ दुःखपदमात्मकालयोरुपलक्षणम् । प्रतिस्मृतिः अनुसन्धानम् । मात्रपदेन दुःखात्मकालेतरविषयदर्शनं व्यावर्त्यते । अनेन मोहस्यावस्थात्रयातिरिक्तत्वं परिशेषात्सिद्धमित्युक्तं भवति । तथा हि- न तावत्सुप्त्यन्तर्भावो मोहस्य, दुःखानुसन्धानात् । न च तदानीं कारणाभावेन दुःखानुदयात्कथं तदनुभव इति वाच्यम् । मोहात्प्राग्विषयानुभवजन्यस्य दुःखस्य तदानीमनुसन्धानसम्भवात् । नापि जाग्रत्स्वप्नयोरन्तर्भावः । दुःखात्मकालातिरिक्तविषयादर्शनात् । अतः परिशेषान्मोहस्य पृथगवस्थात्वसिद्धिरिति । यद्वा- अनेन मोहे अर्धप्राप्तिसमर्थनाय साक्षादेव परिशेषप्रकारः प्रदर्श्यते । तथाहि– न सुप्ताविव मोहे समग्रप्राप्तिः, दुःखानुसन्धानात् । नापि जाग्रत्स्वप्नयोरिवाप्राप्तिरेव, दुःखमात्रानुसन्धानेन अन्यार्थादर्शनात् । अतः परिशेषादर्धप्राप्तिरेवेति । 'वाराहे' 'उक्तम्' इति शेषः । न केवलं सूत्रे, किन्तु वाराहे चेति चशब्दार्थः ।

सोऽपि तत एवेति सिद्धम् ।

ननु मोहे जीवस्य अर्धप्रवेशरूपावस्थानमेव चिन्त्यते । तदयुक्तम् । मोहस्येश्वराधीनतायाः असिद्धत्वेन तस्यैवेह चिन्त्यत्वात् । केवलैतच्चिन्तनस्य व्यर्थत्वात् । न च शङ्काकारणाभाव इति वाच्यम् । मोहे आघातव्याध्यादिकरणान्तरस्यापि दर्शनेन तस्येश्वरानधीनत्वशङ्कोदयात् इत्यत आह- **सोऽपीति** ॥ अपिशब्दस्समुच्चये । 'ततः' इत्यावर्तते । 'भवति' इत्यध्याहारः । तथा च यतः न केवलं स्वप्नादिः, अपि तु 'सः मोहोऽपि तदुद्बोधश्च 'तत एव' ईश्वरादेव भवतीति, 'तत एव' कर्मानुस्मृत्यादिपूर्वोक्तहेतुत एव सिद्धम् । अतस्स ततोऽन्यतो वेति चिन्ता न क्रियत इत्यन्वयः ।

मूर्च्छाप्रबोधनं चैव यत एव प्रवर्तते ।
स ईशः परमो ज्ञेयः परमानन्दलक्षणः ॥ इति कौर्मे ॥ १० ॥

ननु कर्मानुस्मृत्यादेः साध्यसङ्कोचः कार्यः । अन्यथा घातादिबाह्यकारण-दर्शनविरोध इत्यतो निमित्तकारणविषयं तत्, अन्यथा विशेषस्मृतिविरोधादिति भावेन तां स्मृतिमुदाहरति- **मूर्छेति** ॥ इदं च व्यस्तं समस्तं च । समासे मूर्छायाः प्रबोधनमिति विग्रहः । चस्समुच्चये । तथा च मूर्छा मूर्छायाः प्रबोधनं च 'यतः' यस्मादेव 'प्रवर्तते' उत्पद्यते स परम ईशः परमेश्वर एव ज्ञेयो, न ब्रह्मादिजीवः । कुतः? यतः सः 'परमानन्दलक्षणः' परमः उत्तमः पूर्णो वा आनन्दः स्वरूपलक्षणं यस्यासौ तथोक्तो नान्योऽत इति योजना । कौर्मे उक्तमिति शेषः । अस्यातः सोऽपि तत एवेति पूर्वेणान्वयः । [1]तथा च मोहावस्थाया ईश्वराधीनत्वस्य पूर्वन्यायसिद्धत्वेन अविचार्यत्वात् अनिश्चितस्वरूपायाश्च तदधीनत्वज्ञानायोगात् अवस्थास्वरूपविचारोऽपि तदधीनत्वप्रतिप्रत्तिहेतुत्वात् सार्थक एवेति भावः ॥

॥ इति सम्पत्त्यधिकरणम् ॥ ७ ॥

॥ ८ ॥ न स्थानतोऽप्यधिकरणम् ॥

(जाग्रत्स्वप्नसुषुप्तिषु प्रवर्तकः विश्वतैजसप्राज्ञरूपी परमात्मा एक एव)

स्थानापेक्षया परमात्मनो भेदादनुग्राह्यानुग्राहकभाव इति ।

अत्रेश्वरस्य सर्वरूपेषु निर्दोषाशेषगुणत्वं समर्थ्यते । तत्र 'न स्थानतोऽपि' इत्यनेन सूचितं पूर्वपक्षं दर्शयति- **स्थानेति** ॥ स्थानानां सुरनरादिसर्वशरीराणां तत्रापि दक्षिणाक्ष्यादीनाम् अपेक्षया तद्भेदापेक्षया स्थानभेदान्निमित्तादिति यावत् । न केवलं स्थानानां, किन्तु स्थानिपरमात्मनोऽपीति वा, न केवलं

---

१. 'पूर्वेणान्वयः ।' इत्यनन्तरं 'न च मोहस्वरूपविचारो व्यर्थ इति वाच्यम् । अनिश्चितस्वरूपस्य मोहस्येश्वराधीनताया दुर्ज्ञानत्वेन तस्य सार्थकत्वात् ।' इति मुद्रितपुस्तकस्थः पाठः ।

जीवानामात्मनां, अनात्मनां पटादीनाम्,- किन्तु परमात्मनोऽपि इति वाऽपिशब्दार्थः। ततः किमित्यतोऽनिष्टमापाद्यमाह- **अनुग्राह्येति** ॥ 'स्यात्' इति शेषः। अपिशब्दोऽत्रापि सम्बध्यते। 'परमात्मनः' इति पञ्चमी षष्ठी च। तथा च परमात्मनः सकाशाद्घटादीनां स्थानभेदाद्भेददर्शनात् तत एव भेदनिमित्तकगुणादितारतम्यस्यापि दर्शनात्। तत एवानुग्राह्यानुग्राहकभावदर्शनात् तद्वद्विश्वादिरूपिणः परमात्मनोऽपि परस्परं स्थानापेक्षया 'भेदात्' भेदप्राप्तेः तत एव गुणादितारतम्यमनुग्राह्यानुग्राहकभावश्च स्यादिति योजना। एवं च स एवेत्युक्तमयुक्तमिति भावः।

अत आह –

सू — ॐ ॥ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ॐ ॥ ११ ॥

स्थानापेक्षयाऽपि परमात्मनो न भिन्नं रूपम्।

एवं पूर्वपक्षं प्रदर्श्य सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ न केवलं स्वतः, किन्तु 'स्थानापेक्षया' स्थानभेदादपीत्यर्थः। अनेन सूत्रे स्थानपदं तद्भेदोपलक्षकं, सप्तम्यर्थे च तसिरित्युक्तं भवति। परस्येत्यस्य व्याख्या- **परमात्मन इति**। सूत्रे 'परस्योभयत्वम्' इत्येवोक्तौ वियदादिवत्पाणिपादाद्यवयवरूपैकैकदेशतोऽनेकस्थानस्थितत्वं तत्रैव भेदाभावश्च विज्ञायेत तदुभयं प्रमाणासिद्धम्, परमात्मा नैकैकदेशतः अनेकस्थानः एकदेशतोऽपि पूर्णत्वादिति युक्तिविरुद्धम्, 'सप्ताङ्ग एकोनविंशतिमुखो विश्वः' (मा २-३) इति स्पष्टश्रुतिविरुद्धं च। अतस्तन्मा विज्ञायीति उभयलिङ्गमित्युक्तम्। तत्र 'भिन्नम्' इत्यनेनोभयपदं व्याख्यातम्। 'रूपम्' इत्यनेन लिङ्गपदम्, 'लिङ्गं स्वरूपमुद्दिष्टम्' इति वचनात्। रूपस्वरूपशब्दयोश्च पर्यायत्वात्। तथा च पूर्वपक्षे विश्वादिरूपिणो हरेः समग्ररूपेणैव भिन्नस्थानस्थितत्वहेतुको भेदो ज्ञायत इति भावः। सिद्धान्ते न भिन्नमिति विशिष्टनिषेधो विशेषणीभूत-

भेदनिषेधपर्यवसितः। भेदशब्देन च सुधोक्तरीत्या अन्योन्याभावस्य तत्साध्य-गुणादिकृतहीनाधिकभावस्य तत्साध्यानुग्राह्यानुग्राहकभावस्य च ग्रहणम्। उभयशब्दस्य भिन्नार्थत्वं चोभशब्दपर्यायत्वात्सिद्धम्। तच्च 'उभादुदात्तः' इति सूत्रवृत्तिसिद्धम्। सूत्रे 'रूपम्' इत्यनुक्त्वा 'लिङ्गम्' इत्युक्तिः न स्थाना-पेक्षयाऽपि परमात्मनो भिन्नं रूपम्, न हि स्थानभेदस्तस्योभयत्वस्य लिङ्गं कारणं वा भवति। स्थानभेदेऽपि तद्गतवस्त्वेकत्वोपपत्तेः। 'स्वप्नाद्यवास्था-भेदेऽपि तद्वतो भोक्तुरेकत्ववत्' इति **तत्त्वप्रदीपे**, 'न स्थानभेदस्तद्भेदस्य ज्ञापकः कारको वा स्यात् इति **आनन्दमालायां** चोक्तस्यार्थान्तरस्य ज्ञाप-कत्वरूपस्य ज्ञापनार्था। तदपि पूर्वपक्ष्यभिमतहेतोरप्रयोजकत्वोद्घाटनार्थम्। तथा च तत्त्वप्रदीपकारस्य स्थानत इति प्रथमार्थे तसिः। उभयमिति च भावनिर्देशः। तस्य द्वित्वपर्यायत्वाद्भेदत्वम्। लिङ्गत्वं च ज्ञापकत्वं कारणत्वं वाऽभिप्रेतम्। परमात्मनो रूपं विश्वादिलक्षणं स्थानभेदान्न भिन्नं ज्ञेयमिति भाष्यार्थश्चाभिप्रेत इति ध्येयम्।

'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते' (ऐ. आ. ३-२-३) इति हि श्रुतिः।

कुतो नेत्यतस्तद्धेतुत्वेन प्रवृत्तं 'सर्वत्र हि' इति सूत्रखण्डं व्याचष्टे-**सर्वेष्विति**॥ इतिशब्दः प्रकारवाची। एकत्वमेकवचनार्थः। तथाच 'सर्वेषु भूतेषु' सुरनरादिदेहेषु तत्रापि चक्षुरादिस्थानेषु 'एतं' परमात्मानमेकमेव 'ब्रह्म' पूर्णगुणमाचक्षते विद्वांस इति श्रुत्यर्थोऽत्राभिप्रेतः। सर्वत्राधिकरणेषु नैवमिति। 'हि' इति श्रुतिरैतरेयेऽस्तीति शेषः। तथा च 'हि' यतः परस्य 'सर्वत्र' नैवं निर्दोषाशेषगुणत्वाभेदप्रतिपादिका 'सर्वेषु भूतेषु' इति श्रुतिरस्ति अतो न तस्य स्थानभेदात् उभयं लिङ्गं मन्तव्यमिति योजना।

'एकरूपः परो विष्णुः सर्वत्रापि न संशयः।
ऐश्वर्याद्रूपमेकं च सूर्यवद्बहुधेयते॥' इति मात्स्ये।

ननु हरेः समग्ररूपेणानेकस्थानस्थितत्वं कथमुपपद्यते तदन्यत्राद्दष्टत्वादित्यतः सर्वत्रेत्यनेन सूचितां सर्वत्रेतिपदघटितां स्मृतिमुदाहरति-**एकरूप इति** ॥ रूपशब्दोऽवतारधर्मपरः । अपिरभिव्याप्तौ । तथा च विष्णुः सर्वत्रापि स्थानेषु [1]'गुणादिभिरवतारैश्चैकरूप एव अभिन्नरूप एवास्ति, न भिन्नो न वा हीनाधिकरूपः । स च सर्वत्र 'परः' अवयवैः पूर्ण एव, न त्वेकदेशेन स्थितः । कथमेतदित्यत आह - 'ऐश्वर्यात्' ईश्वरत्वादिति । चोऽप्यर्थः । तथाचैकमपि तद्रूपम् ऐश्वर्यात् बहुधा अनेकस्थानेषु सामग्र्येणैव सूर्यवत् अनेकधा स्थितं ज्ञायते इत्यर्थः । सूर्यवदित्युक्त्या अन्यत्राद्दष्टशङ्का निरस्ता । 'मात्स्ये' उक्तमिति शेषः ॥

प्रतिदृशामिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः (भाग-१-९.४९) इति च भागवते ॥ ११ ॥

सूर्यदृष्टान्तं स्पष्टयन् उक्तार्थे स्मृतिं चाह - **प्रतिदृशामिति** ॥ इदं च -

'तमिममहमजं शरीरभाजां हृदि हृदि विष्ठितमात्मकल्पितानाम् ।'

इति पूर्वार्धेन सह व्याख्येयम् । तथाहि- 'प्रतिदृशं' दृशं दृशं प्रति चक्षुरभिमानितया तन्नियामकत्वेनैश्वर्यवशात् 'नैकधा' नसमासः । अनेकरूपेण स्थितमर्कमिव तं यथा एकमेव समधिगच्छति ज्ञानी, तथा अहमपि 'आत्मकल्पितानां', परमात्मसृष्टानां 'शरीरभाजां' जीवानां 'हृदि हृदि' प्रतिहृदयं 'विष्ठितं' समग्ररूपेणैव विविधतया स्थितं 'तम्' ईश्वरं 'इममजं' कृष्णम् एकत्वसङ्ख्याविशिष्टमभिन्नम् भेदमोहो भेदोऽस्तीति व्यामोहो विधूतः अवतारगुणादिषु निरस्तो भेदभ्रमो यस्य सः, समधिगतोऽस्मीत्यर्थः । करचरणादिरूपसामग्र्यमात्रेऽयं दृष्टान्तः न तु द्रव्यपूर्तिरूपेऽपि । सूर्यस्य ईश्वरवच्चक्षुरादिषु द्रव्यपूर्त्या स्थित्यभावादिति ध्येयम् । यद्वा- 'प्रतिदृशं' दृशं दृशं प्रति मां प्रति मां प्रत्ययं वर्तत इति नैकधा बहूनामाभिमुख्येन

---

१. 'गुणादिभिः' इत्यतः 'हीनाधिकरूपः' इत्यन्तो भागः न दृश्यते मातृकायाम् ।

स्थितमर्कमेकमेकमिव ईश्वरमप्यहं एकं समधिगतोऽस्मीत्यर्थः । न चास्मिन् पक्षे सूर्यस्य वस्तुतोऽनेकस्थानत्वाभावात्कथमस्य पूर्वप्रमाणगतसूर्यदृष्टान्त-स्पष्टनरूपत्वमिति वाच्यम् । मां प्रति मां प्रतीति भ्रान्त्या बहुधा व्यवस्थितस्य सूर्यस्य यथैकत्वज्ञानमित्येवं स्पष्टनरूपत्वसम्भवात् । इति चेति न केवलं मात्स्ये, किन्तु भागवते चोक्तार्थोऽभिहित इति चशब्दार्थः । प्रथमस्कन्धे युधिष्ठिरं प्रति भीष्मवाक्यमेतत् ।

सू —

ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ ॐ ॥ १२ ॥

'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिध्यतः ॥' (मा. २-१६) इति भेदवचनान्नेति चेत् –

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशे तावद्व्याचष्टे- नेति ॥ 'भेद-वचनात्' इत्यनेन भेदशब्दो वचनपरतया व्याख्यातः । शेषित्वादे-रुपलक्षणमेतत् । तथा च 'कार्यकारणबद्धौ' इति भेदकधर्मोक्तिमुखेन भेदोक्तेर्विश्वाद्यात्मनः परस्यानुग्राह्यानुग्राहकभावान्न तस्याभेदो निर्दोषत्वं गुणपूर्णत्वं च युक्तमित्यर्थः । 'सर्वत्र हि' इत्युक्तानुमानं तु प्रतिपक्षितत्वा-दसाधकमिति भावः । 'कार्यः' इति माण्डूकश्रुतौ कार्यशब्देनाज्ञानकार्य-स्वातन्त्र्यभ्रमरूपं वा, तत्त्वप्रदीपोक्तरीत्या प्रकृतिकार्यदेहेन्द्रियादिविषयक-ममताभिमानादिरूपं वा, जागरणं जाग्रत्वकालीनभ्रमकार्यभूतभ्रमरूपस्वप्नश्च विवक्षितः । न च स्वप्नस्य जाग्रत्कालीनभ्रमकार्यत्वं कथमिति वाच्यम् । जाग्रत्कालीनभ्रमाहितसंस्कारत्स्वप्नकालीनजाग्रत्वभ्रमोत्पत्ति सम्भवात् । कारणशब्देन तु अज्ञानं वा, भ्रान्तिकारणप्रकृतिर्वा, 'स्वप्नादुत्थाने तैजसाद्विभक्तो विश्वः' इति माण्डूकभाष्योक्तेः जाग्रदवस्थाकारणं स्वप्नो वा

विवक्षितः। बद्धत्वं च सिद्धान्ते बन्धस्वामित्वम्। पूर्वपक्षे बन्धकत्वे अवान्तर-भेदादेव रूपभेदो वक्तुं शक्यः। तथापि सिद्धान्ते पूर्वपक्ष्यभिमतबद्धत्वनिरासाय तद्व्याख्यानपरस्मृत्युदाहरणात्पूर्वपक्षे बद्धत्वमेवाभिप्रेतम्। अत एवं टीकायाम् उभयपरबद्धशब्दप्रयोगः। अत्र कार्यं च कारणं चेति, कार्यं कारणं यस्येति, कार्यस्य कारणमिति च विग्रहः। तथा च अविद्याकार्यभ्रमरूपजाग्रत्त्वेना-विद्यातत्कार्यस्वप्नरूपोभयकारणकजाग्रत्त्वेन च बद्धो विश्वः कार्यकारणबद्धः। तैजसोऽप्येवमुभयबद्धः। प्राज्ञस्तु कारणमात्रबद्धः। जाग्रत्स्वप्नयोः कारणं यदज्ञानं तन्मात्ररूपसुप्तिबद्धत्वात्कार्यकारणाकारेण द्वावपि बन्धौ तुर्याख्यरूपे न स्त इत्यर्थः॥

न, 'एष त आत्माऽन्तर्याम्यमृतः' (बृ.५-७-३) 'अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्' (बृ.४-५-१) 'अयं वै हरयोऽयं वै दश च सहस्राणि च बहूनि चानन्तानि च तदेतद् ब्रह्म पूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्' (बृ.४-५-१९) इति प्रत्येक-मभेदवचनात्॥ १२॥

परिहारांशं व्याचष्टे– नेति॥ नैतच्छ्रुतिबलेनेश्वररूपाणां भेदो वक्तव्य इत्यर्थः। कुतो नेत्यतः प्रवृत्तं प्रत्येकमतद्वचनादित्यंशं व्याचष्टे- एष त इति॥ इति प्रत्येकमित्यस्यानन्तरं परस्परं मूलरूपेणेति च शेषः, इदं च 'एष त आत्मा' इति प्रत्येकमभेदवचनात्, 'अयमेव सः' इति प्रत्येकमभेदवचनात्, 'अयं वै हरयः' इति प्रत्येकमभेदवचनादिति वाक्यत्रयेऽप्यावृत्त्या योज्यम्। तत्राद्ययोः प्रत्येकं परस्परमित्यस्यान्वयः। अन्तेन तु मूलरूपेणेत्यस्य। अनेन 'यः पृथिव्यां तिष्ठन् ....योऽप्सु तिष्ठन् .....योऽग्नौ तिष्ठन्' (बृ.५-७) इत्यादिना भगवतोऽनेकस्थानान्युक्त्वा तत्र तत्र प्रत्येकम् 'एष त आत्माऽन्तर्याम्यमृतः' इति तत्तत्स्थानगतभगवद्रूपाणां परस्परमन्योन्यमभेद-

वचनात् । तथा 'यः पृथिव्यां तेजोमयोऽमृतमयो....योऽप्सु तेजोमयोऽमृतमयो.. योऽग्नौ तेजोमयोऽमृतमयो .... यो वायौ' (बृ.४-५) इत्यादिना भगवतोऽनेकस्थानस्थितत्वमभिधाय तत्र तत्र प्रत्येकं 'अयमेव स योऽयमात्मा .... अयमेव स योऽयमात्मा' इति तद्रूपाणां परस्परमभेदवचनात् । तथा 'अयं वै हरयोऽयं वै दश' (बृ.४-५-१९) इति भगवद्रूपाणां मूलरूपेणाभेदवचनादिति हेत्वर्थ उक्तो भवति । सूत्रभाष्ययोः प्रत्येकमित्युक्तिरादरसूचनार्था । तत्प्रयोजनं तु सिद्धान्तश्रुतीनां प्राबल्यसूचनेन ताभिः पूर्वपक्षश्रुतेर्बाधसूचनम् । तेन भेदाभेदवचनयोः साम्यादनिर्णय इति शङ्का निरस्ता । 'एष ते' इति बृहदारण्यके उद्दालकं प्रति याज्ञवल्क्यवचनमेतत् । 'एषः' पृथिव्यन्तर्याम्येव तवान्तर्यामीत्यर्थः । एवमबादावपि । 'अयमेव सः' इत्यारभ्य 'इदं सर्वम्' इत्यन्तमपि । तत्रैव मधुब्राह्मणे श्रुतम् । तदर्थस्तु- यः 'तेजोमयोऽमृतमयः पुरुषः' इति पूर्ववाक्ये तेजःपूर्णत्वनित्यस्वरूपत्वपूर्णत्वगुणः परमात्मा अभिहितः सोऽयम् । अयं क इत्याशङ्कायामाह- य इति ॥ अयं स एव यः पूर्वोक्त आत्मा सर्वगो हयशीर्षाख्यः । 'इदं' रूपम् 'अमृतं' नित्यमुक्तं 'सर्वमिदं' जगत् 'ब्रह्म' तदधीनमिति । 'अयम् वै हरयः' इत्यारभ्य 'इत्यनुशासनम्' इत्यन्तमपि बृहदारण्यके श्रुतम् । अनेन हि परमात्मरूपाणामभेदे प्रमाणत्वेन 'इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश' (ऋ.६-४७-१७) इति मन्त्रमुदाहृत्य व्याख्यातः । 'हरयो' हरिनामानो 'दश' मत्स्याद्याः 'अयं वै' मूलरूप्येव चशब्दात्सूचितानि शतानि नारायणादिहरिनामकानि अयमेव । एवमृक्स्थं 'शतादश' इत्येतद्व्यूहद्वयपरत्वेन व्याख्याय दशशतानीति व्युत्क्रमेणान्वयेनैकव्यूहपरत्वेनापि व्याख्याति- **सहस्राणीति** ॥ विश्वादीनि सहस्राणि अयं वा इत्यन्वयः । दशेत्येतद्बहुपर्यायमभ्युपेत्य व्यूहान्तरपरत्वेनापि व्याख्याति - **बहूनि चेति** ॥ परादीनि बहूनि च हरयोऽयं वा इत्यन्वयः । 'शतमनन्तं भवति' इति वचनाच्छतेत्येतदनन्तपर्यायमित्यभिप्रेत्य व्यूहान्तरपरत्वेनापि व्याचष्टे-

अनन्तानि चेति ॥ अजितादीन्यपि हरयोऽयं वा इत्यन्वयः । एवं मत्स्यादि-परमात्मरूपाणामभेदमुक्त्वा तन्महिमानमाह- **तदेतदिति** ॥ 'तत्' प्रसिद्ध-मेतद्रूपजातं 'ब्रह्म' गुणपूर्णं न विद्यते पूर्वं यस्मात्तत् 'अपूर्वं' अनादि न विद्यते परमुत्तरं यस्मात्तत् 'अनपरम्' अन्तशून्यं न विद्यतेऽन्तरमन्यद्यस्य तत् 'अनन्तरम्' न विद्यते बहिरन्यद्यस्य तत् 'अबाह्यम्' इदमेव सर्वस्मादन्तरं बाह्यं चेत्यर्थः । ब्रह्मायमात्मा सर्वमनुभवतीति 'सर्वानुभूः' सर्वज्ञ इति 'वेदानु-शासनं' वेदव्याख्यानमित्यर्थः । पुनर्ब्रह्मेत्युक्तिस्तात्पर्यार्था, अनेकविशेषण-सम्बन्धार्था वा । यद्वा- ब्रह्मेत्यनुवादोऽतो न पौनरुक्त्यम् । तथा च यत् ब्रह्मायमात्मा सर्वानुभूरित्यन्वयः । विधेयविवक्षया अयमात्मेति पुल्लिङ्ग-प्रयोगः ॥

सू - ॐ ॥ अपि चैवमेके ॥ ॐ ॥ १३ ॥

एवमभेदेनैव चशब्दादनन्तरूपत्वं चैके शाखिनः पठन्ति । 'अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमश्शिवः । ओङ्कारो विदितो येन स मुनिर्नेतरो जनः ॥' (मा.४-७) इति ॥

[1]ननु नाभेदश्रुतिभिः भेदश्रुतेः बाधो युक्तः । तासां कतिपयरूपविषयत्वेन सावकाशत्वात् । नापि 'अयं वै हरयः' इत्यन्तिमश्रुतिविरोधः । तत्र परस्पर-मभेदानुक्तेः, मूलरूपेणापि 'एष त आत्मा .. अयमेव सः' इतिवत् स्पष्ट-मभेदाप्रतीतेः । अतो भेदश्रुतिबलात् विश्वादीनां भेद एवेत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **अपीति** ॥ अत्रापि तत्त्वप्रदीपोक्तरीत्या न केवलं काण्वा एवं पठन्ति, किन्तु 'एके' अन्ये माण्डूकेया अपीति समुच्चयार्थः । एवमित्यनुवादः, अभेदेनेति व्याख्यानम् । इत्थंभूतलक्षणे तृतीया । तथा च अभिन्नत्वप्रकारं प्राप्तान्येवेत्यर्थः । 'विश्वाद्यनन्तरूपाणि' इति शेषः ।

---

१. ननु नाभेदश्रुतेः भेदश्रुतिबाधो युक्तः ।' इति मातृकायां दृश्यते । (प.स. १७)

चशब्दादित्यनन्तरं 'विष्णोस्समुचितम्' इति शेषः । द्वितीयान्तशब्दयोरेके पठन्तीत्यनेनान्वयः । यद्वा- 'अभेदेने'ति सहयोगे तृतीया । तथा च चशब्दबोधितम् 'अनन्तरूपत्वं' विश्वादिरूपाणामनन्तत्वं बहुत्वम् अभेदेन सहैके पठन्तीत्यर्थः चस्समुच्चये । 'इति पठन्ती'त्यन्वयः । इतिरावर्तते । स च हेतौ । तथा च इति यतः पठन्ति अतो न भेदश्रुतिमवलम्ब्य विश्वादिभेदो ग्राह्यः, न भेदश्रुतिः अभेदश्रुतिविरोधिनीति वा अध्याहारेणान्वयः । अनेन सूत्रे पठन्तीत्यस्य यतोऽतश्शब्दयोरुक्तसाध्यवाक्यस्य च अध्याहारः कार्य इति सूचितम् । श्रुत्यर्थस्तु - यद्यपि 'अमात्रो' भिन्नांशशून्यः तथापि 'अनन्तमात्रः' अभिन्नानन्तांशवान् 'द्वैतस्योपशमः' द्वितीयेन प्रकारेणेतं द्वीतं इण् गतौ, भावे निष्ठा, द्वीतमेव द्वैतम्, तस्योपशमः तन्नाशकृत् । तत्त्वप्रदीपे तु - 'अमात्रः' प्रमाणरहितः मिथ्याज्ञानं 'अनन्तमात्रः' अनन्तरूपः 'शिवः' सुखात्मकः 'ॐ कारः' ओमित्याक्रियमाणः प्रणववाच्यः परमात्मा येन जीवेन विदितः स एव मुनिः न त्वितर इति 'द्वैतस्योपशमः' भेदरहित इति व्याख्यातम् । पठन्तीत्यन्वयः ॥

अभेदेऽपि भेदव्यपदेशः स्थानभेदादैश्वर्ययोगाच्च युज्यते ।

तर्हि का गतिः 'कार्यकारणवद्वौ' (मा. २-१६) इति भेदव्यपदेशस्येत्यत आह- **अभेदेऽपीति** ॥ विश्वादिरूपाणामभिन्नत्वेऽपीत्यर्थः । यद्यपि तथापीत्यर्थे अपिशब्दः । अनेन सौत्रापिशब्दस्यार्थान्तरं दर्शितम् । **भेदव्यपदेशो युज्यत इति** । विश्वादयो बद्धाः तुरीयस्त्वबद्ध इति भेदकधर्मोक्तिमुखेन भेदोक्तिर्युज्यते इत्यर्थः । अनेनैवंशब्दस्यार्थान्तरं दर्शितम् । कथं युज्यते अत आह- **स्थानभेदादिति** ॥ अक्ष्यादितदन्यरूपस्थानभेदादित्यर्थः । तथा चाक्ष्यादिस्थो बद्धः अन्यत्रगस्त्वबद्ध इति भेदकधर्मोक्तिः स्थानभेदाद्युज्यते । तथा भेदोक्तिरपि स्थानगतभेदस्य स्थानिन्युपचाराद्युज्यत इत्यर्थः । 'अनन्योऽप्यन्यशब्देन' इत्यानन्दमयनयोदाहृतप्रमाणे तु अभेदे भेदव्यपदेशः

अचिन्त्यैश्वर्यात् युज्यत इत्युक्तम् । तत् भेदव्यपदेशस्य मुख्यत्वाभिप्रायकम् । अभिन्नस्यैकस्य स्थानभेदोऽपि कुत इत्यत आह- **ऐश्वर्येति** ॥ अचिन्त्य-शक्त्याख्योपायादित्यर्थः । हेतुसाधकहेतुसमुच्चये चशब्दः ॥

ब्रह्मतर्के च ।

'बद्धो बन्धादिसाक्षित्वाद्भिन्नो भिन्नेषु संस्थितेः ।
निर्दोषाद्वयरूपोऽपि कथ्यते परमेश्वरः ॥ इति ॥' १३ ॥

ननु निर्दोषस्य हेरः कथं बन्ध इत्याशङ्कां परिहर्तुमुक्तार्थे चशब्दसूचितां स्मृतिमाह- **ब्रह्मतर्के चेति** ॥ न केवलमस्माभिरिति समुच्चये शङ्कापरिहार-समुच्चये वा चशब्दः । **बन्धादीति** ॥ जीवस्य जाग्रदादिभ्रमकारणतया बन्ध-कर्तृत्वादित्यर्थः । आदिशब्देन दुःखादिदोषो गृह्यते । बद्ध इत्युपलक्षणम् । दुःखीत्यपि द्रष्टव्यम् । निर्दोषिति विशेषणयोः कर्मधारयो बहुलग्रहणात् । अपिः प्रत्येकं सम्बध्यते । तथा च परमेश्वरो यद्यपि निर्दोषः, तथापि 'बन्धादि-साक्षित्वात्' अन्यगतबन्धदुःखादिद्रष्टृत्वात्तत्स्वामित्वाच्च बद्धादिरिति कथ्यते । एवं परमेश्वरो यद्यपि 'अद्वयरूपः' अभिन्नरूपः । तथापि 'भिन्नेषु ' अक्ष्यादिषु संस्थितेर्निमित्ताद्भिन्न इति कथ्यते इति योजना । इति ब्रह्मतर्क इत्यन्वयः । 'उक्तम्' इति शेषः ॥

॥ इति न स्थानतोऽप्यधिकरणम् ॥ ८ ॥

॥ ९. अरूपाधिकरणम् ॥

(परमात्मा अप्राकृतज्ञानानन्दादिरूपवान्)

रूपवत्वादनित्यत्वमिति ।

अत्राधिकरणे विष्णोरप्राकृतरूपं समर्थ्यते । पूर्वपक्षयति- **रूपवत्त्वा-दिति** ॥ शुक्लादिरूपवत्त्वेन विग्रहवत्त्वेन चोक्तत्वादित्यर्थः । अत एव च तत्त्वप्रदीपे 'रूपोपन्यासाच्च पुरुषविधमपि' इत्यादिना रूपवत्त्वमुक्तमिति

रूपशब्दितविग्रहवर्णोभयप्रापकसूत्रोदाहरणं कृतम् । न चैवं 'रूपशब्देन शुक्लादिगुणप्रतीतिः स्यात् । अतः- 'शिरःपाणीत्युक्तम्' इति सुधाविरोध इति वाच्यम् । तस्यास्तन्मात्रप्रतीतिस्स्यादित्यर्थकत्वात् । 'अनित्यत्वं' देहतो नाशवत्त्वं, 'विष्णोः स्यात्' इति शेषः । एवं रूपवत्त्वादित्येतत् । रूपवत्त्वेन 'रुग्मवर्णं, आदित्यवर्णम्' इत्यादिश्रुतिसिद्धत्वादित्यपि व्याख्येयम् । तेन हेत्वसिद्धिः परिहृता । अनित्यपदं च विष्णो रूपवत्त्वे 'अरूपमव्ययम्' तदरूपमनामयम्' इत्यादि श्रुत्यप्रामाण्यं च स्यादित्यप्रामाण्यपरतयाऽपि व्याख्येयम्– यथा 'अनित्यमुच्यते' (जै.सू. १-२-१) इति जैमिनिसूत्रे बाधकद्वयमुक्तं भवति, एवमरूपत्वपक्षेऽपि बाधकद्वयं टीकोक्तमनुसन्धेयम् । तथा च पक्षद्वयेऽपि भक्तिरनुपपन्नेति पूर्वपक्ष्यभिप्रायः ॥

अतो वक्ति –

सू— ॐ ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ ॐ ॥ १४ ॥

प्रकृत्यादिप्रवर्तकत्वेन तदुत्तमत्वान्नैव रूपवद्ब्रह्म ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे - **अत इति** ॥ 'प्रकृत्यादिप्रवर्तकत्वेन' तन्नियामकत्वेनेति । [1]'अनेन तच्छब्दार्थो दर्शितः । आदिशब्देन भूतं गृह्यते । उत्तमत्वादित्यनेन प्रधानत्वादित्येतत्प्रकारान्तरेण व्याख्यातम् । तत्र पूर्वम् उत्तमत्वे प्रकारप्रदर्शनरूपम् । सूत्रेऽरूपमिति वाच्ये रूपरूपिभेदनिवृत्त्यर्थ-मरूपवदित्युक्तम् । तद्व्याचष्टे- **नेति** ॥ प्राकृतभौतिकरूपवद्भिन्नमेवेत्यर्थः । न तु तद्वदित्येवकारार्थः । सूत्रे तदिति व्यस्तं समस्तं चेत्याशयेन व्यस्ततच्छब्दार्थमाह- **ब्रह्मेति** ॥ तस्मात् नानित्यत्वं ब्रह्मणः शङ्क्यमिति वाक्यशेषः ।

---

१. 'अनेन उत्तमत्वे प्रकारो दर्शितः' इति वाक्यविन्यासो दृश्यते ।

हिशब्दात् 'अस्थूलमनणु' (बृ. ५-८-८) इत्यादिश्रुतेश्च ।

ननु ब्रह्मणः प्रकृत्यादिसामर्थ्येन देहबन्धाभावेऽपि स्वेच्छालीलादिनिमित्तं रूपं किं न स्यादित्याशङ्कावारकतया हिशब्दं व्याचष्टे- **हिशब्दादिति** ॥ 'सूचितायाः' इति शेषः । 'श्रुतेः' इत्यस्य 'न' इतिवाक्येनान्वयः । तथा च निमित्तान्तरकृतरूपपदोक्तदेहाभ्युपगमे श्रुतावरूपमिति सामान्यनिषेधों न स्यादिति भावः । न केवलमुक्तयुक्तेरिति चशब्दार्थः । व्याख्यातेयं श्रुतिः अक्षरनये । अनेन सूत्रे नपुंसकोक्तिरेतच्छ्रुत्यनुसारादिति ध्येयम् ।

'भौतिकानि हि रूपाणि भूतेभ्योऽसौ परो यतः ।
अरूपवानतः प्रोक्तः क तदव्यक्ततः परे ॥'
इति मात्स्ये ॥ १४ ॥

सूत्रार्थे स्मृतिं चाह- **भौतिकानीति** ॥ यस्मात् सर्वाणि 'रूपाणि' शरीराणि पाञ्चभौतिकानि । उपलक्षणमेतत् । आव्यक्तिकानि च । यस्माद्वा 'असौ' परमात्मा भूतेभ्यः 'परः' तत्प्रवर्तकत्वेन तदुत्तमः तस्मात् 'अरूपवान्' तत्कार्यरूपरहितः । ननु भूतपरे भौतिकरूपाभावेऽपि अव्यक्तकार्यं रूपं किं न स्यादित्यत आह- **केति** ॥ 'अव्यक्ततः' प्रकृतितः 'परे' तत्प्रवर्तकत्वेन तदुत्तमे तत एव तत्कृतबन्धशून्ये ब्रह्मणि 'तत्' आव्यक्तिकं रूपमपि 'क' नेत्यर्थः । यद्वा - तत्त्वप्रदीपोक्तरीत्या कैमुत्यमेतत् । अस्मिन् पक्षे नोपलक्षणम् । तच्छब्देन भौतिकरूपस्यैव परामर्शः । तथा च यदा भूतेभ्यः परे भगवति भूतकार्यदेहो न, तदा भूतकारणाव्यक्तमप्यतीत्य वर्तमाने तस्मिन् तदव्यक्तकार्यभूतकार्यशरीरं नेति किमु वक्तव्यमित्यर्थः । यदा भूतपरत्वमेव भौतिकदेहाभावे हेतुः, तदा सुतरां भूतपराव्यक्तपरत्वमिति भावः । एवं यतो भौतिकानि रूपाणि अनित्यत्वव्याप्तानि, असौ च भूतेभ्यः परत्वात्तद्रहितोऽतो नानित्यताशङ्का कार्येत्यध्याहारेण तत्त्वप्रदीपोक्तं योजनान्तरं द्रष्टव्यम् । इति मास्त्य इति । 'उक्तम्' इति शेषः ।

सू – ॐ ॥ प्रकाशवच्चावैयर्थ्यम् ॥ ॐ ॥ १५ ॥

'यदा यश्यः पश्यते रुग्मवर्णम्' (मु.३-१-३) 'श्यामाच्छबलं प्रपद्ये' (छा.८-१३-१) 'सुवर्णज्योतिः' (तै. ३-१०) इत्यादिश्रुतीनां च न वैयर्थ्यम्, विलक्षणरूपवत्त्वात्।

ननु ब्रह्मणो रूपाभावे 'रुग्मवर्णम्' इत्यादिरूपित्वश्रुतिर्वैयर्थ्यं, सौन्दर्यसौलक्षण्याद्यभावश्चेत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **प्रकाशवच्चेति** ॥ श्रुतीनामित्यनेन वैयर्थ्यसम्बन्धी दर्शितः। 'यदा' इति मुण्डकश्रुतिरदृश्यत्वनये व्याख्याता। 'श्यामात्' इति छन्दोगश्रुतिः। 'श्यामो' हृदिस्थो विष्णुः शबलो विश्वरूपवान् इति तद्भाष्ये व्याख्याता। यो हृदिस्थो विष्णुः श्यामरूपवान् तस्मात्तदुपासनानन्तरं यो हृदि स्थितः 'शवलो' विश्वरूपवान्नानावर्णयुक्तस्तमहं प्रपद्ये उपासे इति तदभिप्रायः। [1]हृद्गतोपास्तिसाध्यां विश्वरूपोपास्तिमाहेति छान्दोग्यटीकोक्तेः यो हृदिस्थो विष्णुस्तदुपासनानन्तरं यो विश्वरूपी व्याप्तरूपी तमुपासे इत्यर्थः। 'सुवर्णज्योतिः' इति वेदान्तरवाक्यं तैत्तिरीयगतं वा। तस्य तद्भाष्ये सुष्ठु परमानन्दो हरिः ज्योतिः प्रेरको यस्येति मुक्तपरतया व्याख्यानेऽपीह ब्रह्मणो रुग्मवर्णाभिधायकतयापि व्याख्यानाद्विरोधः। आदिशब्देन 'आदित्यवर्णम्' इत्यादिकं गृह्यते। श्रुतीनां चेति चशब्दः न केवलमरूपित्वश्रुतीनां न वैयर्थ्यम्, अपि तु रूपित्वश्रुतीनां च 'न वैयर्थ्यम्' विषयाभावकृताप्रामाण्यमिति समुच्चये। वैयर्थ्यं चेति भिन्नक्रमेणान्वये सौन्दर्याद्यभावसमुच्चये वा चशब्दः। कुतो रूपश्रुतिर्वैयर्थ्याभावः सौन्दर्याद्यभावो वेत्यतस्तत्र हेतुतया प्रकाशवदित्यंशं मतुबभिप्रायेण व्याचष्टे- **रूपवत्त्वादिति** ॥ पञ्चमीनिर्देशेन यतः तत् प्रकाशवद्रूपवदिति हेतुर्दर्शितः। यत् चशब्देनारूपित्वश्रुतीनामप्यवैयर्थ्यमनित्यत्वराहित्यं च सूचितम्, तदयुक्तम्। ब्रह्मणो रूपित्वं अनित्यत्वस्यारूपित्वश्रुतिर्वैयर्थ्यस्य

---

१. 'हृद्गतोपास्तिसाध्यां' इत्यतः 'टीकोक्तेः' इत्यन्तो भागः मातृकायां न दृश्यते।

चापत्तेरित्यतो नैवमित्याह सूत्रकृत्- **अवैयर्थ्यमिति** ॥ तस्यार्थः- **विलक्षणेति** ॥ प्राकृतभौतिकरूपविलक्षणेत्यर्थः । अरूपवच्चेति चशब्दार्थो वाऽयम् । तथा च अनित्यत्वादिव्याप्तप्राकृतादिरूपाभावान्न ब्रह्मणोऽनित्यत्वं, न वाऽरूपित्वश्रुतिवैयर्थ्यं प्राकृतादिरूपाभावाविषयत्वात्तस्या इति भावः । एवं न वैयर्थ्यमित्येतत् व्युत्पत्त्यभावादरूपित्वश्रुतेरर्थाबोधकत्वं नेत्यपि व्याख्येयम् ।

यथा चक्षुरादिप्रकाशे विद्यमानेऽपि वैलक्षण्यादप्रकाशादिव्यवहारः ॥ १५ ॥

ननु यद्यस्ति परमात्मनो रूपं, तर्हि कथं तस्य प्रसिद्धरूपवैलक्षण्यमात्रेणारूपित्वोक्तिरित्याशङ्कोत्तरत्वेनापि प्रकाशवदित्येतद्व्याख्यानाभिप्रायेण व्याचष्टे - **यथेति** ॥ आदिशब्देन तेजोऽन्तरं गृह्यते । 'विद्यमाने' इत्यतः प्राक् गृहान्तरित्युपस्कार्यम् । अपिशब्दो विरोधसूचकः । 'वैलक्षण्यात्' सौरदीपादिप्रकाशवैलक्षण्यात् चक्षुरादिप्रकाशस्येति विपरिणामेनान्वयः । **अप्रकाशादीति** । नास्ति प्रकाश इत्यादिव्यावहार इत्यर्थः । आदिशब्देनान्धकारावृतमिदं गृहमित्यादिव्यवहारो गृह्यते । व्यवहार इत्यनेन प्रकाशशब्दः प्रकाशप्रतियोगिकाभावव्यवहारपर इति सूचितम् । तथा प्रकृतेऽपीति वाक्यशेषः । एवं प्रकाशवदित्येतत् परमात्मनि 'आत्मैवास्य ज्योतिः' इति प्रकाशशब्दप्रयोगवदित्यपि व्याख्येयम् । पूर्वसूत्रात्तदिति पदं विपरिणम्येहानुवर्तते । तदपि श्रुतिब्रह्मोभयपरम् । तथाचायं सूत्रार्थः- यतस्तद्ब्रह्म 'प्रकाशवत्' रूपवद्विग्रहवत् शुक्लादिरूपवतस्तस्य ब्रह्मणोऽरूपित्वेऽपि तासां रुग्मवर्णादिश्रुतीनाम् 'अवैयर्थ्यम्' वैयर्थ्यं नास्ति, नापि सौन्दर्याद्यभावः । न केवलं रूपित्वश्रुतीनामेवावैयर्थ्यम्, किन्तु तस्मिन् ब्रह्मणो रूपित्वपक्षे तासां ब्रह्मणोऽरूपित्वबोधिकानाम् 'अरूपमव्ययम्' इत्यादिश्रुतीनां च । नापि तस्यानित्यत्वम् । कुतः ? यतस्तद्ब्रह्म 'अरूपवत्' अनित्यत्वव्याप्तप्राकृतभौतिकविलक्षणरूपवत् ब्रह्मणः 'अवैयर्थ्यम्' अत्यन्तविलक्षणार्थत्वं विलक्षणरूपवत्त्वमत इति वा । ननु विलक्षणरूपवत्त्वे कथमरूपित्वश्रुत्यवैयर्थ्यम् ? यतः 'प्रकाशवत्' प्रकाशविषय-

व्यवहारवत् । यथान्धकारे गृहान्तर्नयनादिप्रकाशे विद्यमानेऽपि तस्य सौरादि-प्रकाशविलक्षणत्वात्तदभावे नास्ति प्रकाश इति व्यवहारो भवति, तथा रूपित्वेऽपि विलक्षणरूपवत्त्वात् ब्रह्मणः अरूपित्वश्रुत्यवैयर्थ्यं भवति । न चैवं रूपशब्दस्य प्राकृतादावेव व्युत्पन्नत्वेनात्र व्युत्पत्त्यभावात् रूपित्वश्रुतिवैयर्थ्यम् । यतः 'प्रकाशवत्' अप्रसिद्धप्रकाशेऽपि परमात्मानि 'आत्मैवास्य ज्योतिः' (बृ. ६-६-६) इति प्रकाशार्थकज्योतिश्शब्दव्यावहारवदुपपद्यते अत इति ।

सू - ॐ ॥ आह च तन्मात्रम् ॥ ॐ ॥ १६ ॥

वैलक्षण्यं चोच्यते रूपस्य विज्ञानानन्दमात्रत्वम् 'ऐकात्म्यप्रत्ययसारम्' (मा.२-४) इति ।

ननु कथं ब्रह्मणो विलक्षणरूपवत्त्वं, येनानित्यत्वादिदोषाभावः, सर्वरूपाणां प्रकृत्याद्यात्मकत्वनियमात् इतररूपापेक्षया तद्रूपस्य वैलक्षण्यानुक्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे- **आह चेति** ॥ सूत्रे भाष्ये च चोऽवधारणे । उच्यत एवेति सम्बन्ध्यते । न तु नोच्यत इत्येवशब्दार्थः । 'रूपस्य' शरीरस्येति बुद्ध्या विविक्तस्य विपरिणतस्य तत्पदस्य व्याख्यानम् । **विज्ञानानन्दमात्रत्वमिति** । ज्ञानानन्दाद्येकस्वरूपत्वमित्यर्थः । अनेन तच्छब्दः तद्गुणसारत्वादित्यत्र प्रकृत-ज्ञानानन्दगुणवाची भावनिर्देशश्चायमिति सूचितम् । इदं च वैलक्षण्यपदेन समानाधिकृततयाऽन्वेतव्यम् । मात्रपदेन रूपस्य प्राकृतत्वनिवृत्तिः । इति श्रुत्योच्यत इत्यन्वयः । ब्रह्मणो ज्ञानानन्दाद्यात्मकत्वोक्त्या तद्रूपस्यापि तदुक्त-मित्यभिप्रायः । अनेन यतः 'ऐकात्म्यप्रत्ययसारम्' इति माण्डूकश्रुतिः तस्य ब्रह्मणो रूपस्य तन्मात्रत्वं ज्ञानानन्दाद्येकस्वरूपत्वम् 'आह च' वक्त्येव, अतो न वैलक्षण्यानुक्तिरिति सूत्रार्थ उक्तो भवति । तथाच पूर्ववाद्युक्तहेतुरसिद्ध इति भावः । एकः प्रधानः, स चासावात्मा च पूर्णश्चैकात्मा तस्य भावः ऐकात्म्यम्, प्रत्ययो ज्ञानं, ऐकात्म्यं प्रत्ययश्चेत्युभयं सारः स्वरूपं यस्य तदैकात्म्यप्रत्यय-सारमिति श्रुत्यर्थः । यद्यपि माण्डूकभाष्ये -

'एकः प्रधान उद्दिष्टः आत्मा पूर्णत्वतश्श्रुतः ।
तदेवास्य स्वरूपं यदैकात्म्यं तेन कीर्तितम् ॥
प्रत्ययो ज्ञानरूपत्वात्सार आनन्दरूपतः ॥ (मां.भा.२.४)

इत्यानन्दरूपत्वं सारशब्दार्थो, न स्वरूपमित्युक्तम् । तथा **व्यासतीर्थीये**- स्वार्थे ष्यञ् । ऐकात्म्यस्य ब्रह्माभेदं चाश्रित्य ऐकात्म्यश्चासौ प्रत्ययश्चासौ सारश्चेति विग्रहः प्रदर्शितः । तथापि 'आनन्दमात्रम्' इत्युत्तरश्रुत्यवैयर्थ्यायेह स्वरूपार्थतया सारशब्दो व्याख्यातः ॥

'आनन्दमात्रमजरं पुराणमेकं सन्तं बहुधा दृश्यमानम् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥'
इति चतुर्वेदशिखायाम् ॥ १६ ॥

इह सारशब्दस्य स्वरूपार्थत्वादानन्दरूपत्वे श्रुत्यन्तरं पठति- **आनन्दमात्रमिति** ॥ आनन्दैकस्वरूपं, न तु प्राकृतम्, कुतः ? यतः 'अजरं' सदा दृढं 'पुराणम्' अनादिभूतम् 'एकं' सर्वोत्कृष्टं 'सन्तं' निर्दुष्टम्, एकं सन्तमिति वा 'बहुधा' विश्वाद्यत्मना मत्स्यादिरूपैर्वा दृश्यमानम् 'आत्मस्थं' देहस्थं परमात्मानं 'ये धीराः' ज्ञानिनः 'अनुपश्यन्ति' साक्षात्कुर्वन्ति तेषां 'शाश्वतं सुखं' मोक्षो भवति, नान्येषामित्यर्थः । **इतीति** ॥ इति चतुर्वेदशिखायां च वैलक्षण्यमुच्यत इत्यन्वयः । अनेन सौत्रचशब्दः श्रुतिसमुच्चयेऽपीति सूचितम् ।

सू — ॐ ॥ दर्शयति चाथो अपि स्मर्यते ॥ ॐ ॥ १७ ॥

दर्शयति चानन्दरूपत्वं 'तद्विज्ञानेन परिश्यन्ति धीराः आनन्दरूपममृतं यद्विभाति' (मु.२-२-८) इति ॥

ननु उक्तश्रुतिद्वये ब्रह्मणो ज्ञानानन्दाद्यात्मकत्वमेवोच्यते, नत्वानन्दादेर्ब्रह्मशरीरत्वम् । अतो रूपिपदोक्तदेहित्वश्रुतेर्लोकविलक्षणरूपविषयत्वाभावाद्वैयर्थ्यम्, सौन्दर्याभावश्चापरिहृतः । न च रूपरूपिणोरभेदादिति तत्त्वप्रदीपे

तदपि श्रुत्यभिप्रेतमित्युक्तमिति वाच्यम् । स्पष्टोक्त्यभावेनानिर्णयादित्याशङ्क्य परिहरत्सूत्रं पठित्वा व्याचष्टे- **दर्शयतीति** ॥ चशब्दो 'रूपत्वम्' इत्यतः परो योज्यः । 'आनन्दरूपत्वं' ब्रह्मशरीरत्वमिति । अनेन सूत्रेऽपेक्षिताध्याहारो दर्शितः । न केवलमानन्दस्य ब्रह्मात्मकत्वं किन्तु तच्छरीरत्वं चेति चशब्दार्थः । 'इति' इत्यनन्तरं भाष्ये सूत्रे च 'श्रुतिः' इति शेषः । श्रुतिर्दर्शयतीत्यन्वयः । 'आनन्दरूपम्' आनन्दशरीरम् अत एव 'अमृतं' देहतो नाशरहितं यद्विभाति तद्ब्रह्म 'विज्ञानेन' श्रवणादिजनितसाक्षात्कारेण 'परिपश्यन्ति' विषयीकुर्वन्ति ज्ञानिन इत्याथर्वणश्रुत्यर्थः ।

'शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जनम् ।
चिन्तयीत यतिर्नान्यं ज्ञानरूपादृते हरेः ॥'
इति च मात्स्ये ॥ १७ ॥

सूत्रे अथोपदं ज्ञानरूपार्थान्तरवाचि । अपिस्समुच्चये । असन्धिः प्रगृह्यत्वात् । तथाच न केवलमानन्दस्यैव ब्रह्मात्मकत्वं तद्रूपत्वं चोच्यते श्रुत्या, किन्तु ज्ञानस्यापि तदात्मकत्त्वं तद्रूपत्वं चोच्यते स्मृत्येति सूत्रखण्डार्थमभिप्रेत्य तां स्मृतिं पठति- **शुद्धेति** ॥ इति मात्स्ये स्मर्यत इत्यन्वयः । तद्वचनाख्यस्मृत्येदमुच्यत इति यावत् । यतिः 'शुद्धस्फटिक सङ्काशं' तद्वच्छुक्लवर्णं निरञ्जनं वासुदेवमेव परं प्रधानम् 'ऋते' ज्ञानाय 'चिन्तयीत' ध्यायीत । 'ज्ञानरूपात्' ज्ञानशरीराद्वासुदेवादृते 'अन्यं' ब्रह्मादिकं[1] परत्वेन न चिन्तयीतेत्यर्थः । न चैतत्सूत्रे एव ज्ञानान्दयोः ब्रह्मरूपत्वे स्पष्टश्रुत्युक्तेरार्थिकोक्तिरूपपूर्वसूत्रवैयर्थ्यमिति वाच्यम् । स्वरूपस्यापि ज्ञानाद्यात्मकत्वसिद्ध्यर्थं तदुपन्यासात् । न चानर्थक्यम् । ब्रह्मतच्छरीरयोरभेदेन ब्रह्मणो ज्ञानानन्दाद्यात्मकत्वे तच्छरीरस्यापि तल्लाभाभिप्रायेण तदुदाहरणोपपत्तेः । अत्र तत्त्वप्रदीपे दर्शयति चानन्दस्य स्वरूपत्वम् 'आनन्दरूपम्' इत्यादि । अथो च दर्शयति-

---

१. 'तत्परिवारतां विना' इति मुद्रितपुस्तके ।

'सज्ज्ञानानन्दर्शीर्षोऽसौ सज्ज्ञानानन्दबाहुकः ।
सज्ज्ञानानन्ददेहस्तु सज्ज्ञानानन्दपादवान् ॥'

इति । अथो च दर्शयति -

'ब्रह्मणस्तद्गुणानां च भेददर्शधरं तमः ।
भेदाभेदप्रदर्शी च तम एवोत्तरं विशेत् ॥
विजानीयात्ततो ब्रह्म सदा सर्वगुणात्मकम् ।
गुणानां च विशेषोऽस्ति न विशेषः कथञ्चन ॥
ते सर्वेऽपि गुणाःपूर्णास्तच्छरीरः परः स्मृतः ।
आनन्दज्ञानशक्त्यादिदेहं विष्णुं तु ये जनाः ॥
अदेहं भूतदेहं वा विदुस्ते चाधरं तमः ।
तथा प्रकृतिदेहज्ञाः कर्मदेहविदोऽपि वा ॥
तस्मादानन्दचिद्देहं चिदानन्दशिरोमुखम् ।
चिदानन्दभुजं ज्ञानसुखैकपरमाङ्गुलिम् ॥
आदेहादानखाग्रेभ्यः पूर्णचित्सुखशक्तिकम् ।
प्रत्येकं तु गुणांस्तांस्तु सदा सर्वगुणात्मकान् ॥
ज्ञात्वा विमुच्यते विष्णोः प्रसादान्मानुषोऽपि सन् ॥'

इति पैङ्गिश्रुतिरिति । एवं दर्शयति इत्येतत् अथो इत्युत्तरत्रापि संयोज्य व्याख्यातम् । तत्पक्षे न केवलं दर्शयति , किन्तु स्मर्यतेऽपीत्यपिशब्दार्थः ॥

॥ इत्यरूपाधिकरणम् ॥

॥ १०. उपमाधिकरणम् ॥

(यथा सूर्यात् सूर्यप्रतिविम्बः भिन्नः, तथा परमात्मनः जीवः भिन्नः)

सू—

ॐ ॥ अत एव चोपमा सूर्यकादिवत् ॥ ॐ ॥ १८ ॥

यस्मादेवं परमेश्वररूपाणां मिथो न कश्चिद्भेदः । अतः

सादृश्याज्जीवस्यापि तथा स्यादिति, तस्य प्रतिबिम्बत्व-मुक्त्वा चशब्देन भेदं दर्शयति ।

अत्राधिकरणे ईश्वरस्य जीवाद्भेदाभेदो निराक्रियते । अत्र पूर्वपक्षानुवाद-रूपम् 'अत एवोपमा' इति सूत्रांशं व्याकरोति- **यस्मादिति** ॥ योजना तु 'यस्मात्' यत एवं 'न स्थानतोऽपि' इत्याद्युक्तप्रकारेण परमेश्वररूपाणां परमेश्वरस्य च 'मिथः' परस्परं 'कश्चित्' अन्योन्याभावरूपो वा हीनाधिक-भावरूपो वा अनुग्राह्यानुग्राहकभावरूपो वा भेदो न, किन्त्वभेद एव सिद्धोऽत इति दृष्टान्तलाभादिति भावः । न तत्रान्योऽन्वेषणीय इत्येवशब्दार्थः । एवं सौत्रातःशब्दपरामृश्यं प्रदर्श्यावृत्त्यभिप्रायेण तमनुकृत्य तस्यार्थान्तरमाह- **सादृश्यादिति** ॥ चित्त्वादिना परमेश्वरसादृश्यादित्यर्थः । सूत्रे 'ततो ह्यस्य' इत्यतोऽनुवृत्तस्यास्येत्यस्यार्थमाह- **जीवस्येति** ॥ न केवलं परमेश्वररूपाणा-मित्यपेरर्थः । अनेन पूर्वत्रापि चशब्दसम्बन्धो ज्ञापितः । उपमेत्यस्यार्थः- **तथेति** ॥ परमेश्वराभेद इत्यर्थः । 'स्यात्' इति शेषोक्तिः । 'स्यात्' इति' इत्यनन्तरं 'प्राप्ते तत्परिहाराय' इति शेषः । अनेन सूत्रे 'न स्थानतोऽपि' इत्यतो नञनुकर्षोऽभिप्रेयते । कुतो नेत्यतस्तत्र हेतुतयाऽऽगतं सूर्यकादि-वच्चेत्यंशं सिद्धान्त्यभिप्रेतानुमानपरतया व्याचष्टे- **तस्येति** ॥ जीवस्येत्यर्थः । 'प्रतिबिम्बत्वम्' ईशप्रतिबिम्बत्वाख्यं हेतुमुक्त्वा सूर्यकादिवदिति दृष्टान्तो-क्त्यैवेति शेषः । 'चशब्देन' उत्तरत्राप्यन्वितेन 'भेदं' परमेश्वरेणात्यन्तभेदरूपं साध्यं 'दर्शयति' समुच्चिनोति सूत्रकार इत्यर्थः । तत्त्वप्रदीपरीत्या तु रूपमित्यादिका श्रुतिस्तस्य प्रतिबिम्बत्वमुक्त्वा भेदं दर्शयतीति चशब्देन सूत्रकारो दर्शयतीत्यर्थः । यद्वा- भेदाभेदपूर्वपक्षस्य बहिरेव लाभादत एवेत्यादि समग्रसूत्रं सिद्धान्त एवेत्याह- **यस्मादिति** ॥ 'ज्ञानैश्वर्यादा'वितिं शेषः । भेदशब्दश्च विशेषवाची । 'अतः' इत्यावर्तते 'अपि' इति च । तथा च यस्मादेवमुक्तरीत्या परमेश्वररूपाणां तत्स्वरूपांशानां मत्स्यादीनां परमेश्वरस्य च मिथो ज्ञानैश्वर्यादौ न कश्चिद्विशेषः. तस्मादेव जीवस्यापि अतः

परमेश्वरस्वरूपांशत्वे 'सादृश्यात्' मत्स्यादिसाम्यात् 'तथा स्यात्' परमेश्वर-स्वरूपांशवत् ज्ञानैश्वर्याद्यविशेषः स्यादिति 'अतः' एतदर्थमेवानिष्टप्रसङ्ग-परिहारार्थमेव अत एवोपमेति पदैः 'तस्य' जीवस्य 'तथापि' अंशत्वेऽपि 'तथा' प्रतिबिम्बभाव एवेति प्रतिबिम्बभावमेवोक्त्वा 'चशब्देन' अतस्तेन हेतुना सूर्यकादिदृष्टान्तेन 'भेदं' साध्यं समुच्चिनोति सूत्रकार इत्यन्वयः।

'रूपं रूपं प्रतिरूपो बभूव (बृ.४-५-१९)
बहवस्सूर्यका यद्वत्सूर्यस्य सदृशा जले।
एवमेवात्मका लोके परात्मसदृशा मताः॥' इत्यादि।

जीवस्येश्वरप्रतिबिम्बत्वमेव कुत इत्यतश्चशब्दसूचितश्रुतेरेवेत्याह- **रूपमिति॥** द्वितीयव्याख्याने तु युक्तिसिद्धप्रतिबिम्बत्वे दार्ढ्याय श्रुत्युपन्यासः। व्याख्यातेयं श्रुतिरंशनये। 'जले' जलादौ 'सूर्यकाः' तत्र प्रतिबिम्बिताः सूर्याः 'यद्वत्' यथा सूर्यस्य सदृशा मताः, एवमेव लोके प्रमिताः 'आत्मकाः' ईशप्रतिबिम्बभूता अमुख्यात्मानः परमात्मसदृशा मता इति श्रुत्यन्तरार्थः। अत्राद्यश्रुतौ रूपशब्दोक्तं प्रतिबिम्बत्वं द्वितीयश्रुत्या परमात्मसदृशा इति व्याख्यातमिति ज्ञेयम्। 'इत्यादि' इत्यनन्तरं 'श्रुतिः' इति शेषः। अत एव तत्त्वप्रदीपे श्रुतिर्दर्शयतीत्युक्तम्। टीकाकृतापि 'श्रुतिरित्यध्याहारस्य सिद्धत्वादित्याशयेन प्रतिबिम्बत्वं दर्शयतीत्यन्वययोग्यपदद्वयमनुषज्यते, इत्युक्तम्। तथाचायं टीकारीत्या सूत्रार्थः- 'अत एव' ईशतद्रूपाणामभेदोक्तेरेव 'अत एव' जीवस्य चेतनत्वादिना ईश्वरसाम्यादेवास्य जीवस्य 'उपमा' मत्स्यादिसाम्यम्। तद्वदीशाभेदः स्यादिति न, कुतः ? यतः 'सूर्यकादिवत्' जलादौ प्रतिबिम्बितसूर्यच्छायादिवत् ईशप्रतिबिम्बस्तस्मादेव तद्भिन्नश्चातः। यद्वा- 'अत एव' मत्स्यादीनामीश्वरस्य च ज्ञानैश्वर्यादाविव विशेषस्योक्त्वादेव अतः। तर्हि जीवस्यापि परमेश्वरस्वरूपांशत्वे यतः 'उपमा' मत्स्यादिभिः साम्यं स्यात्, ततश्च तस्योपमा परमेश्वरवत् ज्ञानाद्यविशेषः स्यात्। अतः

एतदर्थमेवंरूपानिष्टपरिहारार्थं जीवस्योपमैव ईश्वरप्रतिबिम्बतैव, न स्वरूपांशता । यतः प्रतिबिम्बोऽतः सूर्यकादिवच्च भेद एव नाभेदोऽपि । न च हेत्वसिद्धिः । 'रूपम्' इत्यादिश्रुतेरिति । तत्त्वप्रदीपरीत्या तु- 'अत एव' जीवस्य परमेश्वरेण चिदानन्दादिसादृश्यादेव 'रूपम्' इत्यादिश्रुतौ सूर्यकादिवदुपमा प्रतिबिम्बत्वमुक्तम् । तस्य तद्रूपत्वादिति भावः । 'अत एव' प्रतिबिम्बत्वोक्त्यैव श्रुत्या भेदोऽप्युक्तः । तस्य भेदघटितत्वादिति चशब्दार्थ इति ।

अत एव भिन्नत्वतदधीनत्वतत्सादृश्यैरेव सूर्यकाद्युपमा, नोपाध्यधीनत्वादिना ॥ १८ ॥

यदुक्तं सूर्यकादिवज्जीवो ब्रह्मप्रतिबिम्ब इति । तदयुक्तम् । जीवस्य सूर्यकादिवदुपाध्यायत्तत्वाभावेन तदुपमत्वासम्भवात् । तद्भावे चानित्यत्वजन्ममोक्षाभावापत्तेः । अतः प्रतिबिम्बत्वाभावाद्भेदासिद्धिरिति दूषणं सुस्थमित्याशङ्क्योत्तरत्वेनापि अत एव चोपमेति सूत्रखण्डं व्याचष्टे- **अत एवेति** ॥ अनुकृतातःशब्दपरामृश्यं दर्शयति- **भिन्नत्वेति** ॥ अत्र भिन्नत्वं साध्यत्वेनोपात्तं, न तु त्रयाणामेकप्रकारत्वम् । तथा च बिम्बभिन्नत्वरूपसाध्यधर्मेण बिम्बाधीनत्वतत्सादृश्यरूपसाधनधर्माभ्यामेव जीवस्य 'सूर्यकाद्युपमा' तत्साम्यमित्यर्थः । सूत्रकृतोक्तेति शेषः । प्रागाभासत्वं चोक्तमिति चशब्दार्थः । स्वप्रयुक्तैवकारव्यावर्त्यमाह- **नेति** ॥ आदिशब्देनोपाधिनाश्यत्वजडत्वादिर्गृह्यते । अतो न सूर्यकाद्युपमासम्भवः । 'न वाऽनित्यत्वादिप्रसङ्गः' इति वाक्यशेषः । दृष्टान्तदार्ष्टान्तिकयोः सर्वसाम्यस्यानपेक्षितत्वादिति भावः । अनेन 'अत एव' तदधीनत्वसादृश्याभ्यामेव 'सूर्यकादिवत्' आभासत्वं जीवस्य सूर्यकाद्युपमा चाभिहिता नोपाध्यधीनत्वादिनेति सूत्रखण्डस्य वृत्त्यन्तरमुक्तं भवति ।

॥ इत्युपमाधिकरणम् ॥ १० ॥

॥ ११. अम्बुवदधिकरणम् ॥

(जैवज्ञानानन्दाद्यभिव्यक्त्यर्थं भक्तिरावश्यकी)

नित्यसिद्धत्वात्सादृश्यस्य नित्यानन्दज्ञानादेः न भक्ति-ज्ञानादिना प्रयोजनमिति ।

अत्राधिकरणे ईश्वरे भक्त्यर्थं तस्यजीवस्वरूपाभिव्यक्तिरूपफलं निरूप्यते । पूर्वपक्षयति- नित्येति ॥ भक्तिश्च ज्ञानं च भक्तिज्ञाने, ज्ञानमपरोक्षं, आदिशब्देन प्रसादो लभ्यते। प्रत्येकं तृतीयान्वयः । 'प्रयोजनं' साध्यम् । 'न प्रयोजनमित्यावर्तते । 'यत' इति 'मोक्षस्ये'ति च शेषः । तथाचेत्थं योजना । न भक्तिः कर्तव्या । कुतः ? यतो न तया प्रयोजनमस्ति । न च ज्ञानमेव प्रयोजनम् । यतो न तेनापि प्रयोजनमस्ति । न च तस्य प्रसादः प्रयोजनम् । यतो न तेनापि प्रयोजनमस्ति । न च प्रसादेन मोक्षसम्भवात्कथं तेन न प्रयोजनमिति वाच्यम् । मोक्षस्य नित्यसिद्धत्वात् । कुतस्तस्य नित्यसिद्धत्वम् ? परमात्मसादृश्यस्य जीवे 'नित्यसिद्धत्वात्' नित्यं सत्त्वात् । किं ततः ? तस्य नित्यज्ञानानानन्दादिरूपत्वात् । न च विद्यमानस्याप्यभिव्यक्त्यर्थं भक्त्याद्यपेक्षितमिति वाच्यम् । विद्यमानस्य योग्यस्याभिव्यक्तेर्नित्यसिद्धत्वात् कदाचित् स्वयमेव सम्भवात्सुप्ताविवेति ।

अतो ब्रवीति -

सू— ॐ ॥ अम्बुवदग्रहणात्तु न तथात्वम् ॥ ॐ ॥ १९ ॥

अम्बुवत्स्नेहेन, ग्रहणं ज्ञानं, भक्तिं विना न तत्सादृश्यं सम्यगभिव्यज्यते । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' (कठ २-२३) इति हि श्रुतिः ।

सिद्धान्तयत्सूत्रमुपन्यस्याम्बुवदिति पदतात्पर्यमाह- अम्बुवदिति ॥

अम्बुवदग्रहणादिति अर्थाभावेऽव्ययमित्याशयेन तत्प्रविष्टग्रहणपदं व्याचष्टे - **ग्रहणमिति** ॥ सूत्रार्थमाह- **भक्तिं विनेति** ॥ 'भक्तिं विना' इत्यनुक्त्वा 'अम्बुवदग्रहणात्' इति गुरूक्तेः प्रयोजनं सलक्षणं दर्शयितुमेवमुक्तिर्गोपनीयत्वेन चेति तत्त्वप्रदीपेऽभिहितम् । अत्र भाष्ये- अम्बुवदित्यनूद्य स्नेहेनेति व्याख्याति । स्नेहात्मकत्वादम्बुनः । तेन मानसस्नेहं लक्षयति । अम्बुवद्ग्रहणं स्नेहसहितं ज्ञानमित्यर्थ इति तत्त्वप्रदीपानुसारात् स्नेहेनेत्यनन्तरं सहितमिति शेषः । सूत्रे अम्बुवदिति मतुब्वत्त्वं छान्दसम् । स्नेहात्मकजलवाचकाम्बुपदस्य तदात्मकस्नेहे शक्तिः, चिक्कणतासाधारणस्नेहमात्रप्रतिपादकस्याम्बुपदस्य मानसस्नेहे लक्षणा । तथाचाम्बुवदग्रहणादित्यस्य मानसिकस्नेहेन सहितं यन्माहात्म्यग्रहणं तस्याभावादित्यर्थः । अस्य पर्यवसितार्थो– **भक्तिं विनेति** ॥ भाष्ये स्नेहेनेत्यस्यान्वयाय तत्त्वप्रदीपावतारिकाटीकारीत्या सहितमिति पदाध्याहारस्यावश्यकत्वात् । सूत्रार्थकथनेन सिद्धान्त्यभिमतानुमाने हेत्वसिद्धिपरिहाराय प्रवृत्तस्य सूत्रस्यासिद्धिकारणव्यतिरेकव्यभिचारपरिहारकत्वमुक्तं भवति । तथात्वमित्यस्यार्थमाह- **तत्सादृश्यमिति** ॥ ततद्गुणसारत्वादिति प्रकृतं ज्ञानानन्दादिनेश्वरसादृश्यमित्यर्थः । अस्य जीवस्येति वर्तते । [1]तुशब्दार्थस्तु सम्यगिति । सुप्तौ विनाऽपि भक्तिं सुखाद्यभिव्यक्तिदर्शनाद्व्यभिचारपरिहारायैतत्पदम् । सूत्रे भवतीत्यध्याहारेणम भवतेर्व्यक्त्यर्थत्वमभिव्यज्यत इति क्रियापदाध्याहारं वाऽभिप्रेत्याह- **अभिव्यज्यत इति** ॥ सूत्रे 'न साम्यम्' इत्यनुक्त्वा 'न तथात्वम्' इत्युक्त्या अभिव्यक्तिरपि कदाचित्स्वयमेव भवतीति शङ्का निरस्ता । कदाचित् तत्सादृश्यस्य स्वयमेवाभिव्यक्तत्वमपि नेति तस्यार्थान्तरसम्भवात् । स्वयमेवाभिव्यक्त्यङ्गीकारेऽनादिसंसारप्रवाहानुपपत्तेरिति भावः । भक्तिं विना न तत्सादृश्यं सम्यगभिव्यज्यत इति भाष्यस्य सूत्रानुसारेण व्यतिरेकमुखत्वेऽपि तेन किन्तु भक्त्यैवाभिव्यज्यत इत्यन्वयोऽपि सूचितः । तत्कुत इत्यत आह- **यमिति** ॥ कठश्रुतिरियम् ।

---

१. तु शब्दस्यार्थः इति कोशे वर्तते ।

भक्तिमतः 'तस्य' जीवस्य स्वां, तनुं तत्स्वरूपमानन्दादिजीवस्वरूपं 'विवृणुते' प्रकाशयतीत्यर्थोऽत्राभिमतः। इति हीति। हिर्यतः 'अस्तीति' शेषः।

'महित्वबुद्धिर्भक्तिस्तु स्नेहपूर्वाऽभिधीयते।
तथैव व्यज्यते सम्यग्जीवरूपं सुखादिकम्॥'

इति पाद्मे॥ १९॥

यदुक्तं स्नेहेन सहितं ज्ञानं भक्तिः, तया जीवस्वरूपस्य सम्यगभिव्यक्तिरिति तत्स्फुटमत्र श्रुत्रौ न प्रतीयत इत्यतः स्मृतिं चाह - **महित्वेति॥** तुरवधारणे॥ 'महित्वबुद्धिः' महत्त्वबुद्धिः। तृतीयोऽतिशये। अत एव तत्त्वप्रदीपे 'महित्वबुद्धिः महत्त्वबुद्धिः। 'वैश्वानरो महिनः शर्म यच्छत्' इतिवदित्युक्तम्। स्नेहः पूर्वः साहित्यप्रतियोगित्वेन पूर्वनिर्दिष्टो यस्यां सा तथोक्ता। तथा च मानसिकस्नेहसहिता विष्णोर्माहात्म्यज्ञप्तिरेव भक्तिरित्यभिधीयत इत्यर्थः। 'तया' भक्त्या, न स्वत इत्येवशब्दार्थः। 'जीवरूपं' जीवस्वरूपम्। यद्यपि–

'माहाम्त्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तः॥'(म.ता.नि. १.८५)

इति भारततात्पर्यनिर्णये स्नेहस्य विशेष्यत्वमुक्तम्। तथापि विशेषणविशेष्यभावस्य कामचारत्वादविरोधः। अत्र यद्यपि पूर्वपक्षभाष्येऽपरोक्षज्ञानपूर्वकालीना भक्तिर्गृहीता। सिद्धान्तभाष्ये तु ज्ञानोत्तरकालीनेति नैकरूप्यम्। तथापि भक्तिमात्रस्य भक्तित्वैकरूपस्येह साफल्यसमर्थनान्न विरोधः। न च भक्त्यैव सम्यगभिव्यक्तौ ज्ञानोत्तर कृतकर्म वैयर्थ्यमिति वाच्यम्। ज्ञानजन्यभक्तेः सम्यगभिव्यक्तिहेतुत्वं ज्ञानानन्तरं पुनरनुष्ठीयमानभक्तेरुपासनस्य निवृत्तकर्मणां चेश्वरप्रसादद्वारा अनभिव्यक्तानन्दाभिव्यक्तिरूपे वा विचित्रानुभवरूपे वा आनन्दवैचित्र्ये हेतुत्वमित्यङ्गीकारेण सार्थक्योपपत्तेः। यथोक्तम्- 'उपासया कर्मभिश्च भक्त्या चानन्दचित्रता' इति। 'पाद्मे' इत्यतः प्राक्

'हि' इत्यनुवर्तते । 'उक्तम्' इति शेषः । अस्य पूर्वस्य च अत इत्यध्याहारेण 'भक्तिं विने'त्यनेनान्वयः ।

॥ इत्यम्बुवदधिकरणम् ॥ ११ ॥

॥ १२. वृद्धिह्रासाधिकरणम् ॥

(साधनतारतम्यात् फलेऽपि तत्)

सू— ॐ ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभय-सामञ्जस्यादेवम् ॐ ॥ २० ॥

तस्य च भक्तिज्ञानादेः वृद्धिह्रासभाक्त्वं विद्यते ब्रह्मादीनामुत्तमानां सर्वेषां भक्तत्वेऽन्तर्भावात् ।

अत्राधिकरणे यदर्थं भगवन्महिमोच्यते, सा भक्तिः पुरुषेषु तारतम्येन तिष्ठति । तदनुसारेण भगवान् फलं प्रयच्छतीत्येतत्समर्थ्यते । तत्र भक्तिः साधकेषु एकप्रकारेति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **वृद्धीति** ॥ अरूपसूत्रादनुवृत्तं तत्पदं विपरिणाम्यानूद्य व्याचष्टे- **तस्येति** ॥ चशब्दोऽवधारणार्थः 'वृद्धिह्रासभाक्त्वं' साधकेष्वाधिक्यन्यूनतावत्त्वमित्यनेन सम्बध्यते । न त्वेकप्रकारत्वमित्यवधारणार्थः । अनेन पूर्वसूत्रादत्र तुशब्दानुवृत्तिः सूचिता । भक्तिशब्देन तत्त्वप्रदीपरीत्या अपरोक्षज्ञानसाधनं भक्तिर्गृह्यते । ज्ञानशब्देन परोक्षज्ञानम् । भक्त्यंशत्वेऽपि ज्ञानस्य पृथगुक्तिः स्नेहवद्बहुमानात्मको भाव एवापरोक्षज्ञानसाधनमिति सूचयितुम् ।

'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन ॥' (भ.गी. ११.५४) इति गीतोक्तेः ॥

भाववोधे तु भक्तिशब्देनापरोक्षज्ञानसाध्यमोक्षसाधनोद्रिक्तभक्तेर्ग्रहणम् । ज्ञानशब्देनापरोक्षज्ञानस्येत्युक्तम् । तत् तत्त्वप्रदीपविरुद्धम् । आदिशब्देन

भक्तिसाधनवैराग्यादेस्तत्साध्योपासनादेश्च ग्रहणम् । 'विद्यते' अङ्गीकार्यत्वेनास्ति । अङ्गीकार्यमिति यावत् । यद्यपि पूर्वसूत्रे अम्बुवद्ग्रहणपदेन भक्तेः प्रकृतत्वात्सैवेह धर्मिसमर्पकतच्छब्देन परामर्शनीया, भक्तितारतम्य कथनेनैवेष्टसिद्धेः, न तु ज्ञानादिकमपि । तथापि ज्ञानादितारतम्याभावे तत्साध्यभक्तितारतम्यं न सिध्यति । फलतारतम्यवत्साधनतारतम्यस्यापि भक्तितारतम्यहेतुत्वादित्याशयेनोपलक्षणाभिप्रायेण भक्तिज्ञानादेरित्युक्तम् । कुतो भक्तेर्वृद्धिह्रासभात्त्वमित्यतस्तत्र हेतुत्वेन अन्तर्भावादित्यंशं [1]'सर्वेषामिति भक्तत्वे इति पदाध्याहारेण तेषां महदल्पत्वादिति हेतूपस्कारेण च व्याचष्टे- **ब्रह्मादीनामिति** ॥ 'उत्तमानां' ब्रह्मादिदेवानां 'भक्तत्वे' भक्तवर्गे अन्तर्भावात्तेषां च महाफलत्वात्, एवं ब्रह्मादिदेवेतरेषां मध्यमानाम् ऋष्यादीनां अधमानां मनुष्योत्तमानां च सर्वेषामधिकारिणां भक्तत्वेऽन्तर्भावात्तेषां च महदल्पफलत्वादिति योजना । अनेनोभयेषामिति धर्मिसमर्पकपदं देवतदन्यपरतया विवृतं भवति । मध्यमाधमाधिकारिणामल्पफलत्वेन देवेतरत्वेन चैकीकरणम् । सूत्रे उभयेषां भक्तत्वादित्येवोक्तौ भक्तत्वस्योभयत्ववद्व्यासज्यवृत्तित्वाभावेनोभयत्वाश्रयेष्वकैकेष्वपि पर्याप्तत्वादन्यतरेषामभक्तत्वशङ्का स्यात् । तथाचोभयसामञ्जस्यादित्ययुक्तं स्यादत उभयपदस्योभयविधभक्तपरत्वात् अतोऽन्तर्भावादित्युक्तम् । अनेन त्रिविधाधिकारिणामपि भक्तत्वसिद्धिः । यद्यपि भाष्ये च भक्त्यादेः पक्षीकरणादधिकारिनिष्ठहेतुप्रयोगोऽनुपपन्नः । तथापि पक्षधर्मताया अनावश्यकत्वादेवमुक्तम् ।

एवं भक्त्यादिविशेषाङ्गीकारादेवेश्वरस्य ब्रह्मादीनन्यान् प्रति च सामञ्जस्यं भवति ।

ब्रह्मादीनामन्येषां च महदल्पफलत्वेऽपि कुतो भक्तितारतम्यमित्यतः प्रवृत्तमुभयेत्यादिसूत्रखण्डं व्याचष्टे- **एवमिति** ॥ अस्यार्थो- **भक्त्यादीति** ॥

---

१. 'सर्वेषां' इति कोशे नास्ति ।

विशेषस्तारतम्यम्। आदिशब्देन पूर्वोक्तानां ग्रहणम्। अङ्गीकारादेव अङ्गीकारे सत्येवेति। अनेन एवमित्येतत्सावधारणमादौ योजनीयमित्युक्तं भवति। 'न स्थानत इत्यतोऽनुवृत्तस्य परस्येत्यस्यार्थमाह- **ईश्वरस्येति** ॥ 'विषमफलदातुः' इति शेषः। उभयपदपरामर्शं दर्शयति- **ब्रह्मादीनिति** ॥ 'अन्यान्' मध्यमाधमान्[1]। बहुलग्रहणात् द्वितीयातत्पुरुषः। चः समुच्चये। **सामञ्जस्यमिति**। समञ्जसो वैषम्यादिदोष[2]शून्यस्तस्य भावः। सामञ्जस्यं 'भवति' भवेत् नान्यथेत्येवशब्दार्थः। न तु समभक्तीनां फलवैषम्यमिति तदर्थः। तथाच फलवैषम्यान्यथानुपपत्त्या भक्तितारतम्यसिद्धिरिति भावः॥

'साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुः।
ब्रह्मादयः क्रमेणैव यथाऽनन्दश्रुतौ श्रुताः॥'

इति ब्राह्मे॥ २०॥

फलं समं, साधनं तु विषममित्येवंरूपफलसाधनवैरूप्ये सूत्रकृदुक्तं युक्तिविरोधमुक्त्वा स्मृतिविरोधं च दर्शयति- **साधनस्येति** ॥ भक्त्यादिरूपसाधनस्येत्यर्थः। 'उत्तमत्वेन' महत्त्वेनाल्पत्वेन चेत्यस्याप्युपलक्षकमेतत्। हेतौ तृतीया। हेतुत्वं च साध्यगतोत्तमत्वं प्रतीति द्रष्टव्यम्। 'साध्यं' मुक्तिफलं 'उत्तमं' महत्, अल्पं चेत्यपि ग्राह्यम्। चोऽप्यर्थस्समुच्चये। ब्रह्मादयो 'देवाः' इति शेषः। [3]'अन्योपलक्षकमेतत्'। साम्यभ्रमनिरासायाह- **क्रमेणेति** ॥ 'अथात आनन्दस्य' (तै. २-८) इति श्रुतौ 'यथा' येन क्रमेणानन्दित्वेन श्रुताः, तथा तेनैव क्रमेण साध्यमानन्दमाप्नुयुरित्यर्थः। **इतीति** ॥ ब्राह्मे उक्तिश्चात्र प्रमाणत्वेन भवतीत्यन्वयः॥

---

१. अधमपदं कोशे नास्ति।

२. दोषपदस्थाने विशेषपदं कोशे अस्ति।

३. 'अन्योपलक्षणकमेतत्' इति कोशे नास्ति।

कुतः ?

सू— ॐ ॥ दर्शनाच्च ॥ ॐ ॥ २१ ॥

'अथात आनन्दस्य मीमांसा भवति' (तै.२-८) इत्यारभ्य ब्रह्मपर्यन्तेषु सुखे विशेषदर्शनात् ।

ननु भवेदेतद्यदि ब्रह्मादीनां फलतारतम्यं स्यात्, तदेव कुत इति हेत्वसिद्धिमाक्षिपति- **कुत इति** ॥ फलस्य वृद्धिह्रासभात्त्वं कुतः ? प्रमाणाभावान्नास्त्येवेति भावः । एतदाक्षेपपरिहाराय सूत्रं पठित्वा व्याचष्टे- **दर्शनाच्चेति** ॥ आरभ्येति आरभ्य पठितायां श्रुताविति्यन्वयः । यद्वा- 'इति सुखे विशेषदर्शनात्' इत्यन्वयः । आरभ्येत्यस्य मनुष्योत्तममारभ्येत्यर्थः । आद्यपक्षे 'मनुष्योत्तममारभ्य' इति शेषः । 'ब्रह्मपर्यन्तेषु' चतुर्मुखपर्यन्तेषु 'मुक्तेषु' इति शेषः । 'सुखे' आनन्देषु विशेषस्य तारतम्यस्य दर्शनादुक्तत्वादित्यर्थः । यद्यपि 'सैषाऽऽनन्दस्य मीमांसा भवति' (तै.२-८) इति तैत्तिरीयश्रुतिपाठः । तथापि शाखान्तरपाठोऽयमित्यदोषः । श्रुतौ प्रकरणान्तरारम्भे अथशब्दः । 'अतः' पक्षद्वयप्रापकसत्त्वात् 'आनन्दस्य' मुक्तसुखस्य 'मीमांसा' किं सर्वेषामेकप्रकार उत अनेकप्रकार आनन्द इति विचारो 'भवति' प्रवर्तत इत्यर्थः । एवं विचारे अनेकधेत्युत्तरमुच्यत इति केचित् । तन्न, तैत्तिरीयभाष्ये आनन्दस्य 'मीमांसा' विचित्रता भवतीति व्याख्यानात् । विविधचरणं वैचित्र्यम् धात्वर्थः । स्वार्थे सन् । फलवैचित्र्ये हेतुभावादित्यतश्शब्दार्थः । मानुषोत्तममारभ्य विरिञ्चपर्यन्तमानन्दतारतम्यं वक्तुं तत्र मनुष्योत्तमचक्रवर्त्यानन्दस्य पूर्वावधिभूतत्वात्तद्वचनाय मुक्तचक्रवर्तिनो विशेषणान्याह- **युवा स्यादित्यादिना** ॥ विष्णुना युतस्सन् याति गच्छतीति युवा । साधुगुणयुक्तत्वात्साधुना विष्णुना युतत्वाद्वा साधुयुवा । मुक्त्याख्याध्ययनफलवत्त्वादाध्यायकः । आसमन्ताच्छमस्येत्याशः अतिशयेनाशः आशिष्ठः नित्यपूर्णसुखवानित्यर्थः । अतिशयेन दृढो द्रढिष्ठः । अतिशयेन बली पृथिवी 'वित्तस्य' वित्तेन पूर्णा

स्यात्तदा तस्य यत्सुखं 'स एको मानुष आनन्दः' मुक्तमनुष्यचक्रवर्ति-सम्बन्ध्येक आनन्द इत्यर्थः। 'ते' प्रसिद्धाः 'ये शतं मानुषाः' मुक्तमनुष्य-चक्रवर्तिसम्बन्ध्यानन्दाः 'स एकः मनुष्यगन्धर्वाणां' मुक्तानामानन्दः। मुक्तत्वज्ञापनाय विशेषणद्वयमाह- **श्रोत्रियस्येति** ॥ श्रोत्रियाणामकामहतानां चेत्यर्थः। एवमग्रेऽपि वचनव्यत्ययो ज्ञेयः। प्राप्तमोक्षिणः श्रोत्रियाः। काम-कृतोपद्रवशून्याः अकामहताः। ये साक्षाद्देवप्रेष्यास्ते देवगन्धर्वाः। तेषां मनुष्य-गन्धर्वापेक्षया शतगुणितोत्कृष्ट आनन्द इत्यर्थः। एवमग्रेऽपि पूर्वपूर्वापेक्षया उत्तरोत्तरेषां शतगुणोत्कर्षो ज्ञातव्यः। चिरकालीनो लोकश्चिरलोकः, स एव लोको येषां त तथोक्तास्तेषामित्यर्थः। देवेष्वनाख्याता अकथिता या देवताः देवकुले जातास्ते आजानदेवास्तेषामित्यर्थः। के कर्मदेवाः ? कुतश्च तेषां कर्मदेवत्वमित्यत उक्तम्- **ये कर्मणेत्यादि** ॥ 'ये' बल्याद्याः कर्मणा मध्ये 'देवान्' देवत्वम् 'अपियन्ति' प्राप्नुवन्ति ते कर्मदेवा इत्यर्थः। **देवाना-मिति** ॥ सृष्ट्यादौ देवत्वं प्राप्तानां तत्त्वाभिमानिदेवानामित्यर्थः। 'इन्द्रस्य' दक्षप्रजेश्वरस्य 'बृहस्पतेः' पुरुन्दरस्य 'प्रजापतेः' रुद्रस्य 'ब्रह्मणः' चतुर्मुख-स्येति समग्रश्रुत्यर्थः॥

चशब्दात् स्मृतिः-

यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे।
तथा मुक्तिविशेषोऽपि ज्ञानिनां लिङ्गभेदने ॥ इति ॥ २१ ॥

नन्वस्तु फलतारतम्यं, तथापि भक्तिसाम्यं किं न स्यात्, फलतारतम्यस्य भक्तीतरप्रसादादितारतम्येनापि सम्भवादित्यत आह- **चशब्दादिति** ॥ 'समुच्चिते'ति शेषः। काऽसावित्यतः तां स्मृतिं पठति- **यथेति** ॥ 'अत्र' संसारे ज्ञानिनां परमेश्वरे 'यथा भक्तिविशेषो' भक्त्यऽतिशयो दृश्यते, तथैव तेषां 'लिङ्गभेदने' लिङ्गशरीरभङ्गे जाते सति 'मुक्तिविशेषो' मुक्तावानन्दव्यक्ति-विशेषोऽपि दृश्यते। नान्यथेत्यर्थः। दृशिरत्र भवत्यर्थः। यद्वा- अत्र 'ज्ञानिनां'

ज्ञानिषु यथा भक्तितारतम्यं योगिभिः 'दृश्यते' ज्ञायते तथैव तेषां लिङ्गभेदने सति 'मुक्तिविशेषो' मुक्तितारतम्यमपि दृश्यते । न वैरूप्येणेत्यर्थः । इति स्मृतिरित्यन्वयः ।

॥ इति वृद्धिह्रासाधिकरणम् ॥ १२ ॥

॥ १३. प्रकृत्यधिकरणम् ॥

(परमात्मनः पालनकर्तृत्वमप्यस्ति)

सृष्टिसंहारकर्तृत्वमेवास्य, न पालकत्वम्, स्वतस्सिद्धेरिति ।

अत्राधिकरणे विश्वपालकत्वं समर्थ्यते । पूर्वपक्षयति- **सृष्टीति** ॥ सृष्टिश्च संहारश्च तयोः कर्ता तस्य भावस्तत्त्वमित्यर्थः । यद्वा- सृष्टौ सत्यां संहारः तस्य कर्तृत्वमित्यर्थः[१] । 'अस्य' भगवतः । इदं चावर्तनीयम् । एवकारः क्रमेण भिन्नक्रमेण चान्वेति । तत्राद्यपक्षे तद्व्यावर्त्यं दर्शयति- **नेति** ॥ 'अस्ती'ति शेषः । 'अस्ये'त्यनुवृत्तपदम् । तथा च न विश्वपालकत्वं भगवतोऽस्ति किन्तु सृष्टिसंहरकर्तृत्वमेव । कुतः ? न च संहर्तुः पालकत्वं सम्भवतीति भावः । पालनसाध्यकार्याभावाच्च । न च स्थितिस्तत्कार्यं सृष्टौ सत्यां यावत्संहारस्तावदस्य जगतः स्थितिस्तत्कार्यस्य पालनं विना स्वत एव सिद्धेस्तस्य तदेकप्रयोजनत्वात् । न च संहारनिवारणव्यापारः अवान्तरोपद्रवनिवारणं वा तत्प्रयोजनम् । यतोऽस्यैव सृष्टिसंहारकर्तृत्वं न त्वन्यस्येति योजना । अनेन सयुक्तिकः पूर्वपक्षः प्रदर्शितो भवति ।

अत आह- ॐ ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ ॐ ॥ २२ ॥

उक्तं सृष्टिसंहारकर्तृत्वमात्रं प्रतिषिध्य ततोऽधिकं ब्रवीति ।

---

१. इदं वाक्यं कोशे नास्ति ।

'नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी विभर्ति' इति (ऋ. १०.३१.८)

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति ॥ उक्तमिति**। स्वस्यां प्रागुक्तमित्यर्थः। अनेन प्रकृतेति प्रातिपदिकं व्याख्यातं भवति। एतावत्त्वमित्येतद्वचाचष्टे- **सृष्टीति ॥** इदं चावर्तते। तथा चोक्तं सृष्टिसंहारकर्तृत्वं तावन्मात्रपर्यवसितमित्येतत्प्रतिषिध्येत्यर्थः। वचनापेक्षया प्रतिषेधस्य पूर्वकालीनत्वज्ञापनाय ल्यबन्तनिर्देशः। मात्रशब्देन पालनाख्यगुणान्तरं व्यावर्त्यते। 'ततः' उक्तात्। भूय इत्यस्य व्याख्यानम्– **अधिकमिति**। पालनमपीत्यर्थः। अस्येत्यनुवर्तते। 'ब्रवीति' इत्यनन्तरं 'श्रुतिः' इति 'यतः' इति च शेषः। अस्य हेतोरस्त्येव हरेः पालकत्वमिति प्रकरणलब्धसाध्येनान्वयः। अनेन हिशब्दो हेत्वर्थतया व्याख्यातः।

'अस्येदेषा सुमतिः पप्रथानाऽभवत्पूर्व्या भूमना गौः।
अस्य सनीळा असुरस्य योनौ समान आभरणे विभ्रमाणाः ॥
किंस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।[1]
सन्तस्थाने अजरे इतऊती अहानि पूर्वीरुपसोऽजरन्त ॥
नैतावदेनापरो अन्यदस्त्युक्षा स द्यावापृथिवी विभर्ति।
त्वं च पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहन्ति ॥'

(ऋ. १०.३१.६,८.७)

इति ऋक्श्रुतेरयमर्थः 'अस्येत्' विष्णोस्सकाशादेव 'एषा सुमतिः' ब्रह्मादिसुबुद्धिः- 'पप्रथाना' अतिशयेन प्रथाना प्रथमाऽभवत्। अनेन 'भूमना' भूम्ना पूर्णेन विष्णुना 'पूर्व्या' पूर्वतना 'गौः' द्यावापृथिवी 'अभवत्' अभूताम्। अस्य विष्णोर्भूम्ना महिम्नैव सुमतिर्गौश्चाभवदिति वा। 'असुरस्य' असुषु प्राणेषु रमणादसुत्वात्प्राणरूपत्वात् रमणीयत्वाच्चासुरो वायुः 'महद्देवानामसुरत्व-

१. निष्टतक्षुः इति वाक्यदारभ्य अन्यदस्त्युक्षा स इत्यन्तं वाक्यं कोशे नास्ति।

मेकम्' (ऋ.३.४४.१) इति श्रुतेः। 'या मारुताद्गर्भमधत्त पूर्वम्' इति स्मृतेः। तस्य 'योनौ' भार्यायां 'समाने' एकस्मिन् 'आभरणे' आसमन्ताद्भरणस्थाने गर्भे 'म्रियमाणाः' देवाः अस्य सकाशादेव 'सनीलाः' भवन्ति निलीयन्ते संह्रियन्त इति यावत्।

भगवन्महिम्नैव द्युभ्वाद्युत्पत्तिरित्यनङ्गीकारे तन्निर्माणे अधिष्ठानादिकं किं स्यादित्याक्षिपति- **किं स्विदित्यादिना**॥ सर्गाद्यसमये वनं किं वाऽऽसीत्, क एव वृक्ष आस, न कोऽपीत्यर्थः। एवं वनं 'किंस्वित्' कस्माज्जातं 'स वृक्षो' वनादन्यत्र विद्यमान एकैकवृक्षश्च 'क आस' कस्माज्जातः। किंकारणकं वनमास, किंकारणकश्च वृक्ष आसेति प्रश्नपरतयाऽपीदं व्याख्येयम्। अस्योत्तरमाह- **यत इति**॥ 'यतो' यस्माद्धरेः सर्वे लोकास्तत्स्थाश्च 'निष्टतक्षुः' समुत्पन्नाः। यस्मादेव 'सन्तस्थाने' सम्यक् स्थायिन्यौ 'अजरे' जराशून्ये दृढे द्यावापृथिव्यौ 'इत ऊती' अस्मादेव समुद्भूतज्ञानादिके अहानि 'पूर्वीः' पूर्व्य उषसश्च 'अजरन्त' जीर्णा अभूवन्। यद्वा- 'पातालमेतस्य हि पादमूलं लोमानि वृक्षौषधयः' इति स्मृतेः 'यतो' यस्यावयवेभ्यो द्यावापृथिव्युपलक्षितचतुर्दशभुवनानि 'निष्टतक्षुः' नितरां कृतानि तेभ्य एवावयवेभ्यो 'वनं' वृक्षादिजातं, किञ्च- 'इतो' भूमेरुपरिगते 'अजरे' नाशरहिते 'सन्तस्थाने' सम्यक् तते वैकुण्ठादिस्थाने 'ऊती' ऊतयो व्याप्तयो यस्य परमात्मनः पूर्वीरहानि उषसश्च 'अजरन्त' जीर्णा आसन्। येनानेनेश्वरेण भवत्कार्यमिति शेषः॥

'अस्येदेषा सुमतिः' इत्यादिना प्रागुक्तं सृष्टिसंहारमात्रपर्यवसितं[1] न भवति, किन्त्वन्यदप्यस्ति। किं तदित्यत आह- **स इति**॥ 'सः' परमात्मा 'उक्षा' भक्ताभिलषितसेचकः द्यावापृथिव्यौ 'विभर्ति' धत्ते पुष्णाति च। यः 'स्वधावान्' पूर्णसुखो भगवान् तस्य स्मृत्या तद्वन्तो भूत्वा 'त्वचं' शरीरं पवित्रं 'कृणुत' कुरुत। हे सन्त इति शेषः। यद्वा- स्वधावान् स परमात्मा

१. 'सृष्टिसंहाररूपं एतावत्सृष्टिसंहारमात्रपर्यवसितम्' इति कोशे वर्तते।

ध्यातश्चेच्छरीरं पवित्रं करोतीत्यर्थः। 'यत्' येन पवित्रीकरणेन 'हरितो' दिशः 'सूर्यं न' सूर्यमिव सदा भगवन्तमक्लेशेनैव प्रजा वहन्तीत्यर्थः। **भावबोधे** तु सदिति पदच्छेदं कृत्वा सदित्यस्य भवत्कार्यमिति च द्वेधा व्याख्यानमित्युक्तम्। तत्र स इति प्रसिद्धपदविभागविरोधादकारे द्वित्वाश्रवणं च बाधकमिति ध्येयम्।

चशब्दात् स्मृतिश्च -

सृष्टिं च पालनं चैव संहारं नियमं तथा।
एक एव करोतीशः सर्वस्य जगतो हरिः॥
इति ब्रह्माण्डे॥ २२॥

सृष्टिसंहारकर्तुरपि पालकत्वरूपगुणान्तरवत्त्वे स्पष्टस्मृतिपरतया सौत्रचशब्दं व्याचष्टे-**चशब्दादिति॥** समुच्चितेति शेषः। तां स्मृतिं पठति-**सृष्टीति॥** सृष्ट्यादिशब्दैः प्रयोज्यव्यापारा लक्ष्यन्ते। 'सर्वस्य जगतः' इत्यादौ योज्यम्। परस्परसमुच्चये चः। 'चैव' एवं संहारम्। तथाशब्दः समुच्चये। नियमनं च। 'एक एव' न त्वन्यः। अत्रोपपत्तिः-**ईश इति॥** ब्रह्माण्डे 'उक्तिश्च' इति शेषः। अस्य श्रुतिरित्यस्य च ब्रवीतीति क्रियापदेनान्वयः। श्रुतौ स्थित्यतिरिक्तस्य धारणपोषणादिरूपप्रयोजनान्तरस्योक्त्या तस्य च 'एकः' इति स्मृतावनन्यसाध्यत्वस्योक्त्या च स्थितेः स्वतस्सिद्धत्वात्तत्पालनं निष्प्रयोजनमिति चोद्यं निरस्तं भवति। अनेन- 'हि' यतो 'नैतावत्' इति श्रुतिः 'अस्येदेषा सुमतिः' इत्यादिना पूर्वं प्रकृतस्योक्तस्य सृष्ट्यादिकर्तृत्वस्य 'एतावत्त्वम्' एतावन्मात्रपर्यवसितत्वं पालनाख्यगुणान्तरासाहित्यं प्रतिषेधति। न केवलमेतावत्किन्तु 'ततः' सृष्ट्यादिकर्तृत्वात् 'भूयः' अधिकं पालकत्वमप्यस्य विष्णोर्ब्रवीति। तथा 'सृष्टिं च' इति स्मृतिश्च स्पष्टम्। अतः सृष्टिसंहारकर्तृत्वातिरिक्तं पालकत्वाख्यं महिमान्तरमपि परस्य सिद्धमिति सूत्रार्थ उक्तो भवति।

॥ इति प्रकृत्यधिकरणम्॥ १३॥

॥ १४. अव्यक्तत्वाधिकरणम् ॥

(परमात्मा अव्यक्तोऽपि स्वप्रसादाद् व्यक्तो भवति)

परमात्मापरोक्ष्यं च तत्प्रसादादेव । न जीवशक्त्येति वक्तुमुच्यते –

सू— ॐ ॥ तदव्यक्तमाह हि ॥ ॐ ॥ २३ ॥

अव्यक्तमेव तद्ब्रह्म स्वतः ।

अत्राधिकरणे भगवद्भक्तेः कर्तव्यतासमर्थनाय तस्योपलब्धयोग्यत्वं समर्थ्यते । सिद्धान्तयत्सूत्रमवतारयति- **परमात्मेति** ॥ चस्त्वर्थः । भक्तिफलत्वेनोक्तमिति विशेषणसमुच्चये वा । तदिति ईश्वरो भक्तिश्चोच्यते । तथाच भक्तिसाध्येश्वरप्रसादादित्यर्थः । यद्वा - तदितीश्वर एवोक्तः । 'भक्तिसाध्यात्' इति शेषः । एवकारव्यावर्त्यमाह- **नेति** ॥ 'जीवशक्त्या' पुरुषप्रयत्नेनेत्यर्थः । अनेनेश्वरस्य व्यक्तत्वे विनैव भक्तिं जीवशक्त्यैव स्तम्भादिवदपरोक्षज्ञानसम्भवात् अव्यक्तत्वे च सत्यामपि भक्तौ तदसम्भवात्प्रयोजनस्याभावान्न भक्तिः कर्तव्येति सयुक्तिकपूर्वपक्षः, तथा स्वतोऽव्यक्तस्यापीश्वरस्य भक्तिसाध्यप्रसादादापरोक्ष्यसम्भवात्सफलत्वाद्भक्तिः कर्तव्येति सयुक्तिकसिद्धान्तश्च सूचितो भवति । 'इति' एवं वक्तुम् 'अतोऽनन्तेन' इत्यादाविति शेषः । 'उच्यते' प्रथमं तत्र हेतुत्वेन अव्यक्तत्वमिति शेषः । 'अव्यक्तमेव' इत्यनेन सूत्रे पूर्वस्मात् एवार्थकचशब्दानुवृत्तिस्सूचिता । तदित्यस्य व्याख्या- **ब्रह्मेति** ॥ परं ब्रह्मेत्यर्थः । 'स्वतः' स्वभावत इति शेषोक्तिः । अनेन अव्यक्तत्वस्यास्वाभाविकत्वं निराकृतं भवति । 'स्वतः' इत्यनन्तरं 'यत' इति शेषः । अस्य परमात्मापरोक्ष्यं च न जीवशक्त्या, किन्तु तत्प्रसादादेवेति प्रकृतसाध्येनान्वयः । अत एव साध्यवाक्यप्रदर्शनार्थमेव वक्तुमित्यन्तमुक्तम् ।

'अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलम् ।
यज्ज्ञात्वा मुच्यते जन्तुरानन्दश्चाक्षयो भवेत् ॥'
इति कौण्ठरव्यश्रुतिः ॥ २३ ॥

अव्यक्तत्वहेतोरसिद्धिपरिहाराय प्रवृत्तम्- 'आह हीति' सूत्रखण्डं व्याचष्टे- **अरूपमिति** ॥ ब्रह्म यतः 'अक्षरं' सर्वथा नाशशून्यमतः 'अरूपं' प्राकृत-विग्रहशून्यं तादृशशुक्लादिरूपशून्यं च, अन्यथा नाशापत्तेरिति भावः । यतोऽरूपमतः 'अव्यक्तम्' अप्रत्यक्षम् । कादाचित्कास्वाभाविकाव्यक्तता-निरासाय- **सदेत्युक्तम्** ॥ चो विशेषणसमुच्चये । 'निष्कलं' भिन्नांशशून्य-षोडशकलाशून्यं वा, निष्कलत्वमक्षरत्वे हेतुततयोक्तम् । 'यत्' ब्रह्माख्यं वस्त्वित्यस्य तत्रत्यतच्छब्देनान्वयः । 'ज्ञात्वा' अपरोक्षतो 'जन्तुः' स जीवो मुच्यते संसृतेः न केवलमनिष्टनिवृत्तिमात्रं, किन्त्वस्य स्वरूपभूतानन्दः 'अक्षयो' नित्योऽभिव्यक्तश्च भवेदित्यर्थः । हिशब्दो हेतौ । श्रुतिराहेति । अनेन सूत्रे श्रुतिरिति शेषो दर्शितः ॥

सू —

ॐ ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ ॐ ॥ २४ ॥

आराधनेऽप्यव्यक्तमेव ज्ञानिनां प्रत्यक्षेण इतरेषामति-सूक्ष्मत्वलिङ्गादनुमानेन ।

नन्वस्तु ब्रह्म स्वतोऽव्यक्तं, तथाप्याराधनेन पुरुषप्रयत्नेन व्यक्तीभविष्यति । समाराधनेनाव्यक्तयक्षसाक्षात्कारदर्शनात् । एवं चेत्किं भक्त्येत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **अपीति** ॥ अव्यक्तमेवेत्यनन्तरं 'तत्स्वतः' इत्यनुवर्तते । तथा च न केवलमनाराधनेऽव्यक्तं, किन्तु 'आराधनेऽपि' भक्तिरहिताराधनेन सम्पूजनेनाप्यव्यक्तमेव, न तु व्यक्तीकर्तुं शक्यमित्यर्थः । कुतः ? यतस्तद्ब्रह्म स्वतोऽव्यक्तं अत इति योजना । यद्वा- भक्तिरहिताराधने एव तदव्यक्तं, न तु

भक्तिसहिताराधनेऽपि येन भक्तेर्वैयर्थ्यं स्यादिति। अनेन सूत्रे संराधने संपूजने इति निमित्तसप्तमी। अपिः भिन्नक्रमः समुच्चये। तदव्यक्तमिति चानुवर्तनीयमिति भवति। आराधनेऽप्यव्यक्तत्वं कुत इत्यतः प्रवृत्तं 'प्रत्यक्षानुमानाभ्याम्' इति सूत्रखण्डं व्याचष्टे- **ज्ञानिनां प्रत्यक्षेणेति** ॥ कर्तरि षष्ठीयम्। इतरेषां ज्ञानसाधनमाह- **इतरेषामिति** ॥ ज्ञानिभ्योऽन्येषामित्यर्थः। इतरेषामित्येनेन प्रत्यक्षसिद्धेऽर्थेऽनुमानवैफल्यमिति निरस्तम्। लिङ्गादनुमानेनेति। लिङ्गाख्येनानुमानेनेत्यर्थः। आगमव्यावर्तनायेदं विशेषणम्। यद्वा- लिङ्गादव्यक्तत्वस्य अनुमानेनेति वैयधिकरण्येनान्वयः। समासपाठे सूक्ष्मत्वहेतुकानुमानेनेत्यर्थः। अस्याराधनेऽप्यव्यक्तमेवेति साध्येनान्वयः। 'इति सिद्धम्' इति शेषः। यद्यपि सूक्ष्मत्वस्याव्यक्तशब्दप्रवृत्तिनिमित्वान्न तत्साधकत्वम्। तथापि प्रत्यक्षाविषयस्वभावत्वमव्यक्तत्वम्। सूक्ष्मत्वं तु ततोऽतिरिक्तमिति भेदादविरोधः। यदा सूक्ष्मा अपि परमाण्वादयो नास्मदक्षगोचराः तदा किम्वातिसूक्ष्मम् ब्रह्मेति ज्ञापनाय- **अतीत्युक्तम्** ॥ न च ज्ञानिकर्तृकब्रह्मविशेष्यकाव्यक्तत्वप्रकारकप्रत्यक्षे ब्रह्मणोऽपि भानात् तस्याव्यक्तताविरोध इति वाच्यम्। स्वतोऽव्यक्तस्यापि ब्रह्मणो भक्तिवशादचिन्त्यशक्त्याभिव्यक्तेरङ्गीकारात्॥

'न तमाराधयित्वाऽपि कश्चिद्व्यक्तीकरिष्यति।
नित्याव्यक्तो यतो देवः परमात्मा सनातनः॥'
इति ब्रह्मवैवर्ते॥ २४॥

ननु परप्रत्यक्षस्यासिद्धत्वात्कथमत्र ज्ञानिप्रत्यक्षं प्रमाणीक्रियत इत्यतः तैरव्यक्तत्वोक्त्या तदन्यथाऽनुपपत्त्या तेषामव्यक्तप्रत्यक्षसिद्धेः तदुपन्यासोपपत्तेरिति भावेनाह- **नेति** ॥ 'तं' परमात्मानं, न केवलमनाराधयित्वा, किन्तु भक्तिं विनाऽऽराधयित्वाऽपि भक्तिं विनाऽपीति वा अपिशब्दार्थः। 'कश्चित्' योग्यो जनः। कुतो न व्यक्तीकरिष्यति ? यतोऽव्यक्तः। नन्वव्यक्तस्यापि विष्णोराराधनेन व्यक्तिस्सम्भवति यक्षादिवदित्यत उक्तम्- **नित्येति** ॥ नित्यं

सदा स्वतोऽव्यक्त इत्यर्थः । यक्षादयस्तु नैवमिति न व्यभिचार इति भावः । एवंभूतश्चेत्कथं भक्त्याऽपि व्यक्तो भवेत् , तथा च भक्तेर्वैयर्थ्यमित्यतो- **देवः परमात्मेति चोक्तम्** । अचिन्त्यशक्त्योभयं युज्यत इति तदभिप्रायः । अनित्यस्य कथं नित्याभिव्यक्तत्वमित्यत आह- **सनातन इति** । देहतः स्वभावतश्च नित्य इत्यर्थः । ब्रह्मवैवर्त इति । 'उक्तम्' इति शेषः । अतो न प्रत्यक्षासिद्धिरिति भावः । न चानेनाव्यक्तत्वमात्रसिद्धावपि कथं तत्प्रत्यक्षसिद्धिरिति वाच्यम् । व्यासादि ज्ञानिकर्तृकाव्यक्तत्वादिवचनस्य वचनान्तरमूलत्वेनानवस्थापत्त्या प्रत्यक्षमूलकत्वस्यैव वक्तव्यत्वेन तेनाव्यक्तत्वसिद्धिसम्भवात् ।

नित्याव्यक्तरूपेण तथैव तिष्ठति व्यक्तं किञ्चिद्रूपं गृहीत्वा दृश्यते ।

यथाऽग्र्यादयस्तन्मात्ररूपेणादृश्या अपि स्थूलरूपेण दृश्यन्ते एवमिति चेत् –

आक्षिपति- **नित्येति** ॥ 'ब्रह्मेति' अनुवर्तते । आदिपदेन जलभुवौ गृह्येते । न त्वकाशवायू अपि, तयोः स्थूलरूपेणाप्यदृश्यत्वात् । यद्यपि तथापीत्यर्थेऽपिशब्दः । तथा च यथा अग्र्यादयोऽग्निमात्रादिलक्षणानुपचितसूक्ष्मरूपेणादृश्या अपि स्थूलेनोपचितरूपेण 'दृश्यन्ते' व्यज्यन्ते, एवं नित्यमुत्पत्त्यादिरहितमत एवाव्यक्तं यन्मूलरूपं तेन 'तथैव' अव्यक्तत्वेनैव तिष्ठति ब्रह्म, किञ्चिदवताररूपं गृहीत्वा तेन दृश्यत इति योजना । यत एवमतो भक्तिं विनाऽपि ब्रह्मदर्शनभावाद्व्यर्था सेति वाक्यशेषः । तथैवेत्येतदवताररूपमित्यनेनापि सम्बध्यते । मूलरूपसदृशमेवेति तदर्थः । तेन मूलरूपदर्शनस्य मोक्षहेतुत्वेऽपि नावतारदर्शनस्य तथात्वमिति शङ्काऽनवकाशः ।

न,

सू— ॐ ॥ प्रकाशवच्चावैशेष्यम् ॥ ॐ ॥ २५ ॥

अग्न्यादिवत्स्थूलसूक्ष्मत्वविशेषाभावात् ।

एतच्चोद्यं प्रतिषेधति- **नेति** ॥ नित्येत्यादिनोक्तं नेत्यर्थः । अनेन सौत्रचशब्दो न दृष्टान्तान्तरसमुच्चायकः, किन्तु शङ्काव्यावर्तक इत्युक्तं भवति । तत्त्वप्रदीपे तु 'सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः' इति तुरश्रुतेः प्रकृतिवच्च नास्य सूक्ष्मत्वं नैव चाग्न्यादिवदिति चकारार्थ इति चकारस्यानुक्तदृष्टान्तसमुच्चायकत्वमुक्तम् । एतत्पक्षे नेत्येतत् । आगामिसूत्रेऽध्याहृत नञर्थकथनरूपमिति द्रष्टव्यम् । कुतो नेति हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य व्याचष्टे- **प्रकाशवच्चेति** ॥ अग्न्यादिवदित्यनेन गुणवाचकप्रकाशशब्दोऽग्न्यादिगुणिवाचकतया व्याख्यातः । आदिशब्देन जल-पृथिव्योर्ग्रहणम् । त्वप्रत्ययः प्रत्येकं सम्बध्यते । विशेषेत्यनेन सूत्रे स्वार्थे ष्यञित्युक्तं भवति । विशेषो धर्मः । पञ्चमीनिर्देशेन चो यत इत्यर्थेऽपीत्युक्तं भवति । 'ब्रह्मणि' शेषः ।

'नासौ सूक्ष्मो न स्थूलः पर एव स भवति । तस्मादाहुः परमः' इति माण्डव्यश्रुतेः ।

ननु ब्रह्मणि स्थूलसूक्ष्मत्वयोरभावः कुतो ज्ञायते, येन व्यक्ताव्यक्तत्वयोरभावः स्यादित्यतः अत्रापि- 'आह ही'त्यस्यानुवृत्तिमभिप्रेत्य तदभिप्रेतां श्रुतिमुदाहरति- **नासाविति** ॥ 'असौ' भगवान् केनचिद्रूपेण सूक्ष्मः केनचित्स्थूल इति न, किन्तु 'स पर एव' सर्वरूपेषु परमसूक्ष्म एव भवति न त्वनैवंभूतः । एवं असौ केनचित् रूपेण स्थूलः केनचित्सूक्ष्म इति न, किन्तु सर्वत्र 'परः' परमस्थूल एवेत्यर्थः । अत एव नञ्द्वयप्रयोगः, 'महतो महीयान्' (कठ. २-२०) इति श्रुत्यविरोधश्च । स्थूलात् स्थूलतमत्वं हि तदर्थः । न चैवं व्यक्तत्वापत्तिः, तद्विरोधिपरमसूक्ष्मत्वेन तत्प्रतिबन्धात् । किञ्चातः ? यस्मात्सर्वत्र परमसूक्ष्मः स्थूलश्च तस्मादेनं विष्णुं परम इत्याहुर्ज्ञानिन इत्यर्थः । श्रुतेरित्यस्यावैशेष्य-मित्यनेनान्वयः । 'सिद्धम्' इति शेषः ।

स्थूलसूक्ष्मविशेषोऽत्र न क्वचित्परमेश्वरे ।
सर्वत्रैकप्रकारोऽसौ सर्वरूपेष्वजो यतः ॥ इति च गारुडे ।

नन्वनुत्पन्नस्य मूलरूपस्योत्पन्नानां चावताररूपाणां च कथं स्थूलसूक्ष्मत्व-विशेषाभाव इत्यत आह- **स्थूलेति** ॥ व्यवस्थयेति शेषः । तथाच यतोऽसौ भगवान् 'सर्वरूपेष्वजः' उत्पत्तिशून्यः सदा अतः 'अत्र' भगवति क्वचिदपि रूपे कालेवा 'स्थूलसूक्ष्मविशेषः' स्थूलसूक्ष्मत्वरूपो धर्मः 'व्यवस्थया' केनचित् रूपेण स्थूलः केनचित् रूपेण सूक्ष्म इति वा । एवं घटादिवज्जननात्पूर्वं सूक्ष्मस्तदूर्ध्वं स्थूल इत्यपि न, किन्तु सर्वत्रैकरूप एवेत्यर्थः । ननु कथमेतद-न्यत्रादृष्टमत्र युज्यत इत्यत आह- **परमेश्वर इति** ॥ हेतुगर्भमेतत् । इति चेति चः श्रुतिसमुच्चये । गारुडे 'उक्तम्' इति शेषः । अस्याप्यवैशेष्यमित्यनेनान्वयः ।

'अव्यक्तव्यक्तभावौ च न क्वचित्परमेश्वरे ।
सर्वत्राव्यक्तरूपोऽयं यत एव जनार्दनः ॥' इति कौर्मे ॥ २५ ॥

एवं स्थूलसूक्ष्मत्वयोर्व्यापकयोर्हरावनुपलब्ध्या तद्व्याप्ययोर्व्यक्तत्वाव्यक्तत्व-योरप्यभाव उक्तः । स्मृत्याऽप्येतदभावं साधयति- **अव्यक्तेति** ॥ अव्यक्तत्व-व्यक्तत्वे इत्यर्थः । चः समुच्चये । क्वचिद्रूपेऽव्यक्तत्वं क्वचिद्व्यक्तत्वमिति व्यव-स्थितौ नेत्यर्थः । परमेश्वरपदप्रयोजनं तु पूर्ववदेव । कुतो नेत्यत आह- **सर्वत्रेति** ॥ सर्वरूपेष्वित्यर्थः । 'अव्यक्तरूपः' अव्यक्तस्वरूपः'अयं' परमेश्वरः । कुत इत्यत आह- **यत इति** ॥ एवकारो भिन्नक्रमः । उत्पत्त्या जननं व्यक्तिमर्दयति गमयति प्रापयत्येवमन्यान् न स्वयमन्यशक्त्या प्राप्नोतीति जनार्दनः । स्वजननमर्दयति अपगमयतीति वा । गीताभाष्ये तु 'न जायत इति जनः अर्दयति गमयति संसारमिति जनार्दनः' इति व्याख्यातं, तदपि प्रकृतानुकूलमेव । कौर्मे उक्तमिति शेषः । अस्याप्यवैशेष्यमित्यनेनान्वयः । व्यक्तत्वाव्यक्तत्वरूपविशेषराहित्य-मिति तदर्थः ।

तर्हि किं यत्नेनेत्यत आह-

सू— ॐ ॥ प्रकाशश्च कर्मण्यभ्यासात् ॥ ॐ ॥ २६ ॥

विषयभूते तस्मिन्नेव श्रवणाद्यभ्यासात्प्रकाशश्च भवति ।

उत्तरसूत्रमवतारयति- **तर्हीति** ॥ ब्रह्मणः सर्वथाऽव्यक्तत्वं इत्यर्थः । **किमिति** ॥ 'यत्नेन' श्रवणादिरूपेण भक्तिपूर्वकेण किं प्रयोजनम्, न किमपीत्यर्थः । 'इत्यतः' इति शङ्कायां परिहारमाह सूत्रकृदित्यर्थः । सूत्रे निराकृतेऽप्यशब्दत्वे तदव्यक्तमित्युक्त्या कस्यचित्तदविषयत्वाशङ्का स्यात्, तां वारयितुं प्रयुक्तः कर्मशब्दः कर्मकारकपरः । तदव्यक्तमित्यनुवर्तते । तस्य विपरिणाम इत्याशयेन विषयभूते 'तस्मिन्' अव्यक्ते ब्रह्मणीत्युक्तम् । न त्वन्यत्रेत्येवार्थः । तथा च तदेकविषयकश्रवणमननाद्यावर्तनादित्यर्थः । भक्तिपूर्वकादिति शेषः । प्रकाश इत्यत्रापि तस्मिन्नित्यावर्तनीयम् । तथा च तस्मिन् 'प्रकाशः', तद्विषयकापरोक्ष्यमित्यर्थः । न केवलमप्रकाशः, किन्तु प्रकाशश्चेति चार्थः । 'तस्मिन्' अव्यक्तेऽपीत्यप्यथा 'यतः' इति शेषः । अनेन सूत्रे हिशब्दस्यानुवृत्तिस्सूचिता । अस्यातो न श्रवणादिवैयर्थ्यमित्यध्याहृतेनान्वयः । अनेन सूत्रे नञनुवृत्तिस्सूचिता ।

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. ४-४-५) इति श्रुतेः ॥ २६ ॥

श्रवणाद्यभ्यासेन अपरोक्षं भवतीत्येतत्कुतो ज्ञायत इत्यातश्चशब्देन आहहीत्यनुवृत्तेन वा सूचितश्रुतेरेवेत्याह - **आत्मेति** ॥ ब्रह्मणो निदिध्यासनकर्मत्वं च स्वप्रतिमाद्वारा तदुपासनं च भवति । प्रतिमोपासनमित्युक्तेः । व्याख्यातेयं श्रुतिर्जिज्ञासाधिकरणे ॥

नित्याव्यक्तस्य कथं प्रकाश इत्यत उच्यते -

सू— ॐ ॥ अतोऽनन्तेन तथा हि लिङ्गम् ॥ ॐ ॥ २७ ॥

उभयत्र प्रमाणभावात् तत्प्रसादादेव प्रकाशो भवति ।

उत्तरसूत्रमवतारयति-**नित्येति** ॥ ब्रह्मणः श्रवणाद्यभ्यासादपीति सम्बन्धः । कथमित्याक्षेपे । न कथमपीत्यर्थः । युक्तिविरोधादिति भावः । **उच्यत इति** ॥ इत्यस्मिन् चोद्ये परिहार उच्यत इत्यर्थः । तत्सूत्रं पठित्वा व्याचष्टे- **अत इति** ॥ **उभयत्रेति** ॥ अव्यक्तत्वे प्रत्यक्षत्वे च प्रमाणसद्भावादित्यर्थः । तदन्यथाऽनुपपत्त्येति यावत् । अत इत्यस्यार्थान्तरमाह- **तस्य प्रसादादिति** ॥ तस्याधिकारिणस्तस्याव्यक्तस्यापि परब्रह्मणः प्रसादादेवेत्यर्थः । न साधनसामर्थ्येनेत्येवार्थः । 'प्रकाशः' आपरोक्ष्यम् इदं चानुवृत्तं पदं भवति । 'इति ज्ञायते' इति शेषः । चेत्यप्यनुषञ्जनीयम् । तस्य 'अनन्तेन' अपरिमितसामर्थ्येनेत्यनेनान्वितस्यावधारणार्थत्वं, प्रकाशश्चेत्यनेनान्वितस्य पुरुषप्रयत्नेनाप्रकाशसमुच्चायकत्वं च द्रष्टव्यम् ।

'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे.१-१०) इति लिङ्गात् ।

न केवलमन्यथाऽनुपपत्त्या प्रसादाधीनप्रत्यक्षत्वं ब्रह्मणः, किन्तु बलवद्युक्त्या चेत्याह सूत्रकृत्- तथाहीति । तद्व्याचष्टे- **तस्येति** ॥ **इति लिङ्गादिति** । इति वाक्योक्ताद्ग्रन्थनिवृत्तिरूपमोक्षस्य मध्यमप्रसादसाध्यत्वरूपात दर्शनस्य प्रसादसाध्यत्वज्ञापकादित्यर्थः । इति शब्द आद्यर्थे । तेन च 'दृष्ट्वैव तं मुच्यते' इति श्रुतिः सूचिता । तथाच 'तस्याभिध्यानात्' 'दृष्ट्वैव' इति वाक्यद्वयबलादर्शनान्मोक्षः, उपासनाजनितप्रसादाच्च दर्शनमिति पारम्पर्यं सिद्ध्यतीति भावः । लिङ्गादित्युक्त्या सूत्रे यत इत्यध्याहार्यमित्युक्तं भवति । तथाशब्दस्तूपमार्थो वा अर्थापत्तियुक्त्योः समुच्चयार्थो वेति हृदयम् । 'तस्य' इति श्रुतिस्तदभिध्याननये व्याख्याता ।

युज्यते च तस्य अनन्तशक्तित्वात् ।

नन्वव्यक्तस्वभावस्य ब्रह्मणः प्रसादेनापि न प्रत्यक्षता युज्यते । न [1]हि प्रसन्नोऽपि नरो वानरो भवितुमीष्ट इत्यत आह- **युज्यते चेति** ॥ चशब्दोऽवधारणार्थः । 'उभयम्' इति विपरिणामेन सम्बध्यते । तदिति च । तथा च तस्य विष्णोरव्यक्तत्वं प्रत्यक्षत्वं चेत्युक्तमुभयं युज्यते । तस्यैव युज्यते न त्वन्यस्येति वा । कुतः ? 'अनन्तशक्तित्वात्' अपरिमितावटितघटकसामर्थ्यवत्त्वादित्यर्थः । तस्यैवानन्तशक्तित्वादित्यनेन सूत्रे तेनेत्यनुक्त्वा अनन्तेनेत्यधिकोक्तेः प्रयोजनं चोक्तं भवति । अत एव प्रमेयदीपे- ननु ज्ञानिभिर्भगवान् दृश्यते चिन्त्यते च । तत्कथमुच्यते 'अव्यक्तोऽयमचिन्त्योऽयम्' (गीता. २.२५) इत्यवतार्य अत एवाव्यक्तादिरूप इति भाष्ये 'अत एव' अचिन्त्यशक्तित्वादेव, यथोक्तम्- 'अतोऽनन्तेन' इतीति व्याख्यातम् । सौत्रात्तश्शब्दस्य व्याख्यानान्तरमिदमिति केचित् ।

'नित्याव्यक्तोऽपि भगवान् ईक्ष्यते निजशक्तितः ।
तमृते परमात्मानं कः पश्येतामितं प्रभुम् ॥'
इति नारायणाध्यात्मे ॥ २७ ॥

सूत्रार्थे स्मृतिं चाह- **नित्येति** ॥ अत्रेत्थं योजना- यद्यपि भगवान्नित्यं नियमेन स्वतोऽव्यक्तस्तथाऽपि 'भक्तैरीक्ष्यते' तद्दर्शनविषयो भवति । कथम् ? 'निजशक्तितः' स्वरूपसामर्थ्यादेव । तेन विना भवत्कार्यं प्रति कथं तस्य हेतुत्वं व्यभिचारादित्यत आह-**तमिति** ॥ परमात्मानं विना तत्प्रसादं विनेति यावत् । तं परमात्मानं कः पश्येन्न कोऽपीति । अव्यक्तस्वभावस्य कथं दर्शनकर्मता ? युक्तिविरोधादित्यत उक्तम्- **'अमितम्'** अनन्तं 'प्रभुं' समर्थम्' इति च । नारायणाध्यात्म इत्यनन्तरं सूत्रोक्तमुक्तमिति शेषः ॥

॥ इत्यव्यक्तत्वाधिकरणम् ॥ १४ ॥

---

१. हि इति पदं कोशे नास्ति ।

॥ १५. अहिकुण्डलाधिकरणम् ॥

(परमात्मनि गुणत्वं गुणित्वं च वर्तते)

स्वरूपेणाऽनन्दादिना कथमानन्दित्वादिरिति ।

अत्र भगवतो गुणित्वं समर्थ्यते । सयुक्तिकं पूर्वपक्षयति- **स्वरूपेणेति** ॥ हेता तृतीया । कथमित्याक्षेपे । ब्रह्मण इति शेषः । प्रथमादिपदेन ज्ञानादिकं गृह्यते । द्वितीयेन ज्ञानित्वादिकं भजनीयत्वं च । युज्यते इत्याकृष्यते । तथा च ब्रह्मणः 'कथं भजनीयत्वं युज्यते' न युज्यते । कुतः ? यतस्तस्य 'कथमानन्दित्वादिर्युज्यते' न युज्यते । अगुणित्वादिति यावत् । कुतः ? 'स्वरूपेण' ब्रह्मस्वरूपत्वेनाङ्गीकृतेनानन्दादिना हेतुना, अनन्दादिगुणानां ब्रह्मस्वरूपत्वाङ्गीकारादिति यावत् । तत्स्वरूपत्वे च तद्वत्त्वायोगादिति भावः इति योजना । [1]'स्वरूपेणानन्दादिना धर्मेण कथमानन्दित्वादिर्युज्यते इत्येकान्वयो वा । तथात्वे युक्तिविरोधादिति शेषः ॥

अत उच्यते -

सू— ॐ ॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ ॐ ॥ २८ ॥

'आनन्दं ब्रह्मणो विद्वान्' (तै.२-४) 'अथैष एव परम आनन्दः' (बृ.६-३-३३) इत्युभयव्यपदेशादहिकुण्डलवदेव युज्यते । यथाऽहिः कुण्डली कुण्डलं च । तुशब्दात् केवलश्रुतिगम्यत्वं दर्शयति ॥ २८ ॥

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ 'आनन्दं ब्रह्मणः' इति तैत्तिरीयश्रुतेः 'न बिभेति कदाचन' इत्युत्तरेणान्वयः । 'अथ' इत्यन्या श्रुतिः । 'एषः' विष्णुरेव 'परमः' पूर्णः । इतिशब्द आद्यर्थे । तेन 'आनन्दो ब्रह्म' (तै.

---

१. एतद् वाक्यद्वयं कोशे नास्ति ।

३.६) इत्यादिः गृह्यते । **इत्युभयव्यपदेशादिति** । इत्याद्यासु श्रुतिषूभयोः ब्रह्मतदानन्दाद्योः उभयोर्गुणित्वतत्स्वरूपत्वयोरुक्तत्वादित्यर्थः । 'यद्वा-'ब्रह्मणः' इति शेषः । अत्राद्यवाक्यं ब्रह्मणो गुणित्वं वक्ति; द्वितीयं तत्स्वरूपत्वमिति विवेकः । ननु श्रौतमपि गुणात्मकस्य ब्रह्मणो गुणित्वं कथं युज्यते ? अदर्शनादित्यत उक्तम्- **अहिकुण्डलवदिति** दृष्टान्तवाक्यमनूद्य व्याचष्टे- **अहीति** ॥ नन्वहेः कुण्डलित्वावस्थायाः कादाचित्कत्वेन खण्डित-त्वाद्भेदाभेदयोः सत्त्वेन कुण्डलित्वं कुण्डलत्वं चेत्युभयं युज्यते । ब्रह्मणस्तु आनन्दादिनाऽत्यन्ताभेदात्कथं गुणत्वं गुणित्वं च युज्यत इत्यतः अहिकुण्डल-वदिति सावधारणमित्याह- **एवेति** ॥ विशेषादेवेत्यर्थः । तथा च ब्रह्मण-स्तद्धर्माणां च भेदप्रतिनिधिविशेषाङ्गीकारादेवोक्तं युज्यत इति भावः । युज्यत इत्यत्र स्वरूपेणानन्दादिनेत्याद्यनुवर्तते । अनेन सूत्रेऽध्याहार्यं प्रतिज्ञावाक्यं दर्शितम् । ननु नेश्वरो गुणवान्, गुणात्मकत्वात्, यथा अश्वोऽनश्वान् दण्डोऽ-दण्डवान् । आनन्दाद्या ब्रह्मगुणाः तत्स्वरूपत्वाद्ब्रह्मवदिति युक्तिविरोधात् न गुणित्वं गुणत्वं च ब्रह्मणो युज्यत इत्यतः प्रवृत्तं तुशब्दं व्याचष्टे- **तुशब्दा-दिति** ॥ **केवलेति** ॥ प्रत्यक्षाद्यसहितेत्यर्थः । श्रुत्यैकसमधिगम्यत्वमिति यावत् । ब्रह्मस्वरूपानन्दादेरिति शेषः । 'दर्शयति' ज्ञापयति सूत्रकार इत्यर्थः । तथा च न तत्र युक्तिविरोधः शङ्कच इति भावः ।

सू— ॐ ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ ॐ ॥ २९ ॥

यथाऽऽदित्यस्य प्रकाशत्वं प्रकाशित्वं च एवं वा दृष्टान्तः ।
तेजोरूपत्वाद्ब्रह्मणः ॥ २९ ॥

दृष्टान्तान्तरेणैतदेव साधयत्सूत्रमुपन्यस्य व्याचष्टे- **प्रकाशेति** ॥ यथाऽऽ-दित्यस्य प्रकाशत्वं प्रकाशित्वं चेत्यनेन भास्वररूपार्थप्रकाशशब्दो भावप्रधानः, प्रकाशाश्रयशब्दोऽपि भावप्रधानः । सचावर्तनीयः । तत्पुरुषश्चायम् । तथा च

१. यद्वा इति वाक्यमत्र अधिकं पठ्यते ।

प्रकाशाश्रयस्यादित्यमण्डलस्य प्रकाशत्ववत् प्रकाशाश्रयत्ववत् प्रकाशित्ववच्चेति दृष्टान्तपदस्यार्थ उक्तो भवति । अत्र पूर्वदृष्टान्त इव न भेदाभेदौ, अखण्डितत्वात् । किन्तु भेदप्रतिनिधिविशेष एवेति ध्येयम् । एवमित्यत्र ब्रह्मण इत्याकृष्यते । तथा ब्रह्मणोऽपि विशेषबलाद्गुणगुणिभावो युज्यत इत्यर्थः । इति शब्दोऽध्याहार्यः । वाशब्दो व्यवस्थितविकल्पे । 'दृष्टान्तो' वाच्य इति शेषः । उभयेत्युक्तानुमाने अहिकुण्डलवदिति वा 'दृष्टान्तो' वाच्य इति शेषः । उभयेत्युक्तानुमाने अहिकुण्डलवदिति वा प्रकाशाश्रयवदिति वा दृष्टान्तपदं प्रयोज्यमिति सूत्रकृतो हृदयमिति भावः । नन्वत्र यावद्द्रव्यभाविगुणाभिन्नानां तद्वतां घटादीनामपि दृष्टान्तयितुं शक्यत्वात्तान्विहाय विशिष्यादित्यग्रहणे का विवक्षेत्यतः प्रवृत्तं तेजस्त्वादिति सूत्रखण्डं व्याचष्टे- **तेजोरूपत्वादिति** ॥ ब्रह्मणः आदित्यस्येत्युभाभ्यामस्य सम्बन्धः । तेन सूत्रे उभयोरिति पदानुवृत्तिः सूचिता । तथा च घटादीनामतेजोरूपत्वात् तान् परित्यज्य तेजोरूपत्वसाधर्म्यविवक्षयाऽऽदित्यदृष्टान्तोक्तिरिति भावः ।

सू— ॐ ॥ पूर्ववद्वा ॥ ॐ ॥ ३० ॥

यथैक एव कालः पूर्व इति अवच्छेदको अवच्छेद्यश्च भवति । अतिसूक्ष्मत्वापेक्षयैष दृष्टान्तः । स्थूलमतीनां च प्रदर्शनार्थमहिकुण्डलदृष्टान्तः ।

दृष्टान्तान्तरेण ब्रह्मणो गुणगुणिरूपत्वं साधयत्सूत्रं पठित्वा व्याचष्टे- **पूर्ववद्वेति ॥ एक एवेति ॥** अभिन्नोऽपीत्यर्थः । कालशब्दस्तदंशपरः । 'पूर्व' इत्यनन्तरमपि कालशब्दो योज्यः । 'भवति' इत्यनन्तरं 'एवम्' इत्यादि च । तथा च यथा पूर्वः काल इति प्रयोगे पूर्वेणाभिन्नोऽपि कालः पूर्व इति 'अवच्छेदको' विशेषकः काल इति 'अवच्छेद्यो' विशेष्यश्च विशेषबलाद्भवत्येवमिति वा दृष्टान्तयोजना । ननु व्यर्थोक्तेरपर्यवसानात्किमर्थोऽयं दृष्टान्त इत्यत आह- **अतीति ॥** 'अपेक्षया' विवक्षया । ब्रह्मण इति शेषः । 'एषः'

कालदृष्टान्तः । तर्ह्यलमनेन दृष्टान्तद्वयेन, किं भेदाभेदविषयेणाहिकुण्डल-दृष्टान्तेनेत्यत आह- **स्थूलेति** ॥ चोऽप्यर्थः । 'प्रदर्शनार्थम्' एकस्मिन्नेव विशेषणविशेष्यभावस्येति शेषः । अत एवास्य प्राथमिकत्वम् । उभयत्र सूत्रकृदभिहितमिति शेषः ।

'प्रकाशवत्कालवद्वा यथाऽङ्गे शयनादिकम् ।
ब्रह्मणश्चैव मुक्तानामानन्दो भिन्न एव तु ॥'
इति नारायणाध्यात्मे ।

सूत्रकृदुक्तार्थे स्मृतिं पठति- **प्रकाशवदिति** ॥ आदित्यमण्डलप्रकाश-वदित्यर्थः । 'कालवत्' साक्षिसिद्धपूर्वोत्तरादिकालावयववदित्यर्थः । 'अङ्गे' शरीरे 'शयनम्' अवस्थाविशेषः, न तु निद्रा मनोधर्मो वा । तथा च अङ्गे शयनमिति प्रयोगे अङ्गाभिन्नमपि शयनं यथा अङ्गविशेषणकं भवति अङ्गं शयनविशेषणं भवतीत्यर्थः आदिपदेनाङ्गं शेत इत्यङ्गस्य शयनक्रियाकर्तृभावो गृह्यते । अङ्गमङ्गमधिशेत इत्यङ्गस्य शयनक्रियाकर्मकर्तृभावो वा । अनेनाहि-कुण्डलदृष्टान्तः सङ्गृहीतः कुण्डलस्याप्यवस्थाविशेषत्वात् । 'एव' एवम् । तुशब्दो विशेषार्थः । चशब्दो भिन्नक्रमः । तथा च यद्यप्यभिन्न एवानन्दः, तथापि प्रकाशवत्कालवद्वा ब्रह्मणो मुक्तानां चेत्येवं तत्सम्बन्धित्वेनोच्यते इत्येकोऽन्वयः । यथाऽङ्गे शयनादिकं 'शयनक्रियानिरूपितविशेषणत्व-कर्तृत्वादिकम्' तदभिन्नमपि [1]'तद्धर्मत्वेनोच्यते, तथा [2]'ब्रह्माभिन्नोऽप्यानन्दा-दिर्विशेषादेव तद्धर्मत्वेनोच्यते इत्यपरोऽन्वयो द्रष्टव्यः । नत्वेकान्वयः । आद्ययोर्विशेषनिर्वाह्यत्वात् अन्त्यस्य भेदनिर्वाह्यत्वात् । अत एव प्रकाशवत् कालवदिति यथाऽङ्गे शयनादिकमिति विचित्रोक्तिः ।

---

१. कोशे 'तत्कर्मत्वेन' इति पदं अस्ति ।

२. कोशे 'ब्रह्माद्यभिन्नो' इति पदमस्ति ।

'आनन्देन त्वभिन्नेन व्यवहारः प्रकाशवत् ।
कालवद्वा यथा कालः स्वावच्छेदकतां व्रजेत् ॥'
इति ब्राह्मे ॥ ३० ॥

सूत्रकृदुक्तार्थे स्मृत्यन्तरं चाह- **आनन्देन त्विति** ॥ तुरवधारणे । स्वाभिन्नेनैवेति सम्बध्यते । 'व्यवहारः' विशेषणविशेष्यभावेन व्यपदेशः । भवतीति शेषः । कालवदित्येतद्विवृणोति- **यथेति** ॥ 'स्वावच्छेदकतां' स्वविशेषणकत्वम् । स्वावच्छेद्य[1]त्वस्याप्युपलक्षणमेतत् । एवञ्चानन्दादिरपीत्युपस्कृतवाक्येनास्यान्वयः । नारायणाध्यात्मे ब्राह्मे इत्युभयत्रापि सूत्रोक्तमुक्तमिति शेषः । आद्यदृष्टान्तस्य विषमत्वाद् द्वितीयस्मृतावनुक्तिः ।

सू— ॐ ॥ प्रतिषेधाच्च ॥ ॐ ॥ ३१ ॥

'एकमेवाद्वितीयम्' (छा. ६-२-१) 'नेह नानाऽस्ति किञ्चन' (कठ. २-४-११) इति भेदस्य ॥ ३१ ॥

ननु किमनेन गुणगुणिनोरभेदमभ्युपेत्य ब्रह्मणो गुणित्वप्रतिपादनेन । गुणगुणिनोर्भेद एव किं न स्यादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **प्रतिषेधाच्चेति** ॥ इति वाक्येन ब्रह्मणस्तद्गुणानां च भेदनिषेधादित्येवं भाष्यस्य सूत्रेणान्वयः । अनेन सौत्रश्चशब्दः शङ्काव्यावर्तकः । तेन न ब्रह्मतद्गुणादेर्भेदः शङ्कच इति प्रतिज्ञा सिद्धा । कुतः ? तस्य भेदस्य प्रतिषेधादिति वा, उभयोर्गुणगुणिनोरुभयत्वस्य भेदस्य प्रतिषिद्धत्वादिति वाऽध्याहारानुवृत्तिभ्यां सूत्रयोजना दर्शिता भवति । 'एकमेव' इति छन्दोगश्रुतिः । तस्याः 'एकं' ज्ञानानन्दादिगुणैरवयवैश्चाभिन्नं ब्रह्मैकमेव, न घटादिवदवयवसहितैकत्वयुक्तं स्वावयवैर्भिन्नाभिन्नम्, 'अद्वितीयं' समाभ्यधिकशून्यमित्यर्थः । 'नेह' इति कठश्रुतिः । तस्याः 'इह' ब्रह्मणि 'किञ्चन' गुणगुण्यादिकं 'नाना' भिन्नं

१. कोशे स्वावच्छेदकस्य इत्येव अस्ति ।

नास्तीत्यर्थः । तत्त्वप्रदीपे तु 'इह' परमेश्वररूपेषु अवयवेषु धर्मेषु च किञ्चन नाना नास्तीत्यर्थ इत्युक्तम् । एतत्पक्षे नानाशब्दो नानात्वार्थकः । तथाच 'किञ्चन' किंरूपोऽपि हीनाधिकभावो वा अन्योन्याभावो वा पृथक्त्वंरूपो वा भेदो नास्तीत्यर्थः ॥

॥ इत्यहिकुण्डलाधिकरणम् ॥ १५ ॥

॥ १६. परमताधिकरणम् ॥

(परमात्मन आनन्दादिकं लौकिकानन्दादिभ्यः विलक्षणम्)

सू— ॐ ॥ परमतः सेतून्मानसम्बन्ध-
भेदव्यपदेशेभ्यः ॥ॐ ॥ ३२ ॥

न चानन्दादित्वाल्लोकानन्दादिवत्, 'एष सेतुर्विधृतिः' (छा.८-४-१) 'य एष आनन्दः परस्य' 'एष नित्यो महिमा ब्राह्मणस्य' (बृ.६.४.२३) इति सेतुत्वं 'ह्युज्यते। 'यतो वाचो निवर्तन्ते' (तै.२-४) इत्युन्मानत्वम् 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. ६-३-३२) इति सम्बन्धः ।

'अन्यज्ज्ञानं तु जीवानामन्यज्ज्ञानं परस्य च ।
नित्यानन्दाव्ययं पूर्णं परज्ञानं विधीयते ॥ इति भेदः ।
अतोऽलौकिकत्वात्परमेव ब्रह्मानन्दादिकम् ॥' ३२ ॥

अत्र भगवद्गुणानां लोकविलक्षणत्वं समर्थ्यते। सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे - **परमिति** ॥ अत्रेत्थं योजना । ब्रह्मानन्दादिकम् 'आनन्दादित्वात्'

---

१. ह्युच्यते इत्यस्ति कोशे ।

तच्छब्दवाच्यत्वाद्धेतोः 'लोकानन्दादिवत्' लौकिकजीवानन्दादिसदृशं न, किन्त्वतो लोकानन्दादेः 'अलौकिकत्वात्' तृतीयार्थे पञ्चमी। अलौकिकत्वेन प्रकारेण 'परं' विलक्षणम् अलौकिकमेवेत्येका प्रतिज्ञा। यद्वा- परब्रह्मानन्दादिकं 'अतो' लोकानन्दादेः 'परं' विलक्षणमित्येव प्रतिज्ञासमर्पकम्, नालौकिकत्वादित्यपि। न चेत्यादिकमपि अतः परमेवेति सावधारणप्रतिज्ञासूचितपूर्वपक्षनिषेधकं, न प्रतिज्ञान्तर्गतम्, अलौकिकत्वादित्येतच्च हेतुसमर्पकमित्यपरा। प्रथमपक्षे कुतोऽलौकिकत्वरूपवैलक्षण्यमित्यतः प्रवृत्तं सेतून्मानेति हेतुं व्याचष्टे- **एष इति**॥ यद्वा- द्वितीयपक्षे वैलक्षण्ये साध्येऽतःशब्दोक्तस्यालौकिकत्वादिति हेतोः साधकतया प्रवृत्तं हेतुवाक्यं व्याचष्टे- **एष इति**॥ सेतुपदं भावप्रधानमित्याशयेन इति सेतुत्वमित्युक्तम्। एवंविधमाधारत्वरूपं वैलक्षण्यमित्यर्थः। हिशब्दो यत इत्यर्थे। 'उच्यते' व्यपदिश्यते। 'इत्युच्यते' इति सर्वत्र सम्बध्यते। अस्यात एभ्यो व्यपदेशेभ्योऽलौकिकत्वावगमादित्यन्वयः। अत्र प्रथमपक्षे सेतुत्वादिधर्मवत्त्वरूपवैलक्षण्ये व्यपदेशः साक्षाद्धेतुः। द्वितीये तु अवगमो हेतुः। व्यपदेशास्तु तत्साधक इति विवेकः। न च व्यपदेशेभ्यः सेतुत्वादिकमेवावगम्यते नालौकिकत्वहेतुरिति वाच्यम्। अलौकिकत्वादित्यस्य टीकारीत्या लोकानन्दादावसम्भावितसेतुत्वादिधर्मवत्त्वादित्यर्थाभ्युपगमात्। 'एषः' इति शाखान्तरवाक्ये विधृतिः सेतुः धारणसमर्थाश्रय इत्यर्थः। एष इति क इत्यत आह- **य इति**॥ नन्वत्रानन्दस्य विष्णुसम्बन्धित्वं न प्रतीयते परशब्दस्यानेकार्थत्वादित्यत उक्तम् - **एष इति**॥ प्रकृतसार्वज्ञपूर्णानन्दादिरित्यर्थः। तथा च विष्णुपरब्राह्मणश्रुतिनित्यमहिमत्वलिङ्गबलाद्विष्णुसम्बन्धित्वं ज्ञायत इति भावः। 'यतः' इति श्रुतिरीक्षत्यधिकरणे व्याख्याता। उन्मानपदमपि भावप्रधानं कृत्वा व्याचष्टे- **उन्मानत्वमिति**॥ उद्गतं मानं मर्यादा यस्मादिति विग्रहः। पूर्णत्वमित्यर्थः। अत्र यद्यपि सर्वात्मना वेदाद्यवाच्यत्वमानन्दस्य प्रतीयते, न विष्णोः, न चोद्गतमर्यादत्वम्। तथापि निमित्तेन नैमित्तिकोपलक्षणान्नासङ्गतिः। व्याख्यानान्तरं वा।

स्वरूपत्वाच्चानन्दस्य, ततो नासङ्गतिः। 'एतस्य' इति बृहदारण्यकवाक्यम्। 'अन्यानि भूतानि' ब्रह्मादीनि मुक्तान्यपि 'एतस्य' विष्णोरेवानन्दस्य 'मात्रां' प्रतिबिम्बांशमश्नन्तीत्यर्थः।

'प्रतिबिम्बरूपविप्रुट्कं तदानन्दस्य चाखिलाः।
मुक्ता ब्रह्मादयोऽश्नन्ति तारतम्येन नित्यदा॥'

इति बृहद्भाष्योक्तेः। इतीत्यनन्तरं वाक्यबोधित इति शेषः। 'सम्बन्धो' बिम्ब-प्रतिबिम्बभावः उपजीव्योपजीवकभावरूपः। **अन्यज्ज्ञानमिति॥** जीवानां ज्ञानमन्यत्' नियामकादीशज्ञानान्नियम्यत्वेन विलक्षणमित्यर्थः। 'परस्य' विष्णोः। वैलक्षण्ये निमित्तमाह- **नित्येति॥** परस्य ज्ञानं 'नित्यानन्दाव्ययं' नियमेनानन्दरूपमव्ययं च 'पूर्णम्' अपरिमितं च 'विधीयते' तेन रूपेण व्यपदिश्यते शास्त्रेषु, जैवं तु न तथेत्यर्थः। **इतीति॥** इति श्रुतिवाक्य इत्यर्थः। 'भेदः' ईशज्ञानस्याधिक्यरूपं वैलक्षण्यम्। यद्यप्युदाहृतवाक्यैरानन्दमात्रस्या-लौकिकत्वमवगम्यते, न सर्वगुणानाम्। तथा च ब्रह्मानन्दादिकमित्यादि-पदायोगः। तथापि सेत्वादिवाक्येष्वानन्दग्रहणात् वैलक्षण्याग्रहणावगमान्न दोषः। ग्रहणात् वैलक्षण्यवाक्ये ज्ञानग्रहणात्। तस्य चानन्दाभेदोक्तेः प्रयो-जनानन्तराभावात् विचित्रोक्तिबलात्पूर्वत्र ज्ञानादीनामुत्तरत्रानन्दादीनां चोप-लक्षणया ग्रहणावगमान्न दोषः। अथ वा- न चेत्यनेन अतः परमित्यनेन ज्ञापित-पूर्वपक्षं प्रतिषिद्धच 'एषः' इत्यादिना सौत्रहेतून् व्याख्याय अतः परमिति प्रतिज्ञा व्याख्यायते। अत्रात इत्यनूदितपदस्य लौकिकत्वादिति पदच्छेदेन 'अमृतत्वस्येशानः' (तै.आ.३-३२) इतिवत् भावभवित्रोरभेदविवक्षया त्वप्रत्यस्य स्वार्थिकत्वेन वा लौकिकत्वादिति व्याख्यानम्। तथा च 'अतो लौकिकत्वात्परम्' अलौकिकमित्यर्थः। लौकिकत्वात्परं तदतिक्रान्तमिति यथाश्रुतमेव वा। अस्मिन् पक्षे न चेत्यपि न सिद्धान्तप्रतिज्ञान्तर्गतम्, किन्तु द्वितीयपक्ष इव पूर्वपक्षप्रतिषेधकम्। आद्यपक्षे 'तु तदपि प्रतिज्ञान्तर्गतम्। न

१. तु पदस्थाने अपि पदं कोशे अस्ति।

चैवमस्य द्वितीयसाङ्कर्यम् । नञ्प्रश्लेषाप्रश्लेषाभ्यां भेदात् । ब्रह्मानन्दादिकमित्यनेन अहिकुण्डलसूत्रं प्रकृतमीशानन्दादिकमिह विशेष्यत्वेन संयोज्यमित्युक्तं भवति । शिष्टं सुगमम् । तत्त्वप्रदीपे तु परमित्यस्य उत्तममित्यर्थमुपेत्य 'एष सेतुः' इत्यादौ आधारत्वमितत्वोपजीव्यत्वनियामकत्वानां व्यपदेशात् 'नित्यानन्द' इत्यादावाधिक्येन वैलक्षण्यव्यपदेशाच्च सर्वस्मात्परम् उत्तममेव ब्रह्मानन्दादिकमिति सूत्रार्थोऽभिहितः । अस्मिन् पक्षे 'अतो' व्यपदेशेभ्यः सेतुत्वाद्यलौकिकधर्मवत्त्वरूपालौकिकत्वावगमात्परमिति भाष्यर्थोऽवगन्तव्यः।

सू — ॐ ॥ दर्शनात् ॥ ॐ ॥ ३३ ॥

दर्शनादेव चान्यानन्दादीनाम् ।

हेत्वन्तरेणानन्दादेरलौकिकत्वं समर्थयत्सूत्रमुपन्यस्य व्याचष्टे- **दर्शनादिति ॥** मनोवाग्गोचरत्वादित्यर्थः । अत एवोत्तरत्र तादृक्श्रुत्युपन्यासः । **अन्येति ॥** ब्रह्मणोऽन्येषां जीवानामानन्दादीनामित्यर्थः । अस्य अतः परमिति साध्यवाक्येनान्वयः । एवशब्दो लिङ्गस्य निरवकाशत्वेन प्राबल्यसूचकः । चो भिन्नक्रमः । न केवलं सेतुत्वादिभ्यः, किन्तु दर्शनाच्च ब्रह्माद्यानन्दादीनां मनसा विषयीकरणात् वाचा व्यवहरणात् परानन्दादीनां चातथाभूतत्वाच्चेति समुच्चये । न चान्यानन्दादीनां तत्तत्साक्षिवेद्यानां च कथम् अन्यमनोजन्यप्रत्यक्षविषयत्वमिति वाच्यम् । तेषां परिमितत्वेन योगिमनोजन्यप्रत्यक्षविषयत्वसम्भवात् । सूत्रभाष्ययोः मनसा वाचेत्यध्याहारेण दर्शनपदस्य मनोवाग्वृत्तिसामान्यपरत्वाच्च ।

'अदृष्टमव्यवहार्यमव्यपदेश्यं सुखं ज्ञानमोजो बलमिति ब्रह्मणस्तस्माद् ब्रह्मेत्याचक्षते तस्माद् ब्रह्मेत्याचक्षते' इति कौण्डिन्यश्रुतिः ॥ ३३ ॥

ननु अन्यानन्दादीनां मनोगोचरत्वादस्तु लौकिकत्वं, तावता ब्रह्मानन्दादेः कथमलौकिकत्वसिद्धिः मानाभावादित्यतस्तत्प्रमाणत्वेन दर्शनपदोक्तां श्रुतिमाह-

अदृष्टमिति ॥ परमादन्यैस्सर्वात्मनाऽस्पष्टत्वेन च मनसाऽदृष्टमित्यर्थः । 'अव्यवहार्यं' वाचा । तत्त्वप्रदीपरीत्याहेयोपादेयं वा । 'अव्यपदेश्यं' वाचा विविक्ततया निरूपयितुमशक्यम् । तत्त्वप्रदीपरीत्या वाचा अव्यवहार्यं वा । इति ब्रह्मण इति । ब्रह्मण आनन्दादिकमेवं ज्ञेयमित्यर्थः । तस्मादृष्टत्वादिनाऽलौकिकानन्दादिपूर्णत्वाद्ब्रह्मेत्याचक्षते ज्ञानिनः । तस्मात्तच्छब्दमुख्यवाच्यत्वाद् ब्रह्मेतिशब्देन परं ब्रह्म व्यवहरन्तीत्यर्थः । **श्रुतिरिति** ॥ ब्रह्मानन्दादेरलौकिकत्वं वक्तीत्यर्थः ॥

अप्रसिद्धस्य कथमानन्द इत्यादिव्यपदेश इत्यतो वक्ति -

सू— ॐ ॥ बुद्ध्यर्थः पादवत् ॥ ॐ ॥ ३४ ॥

जीवेश्वरसम्बन्धज्ञापनार्थमप्रसिद्धोऽपि पादो यथा पादशब्देन व्यपदिश्यते 'पादोऽस्य विश्वा भूतानि' (ऋ. १०. ९०.३) इति तथा ।

नन्वेवमानन्दादेरलौकिकत्वात्कथं श्रुतिपुराणादिष्वानन्दादिपदप्रयोग इत्याशङ्क्य तत्परिहाराय सूत्रमवतार्य व्याचष्टे- **अप्रसिद्धस्येति** ॥ 'ब्रह्मानन्दादेः' इति विपरिणामेनान्वेति । हेतुगर्भमिदम् । 'कथम्' इत्याक्षेपे । आनन्दशब्दात्परम् इतिशब्दो योज्यः । आदिशब्देन ज्ञानमित्यादिव्यवहारो गृह्यते । तथा च 'अप्रसिद्धस्य' ब्रह्मानन्दादेः 'आनन्दादिव्यपदेशः' ब्रह्मानन्दादिकर्मकानन्दादिशब्दव्यवहारः 'कथं' केनोपायेन युज्यते । एवं 'कथं' किमर्थं युज्यते- न युज्यते, तस्याप्रसिद्धत्वेन तच्छब्दानां तत्र शक्तिग्रहायोगात्, तत्र तत्प्रयोगे प्रयोजनाभावाच्चेत्याक्षेपाभिप्रायः । आनन्दादिव्यपदेश इत्येतत् बुद्ध्यर्थ इत्यनेनापि सम्बध्यते । बुद्ध्यर्थ इत्यस्य बुद्ध्यर्थमिति व्यत्ययेन दृष्टान्तभागेऽप्यन्वयमभिप्रेत्य पादवदित्यंशं विवृणोति- **जीवेति** ॥ सम्बन्धः अंशांशिभावः । तथा च यथा पुरुषपादस्य तदंशत्वं तथा भूतानामिति जीवेश्वरयोरंशांशित्वसम्बन्ध ज्ञापनार्थ-

मित्यर्थः । न चैवं जीवेश्वरयोरभेदप्रत्ययापत्तिः । भेदश्रुतिपर्यालोचनया ज्ञातांशांशिभावस्यापि पुंसो भिन्नांशत्वस्यैव प्रतीतेः । **अप्रसिद्ध इति** ॥ पुरुष-देहावयवप्रसिद्धचरणविलक्षणः 'त्रिपादस्यामृतं दिवि' (ऋ.१०-९०-३) इत्युक्तश्वेतद्वीपानन्तासनवैकुण्ठगतनारायणवासुदेववैकुण्ठाख्यमूर्तित्रयविलक्षण-श्चेत्यर्थः । यद्यपि तथापीत्यर्थे, न केवलं प्रसिद्धः, किन्तु अप्रसिद्धोऽपीति समुच्चये वा अपिशब्दः । **पाद इति** ॥ विश्वाख्योऽश इत्यर्थः । इति श्रुतिगतेन पाद-शब्देनेत्यन्वयः । 'व्यपदिश्यते' व्यवह्रियते । पादवदित्यनेन लब्धं दार्ष्टान्तिकभागं दर्शयति- **तथेति** ॥ 'तथा व्यपदिश्यते' तद्वदेव व्युत्पाद्यत इत्यर्थः । एवं 'तथा' लौकिकविलक्षणत्वेन अप्रसिद्धस्याप्यानन्दादेर्व्यपदेशो 'बुद्ध्यर्थः' आनन्दादेरनु-कूलवेदनीयत्वादिज्ञापनार्थ इत्यर्थः । प्रकारान्तरेण तत्प्रत्यायनोपायाभावादिति भावः । न चैवमप्यलौकिकत्वविशिष्टानन्दप्रत्ययोपायाभाव इति वाच्यम् । अनुकूलवेदनीयत्वादिज्ञानमात्रवतः पुरुषस्य 'अदृष्टमव्यवहार्यम्' (कौण्डिन्य) 'अलौकिकास्तस्य शब्दाः तथाऽर्थाः' 'अलौकिको ह्येष विष्णुः परत्वात्' इत्यादिश्रुत्यन्तरबलेनालौकिकत्वज्ञानसम्भवात् । सूत्रभाष्ययोर्यत इति शेषः । अस्यातो नानन्दादिव्यपदेशायोगो न वा प्रयोजनाभाव इत्यवतारिकालब्ध-साध्येनान्वयः ।

'अलौकिकोऽपि ज्ञानादिस्तच्छब्दैरेव भण्यते ।
ज्ञापनार्थाय लोकस्य यथा राजेव देवराट् ॥' इति पाद्मे ॥३४॥

अत्रार्थेऽनुभवसिद्धदृष्टान्तप्रतिपादिकां स्मृतिं चाह- **अलौकिकोऽपीति** ॥ यद्यपितथापीत्यर्थेऽपिशब्दः । आदिपदादानन्दादिग्रहः । 'तच्छब्दैः' ज्ञान-मित्यादिरूपैरलौकिकैरशब्दैः 'लोकस्य' जनस्य ज्ञापनार्थायैवेति सम्बन्धः । बोधकत्वसर्वव्यवहारहेतुत्वानुकूल-वेदनीयत्वादिज्ञापनप्रयोजनायेत्यर्थः । यथैव 'देवराट्' देवेन्द्रः प्रसिद्धराजविलक्षणोऽपि राजेवास्ते इति यथा राजेति शब्देन 'भण्यते' व्यवह्रियते तथेत्यर्थः । यद्वा- यथा राजा तथेन्द्र इति वाक्येनेवेत्यर्थः ।

'भण्यते' निर्दिश्यते । अत्र ईश्वरानन्दादिरूपाणामर्थानामलौकिकत्वं नाम अप्राकृतत्वं शब्दानामलौकिकत्वं नाम वैदिकत्वमिति भावबोधकाराः । तन्न, लौकिका अपि शब्दाः अमुष्मिन् प्रवर्तमानाः अधिकार्थान् लोकविलक्षणानन्दादीन् वदन्तीति वाक्यशेषानुपपत्तेः । संस्कृतत्वरूपवैदिकत्वस्य लौकिकेष्वपि सत्त्वात् प्राकृतानां चेह प्रसक्त्यभावात् । तस्माच्छब्दतदुपजीवीतरप्रमाणगम्यत्वं लौकिकत्वमर्थस्य तदगम्यत्वमलौकिकत्वम् । एवंविधार्थके एव शब्दस्य लौकिकत्वालौकिकत्वे इति द्रष्टव्यम् । केचित्तु- शब्दस्यालौकिकत्वं लोकाप्राप्तभगवत्स्वरूपभूतानन्तवर्णपदादिरूपत्वमित्याहुः । तन्मूलं चिन्त्यम्, पाद्मे चायमर्थ उक्त इत्यन्वयः ।

॥ इति परमताधिकरणम् ॥ १६ ॥

॥ १७. स्थानविशेषाधिकरणम् ॥

(परमात्मनः रूपगुणेषु भेदो नास्ति)

परानन्दमात्रात्वे कथं ब्रह्माद्यानन्दादीनां विशेष इति ।

अत्राधिकरणे ब्रह्माद्यानन्दादीनां भगवदानन्दादिप्रतिबिम्बत्वं पूर्वनयोक्तं समर्थ्यते । पूर्वपक्षयति- **परेति** ॥ आनन्दशब्दात्परम् आदिशब्दो योज्यः । मात्रात्वं प्रतिबिम्बत्वम् । 'कथम्' इत्याक्षेपे । ब्रह्मा चतुर्मुखः । मुक्तब्रह्मादिपरोऽयं शब्दः । उक्तं हि तत्त्वप्रदीपे - सृतिगानां सृष्ट्यादिना वैषम्यकालुष्यादेर्वैचित्र्यमुपपद्यते, न मुक्तब्रह्माद्यानन्दादीनां विशुद्धरूपाणां तदुपपत्तिरिति । 'मिथ' इति शेषः । 'विशेषो' शुद्धचैतन्यरूपेण वैचित्र्यं स्यात् । यत इति शेषः । तथा च यतो ब्रह्माद्यानन्दादीनां परमात्मानन्दादिमात्रात्वे अभ्युपगते तेषां 'मिथः' अन्योन्यं 'विशेषः' वैचित्र्यं कथं स्यात् न स्यात्, अन्यथा बिम्बभूतभगवदानन्दादावपि विशेषः स्यात् । तथा च भगवद्रूपेषु विशेषः गुणतारतम्यम् । एवं चेत् कथं तत्र भक्तिः कर्तव्या स्यात्, न कर्तव्यैव स्यात्,

अतः कथं ब्रह्माद्यानन्दादीनां परानन्दादिमात्रात्वं तत्प्रतिबिम्बत्वं स्यात्, नास्त्येवेति योजना।

अत उच्यते -

सू — ॐ ॥ स्थानविशेषात्प्रकाशादिवत् ॥ ॐ ॥ ३५ ॥

यथाऽऽदित्यस्य दर्पणादिस्थानविशेषात् प्रतिबिम्बे विशेषः एवमानन्दादेरपि ।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति ॥ यथेति ॥** दर्पणादीत्यादिपदेन जलसूर्यकान्तादेर्ग्रहणम्। प्रसिद्धत्वाद्दर्पणग्रहणं, न प्रकृतोपयुक्तत्वात्। अपिर्यद्यपि तथापीत्यर्थे । दृष्टान्तदार्ष्टान्तिकसमुच्चये चः । आदित्यशब्दात् परमादिशब्दो योज्यः। तथा च यथाऽऽदित्यादेः प्रतिविम्बे सूर्यकान्ताद्युपाधिकृते सूर्यकान्तादिस्थानविशेषात् स्थानगुणात् 'विशेषः' अग्निजनकत्वादिवैचित्र्यम्, एवं परमात्मानन्दादेः प्रतिबिम्बे जीवानन्दादौ ब्रह्मादिस्थानगतभक्त्यादिगुणविशेषाद्विशेषो वैचित्र्यं युज्यत इति योजना । अस्यातो न प्रतिबिम्बे वैचित्र्यानुपपत्तिरित्यध्याहृतसाध्येनान्वयः। अनेन सूत्रे षष्ठ्यन्तात् सप्तम्यन्ताच्च वतिः, आवर्तनीयश्चायं, प्रतिविम्बोपलक्षकश्च विशेषशब्दोऽप्यवर्तनीय इति सूचितम्।

'ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च ।
प्रतिबिम्बत्वमायाति मध्योच्चादिविशेषतः ॥'

इति वाराहे ॥ ३५ ॥

अत्र स्मृतिं चाह- **ब्रह्मादीति ॥** परमस्य आनन्दादिः, 'मध्योच्चादिविभेदतो' मध्यमोत्तमाधमभेदेन 'ब्रह्मादिगुणवैशेष्यात्' ब्रह्मादिगतभक्तिज्ञानादिगुणवैचित्र्यात् 'प्रतिविम्बत्वमायाति' प्रतिफलितो भवति। ब्रह्मादि-

स्वरूपोपाधौ मध्योच्चादिभेदतः प्रतिबिम्बाकरो भवतीत्यर्थः । उक्तं हि तत्त्व-प्रदीपे- एवं परमात्मानन्दादेरपि ब्रह्मादिस्थानगतगुणविशेषात् प्रतिबिम्ब-भूतानन्दादिविशेष इत्युक्त्वा प्रतिबिम्बत्वमायातीत्यर्थ इति । भाववोधे तु-ब्रह्मादीनामिति पदमध्याहृत्य ब्रह्मादीनामानन्दादिः परस्यानन्दादेर्ब्रह्मादि-गुणवैशेष्यात् मध्योच्चादिविभेदतः 'प्रतिबिम्बत्वमायाति' प्रतिफलितो भवति तदधीनत्वे सति तत्सदृशो भवतीति व्याख्यातम् । तत्पक्षे तत्त्वप्रदीपविरोधः तावत् स्फुटः, प्रतिबिम्बो भवतीत्यनुक्त्वा प्रतिफलितो भवतीत्युक्तावस्वारस्यं चेति ध्येयम् । **वाराह इति** ॥ उक्तार्थोऽभिहित इति शेषः ।

सू— ॐ ॥ उपपत्तेश्च ॥ ॐ ॥ ३६ ॥

'ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादितः ।
ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रता ॥'

इति पाद्मे ॥ ३६ ॥

युक्त्यन्तरेण बिम्बानन्दाद्यवैचित्र्येऽपि प्रतिबिम्बवैचित्र्यमुपपादयत्सूत्रं पठित्वा स्मृत्यैव व्याचष्टे- **उपपत्तेश्चेति** ॥ न केवलं प्रतिबिम्बानन्दादि-वैचित्र्यस्य बिम्बावैचित्र्येऽपि स्थानविशेषादुपपत्तिः, किन्तु बिम्बभूत-भगवदैश्वर्यवशाच्चेति सूत्रवृत्तिं चशब्दस्याध्याहृतहेतुनाऽन्वयं चाभिप्रेत्या-सिद्धिपरिहारायोपपत्तेरित्यस्य उक्तहेतुकोपपत्तिवचनादित्यर्थमुपेत्य स्मृतिरूपं तद्वचनमुदाहरति- **ऐश्वर्यादिति** ॥ विष्णोः परमादैश्वर्याद्ब्रह्मादीनां गुणानां भक्त्यादीनाम् 'अनादितः' अनादिभक्त्यादिवशादिति यावत् । ब्रह्मादीना-मानन्दादेः 'विचित्रता' मध्योच्चादिभेदभिन्नं तारतम्यं 'हि' आनन्द-श्रुत्यादिप्रसिद्धं 'सूपपन्ना' सम्यगुपपन्नमित्यर्थः । एकस्यैवानन्दस्य चूत-फलादिभोगप्रयुक्ता ये आनन्दादेर्विशेषास्तदात्मकत्वं विचित्रत्वं तु प्रकृता-नुपयुक्तम् । भक्त्यादिग्रहणेन पूर्वसूत्रोक्तभक्त्यादिरूपनिमित्तं चशब्दसमुच्चेयं दर्शितम् । भक्त्यादीनामनादित्वोक्त्या पुरुषापाद्यानां भक्त्यादिस्थानगुणानां

कथं स्वाभाविकानन्दादिवैचित्र्ये हेतुत्वमिति शङ्का परिहृता। पाद्म इत्यस्य सूत्रेणान्वयः। 'उपपत्तेः' उपपन्नत्वोक्तेरित्यर्थः। अस्य नसिद्धिरित्यध्याहृत-साध्येनान्वयः।

॥ इति स्थानविशेषाधिकरणम् ॥ १७ ॥

॥ १८. तथान्यत्वाधिकरणम् ॥

(ध्यानकाले यद्रूपं प्रतीयते तत् ब्रह्मस्वरूपं न)

ध्यानकाले यच्चित्ते प्रदृश्यते तदेव ब्रह्मरूपम् अतः कथमव्यक्ततेति।

अत्राधिकरणे ब्रह्मणो ध्यानप्रतीतादन्यत्वोक्त्या पुनरव्यक्तत्वं समर्थ्यते। पूर्वपक्षयति- **ध्यानेति** ॥ योजना तु- 'यत्' यतो ब्रह्म ध्यानकाले 'चित्ते' मनसि 'प्रदृश्यते' तेन प्रतीयते अतः कथं ब्रह्मणोऽव्यक्तता तस्माद्व्यक्त-मेवेति। न च यच्चित्ते प्रदृश्यते न तद्ब्रह्मेति वाच्यम्। यतस्तद्ब्रह्मरूपमेव, न ततोऽन्यत्। ननु ध्यानप्रतीतं न ब्रह्म, तथा सति ध्यातृबहुत्वेन तस्य बहुत्वापत्तेरित्यतोऽप्युक्तम्- **ब्रह्मरूपमिति** ॥ रूपशब्दोऽत्र व्यक्तिपरः। समुदायैकवचनमेतत्। तथा च चित्ते प्रतीतानि ब्रह्मरूपाण्येव। अतः स्वरूपभेदाभावेऽपिरूपाणां नानात्वात् ध्येयबहुत्वोपपत्तिरिति भावः।

अत आह -

सू— ॐ ॥ तथाऽन्यत्प्रतिषेधात् ॥ ॐ ॥ ३७ ॥

'यथा जीवानन्दादेरन्यद्ब्रह्म तथोपासाकृतादपि।
यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥' (केन.भा.१-६)
इति प्रतिषेधात्।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- अत इति ॥ ब्रह्मेत्येतत् तदानन्दादेरप्युपलक्षणकम् । 'उपासाकृतात्' उपासनेन मानसवासनामयस्य वस्तुनो मनसाऽवलोकनाख्येन विषयीकृताद्वासनामयात् । अपिर्भिन्नक्रमः समुच्चयेऽवधारणे च । अत्र यथा जीवानन्दादेः ब्रह्मानन्दादिकमन्यत् तथा ब्रह्म उपासाकृतात् अन्यदिति नान्वयः । वैषम्येनोपमानोपमेयभावायोगात् । किन्तु जीवानन्दादेरित्यतः परं यथाशब्दस्यावृत्त्या योजनेन यथा जीवानन्दादेर्यथा येन विकृतत्वापरपर्यायान्यथात्वाल्पत्वादिना कारणेन ब्रह्मानन्दादि ततः 'अन्यत्' विलक्षणं तथा तत्सदृशेन दुर्लक्षणत्वादिना कारणेन ब्रह्मापि उपासाकृतात् 'अन्यदपि' विलक्षणमेवेति । अनेन सौत्रस्तथाशब्दः 'परमतः' इत्यत्रोक्तन्यायातिदेशकः समुच्चयार्थ इत्युक्तं भवति । इतीति इत्येवं रूपे तलवकारवाक्ये उपासाकृतस्य ब्रह्मत्वप्रतिषेधादित्यर्थः । अनेन सूत्रे 'तदव्यक्तम्' इत्यनुवर्तनीयम् । 'अन्यत्' इति चावर्तनीयम् । तथा च 'तत्' ब्रह्म उपासाकृतादन्यत् । कुतः ? यतोऽन्यत् अत एव शेषशेषिणोरैक्यानुपपत्तेरेव श्रुतौ तस्य चित्ते प्रतिविम्बितस्य ब्रह्मत्वप्रतिषेधः, अतः प्रतिषेधात् तद्वा ब्रह्म न, यतोऽन्यत् अतोऽव्यक्तमेव न व्यक्तमिति सूत्रयोजना दर्शिता भवति । यदिदं वस्तु 'उपासते' ध्यायन्ति नेदं ब्रह्म, किन्तु पुरुषो यद्वस्तु 'न मनुते' साकल्येन न जानाति, येन वस्तुना मनो ज्ञातमाहुः कवयस्तदेव त्वं ब्रह्मेति विद्धीत्यर्थः । उमां प्रति शङ्करवाक्यमेतत् । यद्यपि तलवकारभाष्ये आसेति भिन्नं पदमुपेत्य नेदं जीवस्वरूपं ब्रह्म, किन्तु, यत् 'ते' तव 'उप' समीपे 'आस' नियामकतया आस्ते तदेव ब्रह्म विद्धीति श्रुत्यर्थोऽभिहितः । तथापि प्रकृतोपयुक्तं व्याख्यानान्तरमेतत् । तत्राप्यासत इत्यैकपद्यं वेत्यविरोधः ।

'पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिविम्बितम् ।
ब्रह्मैव प्रतिविम्बे यदतस्तेषां फलप्रदम् ॥

तदुपासनं च भवति प्रतिमोपसनं यथा ।
दृश्यते त्वापरोक्ष्येण ज्ञानेनैव परं पदम् ।।
उपासनात्त्वापरोक्ष्यं गमयेत्तत्प्रसादतः ।।'

इति ब्रह्मतर्के ।। ३७ ।।

ननु ध्यानकाले प्रतीतस्याब्रह्मत्वे कथं ब्रह्म फलदं स्यात् । न ह्यन्यस्य ध्यानमन्यस्य फलदातृत्वमिति युज्यते अतिप्रसङ्गादित्यत आह- **पश्यन्तीति ।।** यन्मनसि 'प्रतिबिम्बितं' प्रतिफलितं वासनामयं वस्तु तत्परमं ब्रह्मेत्युच्यते । उपचारेण तदाश्रये तद्व्यपदेश इति भावः । तदेव ध्यानकाले पश्यन्ति । केचित्तु- ध्यानानन्तरं परमं ब्रह्मापरोक्ष्येण पश्यन्तीत्यन्वयमाहुः । ननु प्रतिबिम्बितस्याब्रह्मत्वात् तद्ध्यानं कथं ब्रह्मध्यानफलदं स्यादित्यत आह- **ब्रह्मैवेति ।।** यतो न ध्यानं फलदं, किन्तु प्रतिबिम्बे यद्ब्रह्मास्ति तदेव तेषां ध्यातृणां दर्शनाख्यफलप्रदमतो नोक्तदोष इत्यर्थः । यतः प्रतिबिम्बे ब्रह्मास्ति । अतस्तेषां फलप्रदं भवतीत्येव वा । अल्पा अपि पिशाचादयः स्वाकारस्मृतौ किञ्चित्फलं दद्युः किमुत सर्वज्ञं सर्वशक्तिकं ब्रह्मेति भावेन पुनर्ब्रह्मेत्युक्तिः । ननु स्थितिमात्रेण कथं ब्रह्म फलदमध्यातत्वादित्यत आह- **तदिति ।।** प्रतिबिम्बोपासनमित्यध्याहारेण सम्बध्यते । तदुपासनमित्यस्यावृत्तिर्वा । तथा च यथा 'प्रतिमोपासनं' प्रतिमायामित्थंभूतो भगवानस्तीति स्मृतिः तदुपासनं तदधिष्ठितब्रह्मोपासनं भवति, तथा 'तदुपासनं' प्रतिबिम्बोपासनं वासनामयवस्तुध्यानमपि तदुपासनं ब्रह्मोपासनं भवतीति योजना ।। प्रतिबिम्बं ब्रह्मैव कुतः न भवतीत्यत आह- **दृश्यते इति ।।** यतः 'परं पदम्' उत्तमं ब्रह्मापरोक्ष्येण । स्वार्थे ष्यञ्- भावभवित्रोरभेदोपदेशो वा । अपरोक्षेण ज्ञानेनैव 'दृश्यते' विषयीक्रियते, न तु ध्यानेनेत्यर्थः । अपरोक्षेणेति पाठः स्वरसः । तर्हि ज्ञानायैव प्रयतितव्यं किमुपासनयेत्यत आह- **उपासनेति ।।** तुशब्दो निरर्थकत्वव्यवच्छेदकः, स्वातन्त्र्यव्यवच्छेदको वा अवधारणे वा । तथाचोपासना तस्य

ध्यानमेव। तस्य ब्रह्मणः प्रसादेन 'तत्' ब्रह्मापरोक्ष्यं 'गमयेत्' प्रापयेदित्यर्थः। तद् ब्रह्मापरोक्ष्यमपरोक्षज्ञानं तद्विषयतां गमयेदिति वा। ब्रह्मतर्क इत्यनन्तरमुक्तम् अतो न किञ्चिच्चोद्यावकाश इति वाक्यशेषः।

॥ इति तथान्यत्वाधिकरणज्ञम् ॥ १८ ॥

॥ १९. सर्वगतत्वाधिकरणम् ॥

(सर्वत्र सर्वदा सृष्ट्यादिकर्ता हरिरेव)

देशकालान्तरे अन्यतोऽपि सृष्ट्यादि युक्तम् ॥ इति ॥

अत्राधिकरणे भगवत एव सर्वकर्तृत्वादि समर्थ्यते। पूर्वपक्षयति- **देशेति** ॥ 'अन्यतो ' ब्रह्मणोऽन्यस्मात्। अपिरेवार्थः। तत्त्वप्रदीपे तु यद्यपि सृष्ट्यादि ब्रह्मण एव, तथापि देशकालान्तरेऽन्यतो युक्तमित्यपिशब्दार्थ उक्तः। तथा च न ब्रह्मणः सकाशादेव सर्वसृष्ट्यादि युक्तमिति भावः। **युक्तेति पाठे** क्रियेति संयोज्यम्। युक्तेत्यनेन राजादौ तथा दर्शनादिति युक्तिरुक्ता भवति।

अतो ब्रूते -

सू—

ॐ ॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ॐ ॥ ३८॥

सर्वदेशकालवस्तुष्वनेनैव सृष्ट्यादिकं प्रवर्तते। 'एष सर्व एष सर्वगत एष सर्वेश्वर एषोऽचिन्त्य एष परमः' इति भाल्लवेयश्रुतिः।

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ 'प्रवर्तते' इत्यन्ते 'अनेने'ति साध्यभागः अनेन एषु इदमित्यावृत्तिविपरिणामाभ्यां व्याख्यातः। सृष्ट्यादिकं प्रवर्तते भवतीति शेषो वा। पूर्वसूत्रेऽन्यदित्यस्य विशेष्यतया प्रकृत ब्रह्मानेनेति परामृश्यते। न त्वन्यत इत्यवधारणार्थः। आधारत्वं विषयत्वं च सप्तम्यर्थः। तत्र

देशकालयोराधारत्वं वियदादिवस्तुनो विषयत्वमिति विवेकः । कुत इत्यतोऽत्र हेतुत्वेन प्रवृत्तं सर्वगतत्वेत्याद्यंशं सर्वगतत्वं च मायामयशब्दश्च सर्वगतत्व-मायामयशब्दौ तयोश्शब्द इति शब्दपदावृत्त्या विग्रहम्, एकत्र षष्ठ्याः प्रतिपाद्य-प्रतिपादकसम्बन्धार्थकत्वम् अन्यत्र व्याख्यानव्याख्येयभावसम्बन्धार्थकत्वं चाभिप्रेत्योभयविधश्रुत्युपन्यासपूर्वकं व्याचष्टे- **एष इति** ॥ 'एषः' हरिः 'सर्वो' गुणपूर्णः व्याप्तश्चेत्यर्थः । प्रत्युद्देश्यं विधेयसम्बन्धबोधनायैष इत्यभ्यासः । यद्यपि प्रथमोक्तं सर्वत्वं न साध्यसाधकमिति भावेन यदनन्तरोक्तं सर्वगतत्वं सूत्रकृता गृहीतं तदप्यस्यैव सृष्ट्यादिकर्तृत्वमित्युक्तसाध्ये साधकं न भवति । तथापि 'अनुप्रविश्य नामरूपे व्याकरोत्' (छा.६-३-३) इति श्रुतेः सर्वगतत्वस्य सृष्ट्याद्यर्थत्वात् तच्छब्देनोक्तसाध्यसिद्धिसम्भवाद्युक्तस्तदुपन्यासः । ईश्वरपरत्व-ज्ञापनाय समग्रश्रुत्युपन्यासः । सर्वगतत्वश्रुतौ सर्वसृष्ट्यादिकर्तृत्वस्य अर्थादुक्त-त्वात् मायामयशब्दोक्तायां मायामयशब्दव्याख्यानरूपायां श्रुतौ तु साक्षादुक्त-त्वात् प्रमेयभेदाच्छ्रुतिद्वयोपन्यासः ।

'सर्वत्र सर्वमेतस्मात्सर्वदा सर्ववस्तुषु ।
स्वरूपभूतया नित्यशक्त्या मायाख्यया यतः ॥
अतो मायामयं विष्णुं प्रवदन्ति सनातनम् ।'
इति चतुर्वेदशिखायाम् ।
आदिशब्दादन्यत्र प्रमाणाभावाच्च ॥ ३८ ॥

'सर्वत्र' सर्वदेशेषु 'एतस्मात्' विष्णोः 'सर्वदा' सर्वकालेषु सर्ववस्तुषु सर्व-मित्यन्वयः । सर्ववस्तु विषयं सृष्ट्यादीत्यर्थः । प्रवर्तत इति भाष्यपदमिहापि सम्बध्यते । तथा च यतः एतस्मात् मायया विश्वसृष्ट्यादि 'प्रवर्तते' भवति, अत एनं विष्णुं मायामयं वदन्ति कवयः । मायया शक्त्या मातीति माया इच्छात्मिका शक्तिः स्वरूपभूता यस्यासौ मायामय इति व्युत्पत्तिसम्भवादिति भावः । कदाचिद्विष्णवभावे शक्त्यभावेन सर्वदेशकालीनसर्वसृष्ट्यादिकर्तृत्वायोग इति

शङ्कावारणाय- 'सनातनं' परमनित्यं विष्णुं नित्यशक्त्येति चोक्तम् । नित्यत्वोपादनाय- **स्वरूपभूतयेति** ॥ चतुर्वेदशिखायां 'श्रुतिः पठिता' इति शेषः । 'अन्यत्र' देशकालान्तरे कतिपयवस्तुविषये विष्णोरन्यतः सृष्ट्यादावित्यर्थः । **प्रमाणाभावाच्चेति** ॥ 'इति सङ्गृहीतम्' इति शेषः । न केवलं स्वपक्षसाधकादुक्तसाध्यसिद्धिः, किन्त्वन्यत्र परपक्षे प्रमाणाभावाच्चेति समुच्चये चशब्दः ।

॥ इति सर्वगतत्वाधिकरणम् ॥ १९ ॥

॥ २०. फलाधिकरणम् ॥

(परमात्मैव कर्मणः फलस्य च हेतुः)

कर्मापेक्षत्वात्फलदानस्य तदेव ददातीति न वाच्यम् । कुतः?

अत्राधिकरणे भगवतः स्वर्गादिकर्मफलदातृत्वं समर्थ्यते । पूर्वपक्षयति- **कर्मेति** ॥ फलदानस्येति षष्ठी सप्तम्यर्थे । 'ईश्वरस्य' इति शेषः । तथा च शुभाशुभफलदाने ईश्वरस्य पुण्यपापाख्यकर्मापेक्षत्वादित्यर्थः । यद्वा- ईश्वरकर्तृकफलदानस्य कर्मापेक्षत्वात्तदधीनत्वादित्यर्थः । कर्मापेक्षत्वादित्येतद्व्याहत्यसिद्धिपरिहाराय कर्मापेक्षत्वस्येश्वरवादिभिरङ्गीकृतत्वादित्यपि व्याख्येयम् । एवं फलदानस्य फलखण्डनस्य फलादानस्य कर्मापेक्षत्वात् तदकरणापेक्षत्वादिति व्यतिरेकपरतयाऽपीदं व्याख्येयम् । तथा च अन्वयव्यतिरेकाभ्यां तदेव कर्मैव फलं ददाति नेश्वर इति ज्ञापयत इत्यर्थः । सिद्धान्तयन्नेतत्प्रतिषेधति - इति न वाच्यमिति । अत्र हेतुं पृच्छति - **कुत इति** ॥

सू— ॐ ॥ फलमत उपपत्तेः ॥ ॐ ॥ ३९ ॥

अत एवेश्वरात्फलं भवति । न ह्यचेतनस्य स्वतः प्रवृत्तिर्युज्यते ॥ ३९ ॥

एतच्चोद्योत्तरत्वेन सूत्रमुपन्यस्य व्याचष्टे- **फलमिति** ॥ 'अत' इत्यनूद्य सावधारणत्वाभिप्रायेणास्मादीश्वरादेवेति व्याख्यातम् । न कर्मण इत्येवार्थः । उपलक्षणमेतत् । अतः सर्वत्र सर्वमेतस्मादित्युक्तेरेवेति तत्त्वप्रदीपोक्तमपि द्रष्टव्यम् । 'फलं' स्वर्गनरकादिरूपम् । 'भवति' इति सूत्रशेषोक्तिः । इतिशब्दो हेतौ, सूत्रार्थस्य न वाच्यमिति साध्ये हेतुत्वद्योतकः । फलमत इति प्रतिज्ञायामुपपत्तेरिति हेतुर्योज्यः । तस्येश्वरस्य चेतनत्वात्सर्वेशितृत्वाच्च फलदातृत्वोपपत्तेरित्यर्थः । इत्याशयेनैवकारेणोक्ते कर्मणः फलदातृत्वाच्च फलदातृत्वोपपत्तेरित्यर्थः । इत्याशयेनैवकारेणोक्ते कर्मणः फलदातृत्वाभावे उपपत्तेरित्यनेनार्थाल्लब्धं हेतुं स्वयं योजयति- **न हीति** ॥ अचेतनस्येति हेतुगर्भः । 'प्रवृत्तिः' फलदाने । फलदातृत्वमिति यावत् । अस्मदादावदर्शनादिति हिशब्दार्थः । अन्याधीनप्रवृत्तिदर्शनात्कथमेतदित्यत आह- **स्वत इति** ॥

सू— ॐ ॥ श्रुतत्वाच्च ॥ ॐ ॥ ४० ॥

'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्' (बृ.५-९-२८) इति ॥ ४० ॥

नन्वीश्वरस्य चेतनत्वेन फलदातृत्वसम्भावनैव भवेत् न निश्चयः, अतः कुतोऽसौ निश्चय इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति- **श्रुतत्वाच्चेति** ॥ इति श्रुतत्वाच्चेत्यन्वयः । न केवलं चेतनत्वाद्युपपत्तेरीश्वरस्य फलदातृत्वं सम्भाव्यते, किन्तु श्रुत्युक्तत्वाच्च तन्निश्चीयते चेति सूत्रार्थः । 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम् । तिष्ठमानस्य तद्विदः' (बृ. ५.९.२८) इति वाजसनेयवाक्ये एकवचनं समुदायापेक्षया, विशेष्यब्रह्मशब्दविवक्षया आनन्दमिति नपुंसकप्रयोगः 'निर्दोषचैतन्यसुखान्तनुम्' इति विष्णुतत्त्वनिर्णयोदाहृतवाक्य इव । तथा च 'दातुः' हविःप्रदातृणां यजमानानां पूजकानां 'रातिः' प्रियः । फलप्रद इति यावत् । 'तिष्ठमानस्य' स्वस्मिन् मनसा

वर्तमानानां 'तद्विदो' ब्रह्मज्ञानिनां 'परायणं' परमप्रिय 'विज्ञानं' पूर्णज्ञानं पूर्णानन्दं ब्रह्मेत्यर्थः। यथोक्तं बृहद्भाष्ये -

'स प्रियः सर्वदातृणां ज्ञानिनां परमप्रियः।
ये तु तद्भाविता नित्यं तेषामेव परायणम् ॥' इति ॥
ब्रह्मपरत्वस्फोरणाय विज्ञानमित्याद्युदाहृतम् ॥

सू— ॐ ॥ धर्मं जैमिनिरत एव ॥ ॐ ॥ ४१ ॥

यतः फलं तदेव कर्म ईश्वराद्भवति। 'एष ह्येव साधुकर्म कारयति (कौ. ३-८) इति श्रुतेरिति जैमिनिः ॥ ४१ ॥

उक्तमाक्षिपत्सूत्रमुपन्यस्य व्याचष्टे- **धर्ममिति** ॥ तत्कर्मैवेत्येवकारान्वयः। सौत्रधर्मपदमधर्मस्याप्युपलक्षकमिति भावेन तदिति स्वपदं कर्मेति सामान्यपदेन विवृतम्। 'ईश्वरात्' 'यतश्श्रुति'रित्याभ्याम् 'अतः' इति पदं द्वेधा व्याख्यातम्। कर्मेति सामान्योक्त्या 'एष ह्येव' इति श्रुतिप्रतीकग्रहणेन च 'एष ह्येवासाधुकर्म कारयति' (कौ.३-८) इत्यस्याप्युदाहर्तव्यतां ज्ञापयति । जैमिनिर्मन्यत इति शेषः। श्रुतिस्तु वैषम्यनये व्याख्याता। सूत्रे नेति शेषः। तथा च यदुक्तम् ईश्वर एव फलप्रदो, न कर्मेति तन्न, कुतः ? 'अत एव' फलस्य कर्मान्वयव्यतिरेकानुविधायित्वादेव। इदं तु न्याय्यं, किं तत् ? यत् 'अतो' धर्माधर्माख्यकर्मत एव फलं भवति, तच्च कर्म तदीश्वराद्भवति कुतः ? 'अतः' 'एष ह्येव' इति श्रुतेरेव। यत एवमत ईश्वरोऽपि अतः एतस्मिन् 'रातिः' इति श्रुतिवचने एतेन फलदातृत्वेन रूपेणोपचर्यत इति। न केवलं कर्मणः फलप्रदत्वमन्वयव्यतिरेकरूपन्यायप्राप्तं, किन्तु जैमिनिराचार्योऽपि धर्माधर्माख्यं कर्मैव फलप्रदं मन्यते। अतोऽपीदं युक्तमिति पूर्वपक्षरीत्या सूत्रार्थः। जैमिन्यभिप्रायानुसारेण तु यतः फलं तस्मादीश्वरादेव कर्म भवतीति 'एष ह्येव' इति श्रुतेरिति सूत्रार्थः । अस्मिन् पक्षे यतः फलं तस्मादेवेश्वरात् भवतीति भाष्ययोजना द्रष्टव्या। तथैव तत्त्वप्रदीपोक्तेः।

सू—

ॐ ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ॐ ॥ ४२ ॥

परस्य कर्मणश्चोभयोः फलकारणत्वेऽपि न कर्म परप्रवर्तकम्। पर एव कर्मणः प्रवर्तकः। 'पुण्येन पुण्यं लोकं नयति पापेन पापम्' (प्र. ३-७) इति हेतुव्यपदेशात्। 'द्रव्यं कर्म च कालश्च' (भाग. २.५.१४) इति च ॥ ४२ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥ ॐ ॥

एतत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **पूर्वमिति** ॥ उभयोरिति स्वपदं परस्य परमात्मनः कर्मणश्चेति च व्याख्यातम्। समुच्चये चशब्दः। अपिशब्दो यद्यपीत्याद्यर्थे। अनेन सौत्रतुशब्दोऽप्यर्थतया व्याख्यातः। तुशब्दस्य कर्तृत्वकरणत्वरूपविशेषार्थत्वमवधारणार्थत्वं चाभिप्रेत्यावधारणव्यावर्त्यं दर्शयति- **नेति** ॥ 'कर्म' इत्यनन्तरं 'कर्तृ सत्' इति पर एवेत्यनन्तरं कर्ता सन्निति च शेषः। प्रयोजकः प्रवर्तक इति सूत्रशेषोक्तिः। अनेन यद्यपि कर्मब्रह्मणोरुभयोः कारणत्वमस्ति, तथापि नोभयोः समप्रधानभावः, किन्तु पूर्वं पूर्वसूत्रेऽतःशब्देनोक्तं ब्रह्मैव फलदाने कर्तृ सत् करणीभूतस्य कर्मणः प्रयोजकं, न तु कर्म ब्रह्मणः। तत्तु करणं सत् ब्रह्म प्रयोज्यमेवेति सौत्रः प्रतिज्ञाभागो व्याख्यातः। कुत इत्यतः प्रवृत्तं हेतुव्यपदेशादिति हेतुं व्याचष्टे- **पुण्येनेति** ॥ इति श्रुतौ ब्रह्मकर्मणोः कर्तृत्वकरणत्वरूपहेतुत्वस्योक्तत्वादित्यर्थः। यद्वा- हेतुशब्दो निमित्तपरः। तथा च ब्रह्मणः कर्तृत्वाख्यस्यैव कर्मणः करणत्वाख्यस्यैव फलप्रदाने स्वातन्त्र्यास्वातन्त्र्यनिमित्तस्योक्तत्वादित्यर्थः। अत एव न समप्रधानभावो, न विनिमयो वा शङ्क्य इति भावः। 'व्यपदेशात्' इत्यनन्तरं इति बादरायणो मन्यत इति वाक्यशेषः। न केवलं फलप्रदानक्रियायां कर्म

परप्रेरितम्, किन्तु तत्सत्ताऽपीश्वराधीनेति न तत्कर्त्रिति भावेनाह- द्रव्यमिति ॥ इति वचनाच्च न कर्म प्रवर्तकमित्यन्वयः । अनेन सौत्रस्तुशब्दश्चार्थोऽपि भवति । तेन पूर्वोक्तचेतनत्वादिति हेतुः 'द्रव्यम्' इति स्मृतिश्च समुच्चीयत इत्युक्तं भवति । 'पुण्येन' इति श्रुतिः वैषम्यनये 'द्रव्यम्' इति स्मृतिश्च रचनाधिकरणे व्याख्याता । अत्र श्रुतेः पुण्येन च ज्ञानमुत्पाद्य पापं विनाश्य तस्य पुण्यपापरहितस्य ज्ञानिनः प्रसन्नः स्वयमेव फलमनन्तं हि ददातीत्यहो भगवतो नारायणस्याश्चर्यरूपोऽयं महिमेति तत्त्वप्रदीपोक्तार्थविशेषोऽपि ग्राह्यः । कर्मब्रह्मणोः स्वातन्त्र्यास्वातन्त्र्यव्युत्पादनप्रकारश्च तत्रैवोक्तः ।

॥ इति श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

॥ १. सर्ववेदाधिकरणम् ॥

(सर्ववेदार्थविचारेण ब्रह्म ज्ञेयम्)

उपासनाऽस्मिन् पाद उच्यते । सर्वपरिज्ञानं प्रथमत उच्यते-

सू—

ॐ ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ ॐ ॥ १ ॥

अन्तो निर्णयः 'उभयोरपि दृष्टोऽन्तः' (गी. २-१६) इति वचनात् सर्ववेदविनिर्णयोत्पाद्यज्ञानं ब्रह्म ।

एतत्पादार्थं दर्शयति- **उपासनेति** ॥ जिज्ञासापरपर्यायोपासना 'अस्मिन्' तृतीयस्य तृतीये पादे 'उच्यते' कर्तव्यत्वेन प्रतिपाद्यत इत्यर्थः । आद्याधिकरणतात्पर्यमाह- **सर्वेति** ॥ उपासना द्विविधा । श्रवणमननापरपर्यायशास्त्राभ्यासरूपा ध्यानरूपा चेति । तत्राद्यायाः यथाशक्तिसर्ववेदतदर्थज्ञानरूपाया अज्ञानसंशयविपर्ययनिवर्तिकायाः ध्यानाङ्गत्वात् सैव 'प्रथमतः' आद्याधिकरणे 'उच्यते' अधिकारिभिः सम्पाद्यत्वेन प्रतिपाद्यत इत्यर्थः । अत्र भाष्यसुधाटीकासु सर्ववेदेतिसर्वशाखेति च विशिष्योक्त्या मीमांसकमत इव ऋग्यजुस्सामरूपवेदत्रयस्याध्येतव्यत्वनियमवत्तैत्तिरीयकाण्वादिरूपशाखाद्वयस्याध्येतव्यत्वनियमो नास्तीति न भ्रमितव्यमिति सूचितम् । अस्मन्मते सर्ववेदसर्वशाखोक्तब्रह्मगुणज्ञानार्थं शक्तैस्सर्ववेदवत्सर्वशाखानामध्येतव्यत्वात् । तदर्थानामपि शक्तैर्ज्ञेयत्वात् । अशक्तैस्तु यथाशक्ति अध्येतव्यत्वात् ज्ञेयत्वाच्च । अत्र किमेकैकेनैव सर्ववेदशाखोक्तं ब्रह्म श्रवणमननाभ्यां ज्ञातव्यम् उत स्वस्ववेदशाखोक्तमिति संशये स्वस्ववेदशाखोक्तमेव ज्ञातव्यमिति पूर्वपक्षे च सति सिद्धान्तयत्सूत्रं पठति- **सर्वेति** ॥ अत्र वेदान्तपदस्योपनिषत्परत्वभ्रान्तिवारणाय अन्तपदं व्याचष्टे- **अन्त इति** ॥ अत्र प्रमाणमाह- **उभयो-**

रिति ॥ 'नासतो विद्यते भावो नाभावो विद्यते सतः' (गी. २.१६) इति पूर्वार्धेन असच्छब्दितस्य कारणस्य प्रकृतेः सच्छब्दितस्य ब्रह्मणश्चाभावः प्रागभावः प्रध्वंसश्च न विद्यत इति वेदनित्यत्वसाधकानादिनित्यत्वव्याप्तावनेकदृष्टान्तप्रदर्शनाय तत्रादरपूर्वकं प्रकृतिपरब्रह्मणोरनादिनित्यत्वमभिधाय अत्रार्थे सम्प्रदायरूपप्रमाणमुच्यते- **उभयोरिति** ॥ 'अनयोरुभयोः' सदसतोरन्तो निर्णयोऽनादिनित्यत्वावधारणं 'तत्त्वदर्शिभिः' वेदार्थतत्त्वज्ञानिभिः 'अपि दृष्टः' कृतश्चेत्यर्थः ।

अपिसिञ्चेतिवत् अपिदृष्ट इति निर्देशः । यद्वा- तत्त्वदर्शिभिरपीति भिन्नक्रमेणापिशब्दान्वयः । न केवलं 'प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम' इत्यागमसिद्धमेतदित्यपिशब्दार्थः । यद्वा 'अन्तः' निर्णयः तद्विषयीभूतार्थो दृष्ट इत्यर्थः । अनेन दर्शनमूलकः सम्प्रदायः उपदेशपरम्परारूपो लक्षणयोक्तो भवति । **वचनादिति** ॥ 'गीतायाम्' इति शेषः । सूत्रे पूर्वसूत्रात् ब्रह्मवाचकं पूर्वपदमनुवर्त्य सर्वेति साध्यभागं व्याचष्टे- **सर्वेति** ॥ सूत्रभाष्ययोर्वेदशब्दः तदर्थपरः । शब्दविषयकनिर्णयस्य ब्रह्मविषयकत्वाभावात् । तथा च सर्ववेदानां तदर्थानाम् अन्तः सर्ववेदान्तः तद्रूपः प्रत्ययो ज्ञानं यस्य तत्तथोक्तम् । अनेन ब्रह्मण एव सर्ववेदार्थत्वं ज्ञापितम् । अन्यथा सर्ववेदाधिगमो व्यर्थस्स्यात् । तथा च तत्त्वप्रदीपटीकारीत्या पूर्वपदोदितं ब्रह्म सर्ववेदाधिगमानन्तरोत्पन्नविचारसाध्यवेदार्थनिर्णयरूपज्ञानविषय इति साध्यार्थः । टीकायां ध्यानार्थिना सर्ववेदान्निर्णीय श्रवणमननाभ्यां ज्ञातव्यं ब्रह्मेत्यन्वयः । केचित्तु - सर्ववेदानां योऽन्तः निर्णयः तेनोत्पाद्यं [१]यदर्थज्ञानं तद्विषयो ब्रह्मेत्यर्थ इत्याहुः । अस्मिन् पक्षे व्यधिकरणबहुव्रीहिमात्रं दोषः । [२]उदाहृततत्त्वप्रदीपटीके अनुगुणे । 'सर्ववेदनिर्णयेनोत्पाद्यज्ञानविषय' इति टीका तु अत्यन्तमनुगुणेति ध्येयम् ।

---

१. यद्विषयज्ञानम् इति कोशे अस्ति ।

२. उदाहृतेति कोशे नास्ति ।

'आत्मेत्येवोपासीत' (बृ. ३-४-७) इत्यादिविधीनां तदुक्तयुक्तीनां च अविशिष्टत्वात् ॥ १ ॥

कुत इत्यतस्तत्र हेतुत्वेन चोदनाद्यविशेषादित्यंशं व्याचष्टे- **आत्मेति ॥** इत्यादीनि विधिवाक्यानि यास्विति बहुव्रीहिः । तथा च इत्यादि विधियुक्तानां काण्वादिशाखानां 'अविशिष्टत्वात्' अधिकारिविशेषनिर्देशशून्यत्वादित्यर्थः । अस्य हेतोरसिद्धिपरिहारकतयाऽप्ययं योज्यः । अस्मिन् पक्षे इत्यादयश्च ते विधयश्चेति कर्मधारयः । तथा च 'इत्यादिविधीनामविशिष्टत्वात्' सर्वाधिकारिसाधारणत्वादित्यर्थः । इत्यादीत्यादिशब्देन 'आत्मानमेव लोकमुपासीत' (बृ.३-४-१५) 'तमेवैकं जानथ' (मुं.२-२-५) 'विज्ञाय प्रज्ञां कुर्वीत' (बृ.६-४-२१) इत्यादिविधयो गृह्यन्ते । ननु कर्मविद्यायां गृहीवात्राधिकारिविशेषः कल्प्यताम् । न च स्वर्गकामत्वादिवदिह कल्पकाभाव इति वाच्यम् । युक्तीनां कल्पकत्वसम्भवात् इत्याशङ्कापरिहारायोक्तमादिशब्दं व्याख्याति - **तदिति ॥** तदित्यावर्तते । तथा च तस्मै ज्ञानविध्यर्थं तत्र उपासीतेत्यादिज्ञानविधिसमीपगतेषु 'अत्र ह्येते सर्व एकी भवन्ति' (बृ.३-४-७) 'अमृतस्यैष सेतुः' (मुं २-२-५) 'वाचो विग्लापनं हि तत्' (बृ.६-४-२१) इत्यादिवाक्येषूक्तानां युक्तीनाम् 'अविशिष्टत्वात्' सर्वाधिकारिसाधारणत्वादित्यर्थः । इतरांशस्तु ज्ञेयादिप्रतिपादकत्वात् नाधिकारिविशेषकल्पक इति भावः । बृहदारण्यके 'आत्मेत्येवोपासीत' इति विधिसमीपे 'अत्र ह्येते' इत्यात्मत्वप्रशंसार्थमर्थ[1]वादश्रुतः । अत्र आत्मत्वगुणे 'एते' 'प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यन् चक्षुः शृण्वन् श्रोत्रं मन्वानो मनः' (बृ. ३-४-७) इति पूर्ववाक्योक्ताः प्राणत्ववक्तृत्वद्रष्टृत्वश्रोतृत्वमन्तृत्वादयः सर्वे गुणाः 'एकं भवन्ति' अन्तर्भवन्तीत्युक्तेः अत्रात्मत्वस्य विवक्षितसर्वगुणसङ्ग्राहकत्व-

---

१. प्रशंसार्थवादः इति कोशे अस्ति ।

युक्तिरुच्यते। यद्यपि 'अत्र' आत्मत्वे सर्वेऽप्यानन्दादयो गुणाः अन्तर्भवन्ती-त्यर्थः टीकायां 'आत्मगृहीतिः' इत्यधिकरणे अभिहितः। तथा व्यासतीर्थीये 'अत्र' आत्मशब्दे 'एते' आनन्दादयः सर्वे धर्माः वाच्यत्वेन 'एकं भवन्ति' पुञ्जीभवन्तीत्यर्थ उक्तः। ते च पूर्वं नोक्ताः, किन्तु तत्त्वप्रदीपोदाहृतवाक्योक्ता एव। तथापि 'प्राणन्' इत्यनेनानन्दस्वामित्वनिर्दोषत्वानां ग्रहणादविरोधः। एवं 'आत्मानमेव लोकम्' इति विधिसमीपवर्तिनि 'न हास्य' इति विधि-समीपवर्तिनि 'अमृतस्य' इत्यर्थवादे मुक्तोपसृप्यत्वयुक्तिरुच्यते। तथा बृहदारण्यके 'विज्ञाय' इति वाक्यसमीपवर्तिनि 'वाचो विग्लापनम्' इति वाक्येऽन्यार्थवेदाध्यनादेर्वाक्श्रमकरत्वयुक्तिरुच्यत इति ध्येयम्। अनेन चोदनानां विधीनामविशेषात्सर्वसाधारणत्वादत एव चोदनायुक्तकाण्वादि-शाखानामविशेषात्, एवं काण्वैरध्येतव्यम्, एवं माध्यन्दिनैः इत्यधिकारि-विशेषनिर्देशशून्यत्वात् तदुक्तयुक्तीनामप्यविशिष्टत्वेनाधिकारिविशेषाकल्प-कत्वादिति हेतुवाक्यस्यानेकधाऽर्थ[१] उक्तो भवति।

सू— ॐ ॥ भेदान्नेति चेदेकस्यामपि ॥ ॐ ॥ २ ॥

'विज्ञानमानन्दं ब्रह्म' (बृ. ५-९-२८) 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.२-१) इत्यादिप्रतिशाखमुक्तिभेदान्नैकधिकारि-विषयाः सर्वशाखा इति चेत्- न, एकस्यामपि शाखायाम् 'आत्मेत्येवोपासीत' (बृ.३-४-७) 'कं ब्रह्म खं ब्रह्म' (छ.४.१०-५) इत्यादिभेददर्शनात् ॥ २ ॥

उक्तमाक्षिप्य समादधत्सूत्रं पठित्वाऽऽक्षेपांशं तावद्व्याचष्टे - **भेदादिति** ॥ 'विज्ञानम्' इति वाजसनेयके 'सत्यम्' इति तैत्तिरीयके। आदिपदेन 'श्रोता मन्ता' (ऐ.आ ३-२-४-१९) इत्यैतरेयवाक्यम्, 'य आत्माऽपहतपाप्मा'

---

१. वाक्य इत्येव कोशे अस्ति।

(छा. ८-७-१) इति छन्दोगवाक्यं च गृह्यते । प्रतिशाखमित्याद्युक्ति-भेदादित्यन्वयः । इत्यादिरूपा च सा उक्तिश्च इत्यादिरूपा उक्तिःवाचिका येषामर्थानामिति च द्वेधा विग्रहः । एवमाक्षेपांशे साधनांशं व्याख्याय साध्यांशं व्याख्याति- **नेति** ॥ सर्वशाखाः नैकार्थविषयाः तत्प्रतिपादिकाः, किन्तु भिन्न-विषयाः, अत एव नैकविषया नैकाधिकारिका इत्यावृत्त्याऽन्वयः । एकैनैक-स्यैवार्थस्य ज्ञेयत्वादिति भावः । नञावृत्त्यभिप्रायेण सौत्रं परिहारांशं व्याचष्टे- **नेति** ॥ तत्तच्छाखोक्तार्थानां पृथक्त्वात्सर्वशाखोक्तं नैकेन ज्ञातव्यम्, किन्त्व-नेकैरिति नेत्यर्थः । कुतो नेत्यतः प्रवृत्तं परिहारांशे साधनभागं व्याचष्टे- **एकस्या-मिति** ॥ न केवलमनेकशाखास्वित्यपिशब्दार्थः । चोदनापदस्य विपरिणतस्य विशेष्यत्वमभिप्रेत्याह- **शाखायामिति** ॥ वाजसनेयशाखायामित्यर्थः । **इत्या-दीति** ॥ इत्याद्युक्तीनां तदर्थानामानन्दज्ञानरूपत्वादिधर्माणां च भेददर्शना-दित्यर्थः । आवृत्त्याऽन्वितस्य भेदादित्यस्यासिद्धिपरिहाराय- **दर्शनादित्यु-क्तम्** ॥ आवृत्तिसूचनाय चशब्दः । श्रुतौ कखशब्दावानन्दज्ञानवाचिनौ । आदि-शब्देन गुणान्तरोक्तयो गृह्यन्ते । सूत्रे भेदादपीत्यपिशब्दान्वयः । **न भेदादित्यपि** ॥ भेदशब्देन प्रसङ्गभेदोऽपि ग्राह्यः । साम्यादिति शेषः । तथाचायं सूत्रार्थः- 'भेदात्' प्रतिशाखं 'विज्ञानमानन्दं ब्रह्म' इत्याद्युक्तिभेदात् अत एव सर्वशाखोक्तार्था-नामपि 'भेदात्' एकेनैकस्यैव ज्ञेयत्वात् न पूर्वपदोक्तं ब्रह्म सर्ववेदान्तप्रत्ययं किन्तु स्वस्वशाखान्तप्रत्ययमिति चेन्न । तथासति 'एकस्यामपि' चोदनायां शाखायां 'भेदात्' 'आत्मेत्येवोपासीत' 'कं ब्रह्म खं ब्रह्म' (छा.४-१०-५) इत्या-द्युक्तिभेददर्शनात् अत एव तत्रोक्तार्थानामपि भेदावगमादेकस्यामपि 'भेदात्' अधिकारिभेदप्रसङ्गात् । नन्वेकस्यामपि शाखायां विधेयधर्मस्यैव भेदाद्धर्मिणो 'न भेदात्' अभेदान्न प्रतिपाद्यभेद इति चेन्न । 'अपि' सर्वशाखास्वपि विधेय-धर्मस्यैव भेदाद्धर्मिणो न पृथक्त्वमिति समाधिसाम्यात् । ननु न सर्वशाखोक्तं ब्रह्म, तथासति न भेदात् सर्वशाखानामेकविषयत्वात्पौनरुक्त्यत्वात् पौनरुक्त्य-

प्रसङ्गादिति चेन्न । एकस्यामपि साम्यात् । नन्वेकस्यां शाखायां प्रसङ्गभेदात् प्रागुक्तस्यानुवादाद्वा न पौनरुक्त्यम् । काण्वश्रुतौ 'अत्रायं पुरुषः (बृ. ६-३-९) इति' इति वाक्यस्य जीवस्य परमात्मज्योतिष्त्वपरस्य स्वप्नसुषुप्तिप्रकरणयोः श्रुतस्य प्रसङ्गभेदेनानुवादविधानाश्रयणादपौनरुक्त्यवत् छन्दोगश्रुतौ 'सैषा षड्विधा चतुष्पदा गायत्री' (छा.३-१२-५) इति वाक्ये प्रसङ्गभेदात्प्रागुक्त-षाड्विध्यानुवादेन चतुष्पात्त्वविधानात्तदंशेऽपौनरुक्त्यवच्चेति चेन्न । 'अपि' सर्वशाखास्वपि प्रसङ्गभेदात् अनुवादादिपरिहारस्य साम्यादिति ।

सू— ॐ ॥ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॥ ॐ ॥ ३ ॥

'स्वाध्यायोऽध्येतव्यः' (तै.आ.२-१५) इति सामान्य-विधेः । हिशब्दात् 'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ।' इति स्मृतेः ॥

पूर्वं सर्ववेदान्तप्रत्ययमित्यत्रैव हेत्वन्ताराभिधानाय सूत्रम्- **स्वाध्याय-स्येति** ॥ अत्र स्वाध्यायस्य तथात्वेनेत्यावृत्तेन हेतुवाक्येनोक्तं हेतुसाधकं हेतुमाह- **स्वाध्याय इति** ॥ इति विधेः सामान्यादित्यन्वयः । 'स्वाध्यायोऽ-ध्येतव्यः' इति यजुर्वेदगतविधेः 'सामान्यात्' अयं स्वाध्यायोऽनेनाध्येतव्यः अंयं अनेन इति विशेषं विना सर्ववेदसर्वाधिकारिसाधारणत्वादित्यर्थः । सामान्यपदेन सौत्रं तथात्वपदम् अविशेषादिति प्रकृतसाधारण्यार्थकमित्युक्तं भवति । पञ्चमीप्रयोगेन तृतीया पञ्चम्यर्थेत्युक्तम् । विधेरित्यनन्तरं स्वाध्यायस्य तथात्वेनेति संयोज्यम्, तस्य स्वाध्यायस्य सर्वशाखाध्ययनस्य तथात्वेन सर्वसाधारणत्वेन एकैकाधिकारिकत्वेनेत्यर्थः । सूत्रे भाष्ये च हेत्वन्तरत्वद्योतकः चशब्दोऽत्रापि योज्यः । ननु लोके शाखाभेदस्य प्रसिद्धत्वाद्विधेरपि विशेष-निष्ठताऽऽवश्यकीति सामान्यादित्यसिद्धमित्यतः प्रवृत्तस्य हिशब्दस्यार्थमाह -

हिशब्दादिति ॥ 'सूचितायाः' इति शेषः । 'स्मृतेः' इत्यस्य 'विधेः सामान्यात्' इत्यनेनान्वयः । ज्ञानोपलक्षकमेतत् । 'द्विजन्मना' त्रैवर्णिकेन 'सरहस्यः' उपनिषत्सहितो रहस्यार्थसहितो वा 'कृत्स्नः' सर्वो वेदः 'अधिगन्तव्यः' अर्थज्ञानार्थमध्येतव्य इत्यर्थः । एवं सवशाखेत्यपि द्रष्टव्यम् ॥

'सर्ववेदोक्तमार्गेण कर्म कुर्वीत नित्यशः ।
आनन्दो हि फलं यस्मात् शाखाभेदो ह्यशक्तिजः ॥
सर्वकर्मकृतौ यस्मात् अशक्तास्सर्वजन्तवः ।
शाखाभेदं कर्मभेदं व्यासस्तस्मादचीक्लृपत् ॥'
इति समाचारे सर्वेषामधिकाराच्च ॥ ३ ॥

किं च अनुष्ठानापेक्षया ज्ञानमात्रस्य सुलभत्वात् यदा सर्ववेदोक्तशक्य[1]-कर्मानुष्ठाने सर्वेषामधिकारसद्भावः तदा तदुक्तब्रह्मज्ञाने सुतरामिति भावेन हेत्वन्तरप्रतिपादनाय प्रवृत्तं समाचारेऽधिकाराच्चेत्यंशं सप्रमाणकं व्याचष्टे- **सर्वेति** ॥ सर्वान् वेदान् सर्वशाखाश्च अधिगम्य 'सर्ववेदोक्तमार्गेण' तदुक्त-प्रकारेणानुष्ठानपूर्वकं यज्ञादिकर्म 'नित्यशः' नित्यं कुर्यात् सर्वोऽपि जन्तुरिति विपरिणामेनान्वयः । न च प्रयोजनाभावः । 'हि' यतः यस्माद्भेदोदितसर्वकर्म-ज्ञानतदनुष्ठानात् 'आनन्दः' मौक्तसुखोद्रेकः फलं भवति ज्ञानिनः । तदितर-स्यान्यत् चित्तशुद्ध्यादि अतः । अनेन सौत्रः संशब्दो व्याख्यातः । ननु यदि सर्वेषां सर्वशाखाध्ययनादि, कथं तर्हि शाखाभेदः, कर्मणि च भेद इत्यत आह- **शाखेति** ॥ कर्मभेदश्चेत्यपि द्रष्टव्यम् । 'हि' यस्मात् 'अशक्तिजः' असामर्थ्यनिमित्तकः तस्मात् स न प्रकृत विरोधीति वाक्यशेषः । एतदेवोप-पादयति- **सर्वेति** ॥ सम्यक्सर्वशाखोक्तकर्माचरण इत्यर्थः । सर्वशाखाध्ययने चेत्यपि द्रष्टव्यम् । 'जन्तवो' द्विजाः । 'अचीक्लृपत्' अकरोत् । इतीत्यनन्तरं स्मृतेरित्यनुषज्यते । 'समाचारः' वेदोदितसर्वकर्मणां सम्यगनुष्ठानम् । तत्र

१. कोशे शक्य इति नास्ति ।

'सर्वेषां' शाखिनां अधिकारादित्यर्थः । अत्र देवाद्याचार एव हेतुः । तस्यानधिकारकृताभावशङ्कावारणाय पूर्वोक्तस्मरणाय अधिकारादित्युक्तम् । इदमपि ज्ञानोपलक्षकम् । चः समुच्चये । विधेस्सामान्यात् अधिकारादित्यनयोः सर्वेति प्रतिज्ञावाक्येनान्वयः । अनेन- हिशब्दसूचितस्मृतेः 'स्वाध्यायस्य' वेदाध्ययनविधेः 'तथात्वं' अविशिष्टत्वं यत एवं अतः 'स्वाध्यायस्य' वेदाध्ययनस्य 'तथात्वं' सर्वसाधारणत्वम् । न च सर्वशाखाध्ययनस्य सर्वसाधारणत्वेऽपि सर्वशाखोक्तमेकेन ज्ञातव्यमित्येतत्कुत इति वाच्यम् । यतः 'स्वाध्यायस्य' अध्ययनविधेः 'तथात्वं' अर्थज्ञानपर्यवसायित्वं, न त्वक्षर-ग्रहणमात्रे चरितार्थत्वम् । न केवलं स्वाध्यायस्य तथात्वात्, किन्तु सर्व-वेदोक्तकर्मसमाचारे सर्वेषामधिकारात्, अत एव सुतरां तत्साध्ये ब्रह्म-ज्ञानेऽधिकाराच्च, पूर्वं ब्रह्म एकैकेनैव सर्ववेदान्तप्रत्ययमिति सूत्रार्थ उक्तो भवति । तत्त्वप्रदीपे तु कैमुत्यं न प्रदर्शितम् ।

सू— ॐ ॥ सलिलवच्च तन्नियमः ॥ ॐ ॥ ४ ॥

यथा सर्वं सलिलं समुद्रं गच्छति । एवं सर्वाणि वचनानि ब्रह्मज्ञानार्थानीति नियमः ।

ननु यदि सर्वशाखोक्तप्रकारेण जानतो ध्यानाधिकारः, तर्ह्यधमाधिकारिणां ध्यानाभावः प्राप्त इत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **सलिलवदिति ॥** 'सर्वं सलिलं' नद्यादिजलं 'गच्छति' प्राप्नोति 'वचनानि' वेदवचनानि 'ब्रह्मज्ञानार्थानि' पुंशक्त्यनुसारेण स्वज्ञानद्वारा ब्रह्मज्ञानप्रयोजनकानीत्यर्थः । **इति नियम इति ॥** इत्येवंरूपनियम इत्यर्थः । अनेन सूत्रे स चासौ नियमश्च तन्नियमः ध्यानेच्छुना सर्ववेदान्तप्रत्ययं ब्रह्म सर्ववेदोक्तप्रकारेण ज्ञातव्य-मित्येवंरूपः, तस्य तत्त्वं च प्रतिबन्धाभावमपेक्ष्य प्रवृत्तत्वम्, चशब्दश्च प्रतिबन्धाभावमपेक्ष्यैव नियमो, न त्वतिदृढ इत्यवधारणार्थ इत्युक्तं भवति ।

आग्नेये च-

'यथा नदीनां सलिलं शक्ये सागरगं भवेत् ।
एवं वाक्यानि सर्वाणि पुंशक्त्या ब्रह्मवित्तये ॥'

इति ॥ ४ ॥

चशब्दः स्मृतिसमुच्चायकोऽपीत्यभिप्रेत्यात्रैवार्थे स्मृतिमाह- **आग्नेये चेति** ॥ न केवलं सूत्रे, किन्तु स्मृतावप्ययमर्थ उक्त इत्यर्थः । **शक्य इति** ॥ समुद्रं गन्तुं शक्ये सतीत्यर्थः । असति प्रतिबन्धक इति यावत् । 'वाक्यानि' वेदवचनानि 'पुंशक्त्या' पुरुषशक्त्यनुसारेण 'ब्रह्मवित्तये' अध्ययनद्वारा परब्रह्मज्ञानाय भवन्तीत्यर्थः । [1]तथा च यथाशक्त्यधीतसर्ववेदेभ्यः श्रवणमननाभ्यां, ब्रह्म जानतां मन्दानामपि ध्यानोपपत्तिरिति भावः । इत्याग्नेये इतीतिशब्दान्वयः ॥

सू— ॐ ॥ दर्शयति च ॥ ॐ ॥ ५ ॥

'सर्वैश्च वेदैः परमो हि देवो
जिज्ञास्योऽसौ नाल्पवेदैः प्रसिध्येत् ।
तस्मादेनं सर्ववेदानधीत्य
विचार्य च ज्ञातुमिच्छेन्मुमुक्षुः ॥' इति चतुर्वेदशिखायाम् ।

'सर्वान् वेदान् सेतिहासान् सपुराणान् सयुक्तिकान् ।
सपञ्चरात्रान् विज्ञाय विष्णुर्ज्ञेयो न चान्यथा ॥'

इति ब्रह्मतर्के ॥ ५ ॥

'चोदनाद्यविशेषात्' इत्युक्तिसमर्थितार्थं श्रुतिस्मृतिभ्यां च साधयत्सूत्रं पठित्वा तद्वचनद्वयमुदाहरति- **दर्शयति चेति** ॥ तमेतमर्थं यतः श्रुतिः मुखत एव 'दर्शयति' प्रतिपादयति । चशब्दात्स्मृतिश्च, अतः सर्ववेदान्तप्रत्ययं

---

१. तथा च आरभ्य भावः पर्यन्तं वाक्यं कोशे नास्ति ।

ब्रह्मेति तत्त्वप्रदीपदिशा सूत्रार्थः। न केवलं युक्तिः, किन्तु श्रुतिः स्मृतिश्चेति वा टीकादिशा चार्थः। 'हि' यस्मात्परमो देवः 'सर्वैर्वेदैरेव प्रसिद्ध्येत्' ज्ञातो भवेत्, नाल्पैर्वेदैः तस्मात्सर्वैरेव वेदैः जिज्ञास्यो नाल्पवेदैः। यस्मादेवं तस्माद्यदि मुमुक्षुः'एनं' विष्णुमपरोक्षतो ज्ञातुमिच्छेत् तदा 'सर्ववेदानधीत्य विचार्य' श्रवणमननाभ्यां तं ज्ञात्वैव तिष्ठेत्। तदैव देवः 'प्रसिद्ध्येत्' अपरोक्षविषयो भवेदित्यर्थः। इति चतुर्वेदशिखायामयमर्थ उक्त इति शेषः। 'इतिहासो' भारतं 'युक्तिः' मीमांसा 'विज्ञाय' स्थितेन विजानतेति यावत्। विष्णुर्ज्ञेयो 'नान्यथा' नाल्पवेदान् जानतेत्यर्थः। ब्रह्मतर्क इत्यत्रापि पूर्ववच्छेषः।

॥ इति सर्ववेदाधिकरणम् ॥ १ ॥

॥ २. उपसंहाराधिकरणम् ॥

(सर्ववेदोक्तगुणान् प्रकारणानुसारेण उपसंहृत्य उपासना कार्या)

सर्वैर्वेदैर्ज्ञेयो नोपास्योऽशक्यत्वात् इति। अत आह-

सू—

ॐ ॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ॐ ॥६॥

सर्ववेदोक्तान् गुणान् दोषाभावांश्चोपसंहृत्यैव परमात्मोपास्यः।

अत्राधिकरणे ज्ञानार्थं सार्वत्रिकगुणोपसंहारः समर्थ्यते। पूर्वपक्षयति- **सर्वैरिति** ॥ 'परमात्मे'ति शेषः। 'ज्ञेयः' इति सावधारणम्। तथा च परमात्मा 'सर्वैर्वेदैः' सर्ववेदोक्तगुणैर्विशिष्टत्वेन ज्ञेय एव 'नोपास्यो' न सर्ववेदोक्तगुणानुपसंहृत्य ध्यातव्य इत्यर्थः। तथा च तदर्थमुक्तं सर्वपरिज्ञानं व्यर्थमिति भावः। कुत इत्यत आह- **अशक्यत्वादिति** ॥ अनन्तवेदोदितानन्तगुणानां स्वभुजवद्युगपद्बुद्धावारोपण[1]रूपोपसंहारस्याशक्यत्वेन तत्पूर्व-

१. आरोप इति मुद्रितपुस्तके वर्तते।

कोपासनयाप्यशक्यत्वादित्यर्थः । सर्वपरिज्ञानं तु विततप्रज्ञानां केषाञ्चित् कथञ्चित् क्रमेण शक्यमिति भावः । सूत्रे सर्ववेदान्तेत्यतः सर्ववेदेत्यनु वर्तते । अर्थशब्दो गुणदोषाभावपरः । सर्ववेदार्थाभेदात् उपसंहार इत्यन्वयः । अर्थशब्दो गुणदोषाभावपरः । सर्ववेदार्थाभेदात् उपसंहार इत्यन्वयः । अर्थपदं चोभयान्वयीत्यभिप्रेत्य उपसंहारोऽर्थाभेदादिति प्रतिज्ञांशं व्याचष्टे- **सर्ववेदेति** ॥ यद्यपि दोषाभावो गुण इत्युक्तेर्दोषाभावोऽपि गुणः, शुभधर्मपरत्वाद्गुणशब्दस्य । तथापि ये विधिमुखवेद्या आनन्दादयो धर्मास्ते गुणाः । ये निषेधमुखवेद्या अपहतपाप्मत्वनिर्दुःखत्वादयः ते दोषाभावा इति विवक्षाभेदात्पृथगुक्तिः । तत्त्वप्रदीपे तु लोकवेदानुसारेण भेदोक्त्युपदेशः स्पष्टत्वायेत्युक्तम् । चेत्यनन्तरं अभेदादिति सौत्रपदमन्वेतव्यम् । 'अभेदात्' अविभागेन एते गुणा नोपसंहर्तव्याः । एते तु उपसंहर्तव्या इति विभागमन्तरेणेत्यर्थः । यद्वा- 'अभेदात्' ऐक्येनेत्यर्थः । उक्तं हि तत्त्वप्रदीपे - एको हि परमात्मा सर्ववेदादिषूपास्योऽर्थः सर्वगुणात्मक इति । उपसंहारश्चेत्यपि चशब्दान्वयमभिप्रेत्य तदर्थमाह- **उपसंहृत्यैवेति** ॥ नतु कांश्चिदनुपसंहृत्येत्येवशब्दार्थः । सूत्रे सर्ववेदान्तप्रत्ययमित्यनेन प्रकृतः परमात्मा उपसंहारोपलक्ष्येणोपासनेन विषयतया सम्बन्धनीय इत्याशयेनाह- **परमात्मेति** ॥ 'उपास्यः' इति सावधारणम् ।

'उपास्य एकः परतः परो यो वेदैश्च सर्वैस्सह चेतिहासैः ।
सपञ्चरात्रैस्सपुराणैश्च देवः सर्वैर्गुणैस्तत्र तत्र प्रतीतैः ॥'
इति भाल्लवेयश्रुतिः ।

कुत इत्यतस्तत्र यतो विधिशेषवदित्यनेन श्रुतिविहितत्वादिति हेतुस्सूचित इत्याशयेन तां श्रुतिमुदाहरति- **उपास्य इति** ॥ 'परतो' रमादेः परो देवः सर्वैर्वेदैः 'एकः' अविभक्तः अविभागेन 'उपास्यः' इत्यन्वयः । 'सहेतिहासैः' सपुराणैरिति सामान्योक्तावपि वेदानुकूलग्रन्थपरतया इदं व्याख्येयम् । ननु सर्वैर्वेदैरुपास्य इत्यसङ्गतमित्यतस्तद्विवृणोति- **सर्वैर्गुणैरिति** ॥ सर्वैर्गुणैरि-

त्यनेन पूर्वोक्तं व्याचष्टे श्रुतिः। एक इति पदेनार्थाभेदादिति सूत्रावयवं व्याचष्टे। एको हि परमात्मा सर्ववेदादिभिरुपास्योऽर्थ इति तत्त्वप्रदीपोक्तः। अस्मिन् पक्षे 'एकः' अभिन्न इत्यर्थः। सूत्रावयवम्' अभेदादिति सूत्रावयवावयवम्। भावबोधे तु बहुवचनेन त्रिमात्रप्रतीतिवारणाय सर्वैरिति पदेन विवृतमित्युक्तम्। 'तत्र तत्र' वेदपुराणादिषु 'प्रतीतैः' प्रतिपादितैरित्यर्थः। श्रुतिरित्यनन्तरं यत इति शेषः।

आग्नेये च-

'विधिशेषाणि कर्माणि सर्ववेदोदितान्यपि।
यथा कार्याणि सर्वैश्च सर्वाण्येवाविशेषतः।
एवं सर्वगुणान् सर्वदोषाभावांश्च यत्नतः।
योजयित्वैव भगवानुपास्यो नान्यथा क्वचित्॥' इति॥

उपसंहृत्योपास्य इत्यत्रैवार्थे स्मृतिमाह- **आग्नेये चेति॥** श्रुतिसमुच्चये चः। 'विधिशेषाणि' शिष्यन्त इति शेषाणि विधिभिः शिष्टानि'सोमेन यजेत' (आप.श्रौ १०-२-१) इत्यादिविधिविहितानि कर्माणि ज्योतिष्टोमादीनि। यद्वा- प्रधानविधिशेषाणि कर्माणि प्रयाजादीनि। न केवलं स्वस्वशाखाविधिविहितानि, किन्तु सर्ववेदोदितान्यपि 'अविशेषतः' अधिकारिविशेषाविभागेन 'सर्वैः' शाखिभिः यथा कार्याणि एवं भगवान् सर्ववेदोक्तान् गुणान् दोषाभावांश्च 'यत्नतः' श्रवणादिप्रयत्नतः 'योजयित्वा' यथाशक्त्युपसंहृत्यैव सर्वैरुपास्यो, न तु 'क्वचित्' कालदेशपुरुषेषु उक्तस्यान्यथाभावोऽस्तीत्यर्थः। इति शब्दस्य इत्याग्नेयवचनाच्च उपास्य इत्यन्वयः।

समानविषये चोपसंहारः। न तु 'सोऽरोदीत्' (तै.सं.१-५-१) इत्यादीनाम्।

सर्ववेदोक्तगुणोपसंहारमुक्त्वा तदपवादमाह- **समाने चेति॥** तद्व्याचष्टे-

समानविषये चेति ॥ योग्यगुणविषय एवेत्यर्थः । अनेन विषयसप्तमीयम्, चोवधारण इति सूचितम् । उपसंहार इत्यस्या वृत्त्याऽत्राप्यन्वय इत्याह- **उपसंहार इति ॥** चशब्दार्थावधारणव्यावर्त्यमाह- **न त्विति ॥** 'इत्यादीनाम्' इत्यादिवाक्यबोध्यानामर्थानाम् । 'असमानाना'मिति शेषः । इत्यादीनामुपसंहार इत्यन्वयः । अयोग्योपासनेनानर्थप्राप्तेरिति भावः । आदिशब्देन 'यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' (तै. सं १-५-१) इत्यादिश्रुतिर्गृह्यते । 'सः' प्रकृतो महादेवः 'अरोदीत्' रोदनमकार्षीत् । अरोदीदिति पदबोध्यं यद्रोदनं तद्रुद्रस्य प्रसिद्धस्य 'रुद्रत्वं' रुद्रशब्दप्रवृत्तिनिमित्तम् । विष्णुविवक्षायां तु रोदनस्वातन्त्र्यं रुद्रशब्दप्रवृत्तिनिमित्तमिति विवेकः । आरोपितं धनुः क्षिताववष्टभ्य स्थितस्य रुद्रस्य शिरो ज्यायां वह्निरूपेण इन्द्रेण छिन्नायां उत्क्षिप्त्वा 'धनुरार्त्निः' धनुष्कोटिः 'उत्पिपेष' चिच्छेदेति श्रुत्यर्थः ।

'गुणैरेव स तूपास्यो नैव दोषैः कथञ्चन ।
गुणैरपि न तूपास्यो ये पूर्णत्वविरोधिनः ॥'

इति बृहत्तन्त्रे ॥ ६ ॥

अत्र स्मृतिमाह- **गुणैरिति ॥** 'सः' विष्णुः ज्ञानानन्दादिगुणैरेवोपास्यः, न तु दुःखादिदोषैः । ननु रोदनादीनामपि विधिमुखवेद्यत्वेन गुणत्वादुपास्यत्वापत्तिः । तथा च 'नैव दोषैः' इति व्याहतमित्यतः उक्तस्यापवादमाह- **गुणैरिति ॥** भगवान् ये पूर्णत्वविरोधिनो मितभुक्त्वादयस्तादृशगुणैरपि नोपास्यः । एवं मितभुक्त्वादीनां लोके गुणत्वेऽपीश्वरे दोषत्वात् । तत्र बहुभुक्त्वस्यैव गुणत्वात् । तदुक्तम् - 'बहुभुक्त्वं यथा दोषो नृषु नैव हरौ क्वचित्' इति बृहत्तन्त्रे उक्तमिति शेषः । सूत्रार्थस्तु अर्थानां सर्ववेदार्थभूतानां धर्माणाम् भावाभावरूपाणाम् अभेदात् अविभागेन एते उपसंहर्तव्या एते तु नेति विभागमन्तरेण उपसंहारो युगपद्बुद्धावारोपः कार्यः । उपसंहृत्य च परमात्मा

तद्गुणात्मकत्वेन ध्यातव्य इति यावत्। कुतः ? यतो 'विधिशेषवदयं' विशिष्ट-सन्ध्यावन्दनादिवदस्यापि विहितत्वात् । गुणदोषाभाववत् दोषाणामप्युप-संहर्तव्यत्वं किं न स्यादिति न वाच्यम् । यतः स चोपसंहारः 'समानें च' योग्ये एव पूर्णत्वाविरोधिगुणविषये एव युक्तः, न तु तद्विरोधिरोदनमित-भुक्त्वादिष्विति।

सू— ॐ ॥ अन्यथात्वं च शब्दादिति चेन्नाविशेषात् ॥ ॐ ॥ ७ ॥

'आत्मेत्येवोपासीत' (बृ.३-४-७) इति शब्दादुपसंहार-स्यान्यथात्वमिति चेन्न, एते गुणा नोपास्या इति विशेष-वचनाभावात् 'सर्वैर्गुणैरेक एवेशिताऽसावुपासितव्यो न तु दोषैः कदाचित्' इति विशेषवचनाच्च । आत्मेत्येवेत्यव-धारणमनात्मत्वनिवृत्त्यर्थम् ॥ ७ ॥

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्य व्याचष्टे- **अन्यथात्वमिति** ॥ अत्र पूर्वसूत्राद्विधिशेषवदिति पदस्यानु वृत्तिम् उपसहारस्येति विपरिणतपदानु-वृत्तिम् अन्यथात्वमित्यस्यावृत्तिं चाभिप्रेत्य शब्दपदगृहीतश्रुत्युदाहरणपूर्वक-माक्षेपांशं व्याचष्टे- **आत्मेति** ॥ योजना तु 'विधिशेषवत्' विधिविहितोप-संहारवत् यतः 'आत्मा' इति शब्दादुपसंहारस्यान्यथात्वं च अनुपसंहारः अल्पगुणज्ञानरूपोऽप्यर्थाद्विहितः, ततश्च 'अन्यथात्वम्' अन्यथोपसंहारे विधिशेषस्य विधिविहितकर्मण 'अन्यथात्वं' लोपः प्रसज्यते तदुपसंहारस्य 'अन्यथात्वं' अकर्तव्यत्वं सिद्धमिति । परिहारांशं व्याचष्टे- **नेति** ॥ सर्वगुणोपसंहारस्य 'अन्यथात्वं' अभावः नेत्यर्थः । कुतो नेत्यतः किमसौ प्रामाणिकत्वादङ्गीक्रियते, उत तद्विरोधिगुणोपसहारे प्रमाणाभावाद्वेति विकल्प्य आद्यपक्षनिषेधहेतुत्वेन अविशेषादिति पदं व्याचष्टे- एत इति ॥

विशेषेति ॥ विशेषप्रमाणाभावादित्यर्थः । 'गुणैः' पूर्णत्वाविरोधिधर्मैः । तथाचासावीश्वरः 'एक एव' अभिन्न एव सर्वैर्गुणैरेव 'उपासितव्यः' उपसंहृत्य ध्यातव्यो न तु दुःखादिदोषैरपीति योजना । चः समुच्चये । नन्वात्मत्वमेवोपासीत न त्वन्यदिति आत्मत्वावधारणादेव तदन्यगुणा नोपास्या इति सिद्ध्यतीत्यतः तदुत्तरत्वेनाप्यविशेषादिति हेतुं व्याचष्टे- **आत्मेति ॥ इत्यवधारणमिति ॥** इति वाक्यगतैवकार इत्यर्थः । **अनात्मत्वेति ॥** अनात्मत्वमात्मत्वायोगः तस्य निवृत्तिर्व्यवच्छेदः स एवार्थो यस्य तत्तथोक्तम् । यतोऽतो न तद्विरोध इति वाक्यशेषः । तथा च भगवन्तम् आत्मैवायमित्युपासीत न त्वनात्मेतीति उत्तमाधिकारिणः प्रति अयोगव्यवच्छेदक एव एवकारो नान्ययोगव्यवच्छेदकः । निरवकाशोदाहृतश्रुतिविरोधादिति भावः । अनेनावधारणस्यायोगव्यवच्छेदेऽप्यविशेषादिति सौत्रहेतोरर्थान्तरमुक्तं भवति ।

सू—

ॐ ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ॐ ॥ ८ ॥

प्रकरणभेदान्न वोपसंहारः कार्यः । परोवरीयस्त्वादिषु तावदेव ह्युक्तम् ॥ ८ ॥

ननु नायं सर्वगुणोपसंहारो युक्तोऽशक्यत्वादित्याशङ्कामभ्युपगमवादेन परिहरन् न वेति सूत्रम् उपसंहारः कार्य इत्येतयोरनुवृत्त्यध्याहाराभ्यां व्याचष्टे- **प्रकरणभेदादिति ॥** परोवरीयस्त्वादिवदित्यादावुपस्कार्यम् । वेति व्यवस्थितविकल्पः । तथा च एवमुपसंहारः कार्यतयोक्तः नासौ कार्यो वा । कुतः ? परोवरीयस्त्वादिवत् । प्रकरणभेदात् । परोवरीयोवैश्वानरादिप्रकरणानां विद्यानां भेदादित्यर्थः । यद्येकैकस्य सर्वगुणोपासनं स्यान्न तर्हि प्रकरणानि भिद्येरन्, कारणाभावादिति भावः । नन्वेकैकस्मिन्नेव प्रकरणे सर्वगुणोक्तिसम्भवात् प्रकरणभेदेऽपि सर्वगुणोपासनोपपत्तिरित्यत आह- **परोवरीयस्त्वादिष्विति ॥**

परोवरीयस्त्वादिगुणप्रतिपादकेष्वित्यर्थः । **प्रकरणेष्विति** । यथेति च शेषः परोवरीयस्त्वं नाम 'परस्मात्' इत्यनेन निरुक्तं निरवधिकसर्वोत्तमत्वम् । आदिपदेनोद्गीथत्वानन्तत्वे प्रकरणान्तरोक्तं च गृह्यते । स्पष्टं गुणप्रतिपत्त्यर्थं त्वप्रत्ययः । सूत्रे तु सप्तम्यन्तं प्रथमान्तं चैतत् । अनेनैवं सर्वगुणोपसंहारः कर्तव्यतयोक्तः सः न कर्तव्यो वा । कुतः ? 'प्रकरणभेदात्' परोवरीयो-वैश्वानरादिविद्याभेदात् । अन्यथा स न स्यात् । न चैकस्मिन् प्रकरणे सर्वगुणोक्तिसम्भवात्प्रकरणभेदेऽपि सर्वगुणोप[1]संहारोपपत्तिरिति वाच्यम् । यतः 'परोवरीयस्त्वादिवत्' निरवधिकसर्वोत्कृष्टत्वरूपपरोवरीयस्त्वादिगुण-प्रतिपादकेषु 'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' (छा. १-९-२) इत्यादिषु प्रकरणेषु तावदेवोपास्यगुणेषु । कियदेव ? परोवरीयस्त्वादि उक्तं न सर्वमत इति सूत्रार्थ उक्तो भवति ।

सू— ॐ ॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ॐ ॥ ९ ॥

सर्वविद्या उक्त्वा 'सोऽहं नामविदेवास्मि नात्मवित्' (छा. ७-१-३) इति वचनात्सर्वस्य ब्रह्मनामत्वात्तदुपसंहारः कार्यः ।

उक्तमाक्षिप्य समादधत्सूत्रम्- **संज्ञात इति** ॥ अत्रापि पूर्ववदुपसंहारः कार्य इत्येतयोरावृत्त्यध्याहाराभ्यामाक्षेपांशं व्याचष्टे- **सर्वेति** ॥ सर्वस्येत्यावर्तते । गुणाभिधायकत्वात् गुणाभिधानस्य चोपसंहारार्थत्वादिति शेषः । कार्य इति सावधारणम् । तथा च 'सर्वस्य' सर्वविद्योक्तगुणस्योपसंहारः कार्य एव । कुतः ? 'सर्वस्य' विद्याराशेः ब्रह्मगुणाभिधायकत्वात् गुणाभिधानस्यचोपसंहारार्थत्वात् । न चासिद्धिः । 'सर्वस्य' शब्दराशेः ब्रह्मनामत्वात् । नामोदितगुणानुपसंहारे तन्नाम्नो ब्रह्मणोऽनुपास्तिप्रसङ्गादिति योजना । अनेन सूत्रे सर्वस्येति शेषः कार्यः, संज्ञात इति भावप्रधानमित्युक्तं भवति । ननु सर्वस्य ब्रह्मनामत्वमसिद्धमित्यत

१. संहारे इति कोशे अस्ति ।

आह- **'सोऽहं नामविदेवास्मि नात्मवित्' इति वचनादिति ॥** सनत्कुमारं प्रति नारदोक्तेरित्यर्थः। इति वचनादवगतात् ब्रह्मनामत्वादित्यन्वयः। 'सः' एवं सर्वविद्यावेत्ताऽप्यहं परमात्मनामविदेवास्मि न परमात्मवित्। कुतः ? सर्वविद्यानिर्णेतव्यज्ञानादिति श्रुत्यर्थः। यद्यपि 'मन्त्रविदेव' इति छन्दोगानां पाठः। तथापि शाखान्तरवाक्यमेतदित्यदोषः । 'यद्वै किञ्चिदध्यागीष्ट नामैवैतत्' (छा. ७.१.३) इति उत्तरवाक्यबलान्मन्त्रशब्दो नामपरो वा। केचित्तु- 'मन्त्रवित्' इत्येव श्रुतिपाठः। भाष्यं तूपनिषदर्थानुवादपरमित्याहुः। ननु 'सोऽहम्' इति वाक्ये स्वस्य नामवित्त्वमात्रोक्तावपि कथं सर्वस्य ब्रह्मनामत्वसिद्धिरित्यत आह- **सर्वेति ॥** ऋग्वेदमित्यादिनेति प्रागध्याहार्यम्। वेदयन्तीति विद्याः वेदादयः। तथा च 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदं अथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्' (छा. ७-१-२) इत्यादिनाऽऽत्मनः सर्वविद्यावेदित्वमुक्त्वेत्यर्थः। यद्वा- ऋगादिसर्वविद्या आत्मना अधीता इत्युक्त्वेत्यर्थः। तथा च सर्वविद्यावेत्ताहं नामविदेवेत्युक्तिबलात् सर्वस्य ब्रह्मनामत्वमवगम्यत इति भावः। श्रुत्यर्थस्तु- 'भगवो' भगवन् सनत्कुमार अहम् ऋग्वेदादिकमध्येमि। इतिहासपुराणमिति द्वन्द्वैकवद्भावः। विशेष्यनिघ्नोऽयं शब्दः। वेदशब्दः आवर्तते। तथा च इतिहासपुराणात्मकं ग्रन्थं वेदं सन्तं वेदानां पञ्चमं पञ्चत्वसङ्ख्यापूरणं वेदमध्येमीति।

'नामत्वात्सर्वविद्यानां गुणानामुपसंहृतिः।
कार्यैव ब्रह्मणि परे नात्र कार्या विचारणा ॥'
इति च ब्रह्मतर्के। इति चेत् सत्यं, उक्तो ह्युपसंहारः।

तत्प्रमाणमप्यस्त्येव । 'नाम वा एता ब्रह्मणः सर्वविद्यास्तस्मादेकः सर्वगुणैर्विचिन्त्यः' इति कौण्डिन्यश्रुतौ ॥ ९ ॥

अत्रैव स्मृतिमाह- **नामत्वादिति** ॥ सर्वविद्याना ब्रह्मनामत्वात्। अत एव सर्वगुणाभिधायकत्वाद्गुणाभिधानस्य चोपसंहारार्थत्वात्परे ब्रह्मणि गुणानामुपसंहृतिः कार्यैवेति योजना। **इति चेति** ॥ इति ब्रह्मतर्क वचनाच्चोपसंहारः कार्य इत्यन्वयः। न केवल सूत्रकृदुक्तहेतोरिति चार्थः। अभ्युपगमरूपं तदुक्तमित्यादिसमाधानांशं व्याचष्टे- **सत्यमिति** ॥ सोपपत्तिकं यद्गुणोपसंहारं-कर्तव्यत्वमुक्तं तत् 'सत्यं' युक्तमेवेत्यर्थः। अनेन सूत्रे 'सत्यम्' इति शेषः। तस्य तदित्यनेनान्वय इत्युक्तं भवति। कथं युक्तमित्यतस्तद्धेतुत्वेनापि तदुक्तमित्येतद्योजयति- **उक्तो हीति** ॥ 'हि' यतः 'कर्तव्यतये'ति शेषः। अनेन तदुपसंहारकर्तव्यत्वं यतोऽस्माभिः 'उक्तं' साधितमिति सूत्रखण्डार्थ उक्तो भवति। श्रुत्याऽप्युक्तार्थसाधनाय 'अस्ति तु' 'तदपि' इति सूत्रांशः प्रवृत्तः। तं व्याचष्टे - **तदिति** ॥ तदित्यनूद्य प्रमाणमित्यर्थकथनम्। यद्वा - तस्मिन् सर्वविद्यानां ब्रह्मनामत्वेन तद्गुणाभिधायकत्वादुपसंहारः कार्य इत्युक्तार्थे इत्यर्थ.। 'प्रमाणं' श्रुतिवचनम्। न केवलं गुणाभिधानस्योपसंहारार्थत्वादिति युक्तिमात्रमित्यपिब्दार्थः। सौत्रतुशब्दार्थमाह- **एवेति** ॥ अस्य सत्यमित्यनेनान्वयः। एतास्सर्वविद्याः परब्रह्मनामैव, तस्माद्विष्णुरेक एव सर्वगुणैरुपसंहृत्योपास्य इत्यर्थः। यावच्छक्तिप्रयत्नेनोपसंहारे फलाधिक्यबोधनार्थं बहुप्रमाणग्रहणार्थं च पुनः पुनः उपसंहारोपन्यास इति न पौनरुक्त्यमिति तत्वप्रदीपोक्तिः। कौण्डिन्यश्रुताविवत्यस्य उक्तो ह्युपसंहार इत्यनुषङ्गः। अतः तत्प्रमाणमस्त्येवेत्यन्वयः।

॥ इत्युपसंहाराधिकरणम् ॥

॥ ३. प्राप्त्यधिकरणम् ॥

(विरिञ्च एव सर्ववेदोक्तसर्वगुणैः उपासनां कर्तुं योग्यः, अन्ये यथायोग्यम्)

सू - ॐ ॥ प्राप्तेश्च समञ्जसम् ॥ ॐ ॥ १० ॥

युज्यते चोपसंहारोऽनुपसंहारश्च योग्यताविशेषात्।

अत्राधिकरणे प्रागुक्तोपसंहारानुपसंहारयोः पुरुषभेदेन कर्तव्यत्वं समर्थ्यते। सूत्रे समञ्जसमित्यनेन असमञ्जसमिति पूर्वपक्षस्य सूचनात्तमनुपन्यस्य सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **प्राप्तेश्चेति** ॥ समञ्जसमित्यस्यार्थः- **युज्यत इति** ॥ चशब्दोऽवधारणे। अनेन सौत्रश्चशब्दः भिन्नक्रम इति सूचितम्। उपसंहारोऽनुपसंहार इति सूत्रेऽनुषक्तपदस्यार्थकथनम्। चः समुच्चये। युज्यत इत्यस्य प्रत्येकं सम्बन्धः। 'पुरुषभेदेन' इति शेषः। नन्वनेनोपसंहारः कर्तव्यः अनेनानुपसंहार इति निर्णयाभावात् तौ पुरुषभेदेनापि [1]न युक्ताविति- तस्तदुत्तरत्वेन[2] प्राप्तेरित्येतद्व्याचष्टे- **योग्यतेति** ॥ प्राप्यते फलमनयेति प्राप्तिर्योग्यता। तथा च स्वभुजवत् ध्यानकाले युगपद्गुणप्रतीत्यादित्योग्यता- विशेषादित्यर्थः। विशेषात् प्राप्तेरित्यनेन प्राप्तेरित्यस्य पुरुषगुणप्रतीतियोग्यता ब्रह्मणः। देवपित्रादीनां क्रमेण न्यूनगुणप्रतीतिः। मानुषाणामल्पगुणप्रतीति- रित्येवं युगपत्प्रतीत्यादियोग्यता ज्ञातव्या।

'गुणैस्सर्वैरुपास्योऽसौ ब्रह्मणा परमेश्वरः।
अन्यैर्यथाक्रमं चैव मानुषैः कैश्चिदेव तु ॥'
इति भविष्यत्पर्वणि ॥ १० ॥

युगपत्सर्वगुणप्रतीतिः ब्रह्मणः अन्येषां क्रमेणेति तदेव शृङ्गग्राहिकया स्मृत्या दर्शयति- **गुणैरिति** ॥ 'अन्यैः' चतुर्मुखेतरदेवपित्रादिभिः। चोऽप्यर्थः। मानुषैस्त्वित्यन्वयः। 'कैश्चित्' अल्पैरानन्दादिगुणैः। यद्यपि स्मृतावुपासना- विशेष एवोच्यते न तु प्रतीतिनियमः। तथापि ध्यानरूपोपासनस्य गुणप्रतीति- साध्यत्वादर्थात्तल्लाभ इति भावः। [3]तथा च सर्वैर्गुणैरित्यस्य युगपत् प्रतीतै- रित्यभ्युपगमान्नासङ्गतिरिति भावः।

॥ इति प्राप्त्यधिकरणम् ॥

---

१. न पदं नास्ति कोशे। २. तदवरत्वेन इति मुद्रितपुस्तके अस्ति।
३. तथा च आरभ्य भावः पर्यन्तं वाक्यं कोशे नास्ति।

॥ ४. सर्वाभेदाधिकरणम् ॥

(उपासनाधिक्येन फलाधिक्यम्)

सू— ॐ ॥ सर्वाभेदादन्यत्रेमे ॥ ॐ ॥ ११ ॥

सर्वगुणयुक्तत्वेनोपसनादन्यत्रैव फले ब्रह्मादयो भवन्ति ।

अत्राधिकरणे बहुगुणोपसंहारस्य फलातिशयोक्त्या कर्तव्यता समर्थ्यते । प्रमाणाभावेन फलविशेषानिर्णयादयुक्तो बहुगुणोपसंहार इति प्राप्ते सिद्धान्तयत्सूत्रं 'पठित्वा व्याचष्टे- **सर्वेति** ॥ अत्र पूर्वसूत्रादवधारणार्थक-चशब्दशिरस्कस्य विपरिणतसमञ्जसपदस्योपसंहारसूत्रादुपसंहारपदस्य चानु-वृत्त्य युक्त एव ब्रह्मादीनां यथायोगं बहुगुणोपसंहार इति साध्यलाभमभिप्रेत्य तत्र हेतुसमर्पकतया सूत्रं व्याचष्टे- **सर्वेति** ॥ सर्वगुणयुक्तत्वेनोपासनादित्यनेन सर्वाभेदादित्यस्य एते गुणा उपसंहर्तव्या एते तु नेति विभागं विना सर्वेषां गुणानामभेदादविभागेनेत्यर्थ उक्तो भवति । 'उपासनात्' उपसंहृत्योपासना-निमित्तादिति शेषः । अन्यत्रेत्यस्य विशेष्यमाह- **फलम् इति** ॥ एव-कारेणाल्पफलव्यावृत्तिः । अनेनान्यत्रेत्यस्यानुपसंहारालपाधिकारिभ्योऽन्यत्र तत्फलविलक्षणे फले इत्यर्थ उक्तो भवति । इमे इत्यस्यार्थो- **ब्रह्मादय इति** ॥ इमे इति विशेषतः प्रस्तुतत्वात् सर्वोपसंहारा उच्यन्त इति तत्त्वप्रदीपोक्तेः । यद्यपि ब्रह्मैव सर्वोपासक इति आदिपदानुपपत्तिः । तथापि तदनतिन्यून-ब्रह्माण्यादिविषयमादिपदमित्युक्तं तत्त्वप्रदीपे । 'भवन्ती'ति सूत्रे शेषोक्तिः । 'यतः' इति शेषः । अस्य लब्धसाध्येनान्वयः ।

'सम्पूर्णोपासनाद्ब्रह्मा सम्पूर्णानन्दभाग्भवेत् ।
इतरे तु यथायोगं सम्यङ्मुक्तौ भवन्ति हि ॥'

इति पाद्मे ॥ ११ ॥

---

१. पठित्वा व्याचष्टे इति पदे न स्तः कोशे ।

न केवलमुपासनानां महदल्पत्वाभ्यां तत्फलानामपि महदल्पत्वे निश्चीयेते, किन्तु तथा स्मृत्युक्तत्वाच्चेत्याह - **सम्पूर्णेति** ॥ 'आनन्दभाक्' आनन्दयुक्तः। तुशब्दोऽप्यर्थः । सम्यगिति क्रियाविशेषणम् । तथा च 'इतरे तु' ब्रह्म-ब्रह्माणीतरदेवादयोऽपि 'यथायोगं' यथायोग्यमुपासनात् मुक्तौ यथायोगं 'सम्यग्भवन्ति' अतिशयवन्तो भवन्तीत्यर्थः । तत्त्वप्रदीपे तु सम्यङ्मुक्ता-वित्यैकपद्याभिप्रायेण इतरे तु यथायोगं यथाशक्त्युपास्तिं कुर्वाणाः 'सम्यङ्मुक्तौ भवन्ति' यथायोगं फलभाजो भवन्ति । सम्यङ्मुक्ताविति वचनादत्यल्पगुणो-पासकानामपि सम्यङ्मुक्तिरेव ना - सम्यङ्मुक्तिरिति सिध्यति । दुःखलेशा-भावादिति विशेषार्थ उक्तः । पाद्मे 'वचनात्' इति शेषः ।

॥ इति सर्वाभेदाधिकरणम् ॥

॥ ५. आनन्दाधिकरणम् ॥

(सत्-चित्-आनन्द-आत्मेति चतुर्गुणोपासा विहिता)

सर्वेषां मुमुक्षूणां कियन्नियमेनोपास्यमित्यत आह -

सू— ॐ ॥ आनन्दादयः प्रधानस्य ॥ ॐ ॥ १२ ॥

प्रधानफलस्य मोक्षस्यार्थे आनन्दो ज्ञानं सदात्मेत्युपास्य एव ।

अत्राधिकरणे सर्वमुमुक्षुसाधारणोपास्यगुणा निर्णीयन्ते । पूर्वपक्षं सूचयति-**सर्वेषामिति** ॥ कियदित्याक्षेपे । उपास्यगुणजातं कियत्' न कियदित्यर्थः । अनेन सङ्ख्याक्लृप्त्याक्षेपः कृतो भवति । किमुपास्यमिति निर्देशकृत्याक्षेपस्या-प्युपलक्षकमेतत् । **क्वचित् किमिति पाठः** ॥ तदा व्यत्यासः । एवं कियत्किमि-त्यनयोः नियमशब्देनान्वयः यदि तर्ह्योरध्याहारेण यदि उपास्यगुणाः चत्वारः पञ्च वा इति चोच्यते तर्हि अन्येषामपि समुच्चयसम्भवात् नैते, अन्ये एवेत्यपि वक्तुं शक्यत्वात् कियत् नियमेन किं नियमेनेति नियमाक्षेपपरत्वेनापीदं

व्याख्येयम् । **इत्यत इति** ॥ सर्वसुमुक्षूपास्यगुणानिर्णयान्न कस्याप्युपासनं युक्तमित्यर्थः । **आहेति** ॥ 'सिद्धान्त सूत्रकारः' इति शेषः । सूत्रे प्रधानस्येति हेत्वंशं व्याचष्टे । **प्रधानफलस्येति** ॥ **शेषित्वेन** प्रधानस्य फलस्येत्यर्थः । यद्वा- फलेषु प्रधानस्येत्यर्थः । फलं निर्दिशति- **मोक्षस्येति** ॥ 'अर्थ' इति शेषोक्तिः । मोक्षप्रयोजनायेत्यर्थः । आनन्दादय इति साध्यभागं व्याचष्टे- **आनन्द इत्यादिना** ॥ सर्वेषां मुमुक्षूणामित्यत्रापि सम्बध्यते । सर्वमुमुक्षुभिरित्यर्थः । सदात्मेति भावप्रधानो निर्देशः । इतिशब्दो वस्तुनिर्देशार्थः । 'गुणा' इति शेषः । एवशब्दस्य एते एवेत्यध्याहृतपदेन सम्बन्धः । न च चतुर्गुणोपासनस्य सर्वमुमुक्षुसाधारण्यानुपपत्तिरेकगुणोपासकानां तदभावात् । अन्यथा 'आत्मेत्येव परं देवमुपास्य' इति वचनाविरोधापत्तेरिति वाच्यम् । अस्य चतुर्विधमोक्षयोग्याधिकारिविषयत्वात् । अत एव तत्र टीका -'न चानन्दादयः प्रधानस्येत्युक्तिविरोधः । तदुपासनस्य सम्पूर्णमोक्षार्थत्वात् । अत्र च 'नोत्क्रामन्ति' इति सम्पूर्णमोक्षाभावोक्तेरिति । न चास्य देवसाधारण्यानुपपत्तिः । देवानामुत्क्रान्तिमार्गयोरभावादिति वाच्यम् । तेषामप्यंशेनोत्क्रान्तिसम्भवात्, पदप्राप्तेः पूर्वं तत्सम्भवाच्च । न च 'सच्चिदानन्द आत्मेति मानुषैः' इत्यणुभाष्ये, ये सम्यङ्मुक्तिमात्रमिच्छन्ति न तत्र विशेषान् तेषां ये गुणा उपास्याः ते कियन्त इत्यधुना निरूप्यत इति तत्त्वप्रदीपे च अस्योपासनस्य मनुष्यमात्राधिकारत्वोक्तेर्विरोध इति वाच्यम् । प्राधान्येन चतुर्गुणोपासनं मनुष्याणामेवेत्यभिप्रायेण ग्रन्थद्वयप्रवृत्तेः । देवैस्तु साधारण्येनैव तदुपास्तिकरणात् । यद्यपि सूत्रे आनन्दमात्रस्य मुखतो निर्देशात्सङ्ख्यानिर्देशक्लृप्त्यसम्भवः । तथापि सत्पदोदितनिर्दोषत्वस्य ज्ञानानन्दयोः आत्मपदोदितस्वामित्वस्य [1]सर्वापेक्षितत्वात् स्वसम्बन्धानुस्मरणस्य भगवत्प्रीतिसाधनत्वेन सर्वापेक्षितत्वात् 'तं यथा यथा' इति श्रुतेरपेक्षितफलानु-

१. सर्वापेक्षितत्वात् इति पदं कोशे नास्ति ।

सारेणेश्वरस्योपास्यत्वात् प्रधानस्येत्युक्तफलपर्यालोचनया आदिपदेन ज्ञानादित्रयस्यैव ग्राह्यत्वात् सङ्ख्यानिर्देशज्ञानं सुकरमिति न दोषः । यद्यप्युपासनस्यानन्दादिरूपमोक्षार्थत्वादिति सौत्रो हेतुः निर्देशनियमसाधक एव, न त्वधिकसङ्ख्येयसमुच्चयव्यवच्छेदमुखेन सङ्ख्यानियमसाधकः । तथापि तत्सूचितः सर्वेषां मुमुक्षूणामधिकोपासनासमर्थत्वादिति हेतुस्तत्साधको भविष्यतीत्यदोषः ।

'सच्चिदानन्द आत्मेति ब्रह्मोपासा विनिश्चिता ।
सर्वेषां च मुमुक्षूणां फलसाम्यादपेक्षिता ॥'

इति ब्रह्मतर्के ॥ १२ ॥

अत्र स्मृतिं चाह- **सच्चिदिति** ॥ 'सर्वेषां मुमुक्षूणां' कर्मक्षयादिचतुर्विधमोक्षेच्छूनां ब्रह्म सच्चिदानन्दात्मेत्येव प्रकारेणोपासा विनिश्चिता कर्तव्यतयेति शेषः । कुतः ? यतः सा 'अपेक्षिता' अपेक्षितफलसाधनम् । न चास्तु अन्यथाऽप्युपासनं, 'फलसाम्यात्' फलस्योपास्तिसदृशत्वात् । यद्वा- उपासनस्य प्रतिमुखस्य 'यथामुखश्रीः' इति भागवतोक्तेः अपेक्षितफलेन साम्यात् तदनुसारित्वादित्यर्थः ।

॥ इत्यानन्दाधिकरणम् ॥ ५ ॥

॥ ६. प्रियशिरस्त्वाधिकरणम् ॥

(प्रियशिरस्त्वादिगुणाः सर्वैः नोपास्याः)

सू— ॥ ॐ ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ ॐ ॥ १३ ॥

फलभेदार्थमुपचयापचययोः भावान्न सर्वेषां प्रियशिरस्त्वादिगुणोपासाप्राप्तिः ।

अत्राधिकरणे ब्रह्मोपासने प्रियशिरस्त्वादिगुणानां सर्वाधिकारिसाधारण्य-निरासेन सर्वेषां चतुर्गुणनियमः समर्थ्यते । अप्राप्तिरित्यनेन प्राप्तिपूर्वपक्ष-सूचनात्तमनुपन्यस्य सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **प्रियेति** ॥ सूत्रे प्रधानस्येत्यनुवर्तते । तस्य भेदशब्देनान्वयः । भेद इति तादर्थ्ये सप्तमी । हिशब्दो हेतौ प्रसिद्धौ चेत्यभिप्रेत्य भेदे उपचयापचयौ हीति हेत्वंशं व्याचष्टे- **फलभेदार्थमिति** ॥ 'अथात आनन्दस्य' इति श्रुतिसिद्धफलतारतम्यार्थमि-त्यर्थः । 'उपचयापचययोः' क्रमेणाधिकाल्पविशेषविषयकत्वरूपयोः । तारतम्य-स्येति यावत् । 'गुणोपासनेऽपी'ति शेषः । केचित्तु- उत्तमानां साधारणाति-रिक्तस्य गुणस्य यथायोग्यमुपचयः सङ्ग्रहः अन्येषामपचयः त्याग इत्याहुः । 'भावात्' अभ्युपेतत्वादित्यर्थः । नञ्व्यत्यासेनान्वयमभिप्रेत्य प्रियशिरस्त्वाद्य-प्राप्तिरिति साध्यांशं व्याचष्टे- **नेति** ॥ 'सर्वेषाम्' उत्तमानामवरेषां चेत्यर्थः । प्रियं शिरो यस्यानन्दमयस्य तस्य भावः प्रियशिरस्त्वं, आदिपदेन मोक्षादि-पक्षकत्वादीनां ग्रहणम् । गुणशब्दात्परो विशेषशब्दो योज्यः । प्रियशिर-स्त्वादिरूपश्चासौ आनन्दादिगुणविशेषश्च तस्योपासा आनन्दादिगुणानां प्रियशिरस्त्वादिसकलविशेषयुक्तत्वेनोपासनेति यावत् । तस्याः प्राप्तिः योग्यता तस्याः प्राप्तिः प्रसक्तिरित्यर्थः । न सर्वैः चतुर्णां गुणानां सकलविशेष[1]युक्तत्वे-नोपासनीयत्वम्, तथा सति सर्वेषां सर्वगुणोपास्तिप्रसङ्गात्सर्वगुणानामपि गुणचतुष्टय[2]विशेषत्वस्य वक्तुं शक्यत्वात् । किन्तूत्तमैरेवेति फलितोऽर्थः । यथोक्तं तत्त्वप्रदीपे- एकैकस्मिन् गुणे विशेषाणामुपचयापचयौ फलतारतम्यार्थं भवतः । अपचयः फलमात्राय भवति, न फलाभावाय । उक्तगुणोपास्तावुप-चयोऽधिकफलाय भवति । अतो नावरेषां प्रियशिरस्त्वादि[3]प्रियगुण-विशेषोपास्तिः **प्राप्यत इति** ॥ अस्यार्थः- आनन्दादिषु एकैकस्मिन्नपि गुणे विद्यमानानां विशेषाणामवान्तरभेदानां प्रियत्वा[3]दीनां विपर्यीकरणे उपचयाप-

---

१. नियतत्त्वेन इति पदं कोशे अस्ति । २. विषयत्वस्य इति कोशे अस्ति ।
३. प्रिय इति नास्ति कोशे ।

चयावाधिक्याल्पत्वे फलतारलम्यार्थमङ्गीकार्यौ भवतः। 'अपचयः' कतिपय-विशेषविषयत्वरूपमल्पत्वम्। उपास्ताविति्युभयत्राप्याकृष्टते। 'फलमात्राय' मोक्षायैव भवति, नातिशयितफलाय। 'उक्तगुणोपास्तावुपचयः' उक्तानां आनन्दादिगुणानां मध्ये एकैकस्मिन्नपि गुणे विद्यमाना ये प्रियत्वादयस्तेषां साकल्येन विषयीकरणमुपचयः साधिकफलाय सातिशयमोक्षाय भवति। यत इत्यर्थः। 'अवरेषाम्' उत्तमाधिकारिव्यतिरिक्तानां 'गुणविशेषोपास्तिः' उक्तगुणगतविशेषविषयोपास्तिरित्यर्थः। किन्तूत्तमानामेवेति वाक्यशेषः।

'नैव सर्वगुणाः सर्वैरुपास्या मुक्तिभेदतः।
विरिञ्चस्यैव यन्मुक्तावानन्दस्य सुपूर्णता॥'

इति वाराहे॥ १३॥

अत्रैव स्मृतिमाह- **नैवेति॥** सर्वगुणास्तद्विशेषाश्च सर्वैरुपास्यानैव। कुतः? 'मुक्तिभेदतः' मुक्तौ फलतारतम्यात्। अन्यथा स न स्यादिति भावः। 'यत्' यस्माद्विरिञ्चस्यैव मुक्तावानन्दफलस्य सुपूर्णता, अन्येषां विरिञ्चेतरेषामपूर्णता चास्तीत्यर्थः। वाराहे पुराणे उक्तमिति शेषः अस्य नेत्यनेनान्वयः। न चास्य सूत्रस्य 'अज्ञात्वैनं सर्वविशेषयुक्तं देवं परं को विमुच्येत बन्धात्' इति गीताभाष्योदाहृतश्रुतिविरोधः शङ्क्यः। यतः प्रमेयदीपे ध्यानापेक्षया सूत्रं, मानापेक्षया तु श्रुतिरिति विशिष्टाधिकारिविषयेयं श्रुतिरिति च द्वेधा समाधानमुक्तम्।

॥ इति प्रियशिरस्त्वाधिकरणम्॥ ६॥

॥ ७. इतराधिकरणम्॥

(देवाः बहुगुणोपासकाः)

सू— ॐ॥ इतरे त्वर्थसामान्यात्॥ ॐ॥ १४॥

इतरे गुणाः फलसाम्यापेक्षयोपसंहर्तव्याः॥ १४॥

अत्राधिकरणे देवगन्धर्वपर्यन्तानां [1]ब्रह्मवागीतरदेवादीनां प्रियशिरस्त्वादि-बहुगुणोपासनं समर्थ्यते। योग्यतानियमानिर्णयाद्विरिञ्चेतरदेवादिभिश्चतुर्भ्योऽ-न्ये मध्यमगुणा नोपास्या इति प्राप्ते सिद्धान्तयत्यसूत्रं पठित्वा व्याचष्टे- **इतरे त्विति** ॥ 'आनन्दादयः' इत्यत्र प्रकृतेभ्यश्चतुर्भ्यः 'सर्वभेदात्' इत्यत्र प्रकृतेभ्यस्सर्वगुणेभ्यश्च 'इतरे' मध्यमगुणाः 'इतरैः' चतुर्मुखेतरदेवादिभिः 'उपसंहर्तव्याः' उपसंहृत्योपास्या इत्यर्थः। अनेन तुरप्यर्थ इति सूचितम्। न चोपासनयोग्यतानिर्णय इत्यतः तद्धेतुत्वेन अर्थादित्येतत् ल्यब्लोपनिमित्त-[2]पञ्चमीत्यभिप्रायेण व्याचष्टे- **फलेति** ॥ तत्तत्प्राप्यफलानुसारेणेत्यर्थः। फल-मपेक्ष्य कथं निर्णय इत्यतः फलोपासनयोः साम्यादिति युक्तिकथनपरतया सामान्यपदं व्याचष्टे- **साम्येति** ॥ उपासनस्य तत्तत्प्राप्यफलसाम्यमपेक्ष्ये-त्यर्थः। यद्वा- फलस्योपासनासाम्यमपेक्ष्येत्यर्थः। न च भविष्यत्फलानिर्णयः, गुरूपदेशेन तन्निर्णयोपपत्तेरिति भावः। अनेन सूत्रे 'निर्णयोपपत्ते'रिति शेषः। तस्य फलनिर्णयोपपत्तेः योग्यतानिर्णयोपपत्तेरिति द्वेधाऽर्थ उक्तो भवति।

॥ इतीतराधिकरणम् ॥ ७ ॥

॥ ८. आध्यानाधिकरणम् ॥

(सर्वगुणोपसंहारानुपसंहारयोः कर्तव्यत्वे प्रमाणम्)

उपसंहारानुपसंहारप्रमाणमाह -

सू — ॐ ॥ आध्यानाय प्रयोजनाभावात् ॥ ॐ ॥ १५ ॥

आध्यानार्थं हि सर्वे गुणा उच्यन्ते प्रयोजनान्तराभावात्।

अत्राधिकरणे सर्वगुणोपसंहारानुपसंहारयोः कर्तव्यत्वे प्रमाणमुच्यते। मानाभावान्नोपसंहारानुपसंहारौ कर्तव्याविति प्राप्ते सिद्धान्तयन्नधिकरण-

---

१. ब्रह्माणीतरदेवानां इति कोशे अस्ति। २.पञ्चमीत्वाभिप्रायेण

तात्पर्यमाह- **उपसंहारेति** ॥ सर्वगुणोपसंहारानुपसंहारयोः कर्तव्यत्वे प्रमाणमाह अस्मिन्नधिकरणे सूत्रकृदित्यर्थः । अनुपसंहारशब्दः तत्त्वप्रदीपरीत्याऽल्पगुणोपसंहारपरः । तत्र प्रथममुपसंहारप्रमाणप्रदर्शनार्थं सूत्रं पठति- **आध्यानायेति** ॥ अत्र प्रियशिरस्त्वादीत्यतो हिशब्दमनुवर्त्य सर्वविद्यासु सर्वेगुणा उच्यन्तेऽत इति चोपस्कृत्य आध्यानायेति हेत्वंशं व्याचष्टे- **आध्यानार्थं हीति** ॥ अत्र तत्त्वप्रदीपे आत्मा धिया ध्यानार्थं हि सर्वे गुणा उच्यन्ते इत्याडोऽर्थ उक्तः । अस्यार्थः - धिया अशेषान् गुणानात्मोपसंहृत्येति । स एव टीकायामशेषेत्यादिना विवृतः । तथा च 'हि' यस्मात् 'आध्यानार्थम्' अशेषगुणोपसंहारपूर्वकध्यानार्थं सर्वविद्यासु सर्वे गुणा उच्यन्ते इत्यर्थः । अस्य तस्मात् सर्वविद्यातो गुणोपसंहारः कार्य इति उपसंहारसूत्रोक्तसाध्येनान्वयः । सर्वविद्यानां भगवद्गुणाभिधायकत्वं च सर्वासां भगवत्संज्ञात्वतः सिद्धमिति न तदसिद्धिरिति भावः । गुणाभिधानस्य ध्यानार्थत्वं कुत इत्यतः तत्र हेतुत्वेन प्रयोजनाभावादित्यंशं व्याचष्टे- **प्रयोजनान्तरेति** ॥ ध्यानं विनाऽन्यस्य प्रयोजनस्याभावादित्यर्थः । ध्यानलक्षणप्रयोजनसत्वादसिद्धिवारणाय- **अन्तरेति** ॥ विप्रकीर्णगुणोपसंहारफलं तु मौक्तानन्दातिशय इति टीकायामुक्तम् ।

'ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा ।
ज्ञातव्याश्चैव ध्यातव्या गुणास्सर्वेऽप्यतो हरेः ॥
नान्यत्प्रयोजनं ज्ञानाद्ध्यानात्कर्मकृतेरपि ।
श्रवणाच्चाथ पाठाद्वा विद्याभिः किञ्चिदिष्यते ॥'

इति परमसंहितायाम् ॥

गुणाभिधानस्य ध्यानार्थत्वे स्मृतिं चाह - **ज्ञानार्थमिति** ॥ अथशब्दः कर्मणां चेत्यर्थान्तरे । 'तस्याः' इति शेषः । तथा च यतः 'तस्याः' उदीरणायाः विद्याभिर्गुणाद्युक्तेः विद्याभिधेयानां हरेर्गुणानां परोक्षज्ञानात् ध्यानात् हरेः कर्मकरणात् शब्दग्रहणारूपाच्छ्रवणात् शब्दाभ्यासरूपात्पाठात् अन्यत् किञ्चित्

प्रयोजनं 'नेष्यते' नोपेयते, अतो 'विद्याभिः' ब्रह्मकर्मोभयविद्याभिर्गुणानां कर्मणां च 'समुदीरणा' अभिधानं ज्ञानार्थं तद्द्वारा ध्यानार्थमेव भवेत् । उपलक्षणमेतत् । कर्मकरणार्थं चेत्यपि द्रष्टव्यम् । यतः सोदीरणा ध्यानाद्यर्थमेव, न प्रयोजनान्तराय, अतस्तस्याः प्रयोजनवत्त्वाय सर्वेऽपि हरेर्गुणाः ज्ञातव्या ध्यातव्याश्चैवेत्यर्थः । कर्माणि च कर्तव्यान्येवेत्यपि द्रष्टव्यम् । तथा चं अनया स्मृत्या गुणाभिधानमाध्यनायैव भवति, सप्रयोजनस्य सतः प्रयोजनान्तराभावादिति सूत्रकृदुक्तानुमानं ज्ञापितं भवतीति ध्येयम् । 'इति परमसंहितायां' तदाख्यग्रन्थे सूत्रकृदुक्तं कथितमिति शेषः ।

'गुणास्सर्वेऽपि वेत्तव्या ध्यातव्याश्च न संशयः ।
नान्यत्प्रयोजनं मुख्यं गुणानां कथने भवेत् ॥'

ननु तथापि प्रयोजनान्तराभावादिति हेतुरसिद्धः । स्मृतौ श्रवणपाठयोरपि गुणाभिधानप्रयोजनत्वेनोक्तत्वादित्यत आह- **गुणा इति ॥** यतो गुणानां 'कथने' कथनात् ज्ञानध्यानाभ्यामन्यत् मुख्यं प्रयोजनं न भवेदेव, अतस्तस्य तत्प्रयोजनवत्त्वाय सर्वे हरेर्गुणा ज्ञातव्या ध्यातव्याश्चेत्यर्थः । तथा च श्रवणादेः परोक्षज्ञानध्यानार्थत्वेन तत्साधनत्वान्न तद्गुणाभिधानस्य मुख्यं प्रयोजनमिति हेतुत्वेनाभिमतस्य मुख्यप्रयोजनान्तराभावस्य नासिद्धिरिति भावः ।

'ज्ञानध्यानसमायोगाद्गुणानां सर्वशः फलम् ।
मुख्यं भवेन्न चान्येन फलं मुख्यं क्वचिद्भवेत् ॥'
इति बृहत्तन्त्रे ॥ १५ ॥

ननु तथापि ध्यानान्यस्य परोक्षज्ञानस्य गुणाभिधानप्रयोजनत्वात्प्रयोजनान्तराभावादित्यसिद्धमित्यत आह- **ज्ञानेति ॥** 'सर्वशः' सर्वेषां गुणानां 'ज्ञानध्यानसमायोगात्' ज्ञानध्यानयोरूपयोग्युपयोज्यभावेन संमेलनान्मुख्यं फलमपरोक्षज्ञानादिकं भवेत्, नान्येन परोक्षज्ञानामात्रेणेत्यर्थः । तथा च

ध्यानपूर्वभाविज्ञानमपि ध्यानोपयोगितया न मुख्यमिति न मुख्यप्रयोजनान्तराभावहेतोरसिद्धिरिति भावः। यद्यपि श्रवणादेस्तत्त्वनिश्चयद्वारा जनलोकादिफलकस्य गुणाभिधानमुख्यप्रयोजनत्वसम्भवात् मुख्यत्वविशेषणेऽपि प्रयोजनान्तराभावहेतोरसिद्धिरेव। तथापि मोक्षाख्यमहाफलसाधनापरोक्षज्ञानसाधनत्वेन विहितस्य श्रवणादेर्जनलोकादिकं न मुख्यं प्रयोजनमिति ज्ञानमेव प्रयोजनं वाच्यम्। तथा च श्रवणादेरपरोक्षज्ञानसाधनतत्त्वज्ञानार्थत्वेन न श्रवणादिकं गुणकथनस्य मुख्यं प्रयोजनमिति नासिद्धिरिति भावः। इति बृहत्तन्त्रे कथितत्वान्नासिद्ध्यादिदोष इत्यन्वयः। अनेनोपसंहारे मुख्यप्रयोजनान्तरशून्यसप्रयोजनसर्वगुणाभिधानमेव लिङ्गतया प्रमाणमित्युक्तं भवति।

सू— ॐ ॥ आत्मशब्दाच्च ॥ ॐ ॥ १६ ॥

'आत्मेत्येवोपासीत' (बृ.३-४-७) इत्यनुपसंहारे प्रमाणम् ॥ १६ ॥

एवं सर्वगुणोपसंहारप्रमाणेन समर्थ्यानुपसंहारं च समर्थयत्सूत्रं पठित्वा व्याचष्टे- **आत्मशब्दाच्चेति** ॥ चोऽप्यर्थः। तथा च 'आत्मशब्दात्' तद्घटितश्रुतेः अनुपसंहारोऽपि सिद्ध्यतीति सूत्रार्थमभिप्रेत्य श्रुत्युदाहरणपूर्वकं सूत्रं व्याचष्टे- **आत्मेति** ॥ 'इति वाक्य'मिति शेषः। **अनुपसंहारेति** ॥ उपासनाक्षिप्तात्पगुणोपसंहारे प्रमाणमित्यर्थः। अन्यथा गुणान्तरव्यावृत्तिपूर्वकम् आत्मत्वोपासनस्यैवात्र विधानादसङ्गतेः। न च अवधारणस्य 'अन्यथात्वम्' इति सूत्रे अयोगव्यवच्छेदकत्वस्योक्तत्वात् कथमन्ययोगव्यवच्छेदकत्वमुच्यत इति वाच्यम्। उपसंहारानुपसंहारवद्ब्रह्मादीन् उत्तमाधिकारिणः प्रत्ययोगव्यवच्छेदकत्वम् अधमाधिकारिणः प्रत्यन्ययोगव्यवच्छेदकत्वमित्यधिकारिभेदेनाविरोधात्।

॥ इत्याध्यानाधिकरणम् ॥ ८ ॥

॥ ९. आत्मगृहीत्यधिकरणम् ॥

(चतुर्गुणा उपास्या एव)

सू— ॐ ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ ॐ ॥ १७ ॥

न च 'आनन्दादयः प्रधानस्य' इत्युक्तिविरोधः । यतः 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१) 'विज्ञानमानन्दं ब्रह्म' (ब्र. ५-९-२८) इतिवदेवात्मशब्दगृहीतिः । 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.३-४-७) इत्युत्तरात् ।

अत्राधिकरणे उपासनायामानन्दादिचतुर्गुणनियमः समर्थ्यते । 'आत्मेत्येवोपासीत' इति सावधारणश्रुतेरात्मत्वमेव सर्वोपास्यं न त्वानन्दादयोऽपीति पूर्वपक्षे प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्यति- **आत्मेति ॥** अत्रात्मपदं शब्दपरमित्याशयेन आत्मगृहीतिरित्युक्तहेतोरपेक्षितं साध्यमध्याहृत्य दर्शयति- **न चेति ॥** 'इत्युक्ति' इत्यावर्तते । तथा च 'आनन्दादयः प्रधानस्य' इत्युक्तेः 'आत्मेत्येवोपासीत' इति सावधारणोक्तिविरोधो नैवेत्यर्थः । कुतो नेत्यतस्तत्र हेतुत्वेन इतरवदिति दृष्टान्तविवरणपूर्वकमात्मगृहीतिरित्येतद्योजयति- **यत इति ॥** 'सत्यं ज्ञानम्' इति तैत्तिरीये 'विज्ञानमानन्दं ब्रह्म' इति बृहदारण्यके । **इतिवदिति ॥** इत्यादिवाक्येषु यथा अनेकेषां सत्यत्वज्ञानानन्दादीनां ग्रहणम्, तथा आत्मशब्देनापि सत्यज्ञानानन्दादीनां 'गृहीतिः' ग्रहणं भवेत् । 'आनन्दानुभवत्वाच्च' इति वचनादात्मशब्दस्यापि सत्यज्ञानानन्दादिग्राहकत्वात् । यथोक्तं तत्त्वप्रदीपे- यथेतरेषु विज्ञानमानन्दं ब्रह्मेत्यादिषु वचनेषु नैकगुणगृहीतिः तद्वदितरयुक्तत्वेनैवात्मशब्दगृहीतिरानन्दादयो गुणा आत्मशब्देन विवक्षिता इत्यर्थ इति । कुतोऽयमात्मशब्दः सत्त्वान्दाद्यभिधायको, न स्वामित्वमात्रस्येत्याशङ्क्योत्तरत्वेनोत्तरादित्यंशं व्याचष्टे- **अत्रेति ॥ उत्तरादिति ॥** बृहदारण्यके 'आत्मा' इति विधेरुत्तरत्र श्रुताद्वाक्यादित्यर्थः । व्याख्यातमेतत्सर्ववेदान्तनये ।

'आनन्दानुभवत्वाच्च निर्दोषत्वाच्च भण्यते ।
नित्यत्वाच्च तथाऽत्मेति वेदवादिभिरीश्वरः ।।'
इति बृहत्तन्त्रे ।। १७ ।।

आत्मशब्दो न स्वामित्वमात्रं वक्ति, किन्तु सत्त्वानन्दादीनपीत्युक्तार्थे स्मृतिं चाह- **आनन्देति** ।। ईश्वरो वेदवादिभिर्न केवलं स्वामित्वादात्मेति भण्यते, किन्तु 'आनन्दरूपत्वात्' अनुभवरूपत्वात् निर्दोषत्वात् नित्यत्वाच्च 'भण्यते' उच्यत इत्यर्थः। निर्दोषत्वान्नित्यत्वादित्यनेन सत्त्वमात्मशब्दार्थ इति सूचितम्। चशब्दः समुच्चये। बृहत्तन्त्रे उक्तमिति शेषः।

।। इत्यात्मगृहीत्यधिकरणम् ।। ९ ।।

।। १०. अन्वयाधिकरणम् ।।

(आत्मशब्दः विरिञ्चस्य सर्वगुणबोधकः)

सू—

ॐ ।। अन्वयादिति चेत्स्यादवधारणात् ।। ॐ ।। १८ ।।

सर्वगुणानामन्वय आत्मशब्दे भवति । 'आप्नव्याप्नेरात्मशब्दः परमस्य प्रयुज्यते' इति वचनादिति चेत्सत्यम्, स्याच्चैवम् ।

अत्राधिकरणे आत्मशब्दस्य पूर्वोक्तमनुपसंहारमानत्वमाक्षिप्य समाधीयते। पूर्वपक्षस्य सूत्र एवोक्तत्त्वात्तदुपन्यस्य पूर्वपक्षांशं तावद्व्याचष्टे- **अन्वयादिति** ।। अत्रेत्थं योजना- नात्मशब्दस्यानुपसंहारमानत्वं युक्तम्, तदुक्तगुणानां सर्वोपास्यत्वाभावात्। कुतः ? श्रुतचतुर्गुणोपासनस्य पुंसः विभ्रमकरत्वेन निश्चायकत्वाभावात्। सोऽपि कुतः ? यत आत्मशब्दे सर्वगुणानां वाच्यतयाऽन्वयो भवति अत आत्मशब्दस्य सर्वगुणाभिधायकत्वमिति यावत्। तदपि कुतः ? आप्नव्याप्नेरिति वचनादिति । वचनार्थस्तु- आप्ना प्राप्ना

व्याप्तिर्देशकालगुणापरिच्छेदो यं स तथोक्तस्तस्येति हेतुगर्भं विशेषणम् । 'परमस्य' परमात्मनः । सप्तम्यर्थे षष्ठी । 'आत्मशब्दः' आत्मेति शब्दः 'इति वचनात्' इत्यन्वयवचनात् । सत्यमेवमिति पदद्वयाध्याहारेण स्यादवधारणादिति सिद्धान्तांशं व्याचष्टे- **सत्यमिति** ॥ अर्धाङ्गीकारे सत्यमितिशब्दः । तथा च यत् परेण सर्वगुणाभिधायकत्वमात्मशब्दस्योक्तं तदङ्गीक्रियते । यदात्मशब्दोक्तस्य सर्वोपास्यत्वाभावोऽनुपसंहारमानत्वं च तन्नाङ्गीक्रियत इति भावः । कथं परेणोक्तमभ्युपगम्यत इत्यत आह- **स्यादिति** ॥ चोऽवधारणे । यत्परेणात्मशब्दस्य सर्वगुणाभिधायकत्वमुक्तम् । 'तदेवं' तथा स्यादेव । कुतः ? यतः 'आप्तव्याप्तेः' इति प्रमाणमत्र स्यात् । तथा च प्रमितत्वात्परोक्ताङ्गीकारो न दोषायेति भावः । ननु श्रुतचतुर्गुणोपासनस्य पुंसो विभ्रमकरत्वात्कथमात्मशब्दोक्तगुणानां सर्वोपास्यत्वमित्यतोऽप्याह- **स्याच्चैवमिति** ॥ ब्रह्मादीन् प्रत्येव, नान्यान् प्रतीति शेषः । तथा च यदात्मशब्दस्य सर्वगुणाभिधायकत्वमङ्गीकृतम् 'तदेवं' तथा स्यादेव, किन्तु ब्रह्मादीन् प्रत्येव, नाल्पाननुपसंहर्तॄन् प्रति, तान् तु अल्पगुणाभिधायकः स्यात् । कुतः ? 'अन्वयात्' तथाऽनुभवात् । अतो विभ्रमकरत्वाभावात् तदुपासनं सर्वेषां, 'स्यात्' युक्तमित्यर्थः ।

'आत्मेत्येव' (बृ. ३-४-७) इत्यवधारणात् । अन्यथा सर्वोपसंहारवचनविरोधात् ॥ १८ ॥

ननु ब्रह्मादीनामात्मशब्दः सर्वगुणान् ज्ञापयतीति कुतः, अन्यान् प्रतीव तान्प्रत्यल्पगुणाभिधायकः किं न स्यादित्याशङ्कोत्तरत्वेनावधाणादित्यंशं व्याचष्टे- **आत्मेति** ॥ अन्ययोगव्यवच्छेदकावधारणयुक्तत्वादित्यर्थः । अवधारणेऽपि किमायातमित्यत आह - **अन्यथेति** ॥ आत्मशब्दस्यान्यान् प्रतीव ब्रह्मादीन् प्रत्यल्पगुणाभिधायकत्व इत्यर्थः । **सर्वोपसंहारेति** ॥ 'गुणैस्सर्वैरुपास्योऽसौ' इत्यादिसर्वोपसंहारपूर्वकोपासनवचनविरोधादित्यर्थः । अयं भावः- यद्ययमात्मशब्दोऽन्यान् प्रतीव ब्रह्मादीन् प्रत्यल्पगुणाभिधायकः, तर्हि

अवधारणमप्यन्यान् प्रतीव तान् प्रत्यन्ययोगव्यवच्छेदकमेव स्यात् । न चेष्टापत्तिः । तथा सति आत्मशब्दोक्तस्यैवोपास्यत्वप्राप्त्या सर्वोपसंहारवचन-विरोधः स्यात् । अतोऽसौ ब्रह्मादीन् प्रति सर्वगुणाभिधायक इति । यद्यपि तत्त्वप्रदीपे सत्यमिति वाक्यं नानुपसंहार एव प्रमाणं, किन्तु सर्वोपसंहारेऽपि प्रमाणं स्यादेव, कुतः ? 'आत्मेत्येव' इति सर्वगुणपूर्ण इत्येवेत्यवधारणात् । 'अन्यथा' एवमर्थानङ्गीकारे सर्वोपसंहारवचनविरोधादित्यात्मेति वाक्यस्या-नुपसंहारमात्रामानत्वाङ्गीकारपरतया सत्यमित्यादिभाष्यं व्याख्यातम् । तथापि टीकाकारैः तदङ्गीकृत्यावधारणादित्यंशं तद्भाष्यं च प्रकारान्तरेणापि व्याख्यातमेति ध्येयम् । अनेन - 'अन्वयात्' 'आप्तव्याप्तेः' इत्यन्वयवचनात् आत्मशब्दे सर्वेषां गुणानाम् अन्वयात् वाच्यतया सम्बन्धात् तस्य तदभि-धायकत्वात् अत एव श्रुतचतुर्गुणोपासनस्य पुंसः विभ्रमकरत्वात् अत एव तदुक्तगुणानां सर्वोपास्यत्वाभावात् न तस्यानुपसंहारमानत्वं युक्तमिति चेत् सत्यं, यतः तथा स्यादेव यत्परेणात्मशब्दस्य सर्वगुणाभिधायकत्वमुक्तं तत् तथा स्यादेव ब्रह्मादीन् प्रति । कुतः ? अस्य वाक्यस्य 'अवधारणात्' अयोगव्यवच्छेदकावधारणयुक्तत्वात्, नान्यान् अल्पान् प्रति । कुतः ? अन्य-योगव्यवच्छेदकावधारणात् । अतो विभ्रमकरत्वाभावात् नोक्तानुपपत्तिरिति सूत्रार्थ उक्तो भवति । तत्त्वप्रदीपरीत्या तु- यत् आत्मेत्यस्य अनुपसंहार-मात्रामानत्वमुक्तं तत्सत्यं युक्तमेव । कुतः ? तस्य सर्वोपसंहारेऽपि मानत्वात् । तत्कुतः ? 'अवधारणात्' 'आत्मेत्येव' इति सर्वगुणपूर्ण इत्येवेत्ययोग-व्यवच्छेदकावधारणादिति सूत्रखण्डार्थः ।

॥ इत्यन्वयाधिकरणम् ॥ १० ॥

॥ ११. कार्याधिकरणम् ॥

(मोक्षार्थम् उपास्यमानगुणाः लोकविलक्षणाः)

सू— ॐ ॥ कार्याख्यानादपूर्वम् ॥ ॐ ॥ १९ ॥

'अलौकिकास्तस्य गुणा ह्युपास्या अलौकिकं मुक्तिकार्यं यतोऽस्य' इति कार्याख्यानादन्यत्र अदृष्टा एव गुणा उपास्याः ॥ १९ ॥

अत्राधिकरणेऽलौकिकगुणानामेवोपसंहार्यत्वं समर्थ्यते । लौकिका एव [1]'ईशगुणा उपसंहृत्य ध्यातव्या नालौकिकास्तेषां पूर्वमननुभूत्वेन ध्यानकालेऽप्रतीतेरिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्यति- **कार्येति** ॥ मुक्तिकार्यत्वाख्यानात् ध्यानकार्यभूताया मुक्तेरलौकिकत्वाख्यानादिति हेतुवाक्यार्थमभिप्रेत्य तत्सूचितां श्रुतिं दर्शयति- **अलौकिका इति** ॥ अलौकिका एवेत्यर्थः । 'तस्य' हरेः । कुत इत्यतो हेतुमाह- **अलौकिकमिति** ॥ 'अस्य' उपासनस्य 'मुक्तिकार्यं' कार्यभूता मुक्तिः 'अलौकिकं' अलौकिकी । कार्यानुसार्युपासनस्यैव कर्तव्यत्वनियमादिति हेतुसूचको हिशब्दः । **इति कार्याख्यानादिति** ॥ इति श्रुतौ कार्यस्य मोक्षस्यालौकिकत्वोक्तेः ध्यानकार्यत्वोक्तेश्चेत्यर्थः । अनेन सूत्रे कार्याख्यानादिति मध्यमपदलोपी समासः, आख्यानादित्याङ्प्रश्लेषो वा । आङोऽर्थस्तु सम्यक्त्वमलौकिकत्वपर्यवसितं, कार्यपदं भावप्रधानमावर्तनीयं चेति सूचितम् । अपूर्वमिति प्रतिज्ञाभागमन्यत्रेतिपदाकर्षणेन श्रुत्यनुसाराद् वचनविपरिणामेन चोपास्या इति पदाध्याहारेण व्याचष्टे- **अन्यत्रेति** ॥ ब्रह्मणोऽन्यत्र लोके इत्यर्थः । 'अदृष्टाः' अप्रतीता अलौकिका इति यावत् । गुणा ब्रह्मणः 'उपास्याः' ध्यातव्या इत्यर्थः । एवेत्यनेनापूर्वपदं सावधारणमिति सूचितम् । यद्यप्यपूर्वशब्दः तद्व्याख्यानरूपोऽदृष्टशब्दश्च यागादिक्रियाजन्ये पुण्ये रूढः । तथापि श्रुतौ यौगिकालौकिकपदप्रयोगात् तत्समानार्थकस्यापूर्वपदस्यादृष्टपदस्य च योगवृत्तिरेवाश्रयणीयेति भावेन असावाश्रिता । न चालौकिकगुणाप्रतीतेः शक्तिग्रहानुपपत्तिः । अभिमान्यधिकरणसुधोक्तरीत्या इन्द्रादौ यस्सहस्राक्षः स इन्द्रः यः पाशहस्तः स वरुणः इत्याद्युपदेशवदत्रापि

---

१. ईशगुणा इति मुद्रिते नास्ति ।

साक्षात्कृतभगवद्रूपाणां योगिनां योऽनुकूलवेदनीयो गुणः स आनन्दः यत् सर्वविषयं तत् ज्ञानमित्याद्युपदेशोपपत्तेः । उपदेशेन च गुणप्रतीति-सम्भवाच्छक्तिग्रहोपपत्तेश्च ।

॥ इति कार्याधिकरणम् ॥ ११ ॥

॥ १२. समानाधिकरणम् ॥

(वाण्याः त्रिविक्रमत्वादिक्रियाणां पृथक् उपासना नास्ति)

सू— ॐ ॥ समान एवं चाभेदात् ॥ ॐ ॥ २०॥

अपूर्वत्वेऽपि समानानामेवोपसंहारः । न तु त्रिविक्रम-त्वादीनां कादाचित्कानां पृथक्त्वेन नित्यविक्रान्त्यादि-ष्वन्तर्भावात् ॥ २० ॥

अत्राधिकरणे उपासनस्य स्वसदृशफलप्रदत्वसिद्ध्यर्थं ब्रह्माणीब्रह्मणोरुपा-सनस्य समविषमत्वं समर्थ्यते । तत्र ब्रह्माणीब्रह्मणोः सत्यलोकादिस्थानैक्यस्य आनन्दादिगुणतारतम्यस्य च सद्भावेन फलस्य समविषमत्वेऽप्युपासनस्य न तथात्वं युक्तम्, विरोधादतो नोपासनसदृशं फलमिति प्राप्ते सिद्धान्तहेत्वभिधानाय प्रवृत्तं सूत्रं पठति- **समान इति** ॥ त्रिविक्रमत्वादिक्रियाणां लोकदृष्टक्रिया-विलक्षणत्वेनात्याश्चर्यत्वात् कथं तदुपासनं ब्रह्माणी हास्यतीत्याशङ्काप्रदर्शनाय - **एवं चेत्युक्तम्** ॥ तत्रैवंशब्देन पूर्वसूत्रोक्तं परामृश्यते । चोऽप्यर्थ इत्याशयेनैवं चेत्येतद्व्याचष्टे- **अपूर्वत्वेऽपीति** ॥ अन्यत्रादृष्टत्वेऽपीत्यर्थः । त्रिविक्रमत्वादि-क्रियाणामित्येतत् आदावन्वीयते । यद्यपि तथापीत्यर्थेऽपि । सूत्रे समाने चेत्यपि चशब्दान्वयः । स चावधारणार्थः । विषयसप्तमी चेयमित्यभिप्रेत्य प्रदर्शित-शङ्कापरिहारकं समाने चेत्येतद्व्याचष्टे- **समानानामेवेति** ॥ साधारणानां नित्यविक्रान्तिनित्यरमणादिरूपाणां योग्यानामेव क्रियाणामित्यर्थः । उपसंहार

इति सूत्रेऽनुवृत्तं पदम्। उपसंहृत्योपासनमित्यर्थः। एवशब्दव्यावृत्तिं दर्शयति - **न त्विति** ॥ तुशब्दो योग्यत्वविशेषद्योतकः। **त्रिविक्रमत्वेति** ॥ अत्र त्रित्वस्यान्वयः पादद्वारा विन्यासेषु, त्रिविक्रमरूपस्य पादत्रययुक्तत्वात्। त्रयो विक्रमा यस्य स तथोक्तः, तस्य भावस्तत्वं त्रित्वसङ्ख्योपेतपादविक्षेपरूपक्रियादीनामित्यर्थः। आदिशब्देन रिङ्खणरमणभक्षणसंहरणादिक्रिया गृह्यन्ते। **कादाचित्कानामिति**। कदाचिदभिव्यक्तानामित्यर्थः। ननु त्रिविक्रमत्वादीनामप्यन्तर्भावेन कदाचिद् विशेषरूपेण च उपास्यत्वान्निषेधायोग इत्यत आह- **पृथक्त्वेनेति**। सदेत्यपि प्रागध्याहार्यम्। तथा च सर्वदा त्रिविक्रमत्वादिविशेषाकारेणोपसंहार इत्यर्थः। ननु त्रिविक्रमत्वादिक्रियाणां सदा पृथक्त्वेनानुपासने सर्वथा तन्निषेधादनुपासनमेव प्राप्नोति प्रकारान्तरेणोपासनानुक्तेरित्याशङ्कानिरासाय- अभेदादित्युक्तं सूत्रे, तद्व्याचष्टे- **नित्येति** ॥ किन्त्वर्थकस्तुशब्द आदौ संयोज्यः। तेन सौत्रच-शब्दस्तुशब्दार्थकतयाऽपि व्याख्यातः। त्रिविक्रमत्वादीनामित्यत्राप्यन्वीयते। विक्रान्तिः क्रिया। आदिपदेन पूर्वोक्तमुच्यते। **अन्तर्भावादिति** ॥ अन्तर्भाव्य उपसंहारः। नित्यमनन्तरूपेषु अनन्तक्रियास्सन्तीत्युपास्तौ त्रिविक्रमात्वादी-नामपि सामान्यत उपास्यासु नित्यविक्रान्त्यादिरूपक्रियासु अन्तर्भूतत्वादिति भावः। सूत्रस्य ब्रह्माणीब्रह्मणोः फलवदुपासनमपि समविषममेवेति उपस्कृत-साध्येनान्वयः।

सू— ॐ ॥ सम्बन्धादेवमन्यत्रापि ॥ ॐ ॥ २१ ॥

परमात्मसम्बन्धित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्यु-पसंहार्यत्वं युज्यते।

ननु न विरिञ्चस्यापि सदा त्रिविक्रमत्वादिविशेषक्रियोपसंहारो युज्यते, तासामनित्यत्वेन ध्यानकालेऽभावादित्याशङ्कां परिहरत्सूत्रं पठति- **सम्बन्धा-दिति** ॥ अत्र सम्बन्धादिति हेतूक्त्या तत्साध्यं नित्यत्वमपि सूचितमिति भावेन सम्बन्ध्यन्तरप्रदर्शनपूर्वकं सम्बन्धादित्येतद्व्याचष्टे- **परमात्मेति** ॥ सम्बन्धस्ता-

दात्म्यं परमात्माभिन्नत्वेनेत्यर्थः । त्रिविक्रमत्वादीनामिति वर्तते । सूत्रे ऐक्यादित्यनुक्त्वा सम्बन्धादित्युक्तिः ऐक्येऽपि विशेषबलात्तत्सम्बन्धित्वव्यवहारो न विरुद्ध इति सूचनायेति ज्ञापयितुं सम्बन्धित्वेनेत्युक्तम् । 'नित्यत्वात्' शक्त्यात्मना नित्यत्वात् । एवमन्यत्रेत्यस्य नित्यव्यक्तवदेव ततोऽन्यत्र कादाचित्कव्यक्तिषु त्रिविक्रमत्वादिष्वित्यर्थ इत्याशयेनाह- **त्रिविक्रमत्वादिष्विति** ॥ **त्रिविक्रमादिष्वितिपाठे** भावप्रधानो निर्देशः । विषयसप्तमीयम् । न केवलं नित्यव्यक्तिषु किन्त्वन्यत्रापीति समुच्चयेऽपिशब्दः । एवमित्यस्यार्थमाह- **उपसंहार्यत्वमिति । युज्यत इति** । 'हिरण्यगर्भेण सदे'ति शेषः ।

'गुणास्त्रैविक्रमाद्यास्तु संहर्तव्या न संशयः ।
विरिञ्चस्यैव नान्येषां स हि सर्वगुणाधिकः ॥'
इति वृहत्तन्त्रे ॥ २१ ॥

अत्रार्थे स्मृतिं चाह- **गुणा इति** ॥ 'त्रैविक्रमाद्याः' त्रिविक्रमस्यायं त्रैविक्रमः त्रिविक्रमत्वादिक्रियात्मकधर्मा इत्यर्थः । आद्यशब्देन हननभक्षणादिकमुच्यते । तुरवधारणे, भिन्नक्रमः । पृथक्त्वेनेति विशेषद्योतको वा । 'सहर्तव्याः' उपसंहर्तव्याः 'अन्येषां' वाण्यादीनाम् । अत्र युक्तिमाह - **स हीति** ॥ 'सः' विरिञ्चः । हिशब्दो हेतौ । **सर्वेति** । सर्वेभ्योऽधिकारिभ्यो गुणैरधिक इत्यर्थः । बृहत्तन्त्रे 'कथितम्' इति शेषः ।

॥ इति समानाधिकरणम् ॥ १२ ॥

॥ १३. नवाधिकरणम् ॥

(आत्मशब्दः तत्तदधिकारियोग्यगुणाभिधायकः)

सू - ॐ ॥ न वा विशेषात् ॥ ॐ ॥ २२ ॥

न वाऽऽत्मशब्देन सर्वगुणगृहीतिः । अधिकारिविशेषात् ॥ २२ ॥

अत्राधिकरणे आत्मशब्दोक्तगुणोपासनस्य सर्वैः कर्तव्यत्वं समर्थ्यते । आत्मशब्दस्य सर्वगुणाभिधायकत्वेन विभ्रमकरत्वात् आत्मशब्देन अस्यैतावन्त एवोच्यन्त इति प्रातिस्विकनियमाभावेनोपासनासम्भवाच्च न तदुक्तगुणाः सर्वोपास्या इति प्राप्ते सिद्धान्तयितुं सूत्रं पठति- **न वेति** ॥ अत्र युक्तमेव सर्वेषामात्मशब्दोक्तगुणोपासनमिति साध्यमध्याहार्यमित्याशयेन तत्र हेतुत्वेन न वेत्यंशं व्याचष्टे - **नवेति** ॥ वाशब्दो व्यवस्थितविकल्पे । आत्मशब्देनेत्यनेन सूत्रे आत्मगृहीतिरिति पदानुवृत्तिस्सूचिता । तथा च आत्मपदेन सर्वेषां गुणानां शुभधर्माणां गृहीतिरभिधानं न वा सर्वान् प्रति, किन्तु ब्रह्मादीन् प्रत्येवेत्यर्थः । अस्य यत इति शेषेणाध्याहृतसाध्येनान्वयः । कुतो नेत्यतस्तत्र हेतुत्वेन विशेषादित्यंशं व्याचष्टे- **अधिकारीति** ॥ आत्मशब्दस्य अधिकारिसामर्थ्य-विशेषमपेक्ष्य तत्तद्योग्यगुणाभिधायकत्वादित्यर्थः ।

सू— ॐ ॥ दर्शयति च ॥ ॐ ॥ २३ ॥

'सर्वान् गुणानात्मशब्दो ब्रवीति ब्रह्मादीनामितरेषां न चैव' इति भाल्लवेयश्रुतिः ॥ २३ ॥

विशेषादिति [1]युक्तिसिद्धार्थं श्रुत्याऽपि समर्थयत्सूत्रं पठित्वा तां श्रुतिमुदाहरति- **दर्शयति चेति** ॥ न वेत्युक्तमर्थं श्रुतिरपि दर्शयतीत्यर्थः । न केवलं युक्तिरिति चार्थः । बह्वर्थकोऽप्यात्मशब्दः 'ब्रह्मादीनां' ब्रह्म-ब्रह्माण्यादीन् प्रति 'सर्वान्' स्वयोग्यान् बहून् 'गुणान्' भगवद्धर्मान् 'ब्रवीति' ध्यानकाले युगपत् प्रत्यप्रकाशयतीत्यर्थः । 'इतरेषां' देवगन्धर्वाणां मनुष्योत्त-मानां च न बहुगुणान्, किन्त्वल्पानित्यर्थः । यथोक्तं तत्त्वप्रदीपे- सर्वान् गुणानात्मशब्दो ब्रवीति ब्रह्मणः, ब्रह्माण्यादीनां शतं शतमूनान् क्रमादिति, न्यूनत्वाद्योग्यतायाः । अवरेषामल्पगुणानेवेति । अनेन यस्य यावन्तो गुणा

---

१. युक्तिशब्दार्थम् इत्यस्ति कोशे ।

आत्मशब्देन युगपत्प्रतीयन्ते तेन तावन्तो ध्यातव्या इति हेतोः व्युत्पत्तिवशेनात्मशब्देन जाता प्रतीतिः न ध्यानोपयोगिनीत्युक्तं भवति ।

॥ इति नवाधिकरणम् ॥ १३ ॥

॥ १४. सम्भृत्यधिकरणम् ॥

(सम्यग्भरणम्, अन्तरिक्षादिलोकव्यापनं च देवादिभिरुपास्यम्)

सू— ॐ ॥ सम्भृतिद्युव्याप्त्यपि चातः ॥ ॐ ॥ २४ ॥

सम्भृतिद्युव्याप्ती अपि देवादीनामुपसंहर्तव्ये नान्येषाम् । अत एव योग्यताविशेषात् ।

अत्राधिकरणे सम्भृत्यादिगुणस्य सर्वोपास्यत्वं नेत्युच्यते । मोक्षे स्वाधमभरणस्य प्रकाशव्याप्तेश्च सर्वापेक्षितत्वात् फलानुसारेण सम्भृतिद्युव्याप्ती सर्वोपास्ये इति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **सम्भृतीति** ॥ अत्रापिशब्दो नञस्समाकर्षकः । उपसंहर्तव्ये इति शेष इत्याशयेन सम्भृतिद्युव्याप्त्यपीति साध्यांशमनूद्य तत्तात्पर्यमाह - **सम्भृतीति** ॥ द्यावापृथिव्योर्भरणं सम्भृतिः, द्युत्या महाप्रकाशेन व्याप्तिः द्युव्याप्तिः कर्तरि षष्ठ्यौ । तथा च 'उक्षा स द्यावापृथिवी विभर्ति' (ऋ. १०-३१-७) 'एष हि सर्वेषु लोकेषु भाति' (छा. ४-१५-४) इत्यादौ प्रतीतेः सम्भरणप्रकाशव्याप्ती देवादिभ्योऽन्यैर्मनुष्योत्तमैः 'नोपसंहर्तव्ये' उपसंहृत्योपास्ये न, किन्तु देवादीनामेवोपसंहृत्योपास्ये इत्यर्थः । सूत्रे सम्भृतिद्युव्याप्ती इति द्विवचनान्तं पदम्, अप्रगृह्यत्वं तु छान्दसमिति ज्ञापनाय सम्भृतिद्युव्याप्ती अपीति प्रकृतिभावेन निर्देशः । अपिशब्दलब्धार्थो- **नान्येषामिति** ॥ तत्त्वप्रदीपे तु 'भृतिव्याप्त्यादयो गुणाः' इति प्रमाणानुसारेण सूत्रे द्विवचनमविवक्षित्वा सम्भृतिद्युव्याप्त्योऽपि गुणा देवानामुपसंहर्तव्याः, नानन्दादय एव । एवमपिशब्दात् वीर्यैश्वर्यादयोऽपि ग्राह्याः । द्वित्वमात्रव्यावृत्त्यर्थं किलाप्रगृह्य असूत्रयत्

इत्यपेस्समुच्चयार्थत्वमुक्तम् । अनेन सूत्रे समाहारद्वन्द्व इति केषांश्चित्पक्षो निरस्तः । सूत्रे अतश्चेत्यन्वयः । चशब्द एवार्थ इत्याशयेन हेत्वंशं व्याचष्टे- **अत एवेति** ॥ देवादीनामेव तदुपास्तियोग्यता, नान्येषामित्यधिकारियोग्यतायां विशेषसद्भावादेवेत्यर्थः । योग्यतैवोपास्तिनियमप्रयोजिका न फलापेक्षेति द्योतयितुमेवशब्दः । न च प्रकाशाद्युपास्त्यभावे मुक्तौ सर्वेषां स्वस्वयोग्यप्रकाशः स्वावरभरणं च कथं लभ्यत इति वाच्यम् । स्वस्वयोग्यगुणयुक्तभगवद्रूपविषय-स्मृतिरूपप्रतीतिविषयत्वेन तदविनाभूततत्प्रकाशादिनैव प्रकाशभरणयोः प्राप्त्यु-पपत्तेः । यथोक्तं न्यायविवरणे- गुण्याकारस्मृतेरेव द्युतिमात्रं प्रतीयते इति । अत एव 'उद्यद्भास्वत्समाभासः' 'युक्ताः प्रदीपवर्णाश्च' 'हरितोपलाभम्' 'हरिन्मणिनिभम्' 'ब्रह्मवायुशिवाहीशविषैः शक्रादिकैरपि । सेव्यमानः' 'विधिशर्वपूर्वगीर्वाणविज्ञानदम्' 'अजेशसमितिं प्रतिबोधयन्तम्' इति स्वस्व-योग्यतानुसारेण किञ्चित्प्रकाशविषयकतया ब्रह्माद्यवरदेवताभरणविषयतया च सर्वेऽपि ध्यानं कुर्वन्ति ।

'देवादीनामुपास्यास्तु भृतिव्याप्त्यादयोः गुणाः ।
आनन्दाद्यास्तु सर्वेषामन्यथाऽनर्थकृद्भवेत् ॥'
इति ब्रह्मतर्के ॥ २४ ॥

ननु सम्भृत्यादिगुणोपास्तिर्देवानामेव योग्येति कुतः, अन्येषामयोग्यता-यामप्युपासने को विरोधः , फलसिद्धेरविशेषादित्यत आह- **देवादीनामिति** ॥ तुरवधारणे । देवादीनामेवेत्यन्वेति । भृतिः सम्भृतिः । व्याप्तिर्ध्रुव्याप्तिः । आदिपदाद्वीर्यादयोऽपि गृह्यन्ते । वेधादय इति केचित् । 'सर्वेषां' सम्पूर्ण-मोक्षयोग्यानाम् देवादिमनुष्योत्तमान्तानां 'अन्यथा' अयोग्योपासने तदुपा-सनम् उपासकस्यानर्थकृद्भवेदित्यर्थः । ब्रह्मतर्के च सूत्रकृदुक्तमुक्तमित्यन्वयः ।

॥ इति सम्भृत्यधिकरणम् ॥ १४ ॥

॥ १५. पुरुषाधिकरणम् ॥

(सर्ववेदोक्तगुणैरेव उपासना कर्तव्या)

यस्यां विद्यायां महागुणा उच्यन्ते सोत्तमानाम् इतराऽन्येषामिति चेत्,

अत्राधिकरणे सर्वविद्यातो गुणोपसंहारः कर्तव्यः इति समर्थ्यते । पूर्वपक्षयति- **यस्यामिति** ॥ अत्रेत्थं योजना । न सर्वविद्यातो गुणोपसंहारः कर्तव्यः । प्रयोजनाभावात् । न च स्वस्वयोग्यगुणोपासनाय स कार्यः । सार्वत्रिकगुणोपसंहारमन्तरेणापि तत्सम्भवात् । कथम् ? यस्यां विद्यायां 'महागुणाः' बहुगुणा उच्यन्ते सा विद्या 'उत्तमानां' बहुगुणोपास्ति-योग्यानामुपासनाय भवति । तत् साधनमिति यावत् । 'अन्येषाम्' अल्पगुणोपासनयोग्यानाम् 'इतरा' अल्पगुणप्रतिपादिका विद्या उपासनाय भवतीति ।

न –

सू—

ॐ ॥ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ ॐ ॥२५॥

पुरुषसूक्तोक्तविद्यायामपि केषाञ्चिद्गुणानामनाम्नानात् ।

पूर्वपक्षं प्रतिषेधति - **नेति** ॥ सर्वविद्यातो गुणोपसंहारो न कर्तव्य इति न, किन्तु कर्तव्य एवेत्यर्थः । कुत इत्यतस्तत्र हेतुतया सूत्रं पठति - **पुरुषेति** ॥ अत उपसंहार इत्यस्यानुवृत्त्या नञनुवृत्त्या च कर्तव्य एव सर्वविद्यातो गुणोपसंहार इति साध्यस्य लाभात्, अनाम्नानाच्चेति चशब्दसम्बन्धेन तत्समुच्चयस्य सर्वगुणोपास्तियोग्यानामधिकारिणां भावात्, सर्वगुणोपास्तेश्च सर्वोपसंहारं विनाऽयोगादिति हेतोश्च सिद्धत्वात्, तथापि कुतस्सर्वत उपसंहारः कर्तव्य इत्यतोऽनाम्नानादित्येनैव एकस्यां विद्यायां सर्वगुणानामनुक्तत्वादिति

हेतुसाधकहेतोरपि सिद्धत्वात्, सोऽपि कुतः सिद्ध इत्यतः कैमुत्येन तत्साधनपरतया समग्रसूत्रं व्याचष्टे- **पुरुषेति** ॥ अपिर्भिन्नक्रमः। तथा च अपि सर्वविद्योत्तमायामपि 'पुरुषविद्यायां' 'पुरुषसूक्तोक्तविद्यायां' पुरुषसूक्तमित्युक्तविद्यायां स्वापेक्षितगुणानां मध्ये केषाञ्चिदेव आम्नानात् पाठात् 'इतरेषां' तदन्येषाम् 'अनाम्नानात्' सुतरां विद्यान्तरे सर्वेषामनाम्नानस्य सिद्धत्वादत एवैकस्यां विद्यायां सर्वेषाम् 'अनाम्नानात्' अनुक्तेः सिद्धत्वादित्यर्थः। अनेन केषाञ्चिदाम्नानात् इतरेषाम् अनाम्नानाच्चेत्यपि समुच्चयः चशब्दार्थ इत्युक्तं भवति।

'सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदीरिताः।
तत्रापि नैव सर्वेऽपि तस्मात्कार्योपसंहृतिः॥'

इति ब्रह्मतर्के ॥ २५ ॥

भवेदुपसंहारस्य कर्तव्यता, यदि स्यात् पुरुषसूक्तस्य सर्वविद्योत्तमत्वं, तत्रापि केषाञ्चिद्गुणानामनुक्तत्वं च। तदेव कुत इत्यत आह- **सर्वत इति** ॥ 'पौरुषे सूक्ते' परमपुरुषप्रतिपादके पुरुषसूक्ते 'सर्वतः' सर्वत्र आदावन्ते च मध्ये चेत्यर्थः। 'सर्वतः' सर्वे गुणा इति वा। 'सर्वतः' सर्वविद्यातः आधिक्येनेति शेष इति वा। 'तत्रापि' पुरुषसूक्तेऽपि स्वापेक्षिताः सर्वेऽपि गुणा नोदीरिता इत्यन्वयः। मानुषापेक्षितक्षितसर्वगुणावचनात् सर्वतः उपसंहृतिः कार्येत्यर्थः। ब्रह्मतर्के सूत्रकृदुक्तमुक्तम् इत्यध्याहारेणान्वयः। सूत्रे सर्वेषामनाम्नानादित्यनुक्त्वा इतरेषामनाम्नानादित्युक्त्या च एकस्यामेव विद्यायां सर्वगुणानुक्तेः अस्तु चतुर्मुखस्य सर्वविद्यातो गुणोपसंहारः, अन्येषां महदल्पगुणाभिधायकविद्याभिरेवोपास्तिसम्भवात् उपसंहारो व्यर्थ इति चोद्यं निरस्तं भवति। सङ्ख्यासाम्यसम्भवेऽपि एकस्यामेव स्वापेक्षितगुणोक्तिनियमाभावात्।

॥ इति पुरुषाधिकरणम् ॥ १५ ॥

॥ १६. वेधाधिकरणम् ॥

(सर्वैः भेदनादिगुणा नोपास्याः)

सू— ॐ ॥ वेधाद्यर्थभेदात् ॥ ॐ ॥ २६ ॥

'भिन्धि विद्धि शृणीहीति फलभेदेन सर्वशः ।
यत्यादीनां तेष्वयोगान्नाधिकारैकता भवेत् ।
अयोग्योपासनादीयुरनर्थं चार्थनाशनम् ।'
इति वृहत्तन्त्रे ॥ २६ ॥

अत्राधिकरणे भेदनादिगुणानां सर्वोपास्यत्वं निरस्यते । सर्वसज्जनापेक्षित-दुष्टजननिग्रहफलकत्वेन वेधादीनां सर्वोपास्यत्वान्न चतुर्गुणोपासनानियम इति प्राप्ते सिद्धान्तयत्सूत्रं पठति- **वेधादीति** ॥ अत्र वेधाद्यर्थभेदादित्येकं पदम् । वेधादीति भिन्नं चावर्तते । नेत्यस्ति । तथा च 'वेधादि' रक्षोघ्नसूक्ते

'ताभिर्विध्य हृदये यातुधानान् ..... ।
अग्ने त्वं च यातुधानस्य भिन्धि..... ।

प्रपर्वाणि जातवेदश्शृणीहि' (ऋ.१०-८७-४,५) इत्यादिनोक्तं दुर्जन-वेधनभेदनहिंसनादिकं न सर्वोपास्यं, कुतः ? यतो न यत्याद्युपास्यं, तदपि कुतः? 'वेधाद्यर्थभेदात्' वेधाद्यर्थस्य तद्विषयकोपासनफलस्य हिंसनस्य यत्यादियोग्यफलात् भेदात् विलक्षणत्वात् । अयोग्यफलस्य चानर्थकफल-साधनत्वादिति सूत्रार्थमभिप्रेत्यात्र स्मृतिं चाह- **भिन्धीति** ॥ 'शृणीहि' जहि । इतिशब्दानन्तरमुपासनेष्विति शेषः । तथाचेत्थं योजना- हे भगवन् दुष्टान् भिन्धि विद्धि शृणीहीत्येवंरूपेषूपासनेषु 'सर्वशः' सर्वेषां 'नाधि-कारैकता' नाधिकारसाम्यं भवेत् । एतदुपासनं सर्वाधिकारिसमं न भवेदिति यावत् । कुतः ? यत्यादीनां 'तेषु' उपासनेषु 'अयोगात्' अयोग्यत्वात् । तदपि कस्मात् ? 'फलभेदेन' फलभेदात् एतदुपासनफलानां यत्यादियोग्यफलाद्

विलक्षणत्वात् । नन्वयोग्यत्वेऽपि कुतो यत्यादीनां वेधाद्युपासनाभाव इत्यत आह- **अयोग्येति** ॥ यतोऽयोग्योपासनादनर्थमर्थनाशनं च 'ईयुः' प्राप्नुयुरत इति । **बृहत्तन्त्रे इति** ॥ 'सूत्रकारोक्तः कथित'इति शेषः । इदं त्ववधेयम् । यत्यादीनां ध्यानात्प्राक् प्राणायामकरणकाले पापपुरुषशोषणदहनादिकमस्ति, न तु ध्यानकाले । तदा तु ते स्वयोग्यगुणानेव ध्यायन्ति न तु भेदनादिकमिति ।

॥ इति वेधाधिकरणम् ॥ १६ ॥

॥ १७. हान्यधिकरणम् ॥

(मोक्षे मुक्तानाम् उपासना ऐच्छिकी)

मुक्तस्योपासना कर्तव्या न वेति ।

अत्राधिकरणे उपासनस्य मुक्तावप्यनुवृत्तिः समर्थ्यते । तत्र विषयसंशयौ दर्शयति- **मुक्तस्येति** ॥ प्रकृतोपासनं विषयः । मुक्तेन क्रियते न वेति सन्देह इत्यर्थः । प्राप्तफलत्वं 'जक्षन् क्रीडन्' (छां. ८-१२-३) इति क्रियान्तरश्रुतिश्च सन्देहबीजमिति भावः । एवं मुक्तस्योपासना न कर्तव्येत्यनेन मुक्तेनोपासना क्रियत इति पूर्वपक्षस्य तथा मुक्तस्योपासना कर्तव्या न वेति समग्रवाक्ये कर्तव्या विहिता नेति विकल्पपरतया व्याख्यायमाने नोभावपि कल्पौ युक्तौ । विहितस्य वा अविहितस्य वा कर्मणः फलावश्यंभावात्फलप्राप्तिप्रसङ्गात्, तथा चापूर्णता-प्रसक्तिः । न चेष्टापत्तिः, मुक्तस्य अपूर्णतारूपान्मुक्तस्य तदयोगात् । किञ्चाद्ये मुक्तस्य विधिबद्धत्वेन मुक्तेस्संसारसमानधर्मतापत्तिः । द्वितीये मुक्तस्याविधि-बद्धत्वादेव करणानुपपत्तिरिति मुक्तस्येत्यस्मिन् व्याख्यायमाने च अनेन पूव-र्पक्षयुक्तेश्च सूचनं कृतं भवति । सिद्धान्तदूषकयुक्तेरेव पूर्वपक्षसाधनत्वादिति ज्ञातव्यम् । तत्त्वप्रदीपे तु मुक्तस्योपासना न कर्तव्येत्यंशमेकपूर्वपक्षपरतया व्याख्याय तत्पूर्वपक्षे विध्यभावात्प्रयोजनाभावाच्चेति हेतुमभिधाय मोक्षार्थं ह्युपासनं तत्पर्यन्तं च विधेयम्, अतः कुतो मुक्तस्योपासनाप्राप्तिरिति तमुपपाद्य कर्तव्येत्यपरः पक्षः । मुक्तस्यापि परतन्त्रत्वात् । तदा विशेषभोगापेक्षयोपास्ति-

सम्भवादित्यत आहेति कर्तव्येत्यंशः पूर्वपक्षान्तरपरतया व्याख्यातः । तत्राद्यः पूर्वपक्षः तद्धेतुश्च टीकोक्तः । द्वितीयस्तु तन्मात्रोक्तः । तत्पक्षे न कर्तव्येति पूर्वपक्षनिरासो 'हानौ तूपायनशब्दशेषत्वात्' इत्यनेन सूचितोऽभ्युपगमेन कृतः । कर्तव्येति द्वितीयपूर्वपक्षनिरासस्तु 'कुशाच्छन्द' इत्यनेन सूचितो विधिबद्धत्वान्न क्रियते, किन्तु स्वेच्छयेत्येवंप्रकारेण कृतः । तस्मात्संसारोपाधिकमेवोपासनं न स्वाभाविकमिति तत्साधनाय भक्तिर्व्यर्थेति भावः ।

अतो ब्रवीति ।

सू—ॐ ॥ हानौतूपायन(उपासना)शब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ ॐ ॥ २७ ॥

नियतस्वाध्यायानन्तरं स्वेच्छया कुशाग्रहणस्तुत्युपगानवदेव मोक्षे उपासनादि ।

अथ सिद्धान्तंयत्सूत्रमवतारयति - अत इति ॥ सूत्रे मुक्तस्योपासना विहिता न वेति विकल्पितपक्षद्वये आसंसारहानेः विहितत्वात्प्रयोजनाय क्रियते । तद्धानौ मोक्षे तु स्वेच्छयेति तत्त्वप्रदीपदिशा 'हानौ तु' इत्यनेन आद्यपक्षोक्तदोषनिरासात् । द्वितीयपक्षोक्तदोषपरिहाराय 'कुशाच्छन्द' इत्याद्युक्तम् । तत्र कुशपदं तद्ग्रहणपरम् । आच्छन्दपदं च बुद्ध्या विवेकेन कुशग्रहणे तच्छब्दार्थोपासनादौ चान्वीयत इति भावेनार्थक्रमेण व्याख्याति- **स्वेच्छयेति** ॥ स्वेच्छया कुशाग्रहणपूर्वकत्वं स्तुत्युपगानयोः कदेत्याकाङ्क्षायां तद्योग्यं कालमाह- **नियतेति** ॥ स्वाध्यायो वेदाध्ययनं स्वकाले विधिनियतब्रह्मयज्ञानन्तरमित्यर्थः । कुशस्य आग्रहणं सम्यग्ग्रहणं, स्तुतिः यजुरादिमन्त्रः, उपगानं साम । आच्छन्देन कुशाग्रहणेन सहिते तत्पूर्वके च ते स्तुत्युपगाने च ते तथोक्ते, ताभ्यां तदध्ययनं लक्ष्यते । तत्त्वप्रदीपे उपगानं साम्ना, स्तुतिस्तदन्यैर्यजुरादिभिरित्युक्तत्वेऽपि टीकायां स्तुत्युपगानपदाभ्यां तत्करणे एव गृहीते तयोरेवाध्ययनकर्मत्वात् । अत्र

ब्रह्मयज्ञरूपमन्त्राध्ययनकाल एव कुशाग्रहणं विहितम् । ब्रह्मयज्ञानन्तरभावि-मन्त्राध्ययने तु कुशाग्रहणं स्वेच्छयैवेति विवेकः । एवेत्यनेन एवार्थकतुशब्दो भिन्नक्रमेणात्र सम्बध्यत इत्याह । तत्त्वप्रदीपे तु तुशब्दो विशेषार्थक इत्याशयेन बन्धहानौ त्वित्यन्वयो दर्शितः । हानावित्यस्य विधिबन्धहानावित्यर्थमभिप्रेत्य तद्विशेष्यस्यागामिसूत्रादाकृष्टस्य 'साम्पराये' इत्यस्यार्थमाह- **मोक्ष इति** ॥ आदिपदेन यजनादिकर्मपरिग्रहः । उपासनादीत्यनन्तरं अस्तीति क्रियत इति वा शेषः । तेनाप्येवार्थकतुशब्दस्यान्वयः ।

'ब्रह्मविदाप्नोति परम्' (तै.उ.२-१-१) इति मोक्षवाक्य-शेषत्वादितरेषाम्, तच्चोक्तम् 'एतत्साम गायन्नास्ते' इति (तै.३-१०) इत्यादि ।

ननु मोक्षे उपासनमस्ति चेत्तत्कुतः स्वेच्छयैवेत्यङ्गीकार्यं, विधित एव किं न स्यादित्याशङ्कापरिहारायोक्तं सूत्रे- **उपायनेति** ॥ तत्रायनेन ज्ञानेन उप ब्रह्मसमीपे अयनं गमनं तस्य शब्दः उपायनशब्दो मोक्षस्य ज्ञानसाध्यताबोधकं वाक्यमिति भावेन तमंशं व्याचष्टे- **ब्रह्मेति** ॥ **इति मोक्षेति** । इत्येवंरूपं यन्मोक्षस्य ज्ञान-साध्यताभिधायकं वाक्यं तच्छेषत्वात् तदर्थत्वात् तद्वाक्यविहितापरोक्षज्ञान-साधनविधायकत्वादित्यर्थः । 'पुरुषविद्यायाम्' इत्यतोऽस्य सम्बन्धिपद-मनुवर्तनीयमित्याह- **इतरेषामिति** ॥ 'श्रोतव्यो मन्तव्यः' (बृ. ४-४-५) 'तद्विजिज्ञासस्व' (तै. ३-१) इत्याद्युपासनविधीनामित्यर्थः । केचित्तु - इदमध्याहृतमित्याहुः । तत्त्वप्रदीपदिशा उपासनाशब्दशेषत्वादिति सूत्रपाठे उपासनाशब्दानां उपासनाविधीनां शब्दशेषत्वात् मोक्षवाक्यशेषत्वादित्यर्थः । अस्मिन् पक्षे उपासनेति व्यस्तं पदं समस्तं च । तत्र व्यस्तपदस्य कर्मोप-लक्षकस्यार्थो भाष्यकृता उपासनादीत्यनेन दर्शितः, न तु पृथक्तच्छब्द-व्याख्यानम्, न वा भावबोधरीत्याऽयं शेषः । इतरेषामित्येतदपि श्रुतपदार्थकथनं, नानुवृत्तमिति ध्येयम् । भवेदियं चिन्ता, यदि मुक्तस्योपासनमेव स्यात्, तदेव कुत

इत्यतस्सूत्रेतदुक्तमित्युक्तं, तद्व्याचष्टे- **तच्चेति** ॥ अनेन सूत्रे तुशब्दाश्चार्थोऽपि। स च तदित्यनेनापि सम्बन्ध्यते। तथा च यदुपासनं श्रुतावुक्तं यत्तस्य स्वेच्छायत्तत्वं तच्च ब्रह्मतर्के उक्तं चेति सूत्रांशयोजना दर्शिता भवति। श्रुतिं पठति- **एतदिति** ॥ आदिपदात् 'ऋचां त्वः पोषमास्ते' (ऋ.१०-७१-११) इत्यादि गृह्यते। **इत्यादीति** ॥ इत्यादावित्यर्थः। 'एतत्' वक्ष्यमाणं 'हावु' (तै.३-१०-५) इत्यादि साम गायन्नास्ते मुक्तचतुर्मुख इति तैत्तिरीयश्रुत्यर्थः। 'त्वः' कश्चिद्ब्रह्मा 'पुपुष्वान्' पुष्टस्सन् ऋचां 'पोषं' पुष्टिमुच्चारणं कुर्वन्नास्ते। 'त्वः' अन्यस्तु ब्रह्मा शाकरीषु ऋक्षु गायत्रं साम गायति। त्वस्तु ब्रह्मा 'जातविद्यां' पौरुषेयविद्यां वदति। त्वस्तु ब्रह्मा 'यज्ञस्य' विष्णोः 'मात्रां उ अंशमेव 'विमिमीते' ध्यायतीति ऋङ्मन्त्रार्थः।

ब्रह्मतर्के च।

'मुक्ता अपि हि कुर्वन्ति स्वेच्छयोपासनं हरेः।
नियमानन्तरं विप्राः कुशाद्यैरप्यधीयते ॥' इति ॥

न केवलं श्रुतौ, किन्तु ब्रह्मतर्के चोपासनमुक्तमिति चशब्दार्थः। 'नियमानन्तरं' नियतस्वाध्यायानन्तरं 'विप्राः' द्विजन्मानः। यथेति शेषः। कुशाद्यैरित्याद्यशब्दात् प्राङ्मुखत्वादि गृह्यत इति तत्त्वप्रदीपोक्तिः। इति ब्रह्मतर्के इत्यन्वयः।

कृष्णो मुक्तैरिज्यते वीतमोहैः ॥ इति च भारते ॥ २७ ॥

किञ्च मुक्तानां यजनाद्यप्यस्ति, किमुतोपासनमिति भावेन चार्थकतुशब्दात् कर्मापि क्रियत इत्युक्तं सूत्रे। तद्विवृतमादिपदेन भाष्यकृता। तत्रार्थे प्रमाणमाह- **कृष्ण इति** ॥ व्याख्यातमिदमंशाधिकरणे। भारते उक्तमित्यन्वयः। अनेन- अस्त्येव 'हानौ' बन्धहानिरूपायां मुक्तौ तदुपासनादि। न च विधिबद्धत्वेन संसारसमानधर्मत्वं मुक्तेः, यतः तत्रोपासनादिविधिं विना

'छन्देन तु' स्वेच्छयैवाङ्गीकृतम्। कुतो ? यतो मुक्तिबन्धहानिर्विधिबन्धहानिरूपा अतः। न चाविहितत्वात् तत्करणानुपपत्तिः, अदर्शनादिति वाच्यम्। कुशाच्छन्दस्तुत्युपगानवदुपपत्तेः। यथा द्विजन्मनां स्वकाले विधिनियतस्वाध्यायानन्तरमपि संस्कारवशात्स्वेच्छया कुशाग्रहणपूर्वं स्तुत्युपगानपदोक्तमन्त्रसामाध्ययनं तद्वत् मुक्तानां संस्कारवशान्मोक्षेऽपि स्वेच्छयैवोपासनोपपत्तेः। न च मुक्तावुपासनमस्ति चेत्स्वेच्छयेति कुतः, वैधमेव किं न स्यादिति वाच्यम्। इतरेषाम् 'उपायनशब्दशेषत्वात्' अयनेन ज्ञानेनोपायनं ब्रह्मसामीप्यादिप्राप्तिः। तथाचोपासनाविधीनां 'ब्रह्मविदाप्नोति' (तै. २-१-१) इति सामीप्यादिरूपमोक्षस्य ज्ञानसाध्यताभिधायकमोक्षवाक्यशेषत्वादित्यर्थः। तथा च मोक्षसिद्ध्यर्थं प्रवृत्ता विधयस्तत्रापि कथं तां विदध्युरिति भावः। न च मुक्तस्योपासनादावेव मानाभाव इति वाच्यम्। यतस्तस्योपासनादि तस्येच्छाधीनत्वं च श्रुतौ भारते ब्रह्मतर्कवाक्ये चोक्तमिति सूत्रार्थ उक्तो भवति।

सू—

ॐ ॥ साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥ ॐ ॥ २८ ॥

स्वेच्छयेत्यङ्गीकर्तव्यं मुक्तस्य तीर्णत्वात्। 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति' (बृ. ३-३-२२) इति ह्यन्ये पठन्ति।

ननु मुक्तस्योपासनं न स्वेच्छया, किन्तु मोक्षे तदा तदा प्राप्तानिष्टपरिहारार्थमेव, कस्यापि निष्फलप्रवृत्तेरदर्शनात् इत्याशङ्कां परिहर्तुं सूत्रम्- **साम्पराय इति ॥** अत्र आच्छन्देनेत्यनुवृत्तपदस्यार्थमाह- **स्वेच्छयेति ॥** इतीति सावधारणम्। न त्वनिष्टपरिहारार्थमित्यवधारणार्थः। तदुपासादीति सम्बध्यते। साम्परायशब्दस्य तात्पर्यार्थमाह- **मुक्तस्येति ॥** पूर्वोत्तरान्वयि तत्। साम्परायशब्दस्तु सम्यक्परस्य आयः प्राप्तिः सम्परायः स एव साम्पराय

इति व्युत्पत्त्या मोक्षार्थक इति पूर्वमेव मोक्ष इत्युक्त्या व्याख्यातः । कुत इत्यतस्साम्पराये तर्तव्यानिष्टस्यैवाभावादिति सूत्र एव हेत्वभिधानात् तमनुपन्यस्य तस्यासिद्धिपरिहाराय तल्लब्धं हेतुमाह- **मुक्तस्य तीर्णत्वादिति** ॥ तीर्णाशेषनिष्टत्वादित्यर्थः । तस्याप्यसिद्धिमाशङ्क्य तत्परिहारत्वेन तथा ह्यन्य इत्येतद्व्याचष्टे- **तीर्णो हीति** ॥ 'तदा' मुक्तौ सर्वान् शोकान् 'तीर्णः' अतिक्रान्तः पुरुषः 'अयनाद्धृदि विष्णुः स हृदयं कीर्तितो बुधैः' इति छान्दोग्यभाष्योक्तः सर्वहृदि स्थितेः हृदयं विष्णुः तस्य 'भवति' तत्सम्बन्धी भवति । तत्प्रतिबिम्बत्वेन तच्छेषभूतो भवतीत्यर्थः । सार्वकालिकस्यापि शेषभावस्य व्यक्त्यपेक्षयाऽत्र भवतीति निर्देशः । अत एव तत्त्वप्रदीपे हृदयस्यैव भवति स्वदृष्ट्याऽपीत्युक्तम् । 'हि' यस्मात् 'अन्ये' छन्दोगाः वाजसनेयिनश्च ।

वायुप्रोक्ते च –

'स्थितप्रज्ञत्वमाप्ता ये ज्ञानेन परमात्मनः ।
ब्रह्मलोकं गतास्सर्वे ब्रह्मणा च परं गताः ॥
तीर्णतर्तव्यभागाश्च स्वेच्छयोपासते परम् ॥' इति ॥ २८ ॥

अत्र स्मृतिं चाह- **वायुप्रोक्ते चेति** ॥ 'ये' जनाः परमात्मनो 'ज्ञानेन' परोक्षेण 'स्थितप्रज्ञत्वं' स्थिता प्रतिष्ठा प्राप्ता प्रज्ञा अपरोक्षज्ञानं येषां ते तथोक्तास्तेषां भावस्तत्त्वं तत्प्राप्ताः तत एव 'ब्रह्मलोकं' सत्यलोकं गताः तत्र चतुर्मुखोपदेशं प्राप्ताः अथ तेन सह 'परम्' आत्मानं गताः बन्धमोक्षाख्यभागयोर्मध्ये तर्तव्यो भागः अंशो बन्धः तीर्णः तर्तव्यभागो यैस्ते तथोक्ताः ते सर्वेऽपि 'परं' परमात्मानं स्वेच्छया उपासत इत्यर्थः । प्रतीकालम्बनविवक्षया 'ब्रह्मलोकं गताः सर्वे' इत्युक्तिरिति केचित् । तत्रान्त्यपादः साध्याभिधायी, उपान्त्यः साधनाभिधायी, अन्ये तदुपपादकसमर्पका इति स्मृतेः प्रकृतोपयोगो द्रष्टव्यः । **इतीति** ॥ इति वायुप्रोक्ते एतदेवोक्तमित्यर्थः ।

॥ इति हान्यधिकरणम् ॥ १७ ॥

॥ १८. छन्दाधिकरणम् ॥

(मोक्षे मुक्ताः स्वेच्छया कर्म कुर्वन्ति)

कर्मापि कुर्वन्ति न वेत्यत आह -

सू— ॐ ॥ छन्दत उभयाविरोधात् ॐ ॥ २९ ॥

अत्राधिकरणे मुक्तानां कर्मणि नियमाभावः समर्थ्यते । प्रासङ्गिकत्वान्नाध्यायादिसङ्गतिः । विषयसंशयौ दर्शयति- **कर्मेति** ॥ मुक्ता इति प्रकृतमस्ति । न केवलमुपासनमित्यपिशब्दार्थः । कर्मकरणशक्तावपीति वा । नियमेनेति शेषः । तथा च इति सन्देहे नियमेन कुर्वन्तीति पूर्वपक्षे प्राप्ते कर्म कुर्वन्ति न वेत्यनियमसिद्धान्तमाह सूत्रकार इत्यर्थः । सूत्रं पठति- **छन्दत इति** ॥ सूत्रे हानावित्यनुवर्तते । तदिति च । तच्च कर्मकरणवाचीत्याशयेन छन्दत इत्यस्यार्थमाह- **स्वेच्छयेति** ॥ स्वेच्छानुसारेणेत्यर्थः । छन्दत इत्यनेन लब्धं साध्यमाह- **कुर्वन्ति न वेति** ॥ अनेन कर्मण्यनियमः सूचितः । कुत इत्यतस्तत्र हेतुत्वेनोभयाविरोधादित्येतद्व्याचष्टे- **वन्धेति** ॥ अनेनोभयस्मिन् कर्मकरणाकरणयोः अविरोधात् विधिबन्धप्रत्यवायाख्यविरोधाभावादिति हेत्वर्थ उक्तो भवति ।

सू—ॐ ॥ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ ॐ ॥ ३० ॥

वन्धप्रत्यवायाभावे हि मोक्षस्यार्थवत्त्वम् । अन्यथा मोक्षत्वमेव न स्यात् ।

ननु मुक्तानां विधिबन्धप्रत्यवायाभाव एव कुत इत्यतः सूत्रम्- **गतेरिति** ॥ अत्रोभयाविरोधादित्यस्यानुवृत्तिमभिप्रेत्य तत्पदं व्याचष्टे- **वन्धेति** ॥ निमित्तसप्तमीयं, विधिबन्धप्रत्यवायाभावादित्यर्थः । सावधारणमेतत् । तेनास्य व्यापकतासिद्धिः । हिशब्दः खल्वित्यर्थे । गतेरित्यस्यार्थमाह- **मोक्षस्येति** ॥

अर्थवत्त्वं' अर्थ इच्छाविषयता तद्वत्त्वं पुरुषैरर्थ्यमानत्वमिति यावत्। 'अन्यथा' विधिबन्धप्रत्यवाययोर्भवि। अर्थवत्त्वमित्यस्य व्याख्या- **मोक्षत्वम्** ॥ मोक्षेच्छावत्त्वमिति। मुचेः सनन्ताद्भावे घञ्, तत अर्शआद्यच्। मोक्षस्य तत्सम्बध्यते, किमु प्राप्यत्वमित्येवार्थः। न स्यादित्यनेन विरोध इत्यस्यार्थ उक्तो भवति। तथाचायं सूत्रार्थः- 'हि' यस्मादुभयाविरोधादेव उभयस्मिन् कर्मकरणाकरणयोर्विधिबन्धप्रत्यवायाख्यविरोधाभावादेव 'गतेः' परमात्मगतिरूपमोक्षस्य 'अर्थवत्त्वं' पुरुषैरर्थ्यमानत्वम्। भावे घञन्तोऽयमर्थशब्दः। अर्थः इच्छाविषयताऽस्यामस्तीत्यर्थवती तस्य भावोऽर्थवत्त्वम्। 'अन्यथा' गतावपि विधिबन्धप्रत्यवाययोर्भवि तस्य विधिबन्धप्रत्ययाख्यसंसारसमानधर्मवत्त्वे तद्वैलक्षण्याभावाद्विरोधः। तस्मान्मुक्तानाम् 'उभयथा' कर्मकरणेन तदकरणेन च स्थितिरिति।

'कदाचित्कर्म कुर्वन्ति कदाचिन्नैव कुर्वते।
नित्यज्ञानस्वरूपत्वान्नित्यं ध्यायन्ति केशवम् ॥'

ननु मुक्तानां कर्मण्यनियमश्चेदुपासनेऽपि तथा स्यादविशेषादित्याकाङ्क्षां परिहर्तुं कर्मोपासनयोः अनियमनियमरूपोक्तार्थे स्मृतिमाह - **कदाचिदिति** ॥ 'मुक्ताः' इति शेषः। अनेन कर्मण्यनियम उक्तः। पूर्ववाद्युक्ताविशेषहेतोरसिद्धिं वक्तुमुपासननियमे हेतुमाह- **नित्येति** ॥ नित्यं भगवद्विषयकं यदपरोक्षज्ञानं तत्स्वरूपत्वान्मुक्तानामित्यर्थः। संसारे भगवदपरोक्षज्ञानस्यामुक्तकर्तृकस्यान्तःकरणवृत्तिरूपत्वेऽपि मुक्तौ अन्तःकरणवृत्तिरूपत्वाभावेन तस्यात्मस्वरूपत्वमेवेति सिद्ध्यति। न च स्वरूपत्वे ज्ञानस्य सकर्तृकत्वानुपपत्तिरिति वाच्यम्। विशेषबलादुपपत्तेः। 'नित्यं' नियमेन ध्यायन्ति। उपासते नित्यं भगवद्दृष्टिकर्तृत्वे नित्यं भगवदुपास्तिकर्तृत्वं कुत इति चेत् दृष्टेरेवोपास्तिरूपत्वात्। यथोक्तं तत्त्वप्रदीपे- नित्यं भगवद्दृष्टिरूपत्वान्मुक्ता नित्यमुपासते। सभक्तिभगवद् दृष्टिरुपास्तिर्भवति। पूर्वमविरतनिरन्तरोपास्त्या हि

भगवन्तमैक्षन्त पश्चादानन्दस्वरूपिणी सा स्वत एवानुवर्तत इति। अस्यार्थः - नित्यं भगवद्दृष्टिस्तत्स्वरूपत्वात्कर्तृत्वान्मुक्ता नित्यमुपासते। उपास्तिकर्तारो भवन्ति। ननु भगवद्दृष्टिकर्तृत्वं उपास्तिकर्तृत्वं कुत इत्यत आह- **पूर्वमिति** ॥ संसारे अन्तःकरणवृत्तिरूपावच्छिन्नोपास्त्या हि भगवन्तमैक्षन्त जडमनसा युक्ताः। पश्चात्संसृत्यनन्तरं मुक्तावानन्दस्वरूपिण्युपास्तिः स्वत एवानुवर्तते। तथाचान्तःकरणवृत्तिरूपायाः दृष्टेः तादृशोपास्ति-साध्यत्वेऽपि न मुक्तकर्तृक-भगवद्दृष्टेरुपास्तिसाध्यत्वं किंत्वात्मस्वरूपत्वमेवेति भवति। सोपास्तिरिति भाव इति।

'तीर्णतर्तव्यभागा ये प्राप्तानन्दाः परात्मनः।
प्रत्यवायस्य बन्धस्याप्यभावात्स्वेच्छया भवेत् ॥'
इति ब्रह्माण्डे ॥ ३० ॥

विध्याद्यभावेऽप्यनिष्टनिवृत्त्यर्थं आनन्दप्राप्त्यर्थं वा कर्मणि नियमः किं न स्यादिति शङ्कायामाह- **तीर्णेति** ॥ व्याख्यातमेतत्। 'परमात्मनः' हरेः प्रसादात् ये प्राप्तानन्दाः तेषामिति शेषः। अपिश्चार्थः। यद्यपीत्याद्यर्थे च। भवेत् कर्मेति शेषः। प्रत्यवायस्येत्यादिनाऽर्धेन कदाचिदिति साध्यवाक्यं हेतूक्तिपूर्वं विवृतं भवति। न च 'सोमेनानन्दं जनयन्' इत्युक्तिविरोधः। कर्मभिरप्राप्ता-नन्दप्राप्तेरेवेह निषिद्धत्वात्। तत्र भोगेनानन्दवैचित्र्यकरणमात्रस्योक्तत्वात्। ब्रह्माण्डे पुराणे नियमानियमौ समर्थिताविति शेषः।

सू—

ॐ ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ॐ ॥ ३१ ॥

उपपन्नश्चैवंभावः। प्राप्तत्वात्तल्लक्षणस्य फलस्य।

ननु विध्याद्यभावो मुक्तानां कर्मानियमसम्भावक एव, न तूपपादकहेतुः, विध्यादिरहितेश्वरकर्तृकसृष्ट्यादिकर्मणि व्यभिचारादतस्तदुपपादकाभावात्

अनुपपन्नोऽसौ कर्मानियम इत्याशङ्कां परिहर्तुं सूत्रम्- **उपपन्न इति** ॥ अत्रोपपन्न इत्यस्य विशेष्यमाह- **एवंभाव इति** ॥ मुक्तानामिति शेषः । छन्दत इति प्रकृतः । कदाचित्कर्म कुर्वन्ति न चेत्येवंस्थितिरित्यर्थः । उपपन्नश्चेत्यनेन न केवलं सम्भावितोऽयम्, किन्तूपपन्नश्चेति समुच्चयार्थकश्चशब्दः सूत्रेऽनुषञ्जनीय इत्युक्तं भवति । तल्लक्षणार्थोपलब्धेरिति हेतुपदस्य तस्य कर्मणः अर्थः फलं परम्परया मोक्षस्तस्योपलब्धेः प्राप्तेरिति, एवं तत् स्वप्राप्त्यनन्तरं स्वसाधनानुष्ठाननियमनिवारणं लक्षणमसाधारणधर्मो यस्यार्थस्य स तथोक्त इति विभागेनार्थमभिप्रेत्य तत्पदं व्याचष्टे- **प्राप्तत्वादिति । तल्लक्षणस्येति** । अत्रापि तत्फलस्य कर्मफलस्य मोक्षस्य तत् स्वप्राप्त्यनन्तरं स्वसाधनानुष्ठाननियमनिवारणं लक्षणमसाधाणधर्मो यस्य फलस्येति द्वेधा व्याख्या कार्या ।

यथा लोके विध्यर्थत्वेन विष्णुक्रमणादिकं कृत्वा समाप्तकर्मेच्छया करोति न करोति च ॥ ३१ ॥

लोकवदिति दृष्टान्तांशं विवृणोति- **यथेति** ॥ विध्यर्थत्वेनेति । यजमानस्य यागविधिपूर्तिलक्षणफलसाधनत्वेनेत्यर्थः । **विष्णुक्रमणादिकमिति** । विष्णुक्रमणं नाम विष्णुमुद्दिश्य क्रियमाणो यागपूर्वाङ्गभूतः कर्मविशेषः । 'समाप्ते' पूर्तिं गते 'कर्मणि' यागे 'इच्छया' स्वेच्छया करोति । यजमान इति शेषः । समाप्तकर्मेति बहुव्रीहिपाठे न शेषः कार्यः । अनेन मुक्ता न कर्मनियमवन्तः, विशेषहेत्वभावे सति प्राप्तफलत्वात् यागकर्तृवदित्यनुमानमुक्तं भवति ।

॥ इति छन्दाधिकरणम् ॥ १८ ॥

॥ १९. अनियमाधिकरणम् ॥

(सर्वेषां ज्ञानिनां मुक्तिरस्ति)

सू — ॐ ॥ अनियमस्सर्वेषामविरोधाच्छब्दानुमानाभ्याम् ॥ ॐ ॥ ३२ ॥

प्राप्तज्ञानानामपि केषाञ्चिन्मुक्तिप्राप्तिः केषाञ्चिन्न यथोपसंहारनियम इति न मन्तव्यम् । 'सर्वे गुणा ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैः' इत्युपसंहारे विरोधादन्यत्राविरोधात् ।

अत्रोपासनोत्पन्नब्रह्मज्ञानानां सर्वेषां मोक्षनैयत्यं साध्यते । सूत्रे नियमपूर्वपक्षनिषेधपूर्वकं अनियम इति साध्यांशं व्याचष्टे- **प्राप्तेति** ॥ 'प्राप्तज्ञानानाम्' उत्पन्नापरोक्षज्ञानानामपीत्यर्थः । न केवलमप्राप्तज्ञानांनां मोक्षो नेत्यपिशब्दार्थः । यद्यपि तथाऽपीत्यर्थे वा अपिः । सिद्धान्तवाक्येनास्यान्वयः । निर्धारणषष्ठीयम् । केषाञ्चित् योग्यानां केषाञ्चित् अयोग्यानाम् । पूर्ववादी नियमे दृष्टान्तमाह- **यथेति** ॥ उपासकेषु केषाञ्चिदेव सर्वगुणोपसंहारो नायोग्यानामित्युपसंहारे यथा पुरुषनियमस्तथा मुक्तावपीत्यर्थः । इतिशब्दो नेत्यनेनापि सम्बध्यते । **नेति** ॥ नियम इति न मन्तव्यमित्यनन्तरं किन्तु सर्वेषामपि मुक्तिरिति शेषः । अनेन सूत्रे तुशब्दानुवृत्तिस्तस्याप्यर्थत्वं मुक्तिरिति शेषश्च सूचितः । अत्र हेतुः- **अविरोधादिति** ॥ तद्व्याचष्टे- **सर्व इति । इतीति** । इति श्रुत्योपसंहारे अनियमनिषेधादित्यर्थः । 'अन्यत्र' सर्वेषां मोक्षे 'अविरोधात्' निषेधाभावादित्यर्थः । 'हि' यस्मात् वेदोक्ताः सर्वे गुणाः 'अन्यैः' ब्रह्मेतरैर्देवैर्नोपास्याः, किमु मनुष्यैर्नेति, तस्मादुक्तैर्वैयर्थ्यायोगाद् ब्रह्मणैवोपास्या इति श्रुत्यर्थः ।

'न कश्चिद्ब्रह्मवित्सृतिमनुभवति मुक्तो ह्येव भवति तस्मादाहुः सृतिहेति' इति कौण्डिन्यश्रुतेश्च । यथा केषाञ्चिन्मोक्ष एवमन्येषामित्यनुमानाच्च ॥ ३२ ॥

नन्वनियमे निषेधाभावेऽपि साधकाभावान्नियम एवेत्यतः प्राप्तं शब्दानुमानाभ्यामित्यंशं व्याचष्टे- **नेति** ॥ कश्चित्' कोऽपि 'ब्रह्मवित्' ब्रह्मापरोक्षज्ञानी 'सृतिं' संसारं, सदेति शेषः । अत्र हेतुः- **मुक्तो हीति** ॥ 'हि'

यस्मात्कदाचित्सृतेः मुक्तो भवति तस्मादित्यर्थः । हेत्वन्तरमाह- **तस्मा-दिति** ॥ सदा सृत्यनुभवाभावादेवैनं मानिजीत्रं 'सृतिहा' सृतित्यागीत्याहु-रित्यर्थः । यद्वा- सृतिनिवर्तकज्ञानविषयत्वादेनं परमात्मानं 'सृतिहा' सृतिघ्न इत्याहुरित्यर्थः । श्रौतेतिशब्दस्य इत्याहुर्वृद्धा इत्यन्वयः । **श्रुतेश्चेति** ॥ न केवलमविरोधादिति चार्थः । अस्यानियम इत्यनेनान्वयः । **केषाञ्चिदिति** ॥ ब्रह्मज्ञानिनां मध्ये केषञ्चिदित्यर्थः । **अन्येषामिति** ॥ सम्प्रतिपन्नेभ्योऽन्येषां विप्रतिपन्नानामित्यर्थः । **इत्यनुमानादिति** ॥ इतिवाक्यस्मारितव्याप्तिमल्लिङ्गा-दित्यर्थः । प्रयोगस्तु- विप्रतिपन्ना ज्ञानिनो नियतमोक्षाः, ज्ञानित्वात् सम्प्रति-पन्नवदिति । श्रुतिसमुच्चये चशब्दः । अनेन- सूत्रे साम्पराय इत्यनुवर्तते, तुरिति च । मुक्तिरिति शेषः । तथा च यथा सर्वगुणोपसंहारे पुरुषनियमस्तथा ब्रह्म-ज्ञानिनां मध्ये केषाञ्चिन्नेति साम्पराये मोक्षे 'नियमः' पुरुषनियमो नास्ति, किन्तु प्राप्तज्ञानानामपि सर्वेषामस्ति मुक्तिः । कुतः ? 'अविरोधात्' तन्निषेधा-भावात् शब्दानुमानाभ्यां साधकाभ्यां च तत्सिद्धेरिति सूत्रार्थ उक्तो भवति ।

॥ इत्यनियमाधिकरणम् ॥ १९ ॥

॥ २०. यावदधिकरणम् ॥

(मुक्तानां योग्यतातारतम्यानुसारेणऽऽनन्दानुभवः)

सू— ॐ ॥ यावदधिकारमवस्थितिराधि-कारिकाणाम् ॥ॐ ॥ ३३ ॥

यथा यथाऽधिकारो विशिष्यते एवं मुक्तावानन्दो विशिष्यते 'मनुष्येभ्यो गन्धर्वाणां गन्धर्वेभ्य ऋषीणामृषिभ्यो देवानां देवेभ्य इन्द्रस्य इन्द्राद्रुद्रस्य रुद्राद्ब्रह्मण एष ह्येव शतानन्दः' इति चतुर्वेदशिखायाम् ।

अत्राधिकरणे उपासनेऽधिकारनियमः समर्थ्यते । नोपस्तिमन्तोऽधिकार-नियमवन्तः मानाभावादिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **याव-दिति** ॥ यथायथेत्यनेन यावदधिकारमित्यव्ययम् अधिकारशब्दितयोग्यतानु-सारेणैवेति व्याख्यातं भवति । **एवमिति** ॥ तथा तथैव, न तु श्रवणादिरूप-स्वप्रयत्नानुसारेणेत्यर्थः । 'विशिष्यते' उत्तरोत्तरमतिशीयते तारतम्येन युक्तो वर्तत इति यावत् । अनेनावस्थितिरिति पदं व्याख्यातम् । सूत्रे साम्पराय इत्यस्य गताविति अस्य वा अनुवृत्तिमभिप्रेत्य तदर्थमाह- **मुक्ताविति** ॥ आनन्द इति अवस्थाप्रकारीभूततारतम्याश्रयकथनम् । अनेन 'आधिकारिकाणाम्' अधि-कारानुसारेणैव अनुष्ठानशीलानां परमेश्वरदत्ताधिकारे वर्तमानानां ब्रह्मादीनां मुक्ताववस्थितिः आनन्दादिगुणतारतम्येन अवस्थानं यदस्ति तत् 'यावदधि-कारमुपासनाधिकारनियमानुसारेणैव भवति न तूपासनादिप्रयत्नानुसारेणेति समग्रसूत्रं हेतुसाध्ययोः व्याप्त्युपपादकतया व्याख्यातं भवति । अनेनास्त्ये-वाधिकारिकाणामुपासनाधिकारनियमः । कुतः ? मुक्तावानन्दतारतम्यसद्भा-वादित्यनुमानं सूचितम् । सूत्रे तारतम्यस्यावधिनिरूप्यत्वेऽपि तत्स्वरूपत्व-ज्ञापनायावस्थितिपर्यन्तधावनम् । अन्यथा तारतम्यमित्येव ब्रूयात् । ननु मुक्ता-वानन्दतारतम्यमेव कुतः । येनोपासनाधिकारनियम इत्यत आह- **मनुष्येभ्य इति** ॥ मनुष्योत्तमेभ्य इत्यर्थः । न चास्य 'अथात आनन्दस्य मीमांसा' (तै. २-८) इत्यादिश्रुतिविरोधः । चक्रवर्तिपित्रादीनामनुक्तेरिति वाच्यम् । सङ्क्षेप-रूपस्यास्य विस्तराविरोधित्वात् । अत्र गन्धर्वपदं देवमनुष्योभयपरम् । ऋषि-ग्रहणेनाजाना अपि परिगृहीताः । 'देवानाम्' इन्द्रावरतात्विकदेवानाम् । षष्ठ्यन्तपदानां श्रुतिगतेन पूर्ववाक्ये विशिष्यत इत्येवंरूपेणान्वयः । अत एव प्राक् स्ववाक्ये विशिष्यत इत्युक्तं, ननु रुद्राच्छतानन्दस्येति क्वचिदुच्यते । ब्रह्मण इति कथमित्यत आह- **एष इति** ॥ हिशब्दः प्रसिद्धौ । चतुर्वेद-शिखायामित्यस्य इत्युक्तमिति शेषेण विशिष्यत इत्यनेनान्वयः ।

अध्यात्मे च -

'ज्ञानं चोपासनं चैव मुक्तावानन्द एव च ।
यथाऽधिकारं देवानां भवत्येवोत्तरोत्तरम् ।।' इति ।। ३३ ।।

ननु मुक्तावानन्दतारतम्यम् उपासनादिरूपप्रयत्नतारतम्येनैव सम्भवत्यतोऽप्रयोजको हेतुरित्यत आह- **अध्यात्मे चेति ।।** चशब्दः परस्परसमुच्चये । 'देवानां' मुक्तियोग्यानां 'यथाधिकारम्' अधिकारानुसारेणैव उपासनं यथोपासनमेव ज्ञानं यथाज्ञानमेव मुक्तावानन्द इत्येते गुणाः उत्तरोत्तरं परस्परसापेक्षा भवन्तीत्यर्थः । अध्यात्मे चेत्यस्यापि पूर्ववदन्वयः ।।

सू— ॐ ।। अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ।। ॐ ।। ३४ ।।

न चासमत्वेन विरोधो भवति । ब्रह्मधीत्वाद्दोषाभावसाम्यादुत्तमेभ्योऽन्येषां भावाच्च ।

ननु मुक्तावानन्दतारतम्यमेव नोपपद्यते असमत्वे मुक्तानां परस्परविरोधप्राप्तेः, लोके तथा दर्शनात् । तारतम्यश्रुतयस्तु संसारविषया इत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **अक्षरधियामिति ।।** असमत्वेन निमित्तेन । अनेन तुशब्दो विरोधनिमित्तसूचकतया व्याख्यातः । विरोधः परस्परं वध्यघातकभावादिः । विरोधप्रयोजकासमत्वस्य सत्त्वात् कथं मुक्तानां विरोधो न भवतीत्यर्थः । तत्र सामान्यादित्यस्य हेतुत्वमभिप्रेत्य सामान्यशब्दितसाम्यप्रतियोगिनं दर्शयति- **दोषाभावेति ।।** सूत्रे दोषाभावादित्येव वक्तव्ये साम्यादित्यधिकोक्तिबलात्सर्वेषामिति लभ्यते । साम्यशब्दार्थः समस्तश इति सुधोक्तेः । तथा च दोषाभावसाम्यादित्यस्यासङ्कुचितसर्वेषां मुक्तानां विषयलम्पटत्वमात्सर्यादि दोषाभावादित्यर्थः । विषयलम्पटत्वं विषयरागः, मात्सर्यमप्रीतिः 'अप्रीतिर्मद्वशो नायमिति मत्सर ईरितः' (नाममहोदधौ १.१८.२९)

इति भागवततात्पर्योक्तेः । अप्रीतिश्चित्ततोदः 'न मद्वशोऽसाविति चित्ततोदं मात्सर्यमार्याः प्रवदन्ति' इति सङ्ग्रहरामायणोक्तेः । ननु मुक्तानां दोषाभाव एव कुतः इत्यत तत्राक्षरधियामिति हेतुगर्भविशेषणेन सूचितं हेतुमाह- **ब्रह्मधीत्वादिति** ॥ 'मुक्ताना'मिति शेषः । ब्रह्मधीत्वात् दोषाभावसाम्यादिति हेतुहेतुमद्भावेन्वयः । देशकालगुणापरिच्छेदवाचिना ब्रह्मशब्देन अक्षरशब्दो व्याख्यातः । तदेतत्सर्वमक्षयगुणगणधाम्नि परमानन्दरूपे परमैश्वर्यरूपे यथेष्टानन्दभोजके भगवति स्थितधियां कुतोऽसमत्वेन विरोधः । रागद्वेषादिदोषाभावसम्याच्च । अन्यथा ब्रह्मदर्शनमेव न स्यात् । रागमत्सरादिल्यपोहेन बहुजन्मसु निरन्तरोपासकानां हि तद्भवतीति तत्त्वप्रदीपेऽभिहितम् । अत्र साम्याच्चेति चशब्दस्योत्तरत्र तद्भावहेतुनाऽन्वयः । असमत्वनिमित्तविरोधाभावे दोषाभावाख्यहेतुमभिधाय हेत्वन्तरप्रतिपादनाय तद्भावादिति सूत्रखण्डः प्रवृत्तः । तं व्याचष्टे- **उत्तमेभ्य इति** ॥ मात्सर्यादिविषयतया प्रपञ्चितेभ्यः उत्तमेभ्यः 'अन्येषाम्' अवराणां ज्ञानादिरूपोपकारस्य 'भावात्' सद्भावादित्यर्थः । यथोक्तं तत्त्वप्रदीपे, यैश्च मत्सराद्विरोध आशङ्क्यते तेभ्य एव परेषां ज्ञानादिगुणभावात्तत्रोत्कर्षो हर्षमाधत्त इति । अनेन सूत्रे तेभ्यः तेषां तस्येति तन्त्रावृत्तिर्दर्शिता भवति । चशब्दो हेतुसमुच्चये । अनेन सौत्रतुशब्दो भिन्नक्रमेण चशब्दार्थतयाऽपि व्याख्यातः ।

औपसदवच्छिष्यवत् । उक्तं च तुरश्रुतौ -

'नानाविधा(देव)जीवसङ्घा विमुक्तौ
न चैव तेषां ब्रह्मधियां विरोधः ।
दोषाभावाद्गुरुशिष्यादिभावात्
लोकेऽपि नासौ किमु तेषां विमुक्तेः ॥' इति ॥ ३४ ॥

ननु विरोधिष्वसाम्यं विषयलम्पटत्वादि च दृश्यते, तत्कथं निश्चिनुमो दोषनिबन्धन एव विरोधो, न त्वसाम्यनिमित्त इत्यतस्तदुत्तरत्वेनौपसद-

वदितत्येतद्व्याचष्टे- **औपसदवदिति** ॥ उप ब्रह्मसमीपं सादयति, गमयत्येनमित्युपसद्गुरुः तस्यायमौपसदः तेन शिक्षणीयः शिष्यः। (उपसीदतीत्युपसदः स एव औपसदः स्वार्थिकोऽण्प्रत्ययः। तथा च शिष्यः इत्यर्थलाभ इति भावः) सच्छिष्यवदिति भाष्यपाठस्तु शिष्यवदित्यस्य तत्त्वप्रदीपानुसारात् सच्छिष्यवदित्यर्थः। न च सूत्रे तदर्थालाभः। आङ्प्रश्लेषेण तल्लाभात्। तथा च दोषासमत्वयोः क्वचिद्विरोधिषु समावेशेऽपि दोषाणामेव विरोधप्रयोजकत्वनिश्चयो युज्यते। असमयोरपि गुरुशिष्ययोर्दोषाभावेन विरोधाभावदर्शनात्। अन्यथा तत्र व्यभिचारापत्तेरिति भावः। स्वोक्तार्थे श्रुतिं चाह सूत्रकृत् - **तदुक्तमिति** ॥ तच्चार्थतुशब्दान्वयेन व्याचष्टे- **उक्तं चेति** ॥ 'देवसङ्घाः' मुक्तियोग्यसमुदायाः। **जीवसंघा इति क्वचित्पाठः** ॥ 'विमुक्तौ' मोक्षे। 'नानाविधाः' तारतम्योपेताः गणशस्सन्तीत्यर्थः 'तेषां' मुक्तानां न विरोधः। कुतो ? दोषाभावात्। अत्र हेतुः- **ब्रह्मधियामिति** ॥ विरोधाभावे हेत्वन्तरमाह- **गुरुशिष्यादीति** ॥ आदिशब्देन स्वामिभृत्यभावो गृह्यते। इममर्थं कैमुत्येनाप्याह - **लोक इति** ॥ 'तेषां' ब्रह्मधियां 'लोके' संसारेऽपि । 'असौ' विरोधो न, कुतो ? दोषाभावाद्गुरुशिष्यादिभावाच्च। ! किमु विमुक्तेः' अनन्तरमिति शेषः।

॥ इति यावदधिकरणम् ॥ २० ॥

॥ २१. इयदामननाधिकरणम् ॥

(मुख्यप्राणादूर्ध्वम् अधिकारिणोऽभावात् प्राणावसानमेवाधिकारितारतम्यम्)

सू— ॐ ॥ इयदामननात् ॥ ॐ ॥ ३५ ॥

नामाद्यारभ्य प्राणान्तमुत्तरोत्तरमुत्तमत्वमुक्तम्। न प्राणात् किञ्चिद्भूय उक्तम्। तथापि पूर्ववत्स्यादिति न वाच्यम्।

अत्राधिकरणे उपासनाधिकारिणां प्राणावसानत्वं समर्थ्यते। सूत्रं पठति- इयदिति ॥ तथापि पूर्ववत्स्यादित्यनेन द्वितीयसूत्रसूचितपूर्वपक्षं प्रदर्शयिष्यन्

पूर्वपक्षे बाधकमाशङ्कते- **नामादीति** ॥ यद्यपि छन्दोगश्रुताविति वाक्यं प्रागध्याहार्यम् । नामादीत्यादिपदेन नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नाप्तेज आकाशस्मराशा गृह्यन्ते । नामादिशब्दाश्च उषास्वाहापर्जन्यमित्राग्निवरुणविधुप्रवहानिरुद्धाहङ्कारिकप्राणेन्द्रोमारुद्रवाणीपराः । 'प्राणान्तं' मुख्यवायुपर्यन्तम् 'उत्तरोत्तरोत्तमत्वं' पूर्वपूर्वापेक्षयोत्तरोत्तरमाधिक्यमुक्तमित्यर्थः । 'प्राणात्' मुख्यप्राणात् 'किञ्चित्' वस्त्विति शेषः । 'भूयः' अधिकं नोक्तमित्यन्वयः । तथा च प्राणः स्वोत्तमाधिकारियुक्तः अधिकारित्वात् नामाधिकारिवदिति पूर्वपक्षसाधकानुमानेऽनुक्तिः बाधिकेति भावः । बाधकं परिहरन् द्वितीयसूत्रदर्शितपूर्वपक्षमाह- **तथापीति** ॥ **पूर्ववदिति** ॥ श्रुतौ पूर्वगृहीतनामादिवदित्यर्थः । **स्यादिति** ॥ प्राणादधिकोऽधिकारी साध्यः स्यादित्यर्थः । अधिकारित्वाद्धेतोरिति शेषः । अनुक्तिस्तु प्रमाणदुर्बलत्वान्न बाधिकेति भावः । सिद्धान्तयति- **नेति** ॥ न वाच्यमित्यनन्तरं किन्तु अधिकारिणामपि 'इयत्' इयत्त्वमेव प्राणावधित्वमेवेति तदर्थः ।

'प्राणो वाव सर्वेभ्यो भूयान्न हि प्राणाद्भूयान् प्राणो ह्येव भूयांस्तस्माद्भूयान्नाम' इति कौण्ठरव्यश्रुतेः ॥ ३५ ॥

कुत इत्यतः प्रवृत्तम् आमननादिति हेत्वंशं व्याचष्टे- **प्राण इति** ॥ वावेत्यवधारणे । 'हि' यस्मात्प्राणात् 'भूयान्' अधिकः कोऽपि नास्ति तत्स्मात् प्राण एव सर्वेभ्यो भूयान्, प्राण एव भूयानिति निगमनम् । यस्मात्प्राणो भूयानधिकः तस्मात्प्राणो लोके 'भूयान्नाम' भूयश्शब्दवाच्यतया प्रसिद्ध इत्यर्थः ॥

सू—

ॐ ॥ अन्तरा भूतग्रामवदिति चेत्तदुक्तम् ॥ ॐ ॥ ३६ ॥

यथा भूतग्राम एकस्मादेक उत्तमोऽस्त्येव एवं प्राणादपि परमात्मानमन्तरा विद्यत इति चेन्न, प्राणादुत्तमाभावे

प्रमाणमुक्तम् । अन्यत्रोत्तमाभावे न प्रमाणम् । दृश्यते चान्यत्रोत्तमत्वम् ॥ ३६ ॥

उक्तमाक्षिप्य समाधातुं सूत्रम्- **अन्तरेति** ॥ अत्राक्षेपांशं व्याचष्टे- **यथेति** ॥ यथा 'भूतग्रामे' प्राणि समूहे नामादौ 'उत्तमो' विशिष्टोऽस्त्येव, तथा प्राणादप्युत्तमो विद्यत इति साध्यत इत्यर्थः । ननु परमात्मनः श्रियश्चोत्तमत्वाङ्गीकारेण सिद्धसाधनमित्यत उक्तम्- **अन्तरेति** ॥ सौत्रपदं व्याचष्टे- **परमात्मनमिति** ॥ श्रियोऽप्युपलक्षकमेतत् । अनेन सूत्रे अक्षरमिति पदानुषङ्गस्सूचितः । 'अन्तरा' विना । नञाकर्षेण परिहारांशं व्याचष्टे- **नेति** ॥ तेनानुमानेन प्राणादप्युत्तमः साध्य इत्यर्थः । कुतो नेत्यतस्तत्र हेतुत्वेन तदुक्तमित्यंशं व्याचष्टे- **प्राणादिति** ॥ 'प्रमाणम्' 'प्राणो वाव सर्वेभ्यो भूयान्' सति श्रुतिरूपम् । उक्तमित्यनन्तरं यत इति शेषः । तथाचाधिकारित्वादित्यनुमानस्यागमबाध इति भावः । ननु नास्मदनुमानस्य बाधः, प्राणादुत्तमाभावे नामादेरप्युत्तमो न स्याधिकारित्वाविशेषादिति अनुकूलतर्कसाहाय्येन इतरानुमानापेक्षया प्रबलत्वादित्याशङ्क्य [१]आकृष्टनञावृत्त्या अन्यत्रेत्यध्याहारेण च परिहरति- **अन्यत्रेति** ॥ नामादावुत्तमाभाव इत्यर्थः । नन्वभाव इव भावेऽपि न प्रमाणमस्तीत्यतः तदुत्तरत्वेन दृश्यत इति पदाध्याहारेण तदित्येतद्योजयति- **दृश्यते चेति** ॥ 'अन्यत्र' वागादौ नामाद्युत्तमत्वं 'दृश्यते' उच्यते 'छान्दोग्ये' इति शेषः । न केवलमन्यत्रोत्तमाभावो न दृश्यते, किन्तूत्तमसद्भावो दृश्यते प्रमीयते चेति चशब्दार्थः । तथा च प्रतितर्कस्य प्रमाणबाध इति भावः । अनेन 'तत्' तत्र प्राणादुत्तमाभावे तच्छ्रुतिरूपं प्रमाणमुक्तम्,भूतग्रामे तु नोत्तमाभावे प्रमाणम् । प्रत्युत तत्सद्भाव एव दृश्यत इति सूत्रखण्डार्थ उक्तो भवति ।

सू—ॐ ॥ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॥ ॐ ॥ ३७ ॥

---

१. आकृष्टनञावृत्त्या इति कोशे नास्ति ।

प्राणस्य सर्वोत्तमत्वे परमात्मना भेदानुपपत्तिरिति चेन्न, श्रुत्युपदिष्टवदुपपत्तेः । अन्येभ्यः प्राणस्योत्तमत्वं तस्मात्परमात्मनो ह्युपदिष्टम् ॥ ३७ ॥

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्य व्याचष्टे- **अन्यथेति** ॥ अत्रान्यथाशब्दार्थमाह- **प्राणस्येति** ॥ 'सर्वोत्तमत्वे' इत्युपलक्षणम् । प्राणादुत्तमाधिकार्यभावे 'प्राणो वाव सर्वेभ्यः' (कौण्ठरव्य) इति श्रुतिस्थसर्वशब्दस्य निरुपचरितसवार्थत्वाङ्गीकारे चेत्यपि अन्यथाशब्दार्थो ज्ञातव्यः । सूत्रे अक्षरेणेत्यनुषक्तपदस्यार्थमाह- **परमात्मनेति । भेदेति** ॥ प्राणस्येति वर्तते । सर्वोत्तमद्वयायोगादिति भावः । एवम् 'अन्यथा' श्रुतिस्थसर्वशब्दस्य सङ्कुचितार्थत्वे परमात्मानं च श्रियं च विनेतिवत्कतिपयाधिकारिणश्च विनेत्यपि वक्तुं शक्यत्वाद्विवक्षितसिद्ध्यनुपपत्तिरिति सूत्रखण्डवृत्त्यन्तरमपि भाष्याभिप्रेतं द्रष्टव्यम् । परिहारांशं व्याचष्टे- **नेति** ॥ नोक्तदोषप्राप्तिरित्यर्थः । कुत इत्यतः कर्मणि घञन्तत्वमाश्रित्य यत उपदेशवदुपपद्यत इति हेत्वंशं व्याचष्टे- **श्रुतीति** ॥ छन्दोग-श्रुत्युक्तप्रकारेणैव श्रुत्यन्तरस्थसर्वशब्दस्य सङ्कोचोपपत्तेः । अत एव प्राणपरमयोः भेदोपपत्तेरित्यर्थः । तथा च द्वितीयपक्ष एवाङ्गीक्रियते । सङ्कोचनियामकं तु श्रुतिवाक्यमेवेति भावः । किं तच्छ्रुत्युपदिष्टमित्यत आह- **अन्येभ्य इति** ॥ स्वव्यतिरिक्तसर्वाधिकारिभ्य इत्यर्थः । 'तस्मात्' प्राणात् । हिः प्रसिद्धौ हेतौ वा । 'उपदिष्टम्' उक्तं छन्दोगश्रुतौ । तस्मात् विष्णुव्यतिरिक्तसर्वार्थत्वं श्रुतेरिति वाक्यशेषः ।

॥ इतीयदामननाधिकरणम् ॥ २१ ॥

॥ २२. व्यतिहाराधिकरणम् ॥

(परमात्मा प्राणादधिकः)

नेति चेन्न -

सू— ॐ ॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥ ॐ ॥३८॥

उक्तं प्राणात्परमात्मन उत्तमत्वं पूर्वोक्ताध्याहारेण ।

अत्राधिकरणे उपासनाधिकरिणः प्राणात्परमेश्वरस्योत्तमत्वं प्रसाध्यते । पूर्वपक्षयति- **नेति** ॥ छन्दोगश्रुतौ प्राणस्यैव सर्वोत्तमत्वमुक्तम्, न तु प्राणात्परमात्मनः । न च वाच्यं सत्यपदोदितस्य विष्णोः प्राणादाधिक्यमुक्तमिति । कुतो ? यतो भूतग्रामवत्प्रश्नप्रतिवचनरूपप्रकरणभेदकल्पकं न, यतश्च 'एष तु वा अतिवदति । यः सत्येनातिवदति' इत्युक्तम्, सत्यत्वं प्राणविशेषणमेव न विष्णुविशेषणम्, अत इत्यर्थः । पूर्वपक्षं प्रतिषेधति- **नेति** ॥ प्रश्नादिरूपप्रकरणभेदकल्पकाभावात् सत्यत्वस्य प्राणविशेषणतया विष्णुविशेषणत्वाभावात् न प्राणाद्विष्णोरुत्तमत्वमुक्तमित्यर्थः । कुतो नेत्यतः सूत्रं पठित्वा व्याचष्टे- **व्यतिहार इति** ॥ यतश्छान्दोग्ये 'पूर्वोक्ताध्याहारेण' पूर्वेषु नामादिप्रकरणेषु 'अस्ति भगवो नाम्नो वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति' (छा. ७-१-५) 'वाग्वाव नाम्नो भूयसी' (छा.७-२-१) इत्युक्तवाक्यसदृशस्य 'अस्ति भगवः प्राणाद् भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति सत्यं वाव प्राणाद्भूयः' इत्येवंरूपस्य प्रश्नप्रतिवचनरूपवाक्यस्याध्याहारेण प्रकरणभेदकल्पनया सत्यस्य विष्णोः प्राणादुत्तमत्वमुक्तं अतो नेति योजना । अनेन यतः इतरवत् 'व्यतिहारः' अध्याहार इति हेत्वंशो व्याख्यातः । श्रुतौ 'भगवो'भगवन्निति नारदकर्तृकप्रश्नस्य 'सत्यं वाव' इति सनत्कुमारकर्तृकं प्रतिवचनम् ।

'एष तु वा अतिवदति' (छां.७-१६) इति विशिंषन्ति हि ।

नन्वध्याहारे कारणाभाव इत्यतस्तत्र हेतुत्वेन विशिंषन्तीत्यंशं व्याचष्टे- **एष तु वा अतिवदतीति ॥ विशिंषन्ति हीति ॥** छान्दोग्ये 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति । तं चेद् ब्रूयुरतिवाद्यसीति । अतिवाद्यस्मीति ब्रूयात् । नापह्नुवीत' (छा. ७-१५) इति प्राणवादिनोऽतिशयितवस्तुवादित्वेनातिवादित्वमुक्तम् । ततश्च 'एष तु वा अतिवदति यः

सत्येनातिवदति' इति सत्याख्यवस्तुवादिनोऽप्यतिवादित्वमुच्यते । तत्र प्राणातिवादिनः सकाशात्सत्यातिवादी तुशब्देन विशिष्यते । तथा च 'हि' यस्माच्छन्दोगाः प्राणातिवादिनः सकाशात्सत्यातिवादिनं 'विशिंषन्ति' अतिशयितवस्तुवादित्वविशेषणयुक्ततया आमनन्ति । एवं सत्यवादिनं विशिंषन्तः प्राणात्सत्यत्वं विशिंषन्ति । तेन ज्ञायते अन्योऽसावन्योऽसाविति । तस्मात् प्रकरणभेदकसद्भावात्प्राणप्रकरणात्परस्तात् 'एष तु वा' इत्यतः प्राक् 'अस्ति भगवः' इत्यादिप्रश्नप्रतिवचनाध्याहारः कार्य इत्यर्थः । स एषोऽधिकारी एवं शृण्वान एवं विजानन्नेवं ध्यायन्नेवं पश्यन् 'अतिवादी' अतिशयितमुत्तमं मुख्यप्राणाख्यं वस्तु वदतीत्यतिवादी भवति 'तं' प्राणातिवादिनं प्रति यदि त्वमतिवाद्यसीत्यन्ये ब्रूयुः, तदा सत्यमतिवाद्यस्मीति ब्रूयात् नापह्नुवीतैव' नैवापनीयेतेत्यर्थः । योऽधिकारी सन् निर्दोषश्चासौ यो नियामकश्चेति सत्यो विष्णुस्तेनातिवदति तमतिवदति एष एव तु प्राणातिवाद्यपेक्षया विशेषेणाति-वदति अतिशयितमुत्तमं वस्तु वदतीत्यर्थः ॥

यथेतरेषु विशेषणम् ।

ननु कथमिदं विशेषणं प्रकरणभेदकं, येन प्रश्नाद्यध्याहारं प्रतिपद्येमहीत्यतः तदुत्तरत्वेनापि इतरवदित्यंशं व्याचष्टे- **यथेति** ॥ 'इतरेषु' वागादिषु । प्रयुक्तमिति शेषः । 'वाग्वा व नाम्नो भूयसी' इत्यादिकं विशेषणं प्रकरण-भेदकमित्यर्थः । वाचो नामाधिक्यरूपातिशयाभिधायकत्वादिति भावः । तथैतदपीति वाक्यशेषः । यस्सत्येनातिवदति सतु प्राणातिवादिनोऽप्यतिशयितं वस्तु विशेषेण वदतीति वचनमुखेन प्राणात्सत्यस्य आधिक्यवाचकत्वादिति भावः । अनेनेतरवदित्यस्य विशिंषन्ति हीत्यनेनापि सम्बन्धः सूचितः । अनेन न विष्णोः प्राणादुत्तमत्वाभावः, यतस्तच्छ्रुत्युपदिष्टं, न च प्रश्नाद्यभावात्प्राणपरैव श्रुतिः, यत इतरवत्प्रकरणान्तरवत्प्रश्नाद्यध्याहारः कर्तुं शक्यः । न चात्र कारणाभावः । हि यतः छन्दोगाः इतरवद्विशिंषन्ति 'वाग्वाव नाम्नो भूयसी'

इत्यादिना नामादितो वागादिकमिव 'एष तु वा इति' तुशब्देन प्राणात्सत्यं विशिंषन्त्यत इति सूत्रार्थ उक्तो भवति ।

'उत्तमत्वं हि देवानां मुक्तावपि हि मानवात् ।
तेभ्यः प्राणस्य तस्माच्च नित्यमुक्तस्य वै हरेः ॥'
इति बृहत्तन्त्रे ॥ ३८ ॥

उक्तार्थे हिशब्दसूचितां स्मृतिं चाह- **उत्तमत्वमिति** ॥ 'देवानां' नामादि-देवानां 'मानवात्' मनुष्योत्तमादिति । उपलक्षणम् । मुक्तावप्युत्तमत्वमस्ति किमु संसारे इत्यर्थः । 'तेभ्यो' देवेभ्यः 'प्राणस्य' मुख्यवायोः 'तस्मात्' प्राणात् । चस्त्वर्थः । नित्यमुक्तस्येति हेतुगर्भम् । हरेरुत्तमत्वमिति सम्बन्धः । बृहत्तन्त्र इत्यस्योक्तमिति पूर्ववाक्येनान्वयः ॥

॥ इति व्यतिहाराधिकरणम् ॥ २२ ॥

॥ २३. सत्याधिकरणम् ॥

(छान्दोग्ये सत्यादिप्रकरणोक्ताः सत्यादयः भगवत्स्वरूपभूताः)

कृतिर्निष्ठा ज्ञानमित्यादीनां भेदाद्बहव उत्तमा इति चेत् -

अत्राधिकरणे प्राणाद्विष्णोरेवोत्तमत्वं साध्यते । पूर्वपक्षयति- **कृतिरिति** ॥ बहव इत्यनन्तरं अपीति, इत्यादीनामित्यनन्तरमुक्तत्वादिति च शेषः । तथा च न केवलं प्राणात्सत्यपदोक्तो विष्णुरेवोत्तमः, किन्तु बहवोऽप्युत्तमास्सन्ति । कुतः? कृतिः निष्ठा ज्ञानमित्यादिशब्दवाच्यानां बहूनां सत्यादुपर्युक्तत्वादित्यर्थः । आदिपदेन सत्यं विज्ञानं मतिः श्रद्धा सुखं भूमा अहङ्कारः आत्मेति शब्दवाच्या गृह्यन्ते । ननु विज्ञानादीनां सत्येनान्योन्यं चाभेदान्न बहूनामुत्तमत्वं, किन्त्वेकस्यैवेत्यत आह- **भेदादिति** ॥ सत्येनान्योन्यं चेति शेषः । **बहव इति** ॥ प्राणादुत्तमा बहव एव स्युः, नत्वेकः सत्यपदोदितो विष्णुरित्यर्थः । तत्त्वप्रदीपे तु सत्यस्य परमात्मत्वे सत्यादीनां भेदात्परमात्मनोऽपि बहव

उत्तमाः स्युरिति पूर्वपक्षो दर्शितः। यद्यपि छान्दोग्ये सत्यादनन्तरं विज्ञानं मतिः श्रद्धा निष्ठा कृतिः सुखं भूमा अहङ्कार आत्मेति क्रमो, न तु कृत्यादित्वेन। तथापि सूत्रे अक्षरस्य प्रकृतत्वात् तदिति वक्तव्ये श्रुतिस्थ कृत्यादिशब्दानुसारेण सेति स्त्रीलिङ्गनिर्देशात्तदनुसारेणात्र कृत्यादित्वेनोक्तिः। न चैवं मत्यादित्वेनोक्तिः स्यादिति वाच्यम्। 'सत्यं पूर्णं कृतिः पूर्णा निष्ठा पूर्णा श्रद्धा पूर्णा' इत्यादिश्रुत्यन्तरानुरोधेन सत्यादनन्तरं कृतिर्निष्ठेति क्रमेण निर्देशात्। तत्त्वप्रदीपे तु लक्ष्मीरपि सत्यादिगुणकत्वात्सत्यादिपदैरुच्यते। तथा च तद्विवक्षया सैवेति स्त्रीलिङ्गशब्दप्रयोग इत्युक्तम्। तथा स्त्रीलिङ्गोक्त्या कृतिर्निष्ठेत्यादिशब्दवाच्यत्वं विष्णोरुचितमिति चोक्तम्।

न,

सू— ॐ ॥ सैव हि सत्यादयः ॥ ॐ ॥ ३९ ॥

सत्यादिगुणास्तस्या एव परदेवतायाः स्वरूपभूताः।

पूर्वपक्षं प्रतिषेधति- **नेति** ॥ न प्राणादधिकाः बहव इति युक्तमित्यर्थः। तत्त्वप्रदीपदिशा तु न तु परमात्मनोऽपि बहव उत्तमाः शङ्क्या इत्यर्थः। एवं प्रतिज्ञां बहिरेव प्रदर्श्य कुतो नेत्यतः तत्र हेतुत्वेन सूत्रमुपन्यस्य व्याचष्टे- **सैवेति** ॥ 'हि' यस्मात्सत्यादयोऽहङ्कारान्ताः 'सा' अक्षरशब्देन प्रकृता ईश्वराख्या परदेवतैव, न तु ततो भिन्नाः तस्मादित्यर्थः। **तस्या एवेति**। अक्षरशब्देन प्रकृताया एवेत्यर्थः। सत्यादयः आत्मान्ताः सा परदेवतैवेति व्याख्यातव्ये सत्त्यादयो गुणाः तस्या एव स्वरूपभूता इति व्याख्यानं सत्यादिशब्दवाच्यानां भेदनिराकरणेन अभेदसाधनार्थम्। अनेन कथमभेदसिद्धिरिति चेदित्थम्- 'सत्यं भगवो विजिज्ञासे' (छा. ७.१६) इति नारदस्य सत्याख्यस्य विष्णोः गुणजिज्ञासायां सनत्कुमारेण 'यदा वै विजानात्यथ सत्यं वदति नाविजानन् सत्यं वदति इति वाक्यशेषेण सत्याख्यविष्णुगुणत्वेन तदविनाभूतज्ञानस्योक्तत्वात्, तथोत्तरत्रापि तत्तद्गुणजिज्ञासायां तत्तदविना-

भूतमत्यादीनामेवोक्तत्वादभेदसिद्धेः। अन्यथा सत्यादिजिज्ञासायां विज्ञानादि-कथनस्यासङ्गतत्वापातात्।

ब्रह्मतर्के च ।

'नामादिप्राणपर्यन्तात् यो हि सत्यादिरूपवान् ।
तस्मै नमो भगवते विष्णवे सर्वजिष्णवे ॥' इति ॥

गुणत्वयुक्तिसिद्धाभेदरूपार्थे हिशब्दसूचितां स्मृतिं चाह- **ब्रह्मतर्के चेति ॥** न केवलं सूत्र इति चार्थः। यो नामादिप्राणपर्यन्तात् अधिकारिजातात् 'अधि' उपरि 'सत्यादिरूपवान्' सत्यादिशब्दवाच्यगुणवानुक्तः, गुणस्वरूपतयोक्तः, तस्मै भगवते 'सर्वजिष्णवे' सर्वजयशीलाय विष्णवे नम इत्यन्वयः। **'नामादिप्राणपर्यन्ताद्यो हि सत्यादिरूपवान्'** इति पाठे उपरिश्रुत इति आधिक्येनेति वा शेषः। हिः प्रसिद्धौ।

'सत्याद्या अहमात्मान्ता यद्गुणास्समुदीरिताः ।
तस्मै नमो भगवते यस्मादेव विमुच्यते ॥'
इति चाध्यात्मे ॥ ३९ ॥

नन्वस्तु भूमान्तानां भगवद्गुणोक्त्या तेनाभेदः, न त्वहङ्कारात्मनोः, तयोरभेदानुक्तेरित्यत आह- **सत्याद्या इति ॥** सत्यविज्ञानमतिश्रद्धानिष्ठाकृति-सुखभूमान इत्यर्थः। 'अहमात्मान्ताः' बहुव्रीहिः। अहङ्कारात्मान्ताः शब्दाः 'यद्गुणाः' यस्य परस्य गुणस्य वाचकाः समुदीरिताः प्रमाणे तस्मै भगवते नम इत्यर्थः। अहङ्कारात्मनोः सत्यादाविव गुणप्रश्नप्रतिवचनपूर्वकमभेदानुक्तावपि अस्त्येव भगवत्स्वरूपत्वमित्यत्र हेतुर्यस्मादिति। यस्मादहङ्कारात्मनोः ज्ञानात् यस्मात् 'सवा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स्वराट् भवति' (छा.७-१२-४) इति वाक्यशेषे बन्धाद्विमुच्यत इत्युक्तम्, तस्मात्तयोस्तत्स्वरूपत्वमित्यर्थः। श्रुतावात्मशब्दो

विष्णुपरः, तस्मिन् रत्यादिमान् 'स्वराट्' स्वतन्त्रो बन्धरहित इत्यर्थः। 'इति ब्रह्मतर्के' 'इति चाध्यात्मे' इत्युभयत्राप्युक्तमिति शेषः। अनयोः अतस्सत्यादय इति पूर्वेणान्वयः।

॥ इति सत्याधिकरणम् ॥ २३ ॥

॥ २४. कामाधिकरणम् ॥

(लक्ष्मीः नित्यमुक्ताऽपि भक्तिविशेषाद् उपासनां करोति)

प्रकृतेरपि जन्मादेः संसारप्राप्तेः किमिति नामादिष्वपाठ इति।

अत्राधिकरणे श्रिय उपासनानधिकारित्वं साध्यते। पूर्वपक्षयति- **प्रकृतेरिति** ॥ न केवलं प्राणादेः किन्तु चित्प्रकृतेर्लक्ष्म्या अपि उपासनाधिकारोऽस्त्येवेति प्रतिज्ञायां हेतुमाह - **संसारेति** ॥ 'प्राप्तेः' सिद्धेः। साधुत्वाच्चेत्यापि द्रष्टव्यम्। नन्वसिद्धः संसार इत्यत आह- **जन्मादेरिति** ॥ सीतारुग्मिण्यादिरूपेण जन्ममरणादेर्दर्शनात्। 'यतः प्रसूता' (महा.१) इत्यादिश्रुतेश्चेत्यर्थः। अधिकारसिद्धेः फलमाह - **किमिति** ॥ कस्माद्धेतोरित्यर्थः। नामादिषु मध्ये ! किमिति। किं निमित्तः 'अपाठो' पाठाभावः किंप्रयुक्त इत्यर्थः। किन्तु तदध्याहारः। तत्पाठोऽध्याहर्तव्य एवेत्यर्थः। स च भवन् प्राणादुपरि एव भवेत्। तथा च नाधिकारिणां प्राणावसानत्वमिति भावः।

अत्रोच्यते -

सू—ॐ ॥ कामादितरत्र तत्र चायतनादिभ्यः ॥ ॐ ॥४०॥

स्वेच्छयैव मूलस्थाने स्थिताऽन्यत्र चावतारान् करोतीश्वरेच्छानुसारेण।

सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **अत्रेति** ॥ अत्रास्मिन् पूर्वपक्षे सिद्धान्त

उच्यते सूत्रकृतेत्यर्थः । सूत्रं पठति- **कामादिति** ॥ अत्र कामादित्येत्स्वकामपरतया व्याख्याति- **स्वेच्छयेति** ॥ सौत्रचशब्दस्य कामाच्चेत्यन्वयमभिप्रेत्यार्थमाह- **एवेति** ॥ न कर्मत इत्यर्थः । अनेनेन्द्रादिवज्जननादिकं निरस्तं भवति । तत्रेत्यनन्तरं शेषं दर्शयन् तदर्थमाह- **मूलेति** ॥ मूलरूपेण 'मूलस्थाने' वैकुण्ठादौ भगवत्समीपे स्थितेत्यर्थः । अनेन प्रकृतेः इतरजननवत् मुख्यजननादिर्निरस्तो भवति । चशब्दस्येतरत्र चेत्यपि सम्बन्धं समुच्चयार्थत्वं चाभिप्रेत्य इतरत्रेत्यस्यार्थमाह- **अन्यत्र चेति** ॥ भूम्यादावपीत्यर्थः । सूत्रे इतरत्रेत्यनन्तरमध्याहार्यं दर्शयति- **अवतारेति** । बहुवचनमाद्यर्थे । अवतारादि करोतीत्यर्थः । 'अवतारो' जनप्रत्यक्षविषयता । आदिपदेनैतदविषयत्वरूपा मृतिर्गृह्यते । यद्वा- अवतीर्यमाणसीतारुग्मिण्यादिरूपबाहुल्याद्बहुवनम् । मरणादेरुपलक्षणमेतत् । 'करोति' प्राप्नोति । अनेन जननादेरवतारादिविषयत्वेनान्यथासिद्धिरुक्ता भवति । कामादित्यस्येशकामादित्यप्यर्थमाह- **ईश्वरेति** ॥ अनेन प्रकृतेःस्वातन्त्र्यशङ्का निरस्ता भवति । अत्रेश्वरेच्छानुसारेण वर्तमानया स्वेच्छयैव मूलस्थाने स्थितेन तेन सहैवान्यत्र च तेन सहावतारान् करोतीति तत्त्वप्रदीपोक्तार्थविशेषो बोध्यः । करोतीत्यस्य प्रकृतिरिति विपरिणतेन सम्बन्धः ।

'सर्वायतना सर्वकाला सर्वेच्छा सर्वज्ञा न वद्धा वन्धिका सैषा प्रकृतिरविकृतिः' इति वत्सश्रुतेः ।

मूलरूपेण भगवत्समीपे स्थिता स्वेच्छयैवावतारान् करोतीत्येतत्कुतः इत्यतः तत्र हेतुत्वेन आयतनादिभ्य इत्यंशं व्याचष्टे- **सर्वायतनेति** ॥ सर्वं जगदायतनमाश्रयो यस्यास्सा तथोक्ता । सर्वः कालः आश्रयो यस्याः सा तथोक्ता । आभ्यां देशकालानन्त्यमुच्यते । सर्वमिच्छाधीनं यस्यास्सा 'सर्वेच्छा' सर्वं जानातीति 'सर्वज्ञा' । **'सर्वावस्था'** इति पाठे सर्वजनस्य सर्वोऽपि जाग्रदाद्यवस्था यस्याः सा तथोक्तेत्यर्थः । तत्त्वप्रदीपे तु सर्वः पूर्णो

विष्णुस्तस्यायतनमेवास्या आयतनम्, तत्काल एव कालः तस्मादेव च इच्छा चेत्यर्थः उक्तः। स्वयं क्वचिदपि न बद्धा बन्धिका च सर्वजीवानाम् 'अविकृतिः' विकाररहिता। अचेतनप्रकृतिव्यावृत्त्यर्थमिदं विशेषणम्। सर्वेच्छा सर्वज्ञेत्येतच्च न व्यावर्तकं, जडेऽपि ज्ञानेच्छोपादानत्वेन तथोक्तिसम्भवात्। या एवंभूता सैषा चित्प्रकृतिरिति श्रुत्यर्थः। इतिवत्सश्रुतेरित्यनेन आयतनादिभ्य इति सौत्रपदस्य भावप्रधानगर्भितस्य सर्वायतनत्वादिबोधकश्रुतेरित्यर्थ उक्त भवति। सूत्रे बहुवचनं तु [1]श्रुतिप्रतिपाद्यबहुत्वाद्युक्तमिति भावः।

'नामादयस्तु बद्धत्वान्मोचकत्वात्परोऽपि च।
उभयोरप्यभावेन यथाऽव्यक्तं न तूदितम्।
श्रुतौ तथा जीवपरावुच्येते किञ्च नेतरत्।
नोच्यते च तदा तत्त्वद्वयं वै समुदाहृतम्॥'

इति ब्रह्मतर्के॥ ४०॥

नन्वेवं प्रकृतेरसंसारित्वेनानधिकारित्वेऽपि कुतः छन्दोगश्रुतौ नामादिष्वपाठः, भगवदुक्तिवत्तारतम्यकथनावसरे तदुक्तेरावश्यकत्वात्। अन्यथा प्रकृतेरभावप्रसङ्गादित्यतः सूत्रचशब्दसूचितां स्मृतिमाह- **नामादयस्त्विति॥** तुशब्दो विशेषार्थः। चशब्दोऽवधारणे। तथा च यथा छन्दोगश्रुतौ बद्धत्वान्निमित्तादेव नामवागादय उदिताः। मोचकत्वादेव परमात्माऽप्युदितः। उभयोर्बन्धमोचकत्वयोरभावेनैव 'अव्यक्तं' श्रीतत्त्वं 'नोदितं' नोक्तं, न तु तस्या अभावान्निमित्तात्। तथा 'द्वा सुपर्णा' (मु.३.१) इति श्रुतौ 'स्वाद्वत्ति' इत्युक्तात्कर्मवद्धत्वात् 'सखाया' उपकार्योपकारिणावित्यनेनोक्तात् मोचकत्वादेव जीवपरमात्मानावेवोच्येते। न तु ताभ्याम् 'इतरत्' अन्यत्किञ्चिज्जडमुच्यते। अनेन बुद्धिजडपरतया व्याख्यानं निरस्तं भवति। यदा चैवमुक्तिः तदा श्रुतौ

---

१. श्रुतिपाठबहुत्वात् इति कोशे।

ईश्वरः प्रकृतिर्जीवो जडं चेति चतुष्टयम्।
पदार्थानां समुद्दिष्टम् .....॥ (बृ.भा.३.५.१)

इति बृहदारण्यकभाष्योदाहृतप्रमाणोक्ततत्त्वचतुष्टयमध्ये ईश्वरजीवाख्यं तत्त्वद्वयमेवोक्तं ज्ञातव्यं, न तु जडाभाव इत्यर्थः। तत्त्वप्रदीपे तु- बद्धत्व-मोचकत्वयोरुभयोरभावेन यथा येन प्रकारेण योजनायामव्यक्तं नैवोदितं छन्दोगश्रुतौ, तथा तस्मिन्नेव योजनाप्रकारे प्राणपर्यन्तो जीवराशिः सत्यादि-गुणकः परमेश्वरश्चैवोच्यते, न त्वन्यत्किञ्चित्, अव्यक्तस्यावद्धत्वेन परतत्त्वेऽ-न्तर्भावात्। 'तदा' तस्मिन् पक्षे तत्त्वद्वयमेवोक्तमित्युक्त्वा, एवं च प्रकारान्तरेणापि श्रुतियोजनाऽस्तीति गम्यते। येन प्रकारेणाव्यक्तशब्दशब्दिता स्वरमणपरतन्त्रा अक्षतगुणगणलक्षणा सा महालक्ष्मीरत्र संलक्ष्यते। स्वयं च सूत्रं 'सैव हि सत्यादयः'(ब्र.सू.३.३.३९)इति तदभिमुखमिव च प्रतिभाति। 'यथाऽव्यक्तं न तूदितम्' इत्यादिकमुदाहरद्भिरिह भट्टारकैश्च तां कटाक्षेण वीक्षमाणामभिप्रेक्षामहे। सा देवी प्रस्तुतैव भगवत्प्रस्तावे अनादिकाल-भगवत्सम्बन्धित्वादित्याह। भूमादिगुणत्वमुभयथा विष्णोरेवेति भूमा विष्णु-रेवेत्युक्तं, पुरस्ताच्छ्रीगुणेषूदितेष्वपि सत्यादिषु तेषां भूमा विष्णुरेवेत्यर्थः। न हि भगवतोऽन्यत्र सत्यज्ञानादीनां परिपूर्तिः। न च 'यत्र नान्यत्पश्यति' इत्यादिना सर्वस्वातन्त्र्यादिधर्मोपपत्तिरन्यत्रेत्यादि तत्रैवावेदितम्। अन्तराले अनुक्तिपक्षेऽपि नोपासनीया सेति मा भूच्छङ्का इत्युपासनापादे प्रस्तौति देवीम्। प्राणप्रस्तुतिः प्राणादुपरि सहैव भगवता मुमुक्षूणां अभिध्यातव्येति। नामादिप्राणपर्यन्तानामपि भूतानामुत्तरोत्तरतो विशेषादुपास्तिपूजादिकं विवक्षितम्, किं पुनरखिलेश्वरस्य अतिप्रियतमाया विरिञ्चमुखनिखिलसुरवर-पुरस्सरसज्जनसन्ततसेव्याया देव्या इति विशेषार्थ उक्तः। अत्र तत्त्वप्रदीपपक्षे स्मृतिगतस्य श्रुताविव्यस्य नावृत्तिः। टीकाकृत्पक्षे तु आवृत्तिः यथातथा-शब्दयोर्दृष्टान्तदार्ष्टान्तिकभावसूचकत्वम्। तत्त्वप्रदीपपक्षे तु प्रकार-

समर्पकत्वम्। टीकाकृत्पक्षेऽस्याः स्मृतेः प्राकृतिकजडाभावशङ्कानिवारकत्वम्। तत्त्वप्रदीपपक्षे तु बन्धमोचकत्वान्यप्रकारेण परापरत्वरूपेण अव्यक्त-परतयाऽपि छन्दोगश्रुतियोजनाप्रदर्शकत्वमिति विशेषो ज्ञातव्यः। महालक्ष्मीः 'अत्र' छन्दोगश्रुतौ 'संलक्ष्यते' प्रतिपाद्यतयाऽभिप्रेयते इत्यर्थः। 'तदभिमुखं' लक्ष्म्यभिमुखं तत्परमिवेत्यर्थः, भट्टारक्तैः श्रीमदाचार्यराजैः सादिदेवीत्यादिना सा देवी सत्यादय इति सूत्रस्य अर्थान्तरमुक्तम्। 'प्रस्तावे' प्रकरणे 'प्रस्तुता' प्रकृतैवेत्यर्थः। 'इत्याह' उपस्थितेरिति सूत्रकृत्। प्रकृति-पुरुषयोः साम्यशङ्कां वारयति- **भूमादीति** ॥ आदिशब्देन अहमात्मनोः ग्रहणम् 'उभयथा' सम्प्रसादादध्युपदेशाच्च। 'सत्यादिषु' मत्यादिरूपश्रीगुणेषूदितेष्वपीत्यन्वयः। 'तेषां' तैः 'भूमा' पूर्ण इत्यर्थः। तैरेव भूमाधिकरणे 'अन्तराले' प्राणपरमात्मनोर्मध्ये बन्धमोचकत्वविवक्षया श्रुत्यनुक्तिपक्षेऽपि प्रस्तौति देवीं सत्यादिशब्दैः सूत्रकृदित्यर्थः। 'मुमुक्षूणां' मुमुक्षुभिः अभिध्यातव्या। देवीति हेतोः प्राणस्तुतिरित्यन्वयः। देव्याः पूजादिकं विवक्षितमिति किमु वक्तव्यमित्यर्थः। अनेन- चित्प्रकृतिरुपासनाधिकारिणी न भवति, तत्साधक-संसारित्वशून्यत्वात्। न च जननादिदर्शनश्रुतिविरोधाद्धेतोरसिद्धिः। यतश्च 'इतरत्र' भूम्यादावप्यवतारान् करोति। अतो जननादिदर्शनस्यावतार-विषयत्वेन विरोधाभावादिति भावः। न च लोकसिद्धजन्माद्येव किं न स्यादिति शङ्क्यम्। यतस्सा तत्र मूलस्थाने मूलरूपेण भगवत्समीपे स्थिता। न च तादृशानामपीन्द्रादीनामर्जुनादिरूपेण उत्पत्तेर्दर्शनात् हेतोरप्रयोजकत्वं शङ्क्यम्। यतः सा 'कामात्' स्वेच्छयैव तत्र स्थिता न कर्मतोऽतः। न च स्वेच्छानुसारित्वे तस्याः स्वातन्त्र्यं शङ्क्यम्। यतः सा 'कामात्' ईश्वरेच्छा-मनुसृत्यैवावतारादि करोति, न स्वेच्छामात्रादतः। न च मूलरूपेण भगवत्समीपे स्थिता इतरत्र स्वेच्छयैवावतारादि करोतीति विशिष्टहेतोरसिद्धि-रिति वाच्यम्। 'आयतनादिभ्यः' सर्वायतनत्वादिप्रतिपादकश्रुतेरेवेति सूत्रार्थ उक्तो भवति।

सू— ॐ ॥ आदरादलोपः ॥ ॐ ॥ ४१ ॥

अवद्धत्वेऽपि भक्तिविशिषादेवोपासनाद्यलोपस्तस्या भवति ।

ननु रमाया असंसारित्वे कृतकृत्यत्वेन भगवदुपासनाद्यभावस्स्यात् । न चासौ युक्तः ।

'यदर्चितं ब्रह्मभवादिभिः सुरैः
श्रिया च देव्या मुनिभिश्च सात्त्वतैः ।
तुलसीभिरीशमभ्यर्चति ..... ।'

इत्यादिप्रमाणविरुद्धत्वात् । अत्रार्चितमुपासितं पूजितं चेत्युक्तेरित्याशङ्कां परिहरत्सूत्रं पठति- **आदरादिति** ॥ अत्र पूर्वसूत्राच्चोऽनुवर्तते । स चाप्यर्थ इति भावेन सूत्रं व्याचष्टे- **अवद्धत्वेऽपीति** ॥ यद्यपि श्रीरबद्धा अत एव कृतकृत्या च, तथापीत्यर्थः । आदरशब्दस्य 'आदरो भजनं भक्तिर्बहुमानं च सेवनम्' इत्यभिधानसिद्धमर्थमाह- **भक्तीति** ॥ निरुपाधिकसर्वातिशयितभक्तिवशा-दित्यर्थः । अलोप इत्येतत्प्रतियोग्युक्तिपूर्वकं व्याचष्टे- **उपासनादीति** ॥ आदिपदेन पूजोच्यते । सूत्रेऽध्याहारात्प्रकरणाद्वा लब्धं धर्मिपदमाह- **तस्या इति** ॥ प्रकृतेरित्यर्थः ।

'यथा श्रीर्नित्यमुक्ताऽपि प्राप्तकामाऽपि सर्वदा ।
उपास्ते नित्यशो विष्णुमेवं भक्तो हरेर्भवेत् ॥'

इति बृहत्तन्त्रे ॥ ४१ ॥

अत्रार्थे स्मृतिं चाह- **यथेति** ॥ 'प्राप्तकामा' लब्धेष्टा कृतकृत्याऽपीति यावत् । विशेषणद्वयसमुच्चयेऽपिशब्दौ । 'नित्यशः' सर्वदा 'एवं' तथा हरेर्भक्तोऽन्योऽपीति शेषः । एवमित्यावर्तते । तस्य 'एवं भवेत्' निरुपाधिक-भक्त्या हेररुपासको भवेदित्यर्थः ।

सू— ॐ ॥ उपस्थितेस्तद्वचनात् ॥ ॐ ॥ ४२ ॥

अनादिकाले भगवत्सम्बन्धित्वाद्युज्यते च नित्युक्तत्वं तस्याः ।

ननु न रमायाः नित्यमुक्तत्वं युक्तं, कारणाभवात् । न च स्वत एव तत् । तस्या अस्वतन्त्रत्वादित्याशङ्कां परिहरत्सूत्रं पठति- **उपस्थितेरिति** ॥ अत्रोपस्थितिर्नाम समीपे स्थितिः । भक्तिकर्मत्वेन प्रकृतत्वादीशस्येति लभ्यते । सा सर्वकाले विवक्षिता । तस्याः नित्यावियोगित्वादिति भावेनोपस्थितेरित्येतद्व्याचष्टे- **अनादीति** ॥ अनाद्यनन्तकाले भगवदविनाभूतत्वादित्यर्थः । भगवत्सम्बन्धित्वादित्यस्य भगवत्प्रसाद्यत्वादित्यप्यर्थः । अनेन नित्यमुक्तत्वे भगवत्प्रसादाख्यकारणमुक्तं भवति । सूत्रेऽध्याहार्यं प्रतिज्ञावाक्यं दर्शयति- **युज्यते चेति** ॥ चोऽवधारणे । युज्यते इत्यस्य कर्त्राकाङ्क्षायां तत्कर्तृत्वेन तद्वचनादित्यत्र तदिति व्यस्तपदेन बोध्यं दर्शयति- **नित्यमुक्तत्वमिति** ॥ कस्या इत्याकाङ्क्षायां प्रकरणलब्धं धर्मिणं दर्शयति- **तस्या इति** ॥ श्रिय इत्यर्थः ।

'द्वावेतावनादिनित्यावनादियुक्तौ नित्यमुक्तावनादिकृतौ नित्यकृतौ योऽयं परमो या च प्रकृती रमते ह्यस्यां परमो रमते ह्यस्मिन् प्रकृतिः स्वस्मिन् हि रमते परमो न स्वस्मिन् प्रकृतिरत एनमाहुः परम इति' इति गौपवन-श्रुतिवचनात् ॥ ४२ ॥

ननु उपस्थितिः कुतः सिद्धेत्यतस्तत्र हेतुत्वेन तद्वचनादित्येतद्व्याचष्टे - **द्वाविति** ॥ या प्रकृतिर्यश्चायं परमः तौ द्वौ 'अनादिनित्यौ' देहतोऽपि 'अनादियुक्तौ' अनादिकालतः सम्बद्धौ 'नित्यमुक्तौ' अनन्तकालदुःखा-

सम्बन्धौ 'अनादिकृतौ' नित्यकृतौ सर्वकाले पूर्णावित्यर्थः। विष्णोः परम-शब्दवाच्यत्वे निमित्तमाह- **रमत इति** ॥ 'अस्यां' प्रकृतौ 'अस्मिन्' परमे। तर्ह्युभयोः साम्यमित्यत आह- **स्वस्मिन्निति** ॥ श्रियां रममाणोऽपि तत्स्थे स्वस्मिन् रमत इत्यर्थः। 'रमायां रममाणोऽपि तत्स्थेनैव श्रियाऽत्मना। रमते' इत्यैतरेयभाष्योक्तेः। यत एवमत एनं विष्णुं परम इत्याहुः स्वरमणेन मायायाः[1] परत्वात् परमशब्दवाच्य इत्यर्थः। **इति गौपवनश्रुतिवचनादिति** ॥ अस्य सिद्धादिति शेषेण भगवत्सम्बन्धित्वादित्यनेनान्वयः। अनेन सूत्रे तद्वचनात् सिद्धादुपस्थितेरित्यन्वयः। तद्वचनादित्यस्य च तस्यां श्रुतौ तस्याः उपस्थितेः वचनात् उक्तेरित्यर्थ उक्तो भवति।

॥ इति कामाधिकरणम् ॥ २४ ॥

॥ २५. निर्धारणाधिकरणम् ॥

(ब्रह्मसाक्षात्कारार्थं श्रवणमननध्यानरूपोपासना कर्तव्या)

दर्शनार्थं ह्युपासनं तच्च श्रवणादेरेव भवति, अतः किमर्थमिति।

अत्राधिकरणे श्रवणमननिदिध्यासनरूपस्य समस्तस्याप्युपासनस्य कर्तव्यत्वं समर्थ्यते। पूर्वपक्षयति- **दर्शनार्थमिति** ॥ 'हि' यतः 'उपासनं' ध्यानं ब्रह्मदर्शनार्थमेव, न तु प्रयोजनान्तरार्थं, तस्यादर्शनात्, अनिष्टत्वाच्च। 'तच्च' दर्शनम् उपासनान्तर्गत 'श्रवणादेः' श्रवणमननाभ्यामेव 'भवति' भविष्यति। अतः किमर्थं समस्तोपासनमित्यर्थः। एवं 'हि' यतः तच्चोपासनमेव हरेः 'दर्शनार्थं' तत्प्रयोजनकं, न तु श्रवणाद्यपीति 'भवति' इष्यते, अतः 'श्रवणादेः' श्रवणमननयोः किममुपासनमनुष्ठानमित्यपि तत्त्वप्रदीपदिशा व्याख्येयम्।

---

१. मायाः इति मुद्रितं।

अत्रोच्यते -

सू — ॐ ॥ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॥ ॐ ॥ ४३ ॥

तत्त्वनिश्चयो वेदार्थनियमश्च ब्रह्मदृष्टेः पृथगेव ।

अथ सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत्रेति** ॥ सूत्रं पठति तन्निर्धारणेति । अत्र ध्यानस्य दर्शनार्थम् अवश्यकर्तव्यतासमर्थनाय तन्निर्धारणार्थनियमः । तद्दृष्टेः पृथक्फलं इत्ययमंशः प्रवृत्तः । तत्र तन्निर्धारणं च अर्थनियमश्चेति द्वन्द्वः, छन्दःकल्पत्वात् एकवद्भावेऽपि नपुंसकत्वाभावः । यद्वा-तन्निर्धारणेन सहितोऽर्थनियम इति मध्यमपदलोपीसमासः । प्रथमतच्छब्दः इयदामननात्, सैवेत्यत्र प्रकृतपरापरतत्त्वपरः भावप्रधानो वा । द्वितीयस्तु सैव हीति प्रकृतब्रह्मपरः । फलमिति तद्दृष्टेरिति चावर्तते । हिः हेताविति्याशयेन तमंशं व्याचष्टे- **तत्त्वेति** ॥ परापरतत्त्वज्ञानमित्यर्थः । 'वेदार्थनियमः' अयमेव वेदार्थो नान्य इति निर्णय इत्यर्थः । फलमित्यत्रान्वीयते । तद्दृष्टेरित्यस्यार्थः- **ब्रह्मदृष्टेरिति** ॥ भगवद्दर्शनादित्यर्थः । फलादिति विपरिणामेनात्रापि सम्बध्यते । ध्यानपलादिति तदर्थः । पृथगिति सावधारणमित्याह- **पृथगेवेति** ॥ एवेत्यन्तरं पलमिति सम्बध्यते । अतो दर्शनार्थं ध्यानं कर्तव्यमिति वाक्यशेषः । तत्त्वप्रदीपे तु समस्तगुणसम्पूर्णो नारायण इत्ययमेव वेदार्थ इति ज्ञानं वेदार्थनियमः, इदं श्रवणफलम् । उपपन्न एवं भाव इति निश्चयः तत्त्वनिश्चयः, इदं मननफलमित्यभिहितम् । अस्मिन् पक्षे तत्त्वनिश्चयो वेदार्थनियम इति भाष्यपदद्वयं सौत्रपदद्वयस्य व्यत्यासेन व्याख्यानरूपमिति प्रतिभाति ।

हिशब्देन 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.४-४-५) इति श्रुतिं सूचयति ।

ननु ध्यानादेव चेद्दर्शनं, किं तर्हि श्रवणमननाभ्यां प्रयोजनमित्याशङ्का

निरासाय सौत्रं हिशब्दं श्रुतिसूचकतया व्याचष्टे- **हिशब्देनेति** ॥ सूचयति सूत्रकारः । श्रुतिस्तु जिज्ञासानये व्याकृता । अत्र दर्शनार्थं ध्यानं, तदर्थं श्रवणमनने इति त्रितयस्याप्यङ्गाङ्गिभावेन विहितत्वात्समस्तमुपासनं कर्तव्यमिति भावः ।

श्रवणादिफलं चाज्ञानविपर्ययादिदर्शनप्रबिन्धनिवृत्तिः ।

ननु श्रुतोऽपि श्रवणादित्रितयसमुच्चयः कथमङ्गीकर्तुं शक्यते, ध्यानादेव दर्शनसम्भवात् । न च ज्ञानोपयोगितया श्रवणादेः कर्तव्यता । श्रवणादेः फलान्तरस्योक्तत्वादित्याशङ्कानिरासकं प्रतिबन्धः फलमित्यंशं व्याचष्टे- **श्रवणादीति** ॥ श्रवणादेः साक्षात्फलं चेत्यर्थः । आदिशब्देन मननं गृह्यते । **अज्ञानेति** ॥ अज्ञानविपर्ययादिरूपं यद्दर्शनस्य प्रतिबन्धकं तन्निवृत्तिरित्यर्थः । आदिपदेन संशयो गृह्यते । तथा च तत्त्वनिर्णयो वेदार्थनियमः अपरोक्षज्ञानं चेति क्रमभावीति शब्दादिजन्यानीत्युत्तरभाविटीकारीत्या गुरूपदेशरूपशब्दप्रत्ययस्य श्रवणशब्दार्थत्वेन विवक्षितस्य तत्त्वनिर्णयद्वाराऽज्ञाननिवर्तकत्वात् युक्त्यनुसन्धानात्मकमननस्य च वेदार्थनियमद्वारा संशयविपर्ययनिवर्तकत्वेन प्रतिबन्धकनिवर्तकतया ध्यानफलकापरोक्षज्ञानोपयोगित्वात्, ध्यानस्य च ज्ञानप्रतिबन्धकस्य दृढत्वाद्ध्यानादेव दर्शनमिति टीकानुसारेण दृढप्रतिबन्धकस्य संशयस्यात्यन्तिकनिरासद्वारा तदुपयोगित्वात्, ज्ञानार्थिनः समस्तोपासनमपेक्षितमेवेति भावः । अनेन 'हि' यतः 'तन्निर्धारणार्थनियमः' तत्त्वनिश्चयो वेदार्थनियमश्चेत्येवंरूपं गुरूपदेशविषयवाक्यश्रवणयुक्त्यनुसन्धानात्मकमननफलं ध्यानफलात् 'तद्दृष्टेः' ब्रह्मदर्शनात्पृथक् ताभ्यां तद्दृष्टेरसिद्धेः, तद्दृष्टेरर्थे तद्ध्यानं कार्यम् । ननु ध्यानादेव चेद्दर्शनं, तर्हि श्रवणमननाभ्यां प्रयोजनाभावात् श्रवणादित्रयानुष्ठानं कुत इत्यतो - **हीति** ॥ 'श्रोतव्यो मन्तव्यः' इत्यादिश्रुत्या ज्ञानार्थं त्रितयस्यापि विहितत्वादित्यर्थः । ननु श्रौतोऽपि त्रितयसमुच्चयः कथमङ्गीकर्तुं शक्यः, ध्यानादेव दर्शनसम्भवात्, श्रवणादेः फलान्तरस्यैव उक्तत्वाच्चेत्यतः- अप्रतिबन्धः फलमित्याह ।

यतस्तद्दृष्टेः 'अप्रतिबन्धः' प्रतिबन्धनिवृत्तिः तयोः श्रवणमननयोः साक्षात् फलम्, तद्द्वारा ध्यानजन्यज्ञानं फलं अतः समुच्चयोऽङ्गीकार्य इति सूत्रार्थ उक्तो भवति।

ब्रह्मतर्के च –

'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ।
संशयं च पराणुद्य लभते ब्रह्मदर्शनम्॥' इति॥ ४३॥

श्रवणादेः प्रतिबन्धकनिवृत्तिद्वारा ज्ञानोपयोगित्वरूपोक्तार्थे स्मृतिं चाह- **ब्रह्मतर्के चेति॥** 'उक्तम्' इति शेषः। न केवलं सूत्र इति चार्थः। किमुक्तमित्यतस्तत्पठति- **श्रुत्वेति॥** 'श्रुत्वा' गुरूपदेशं प्राप्य तज्जन्यतत्त्वज्ञानद्वारा तदज्ञानं 'पराणुद्य' परिहृत्य 'मत्वा' ब्रह्मविषयकयुक्त्यनुसन्धानात्मकमननं कृत्वा 'तत्संशयविपर्ययौ' संशयमिथ्याज्ञाने पराणुद्य, तथा 'ध्यात्वा' दृढप्रतिबन्धं च पराणुद्य ब्रह्मदर्शनं 'लभते' प्राप्नोतीत्यर्थः। यद्वा- श्रवणमननिदिध्यासनानां क्रमेणाज्ञानविपर्ययसंशय-निवर्तकत्वमत्रोच्यते। यथोक्तं तत्त्वप्रदीपे- तत्त्वनिश्चयवतोऽपि परोक्षात्कश्चित्संशयो भवति आ दृष्टेः। दर्शने तु कीदृशोऽपि न भवेत्। तदाह-

'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ।
संशयं च पराणुद्य लभते ब्रह्मदर्शनम्॥' (अनु.) इति॥

ननु -

'अथ वा सततं शास्त्रविमर्शेन भविष्यति।' (त.सा.सं. ४.१५७)

'विष्णुशास्त्रावमर्शनं, एकमन्यद्धरेर्ध्यानम्॥' (त.सा.सं. ४.१३५)

इति च तन्त्रसारे श्रवणादिरूपशास्त्रावमर्शस्य साक्षादपरोक्षज्ञानसाधनत्वोक्तेरत्र प्रतिबन्धकनिवर्तकतया ध्यानाङ्गतया अपरोक्षज्ञानोपयोगित्वोक्तौ तद्विरोध इति चेत्, अत्रोक्तं सुधायाम्- शास्त्राभ्यासस्य ध्यानाङ्गत्वेऽपि स्वतन्त्रोपासनत्वं चास्ति। तेन चित्तवृत्तिनिरोधनादिति। अथ वा-

उपासनाप्राक्कालीनयोः तदनन्तर्गतयोः तज्जातीययोः श्रवणमननयोः अत्र विचारितत्वात् तन्त्रसारे तदतिरिक्तयोः तदनन्तरभाविनोः विक्षितत्वात् न विरोधः । शास्त्राभ्यासध्यानरूपद्विविधोपासनस्यापि श्रवणमननमङ्गमिति तत्त्वप्रदीपोक्तेः सुधायामपि श्रवणमननरूपाभ्यासस्य भेद एव तात्पर्यं, न तु भावबोध इव अभेदे तात्पर्यं वर्णनीयम् । केचित्तु- ईषद्बिम्बध्यानस्य सर्वापेक्षितत्वेऽपि अधिकारिविशेषे शास्त्रविमर्शप्राचुर्यविवक्षया 'अथवा सततम्' इति वाक्योपपत्तेः न विरोध इत्याहुः । इति ब्रह्मतर्के इत्यन्वयः । अस्य च अज्ञानादिनिवृत्तिः श्रवणादिफलमित्युक्तमिति पूर्वेणान्वयः ।

॥ इति निर्धारणाधिकरणम् ॥ २५ ॥

॥ २६. प्रदानाधिकरणम् ॥

(गुरुप्रसादपूर्वकश्रवणेनैव ज्ञानमिति निरूपणम्)

सू— ॐ ॥ प्रदानवदेव हि तदुक्तम् ॥ ॐ ॥ ४४ ॥

न च श्रवणादिमात्रेण ब्रह्मदृष्टिर्भवति, किन्तु सेतिकर्तव्येन । यथा गुरुदत्तं तथैव भवति ।

अत्र भगवज्ज्ञानसाधनश्रवणाद्युपासनस्य सेतिकर्तव्यताकत्वं साध्यते । सूत्रं पठति- **प्रदानवदेवेति** ॥ अत्र तच्छब्दपरामर्शप्रदर्शनपूर्वकमेवशब्दसूचित-पूर्वपक्षं प्रतिक्षिपन् सूत्रं व्याचष्टे- **न चेति । श्रवणादिमात्रेणेति** । यथा-कथञ्चिदनुष्ठितेन इतिकर्तव्यतारहितेन श्रवणादिनेत्यर्थः । अनेन पूर्वपक्ष-सूचकैवशब्दार्थ उक्तो भवति । ब्रह्मदृष्टिर्भवतीत्यनेन सूत्रे पूर्वस्माद्विपरिणामेन दृष्टेरिति पदमनुवर्तत इति सूचितम् । कुतो नेत्याशङ्कते- **किन्त्विति** ॥ तदुत्तरतया मतुवाश्रयणेन प्रदानवदित्येतद्व्याचष्टे- **सेतिकर्तव्येनेति** ॥ भाव-प्रधानोऽयं निर्देशः । इतिशब्दः प्रकारार्थः । इति प्रकारेण कर्तव्यमिति-कर्तव्यमङ्गिभूतं कर्म तस्य भाव इतिकर्तव्यत्वमङ्गं तत्सहितेनेत्यर्थः ।

श्रवणादिनेति वर्तते । कुत इत्यतोऽपि प्रवृत्तं यतस्तत्फलं 'प्रदानवत्' तदननुरूपमित्यभिप्रायेण वत्यन्तांशं विवृणोति- **यथेति** ॥ 'गुरुदत्तं' गुरुदानं तदुपदेशो यथा 'तथा' तदनुसार्येव भवति । फलमिति शेषः । स प्रदानेनेत्यनुक्त्वा सेतिकर्तव्येनेत्युक्त्या 'श्रोतव्यो मन्तव्यः' इति श्रुतिविरोधः परिहृतः । तथा च गुरुप्रदानं ज्ञानसाधनस्य श्रवणादेः इतिकर्तव्यताऽङ्गमेव, न चैतावता तस्य साधनवत्कार्यत्वेन पृथग्वाच्यता सोमलतारसकार्यत्वोक्तिवत् तदङ्गदृढमुष्टिनिपीडनादेः पृथग्वचनात् । अतो न श्रवणादिमात्रस्य ज्ञानहेतुता-बोधकश्रोतव्य इत्यादिवचनविरोध इति भावः ।

'आचार्यवान् पुरुषो वेद' (छा. ६-१४-२) इति ह्युक्तम्

॥ ४४ ॥

ननु प्रदानाधीनत्वं ज्ञानस्य कुत इत्यतः प्रवृत्तं तदुक्तमित्येतद्व्याचष्टे- **आचार्यवानिति** ॥ 'हि' यस्मादुक्तं तदिति सम्बध्यते । तथा च छन्दोगश्रुतौ तज्ज्ञानस्य गुरुप्रसादाधीनत्वमुक्तमित्यर्थः । हीत्यनेन सूत्रे पूर्वस्माद्धिशब्दोऽनुवर्तनीयः, स च श्रुतिसूचकः, यस्मादित्यर्थे चेत्युक्तं भवति । 'आचार्यवान्' तदनुग्रहवान् पुरुषो विमुक्ताविद्यापटलस्सन् ब्रह्म वेदेति छन्दोगश्रुत्यर्थः । अनेन- 'हि' यतस्तत् प्रदानयुक्तमेव श्रवणादि ज्ञानसाधनमिति तस्यां श्रुतावुक्तम् अतः 'प्रदानवत्' प्रसादपूर्वकत्वेन प्रकृष्टगुरूपदेशाख्यदानयुक्तमेव श्रवणादि 'तद्दृष्टेः' ब्रह्मज्ञानस्य साधनं, न श्रवणादिमात्रमिति सूत्रार्थ उक्तो भवति ।

॥ इति प्रदानाधिकरणम् ॥ २६ ॥

॥ २७. लिङ्गभूयस्त्वाधिकरणम् ॥

(गुरुप्रसादः बलीयान्)

गुरुप्रसादः स्वप्रयत्नो वा बलवानिति निगद्यते-

सू– ॐ ॥ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ॐ ॥ ४५ ॥

ऋषभादिभ्यो विद्यां ज्ञात्वाऽपि सत्यकामेन 'भगवांस्त्वेव मे कामे ब्रूयात्' (छा. ४-९-२) 'श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्ध्येव विद्या विदिता साधिष्ठं प्रापयतीति' (छा. ४-९-३) इति वचनात्।

अत्रेतिकर्तव्यतारूपगुरुप्रसादस्य बलीयस्त्वं समर्थ्यते । संशयप्रकारं दर्शयति- **गुर्विति** ॥ यज्ज्ञानसाधनतया गुरुप्रसादपूर्वकश्रवणादि प्रकृतं तन्मध्ये किं गुरुप्रसादो बलवान् उत श्रवणादिरूपशिष्यप्रयत्न इति संशय इत्यर्थः । एवं वाशब्दं चशब्दार्थं कृत्वा इतिद्वयं समं वेति कोट्यन्तरपरतया व्याख्येयम् । उपलक्षणमेतत् । गुरुप्रसादस्येतिकर्तव्यतामात्रत्वात् शिष्यप्रयत्न एव वलवानिति पूर्वपक्षे चेत्यपि द्रष्टव्यम् । सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **निगद्यत इति** ॥ सूत्रं पठति- **लिङ्गेति** ॥ अत्र 'तत्' तस्य गुरुप्रसादस्य 'तत्र' प्राबल्ये 'लिङ्गभूयस्त्वात्' लिङ्गबाहुल्यदर्शनाद् बहुलिङ्गदर्शनादिति हेतुवाक्य-योजनामभिप्रेत्य सूत्रक्रमेण प्रथमं हेतुवाक्यं व्याचष्टे- **ऋषभादिभ्य इति** ॥ ऋषभाविष्टाद्वायोरित्यर्थः । तथैव तत्त्वप्रदीपोक्तेः । 'वायुर्वृषभरूपः सन्' इति छान्दोग्यभाष्यस्याप्ययमेवार्थः । आदिपदेन प्रत्यक्षोऽग्निः । हंसरूपी ब्रह्मा जलवायसरूपी वरुणश्च गृह्यते । 'विद्यां' ब्रह्मविद्यां 'ज्ञात्वाऽपि' श्रुत्वैव । यद्वा- 'विद्यां' ज्ञानादिगुणकं ब्रह्म ज्ञात्वा पुनरपीत्यर्थः । सत्यकामेन 'वचनात्' उक्तत्वादित्यन्वयः । सत्यकामो नाम ऋषिः स्वोपनेत्रा गौतमेन पालनार्थं गवानुगमनकर्मणि नियुक्तोऽरण्यं प्रविष्टो गुर्वाज्ञाक्रमेण तत्रैव बहुवर्षगणं प्रोवास । तत्रैनं प्रत्यृषभोऽग्निर्हंसो मद्गुश्चेत्येतद्रूपा देवाः स्वयमेव आगत्य ब्रह्मविद्यामुपदिदिशुः । अथ तैः ब्रह्मविद्यां श्रुत्वा स्वाचार्यकुलं पुनः प्राप्तोऽथाचार्येण गौतमेन हे सत्यकाम त्वं ब्रह्मविदिव भासि कोनु त्वामनुशशास देवो वा मनुष्यो वेत्युक्तो मनुष्येभ्योऽन्ये देवा इति 'प्रतिजज्ञे' विज्ञापयाञ्चक्रे । अथ गौतममुपदेशाय प्रार्थयत । किमिति ? यद्यपि देवेभ्यो मया श्रुतं ब्रह्म, तथापि भगवानेव तु 'मे' मम 'कामे' तादर्थ्ये सप्तमी, शुभार्थं

'ब्रूयात्' ब्रवीतु। कुतः ? 'हि' यतो 'भगवद्दृशेभ्यो भगवत्समेभ्य एव 'मे' मया श्रुतम्, न त्वाचार्यात् अतो हेतोः। न च यस्मात्कस्माच्चित् श्रवणेनालमिति शङ्क्यम्। यतः उपनयनादिकर्तुराचार्यादाराधितादेव 'विदिता' लब्धा विद्या 'साधिष्ठं' भावप्रधानोऽयं साधुतमत्वं स्थिरत्वं वा प्रापयति' स्वार्थे णिच् प्राप्नोति। क्वचिद्भवतीति पाठः, तदा भवतेः प्राप्त्यर्थता ज्ञेया। न च देवा में आचार्याः, तेषामाचार्यतया मयाऽनङ्गीकृतत्वादिति भावः। प्रापयतीत्यनन्तरं श्रुताविति शब्दोऽस्ति, तस्य इति प्रतिजज्ञे इत्यन्वयः। अयं तु भाष्यकारीयः। इति वचनादित्यस्योत्तरत्रान्वयः॥

'अत्र ह न किञ्चन वीयाय' (छा. ४.९) इत्यनुज्ञानादुपकोसलवचनाच्च लिङ्गभूयस्त्वाद्गुरुप्रदानमेव बलवत्।

लिङ्गान्तरं दर्शयति- **अत्रेति**॥ 'अत्र' ऋषभादिदेवेभ्यः श्रवणे तन्निमित्तं किञ्चन 'न वीयाय' नापगतं न ते काचिद्धानिरपराधोऽभूदिति गौतमः सत्यकामायोवाचेत्यर्थः। हेत्यास्वादने। **इत्यनुज्ञानादिति**॥ इत्येवं गौतमेन गुरुणा देवोपदिष्टस्य स्वाभिमतिसूचकशब्दोक्तिरूपानुज्ञाकरणादित्यर्थः। स्वप्रदानस्याप्राबल्येऽनुज्ञावैयर्थ्यादिति भावः। लिङ्गान्तरं दर्शयति- **उपकोसलवचनाच्चेति**॥ उपकोसलस्य सत्यकामस्य गुरुप्रार्थनारूपवचनादित्यर्थः। एवमुपकोसलं प्रति गुरूपदेशवचनाच्चेत्यप्यर्थः। तत्त्वप्रदीपे तु उपकोसलस्यार्थे सत्यकामं प्रति जायावचनात् उपकोसलायाग्नीनां वचनात् तेषां प्रत्येकं वचनात् तथा उपकोसलायाचार्यानुज्ञार्थमग्नीनां वचनादिति [1]चतुर्धा व्याख्यातम्। इत्थं हि छान्दोग्ये आख्यायिका - उपकोसलो नाम ऋषिः तस्मै सत्यकामाख्यो गुरुः स्वजायोक्तोऽपि विद्यामप्रोच्यैव प्रोषितः। अथोपकोसलः स्वगुरोराज्ञानुसारेण बहुवर्षगणं गार्हपत्यादीनग्नीन् परिचचार। अथ ते तुष्टाः 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा. ४-१०) इत्यादिना सम्भूय प्रत्येकं च [2]ब्रह्मविद्याम् उपदिदिशुः।

---

१. चतुर्थे इति कोशेऽस्ति। २. ब्रह्मविद्या इति कोशे।

तेभ्यः श्रुतविद्योऽप्युपकोसलः 'आचार्यस्तु ते गतिं वक्ता' (छा.४-१४) इति तैरुपदिष्टो गुरुमार्थयत। गुरुरपि सत्यकामस्तं प्रति 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छा. ४-१५) इत्यादिना विद्यामुवाचेति। श्रवणोदेरेव प्राबल्ये न तेन गुरुः प्रार्थ्येत, गुरुणा च नोच्येत, अतो ज्ञायते गुरुप्रदानं बलवदिति। यद्यपि छान्दोग्ये 'किन्तु सोम्य तेऽनुवोचन्'(छा. ४-११)इति सत्यकामेन पृष्टः उपकोसलः 'इति ह प्रतिजज्ञे' (छा. १४) अग्निभिरुक्तं विज्ञापयाञ्चक्रे इत्येवोच्यते, न तु तेन विद्योपदेशाय गुरुरर्थ्यते इति। प्रत्युत 'लोकान्वाव किल सोम्य तेऽब्रुवन्नहं तु वक्ष्यामि' (छा.४-१४) इत्यनेन स्वयमेवोपदिष्टवानिति प्रतीयते। तथापि 'इति ह प्रतिजज्ञे' इत्यनेनाग्निभिरुक्तस्य 'आचार्यस्तु ते गतिं वक्ता' (छा.४.१४) इत्यस्यापि विज्ञापितत्वात्तदेव प्रार्थनाज्ञापकमिति भावः। 'वचनात्' अभ्यनुज्ञानात्। वचनाच्च लिङ्गभूयस्त्वादिति सामानाधिकरण्यम्। तथा च सत्यकामप्रार्थनगौतमानुज्ञोपकोसलप्रार्थनसत्यकामवचनात्मकात् बहुलिङ्गादित्यर्थः। एवं हेतुं व्याख्याय तद्बलीय इति प्रतिज्ञांशं व्याचष्टे- **गुर्विति**॥ 'बलवत्' प्रबलं स्वप्रयत्नादिति शेषः। एवेति सूत्रेऽनुवृत्तपदानुवादः। न श्रवणादीत्येवार्थः। यद्यपि तत् गुरुप्रसादमात्रं बलवदिति प्रतिज्ञातव्यम्। प्रसादप्राबल्यस्यैवेह विचार्यत्वात्। न तु प्रसादपूर्वकगुरूपदेशात्मकप्रदानपर्यन्तधावनम्। तथापि 'सविशेषणे हि' इति न्यायेन गुरुप्रसादप्राबल्य एव तात्पर्यान्न दोषः। न च सूत्रे बलीय इति बलप्रकर्ष एवोक्तः, न तु बलवत्त्वमिति वाच्यम्। प्रदानं न श्रवणादितो दुर्बलं नापि तद्वत् बलवत्, किन्तु बलीयः बलवत्तरमिति ज्ञापनाय प्रयुक्तस्य बलीयःपदस्य बलवत्तरमिति स्मृत्यनुसारेण तथैव व्याख्येयत्वात्। सूत्रे स्मृत्यनुसारेण अर्शआद्यजन्तात् इत्यन्ताद्वा प्रत्ययमाश्रित्य बलवदिति व्याख्यातमित्यदोषः। तर्हि स्मृताविव प्रसादापेक्षया अन्यद्बलवत्साधनं व्युदसितुं बलवत्तरमिति प्रतिज्ञातव्यमिति वाच्यम्। बलवदित्यस्य श्रवणादेः सर्वस्मात् साधनात्

बलवत्तरमित्यर्थाभ्युपगमात् । एवशब्दश्च बलवदेवेत्यपि सम्बध्यते । नाधमं नापि समामित्यर्थसिद्धेः । यद्वा - सूत्रे मत्वर्थे ईयसुन्, स्मृतौ स्वार्थे तरबार्षः ।

तर्हि तावताऽलमिति न मन्तव्यम् । 'श्रोतव्यो मन्तव्यः' (बृ.४-४-५) इत्यादेस्तदपि कर्तव्यम् ।

तदपीत्यंशमवतारयति- **तर्हीति** ॥ गुरुप्रसादस्य प्राबल्ये इत्यर्थः । 'तावता' तावतैव न श्रवणादिना कृत्यमित्येवशब्दार्थः । 'इति' इत्यपि न केवलं प्रसादस्य दौर्बल्यमिति, किन्तु श्रवणादेर्वैयर्थ्यमित्यपि न मन्तव्यमित्यर्थः । कुतो नेत्यतस्तत्र हेतुतया- हि तदपीत्यंशं हिशब्दसूचितश्रुत्युदाहरणपूर्वकं कर्तव्यमिति पदाध्याहारेण च व्याचष्टे- **श्रोतव्य इति** 'तदपि' श्रवणादिकमपीत्यर्थः ।

वाराहे च -

'गुरुप्रसादो बलवान्न तस्माद्बलवत्तरम् ।
तथापि श्रवणादिश्च कर्तव्यो मोक्षसिद्धये ॥' इति ॥ ४५ ॥

अत्र स्मृतिमाह- **वाराहे चेति** ॥ न केवलं सूत्र इति चार्थः । साधनेषु गुरुप्रसादो बलवान्, तस्मात्प्रसादात् 'बलवत्तरं' बलवत्साधनं नास्तीत्यर्थः । यद्यप्येवं, तथापि मोक्षसिद्धये 'श्रवणादिश्च' श्रवणादिरपि कर्तव्य इत्यर्थः । इति वाराहे इत्यस्य सूत्रकृदुक्तमुक्तमित्यध्याहृतेनान्वयः ।

॥ इति लिङ्गभूयस्त्वाधिकरणम् ॥ २७ ॥

॥ २८. पूर्वविकल्पाधिकरणम् ॥

(पूर्वगुरुसमानश्चेत् गुर्वनुज्ञयाऽन्यगुरुः स्वीकार्यः,
अधिकश्चेत् पूर्वानुज्ञां विनेवान्यगुरुः स्वीकार्यः)

सू — ॐ ॥ पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥ ॐ ॥ ४६ ॥

न च पूर्वप्राप्त एव गुरुरिति नियमः । समग्रानुग्रहं चेत्पश्चात्तनः करोति स्वयमेव तदा विकल्पः स्यात् ।

त्राधिकरणे पूर्वप्राप्तादन्योऽपि गुरुः स्वीकार्य एवेति समर्थ्यते ।

'गुरुत्यागे भवेन्मृत्युर्मन्त्रत्यागे दरिद्रता ।
गुरुमन्त्रपरित्यागी रौरवं नरकं व्रजेत् ॥' इति ॥

गुरुपरित्यागे दोषश्रवणात्, प्रथमप्राप्तपरित्यागे कारणाभावाच्च पूर्वप्राप्त एव गुरुर्ग्राह्यो नान्य इति प्राप्ते सिद्धान्तयत्सूत्रं पठति- **पूर्वेति** ॥ अत्र पूर्वविकल्पः स्यादिति साध्यांशं व्याचष्टे- **न चेति** ॥ किन्तु पश्चात्तनोऽपि स्वीकार्यो भवतीत्येवकारार्थः । अनेन पूर्वविकल्पस्स्यादित्यस्य पूर्वप्राप्ते गुरौ विकल्पो 'नियमः' स एवानुवर्तनीय इति नियमो नास्ति, किन्तु पश्चात्तनोऽपि स्वीकार्यो भवेदित्यर्थ उक्तो भवति । ननु पश्चात्तनस्वीकारवैयर्थ्यमित्यतः प्रवृत्तं प्रकरणादित्यशं व्याचष्टे- **समग्रेति** ॥ समग्रानुग्रहमिति प्र इत्यस्यार्थकथनम् । शिष्याज्ञानादिपरिहरणसमर्थं तदपेक्षितार्थोपदेशार्थानुग्रहमित्यर्थः । अनुग्रहमित्यनेन सूत्रे प्रकृष्टानुग्रहकरणमपेक्ष्येति ल्यब्लोपे पञ्चमीत्युक्तं भवति । 'चेत्' यतः पश्चात्तनो गुरुरिति शेषः । प्रकरोतीत्यनेनोपसर्गस्य न केवलं कर्मसमर्पकत्वं, किन्तु क्रियातिशयद्योतकत्वमपीत्युक्तं भवति । तथा च पूर्वगृहीतात्पश्चात्तनो गुरुः यतः समग्रानुग्रहं करोति अतो न तत्स्वीकारवैयर्थ्यमिति सोऽपि स्वीकार्यः, न तु पूर्वप्राप्त एव गुरुरिति नियम इति योजना । इदानीं प्रकरणात् पूर्वविकल्प इत्यंशं पूर्वत्यागे पश्चात्तनस्वीकारे विशेषाभिधानपरतयाऽपि व्याचष्टे- **समग्रेति** ॥ अस्मिन् पक्षे प्रकरोतीत्यन्तस्य न पूर्वेणान्वयः, किन्तु उत्तरवाक्येनान्वयः । 'चेत्' यदि । पश्चात्तन इत्यनन्तरं समोऽधिकः अधम इति शेषः । 'स्वयमेव' यदृच्छयैव । तदेत्यस्य तत्र त्यागे स्वीकारे चेत्यप्यर्थः । सूत्रे पूर्वविकल्प इत्यस्य पररूपभावाभावयोः अविकल्पो विकल्प इति द्वेधा विच्छिन्नत्वात् भाष्येऽपि विकल्पोऽविकल्प इति द्वेधा विच्छेदः कार्यः ।

पूर्वानुज्ञयेति शेषः। नेति चानुषज्यते। तथा च पश्चात्तनो यदि पूर्वगृहीतेन समः तदा पूर्वत्यागे पश्चात्तनः समग्रानुग्रहं करोति चेत् पूर्वतनस्त्याज्यः, न चेत् न त्याज्य इति विकल्पः व्यवस्थितप्रकारभेदः स्यात्। एवं समःसमग्रानुग्रहं करोति चेत्तदा पूर्वसमस्वीकारे विकल्पः स्यात् पूर्वानुज्ञया स्वीकार्यः। तदभावे 'न वा' न स्वीकार्य एवेति विधिरिति। स्वयमेवेत्यनेन विकल्पश्च यदृच्छया प्राप्तौ, न तु तदर्थं प्रयतितव्यमित्युक्तं भवति। एवं पश्चात्तनोऽधिक उत्तमश्चेत् स च यदि समग्रानुग्रहं न करोति, तदा पूर्व-स्मादधिकस्वीकारे 'अविकल्पो' विकल्पो न स्यात्। न स्वीकार्य इति यावत्। एवं पश्चात्तनः पूर्वस्मादधिकः समग्रानुग्रहं करोति चेत् तदा स्वयमेव पूर्वानुज्ञां विना 'अविकल्पः' असंशयः, पूर्वं परित्यज्योत्तमो गुरुस्स्वीकार्यस्स्यात्। एवं पश्चात्तनः पूर्वस्मादधमश्चेत्तदा त्यागे 'अविकल्पो' नियमत्याग एव न स्यात्। 'गुणाधिकं गुरुं प्राप्य तद्धीनं नाप्नुयात्कचित्' इति वचनात्। पूर्वस्मादधमः समग्रानुग्रहं करोति चेत् स्वीकारे विकल्पः स्यात् पूर्वानुज्ञया ग्राह्य एव स्यात्। यथोक्तं तत्त्वप्रदीपे, अतः सिद्धं समग्रानुग्रहे तूत्तमस्य तदनुज्ञयाऽवरः प्राप्य इतीति योजना।

मानसक्रियावत्। यथोभयोर्ध्यानयो समयोः।

साम्ये विकल्प इत्यत्र सूत्रोक्तं दृष्टान्तमर्थक्रमेण व्याचष्टे - **मानसेति**॥ अनेन सूत्रे षष्ठीद्विवचनान्ताद्धतिः। क्रिया धात्वर्थः। ध्यायत्यर्थो ध्यानम्। मानसी मनोवृत्तिरूपा च सा क्रिया च कडारादित्वात्परनिपातः इत्युक्तं भवति। मानसक्रियावदिति स्वपदं वर्णयति- **यथेति**॥ विकल्पः स्यादिति सम्बन्धः। 'उभयोः' रामकृष्णादिरूपद्वयविषययोः नीलपीतादिरूपद्वयविषययोर्वेत्यर्थः। 'समयोः' फलतः समयोरेव विकल्पः नोत्तमाधमयोरिति।

'पूर्वस्मादुत्तमो लब्धः स्वयमेव गुरुर्यदि।
गृह्णीयादविचारेण विकल्पः समयोर्भवेत्॥

समग्रानुग्रहाभावात्सत्यकामस्स्वकं गुरुम् ।
ऋषभाद्यनुज्ञया चैव प्राप तस्माद्धि युज्यते ॥'

इति बृहत्तन्त्रे ॥

अत्र स्मृतिमाह- **पूर्वस्मादिति** ॥ यदि 'पूर्वस्मात्' पूर्वगृहीतात् उत्तमो गुरुर्लब्धस्तदा असौ अविचारेणासंशयं स्वयमेव पूर्वानुज्ञां विना गृह्णीयादित्यर्थः । 'समयोः' ज्ञानादितः । पूर्वोत्तरयोरिति च त्यागस्वीकारयोरिति च शेषः । यदि पूर्वस्मादुत्तमोऽविचारेण स्वीकार्यः, तर्हि कथमृषभादयः सत्यकामेन न गृहीताः, प्रत्युत पूर्वतन एव प्राप्तोऽतो नैतद्युक्तमित्यत आह- **समग्रेति** ॥ 'हि' यस्मात् सत्यकामः ऋषभादीनाम् एकैकस्मादेव 'समग्रानुग्रहाभावात्' तैस्तदकरणात् ऋषभाद्यनुज्ञयैव 'स्वकं' स्वयोग्ययावदुपदेशकत्वेन स्वयोग्यमेव गुरुं गौतमं 'प्राप' जग्राह, न तूत्तमान्, तस्मात्पूर्वपरित्यागेन समग्रानुग्रहकर्ता उत्तमः समो वा स्वीकार्य इत्येतद्युज्यत इत्यर्थः ।

'समग्रानुग्रहं कश्चित्स्वयमेव समो यदि ।
कुर्यात्पुनश्च गृह्णीयादविरोधेन कामतः ॥'

साम्ये पूर्वानुज्ञापेक्षितेति भावेन तत्र स्मृतिमाह- **समग्रेति** ॥ यदि पुनः पूर्वस्य ज्ञानादिगुणैः समः कश्चिन्मध्ये प्राप्तो गुरुः स्वयमेव शिष्यःप्रयत्नं विनैव प्रसन्नः समग्रानुग्रहं कुर्यात् 'तदाऽविरोधेन' पूर्वानुज्ञया 'कामतो' यथेच्छं गृह्णीयात्तमिति शेषः । पूर्वानुज्ञाऽभावे स्वस्येच्छाभावे च न गृह्णीयादिति भावः ।

'ध्यानयोस्समयोर्यद्वद्विकल्पः कामतो भवेत् ।
एवं गुरोर्द्वितीयस्य विकल्पो ग्रहणेऽपि च ।'

इति महासंहितायाम् ॥ ४६ ॥

सौत्रदृष्टान्तं स्ववाक्येन विवृतमपि स्मृत्याऽपि विवृणोति- **ध्यानयोरिति** ॥

ईशारूपद्वयविषयकयोः फलतः समयोः ध्यानयोः 'यद्वत्' यथा 'कामतः' इच्छया व्यवस्थितो विकल्पः स्वापेक्षितान्यतरानुष्ठानम्, एवं तथा द्वितीयस्योत्तरस्य पूर्वसमस्य गुरोः 'ग्रहणे' स्वीकारे 'विकल्पः' पूर्वानुज्ञया स्वीकार्यः अन्यथा नेति । एवमिच्छायां स्वीकार्योऽन्यथा नेति । एवं द्वितीयस्य समस्य लाभे पूर्वस्याग्रहणे त्यागे विकल्पः, द्वितीयस्य समग्रानुग्रहकर्तृत्वे पूर्वस्य त्यागोऽन्यथाऽत्याग इति विकल्पस्स्यादित्यपि व्याख्येयम् । बृहत्तन्त्रे महासंहितायां चेत्युभयत्र सूत्रकृदुक्तं उक्तमिति शेषः । अनेन 'गुरुत्यागे' इति दोषवचनस्याधमस्वीकारविषयत्वं वा अनुज्ञाभावविषयत्वं वा समग्रानुग्रहस्याकर्तुः स्वीकारविषयत्वं वेति गतिरुक्ता भवति ।

सू— ॐ ॥ अतिदेशाच्च ॥ ॐ ॥ ४७ ॥

'ब्रह्मोपास्व ब्रह्मोपचरस्व तच्छृणु हि तत्त्वामवतु । यथा ब्रह्मोपचरेर्यथा मामुपचरेर्ये चाऽन्येऽस्मद्विधाः श्रेयसश्च तानुपास्व तानुपचरस्व तेभ्यः शृणु हि तु ते त्वामवन्तु' इति पौष्यायणश्रुतावतिदेशाच्च ॥ ४७ ॥

हेत्वन्तरेण समोत्तमगुरुस्वीकारं समर्थयत्सूत्रं पठित्वा व्याचष्टे- **अतिदेशाच्चेति ॥** दृष्टान्तमुखेन वचनमतिदेशः । तथा च इति श्रुतौ पूर्वगुरुणैव स्वसमोत्तमगुरुस्वीकाराय दृष्टान्तमुखेन शिष्यधर्माणामुपदिश्यमानत्वादित्यर्थः । अतिदेशाच्चेत्यस्य आचार्यादन्यस्यापि समोत्तमेषु शिष्यस्य वृत्त्यतिदेशाच्चोक्तार्थे निश्चय इति तत्त्वप्रदीपदिशा पूर्वविकल्प इत्युक्तार्थ निश्चय इति वाक्यशेषेणान्वयः । 'ब्रह्मोपास्व' तद्विषयकध्यानादिकं कुरु । 'उपचरस्व' पूजय 'तद्धि' प्रसिद्धं ब्रह्म शृणु । शृणुहीति छान्दसमेकं वा पदम् । तत् त्वां रक्षतु । यथा ब्रह्मोपासीथाः तथा मामुपास्व, यथा ब्रह्मोपचरेः तथा मामुपचरस्वति शेषः । यथा मामुपचरेस्तथा येऽन्ये च 'अस्मद्विधाः' अस्मत्समानाः 'श्रेयसो'

विभक्तिविपरिणामेन श्रेयांसः तान् श्रेयसोऽस्मदुत्तमांश्च उपास्वोपचरस्वेति शिष्यं प्रति गुरुवाक्यमेतत् । आचार्योपासनं नाम सविनयमन्ते स्थितिः आचार्योपचारोऽभीष्टकरणादिः । 'तेभ्यः' समोत्तमेभ्यः ब्रह्म शृणु 'ते' समोत्तमाः त्वाम् 'अवन्तु' रक्षन्त्विति तत्त्वप्रदीपदिशा श्रुत्यर्थः ।

॥ इति पूर्वविकल्पाधिकरणम् ॥ २८ ॥

॥ २९. विद्याधिकरणम् ॥

(अपरोक्षज्ञानमेव मोक्षकारणम्)

न च 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' (गी. ३-२०) इत्यादिनाऽन्यन्मोक्षसाधनम् ।

सू— ॐ ॥ विद्यैव तु निर्धारणात् ॥ ॐ ॥ ४८ ॥

'तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽयनाय' (श्वे ३-८) इति निर्धारणाद्विद्ययैव मोक्षः ॥ ४८ ॥

अत्र नये उपासनस्य कर्तव्यतासमर्थनाय ज्ञानमेव मुक्तिहेतुरिति समर्थ्यते । सूत्रगतैवकारसूचितपूर्वपक्षं प्रतिषेधति- **न चेति** ॥ चोऽवधारणे अप्यर्थे च । ज्ञातमिति शेषः । तथा च इत्यादिना वाक्येन मोक्षसाधनत्वेन ज्ञातं ज्ञानात् 'अन्यत्' कर्माद्येव मोक्षसाधनं नेत्यर्थः । यद्वा- 'अन्यत्' कर्माद्यपि मोक्षसाधनं नेत्यर्थः । आदिशब्देन 'त्यागेनैके अमृतत्त्वमानशुः' (महाना. १०) 'प्रयागमरणेन वा' इत्यादिकं गृह्यते । 'संसिद्धिं मोक्षम् 'आस्थिताः' प्राप्ताः 'जनकादयो' विदेहादयः । इदं गीतावाक्यम् । 'त्यागेन' देवतामुद्दिश्य द्रव्यत्यागेन 'अमृतत्वं' मोक्षम् 'आनशुः' प्रापुरिति श्रुत्यर्थः । न चेत्युक्तार्थे हेतुतया सूत्रमुपन्यस्य व्याचष्टे- **विद्येति** ॥ 'अयनाय' मोक्षार्थं अपरोक्ष-ज्ञानादन्यः 'पन्थाः' उपायो न विद्यते इत्यर्थः । **इति निर्धारणादिति** ॥ इति श्रुतौ अन्यस्य

मोक्षसाधनत्वनिवारणादित्यर्थः । यद्वा- निर्णायकवचनादित्यर्थः । सूत्रे मोक्षसाधनमिति शेषः कार्य इति भावेन विद्यैवेत्येतत्तात्पर्यतो व्याचष्टे- **विद्ययै-वेति** ॥ 'मोक्षः' संसारनिवृत्तिरूपः । भवतीति शेषः । भवति यतोऽतो नेत्यन्वयः । सूत्रे 'नान्यः पन्थाः' इत्येवार्थश्रुत्यनुसारेण प्रथमाप्रयोगेऽपि विद्ययैवेति तृतीयाप्रयोगेन 'कर्मणैव' इत्यादिवचनात्सावधारणविद्यावचनस्य प्राबल्यमुक्तं भवति । अनेन सौत्रतुशब्दः प्राबल्यार्थतया व्याख्यातः । कर्मवचनानां गतिस्तु भाक्तनये एव प्रतिपादिता । प्रतिपादयिष्यते चोत्तरत्र ।

सू— ॐ ॥ दर्शनाच्च ॥ ॐ ॥ ४९ ॥

न केवलं विद्यया, किं तु अपरोक्षज्ञानेन च । 'सर्वान् परो मायया ऽयं सिनीते दृष्ट्वैव तं मुच्यते नापरेण' इति कौशिकश्रुतेः ॥ ४९ ॥

ननु यदि विद्या मोक्षसाधनं तर्हि ध्यानवैयर्थ्यं, ज्ञानरूपायाः विद्यायाः श्रवणादेव सम्भवादित्याशङ्कां परिहरत्सूत्रं पठति- **दर्शनाच्चेति** ॥ अत्र चशब्दः समुच्चये अप्यर्थः । मोक्ष इति शेष इति भावेन सूत्रं व्याचष्टे- **नेति** ॥ 'विद्यया' परोक्षज्ञास्या । सौत्रदर्शनपदार्थमाह- **अपरोक्षज्ञानेनेति** ॥ मोक्ष इति वर्तते । तथा च दर्शनार्थं ध्यानमावश्यकमिति भावः । नन्वेवं 'विद्वान्' इति परोक्षविद्यया मोक्षश्रवणात्कथमुच्यते दर्शनान्मोक्ष इति, तत्राहि- **सर्वानिति** ॥ विशेषश्रुति-वलात् साऽपि दर्शनार्थेति भावः । अयं 'परः' सर्वोत्तमः हरिः 'सर्वान्' जीवान् 'मायया' स्वेच्छया प्रकृत्या च यतः 'सिनीते' बध्नाति अतः 'तं' यथायोग्यं दृष्ट्वैव मुच्यते बन्धात् । नान्येन परोक्षज्ञानमात्रेण नान्यपुरुषदर्शनेन, अन्यस्य बन्धमोचन शक्तस्याभावादिति वा श्रुत्यर्थः । श्रुतेरित्यनेन न केवलं ब्रह्मदर्शनादित्यर्थः, किन्तु श्रुतेरित्यप्यर्थ इत्युक्तं भवति ।

॥ इति विद्याधिकरणम् ॥ २९ ॥

॥ ३०. श्रुत्यधिकरणम् ॥

('ज्ञानात् मोक्षः' इति वचनं 'कर्मणा मोक्षः' इति वचनेन न बाधितम्)

सू– ॐ ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ॐ ॥ ५० ॥

सावधारणा बलवती श्रुतिः ।
'इन्द्रोऽश्वमेधांच्छतमिष्ट्वाऽपि राजा
ब्रह्माणमीड्यं समुवाचोपसन्नः ।
न कर्मभिर्न धनैर्नैव चान्यैः
पश्येत् सुखं तेन तत्त्वं ब्रवीहि ॥' इति बलवल्लिङ्गम् ।
'नास्त्यकृतः कृतेन' (मुं १-२-१२)इत्युपपत्तिश्च ॥
'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥'
इति युक्तिमद्भगवद्वचनम् । अतो न प्रमाणान्तरबाधः ॥

अस्मिन्नधिकरणे यत्साधनं भगवदुपास्तिः तस्य ज्ञानस्य मोक्षसाधनत्वं समर्थ्यते । 'कर्मणैव' इति वचनात् कर्मसाध्य एव मोक्ष इति प्राप्ते सिद्धान्ताभिधानाय सूत्रं पठति- **श्रुत्यादीति** ॥ अत्र मत्वर्थे ईयसुन् । श्रुत्यादिबलीयस्त्वादित्यस्य श्रुतिलिङ्गोपपत्तिस्मृतीनामतिबलवत्त्वात् । बलवच्छ्रुत्यादेरिति यावत् । इत्यर्थमभिप्रेत्य बलीयस्त्वे हेतुप्रदर्शनपूर्वकं सूत्राभिप्रेतां श्रुतिम्, आदिपदसूचितप्रमाणानि च दर्शयति- **सावधारणेति** ॥ 'तमेवम्' इति 'दृष्ट्वैव' (काँशिक) इति श्रुतिः 'कर्मणैव' इति स्मृतेर्बलवती यतः 'सावधारणा' निरवकाशेतरव्यवच्छेदरूपाऽवधारणेन युक्ता अत इत्यर्थः । यद्यपि 'नान्यः पन्थाः (श्वे. ३.८) इत्यवधारणार्थप्रतीतेः, 'दृष्ट्वैव' इत्यत्र च साक्षादवधारणश्रुतेः सावधारणेत्युक्तम् । राजा इन्द्रः शतसङ्ख्याकानश्वमेधाख्यक्रतून् कृत्वा ईड्यं ब्रह्माणम् उपसन्नस्समुवाच । किमिति ? हे ब्रह्मन् अहं 'कर्मभिः'

अश्वमेधाद्यैः धनैः 'अन्यैः' तपआदिभिः सुखं 'न पश्येत्' पश्येयं न पश्यामि। पश्य इति पाठोऽप्यस्ति। तदा पदिव्यत्ययः। आद्यपाठे पुरुषव्यत्ययः (यद्वा-इन्द्रः पश्येदिति परोक्षनिर्देशः। द्रोणं प्रति भीमवचनमेतत्) यत एवं 'तेन' कारणेन तदर्थं दुःखासंभिन्नसुखरूपमोक्षार्थं 'तत्त्वं' मोक्षसाधनज्ञानविषयं ब्रवीहीति श्रुत्यर्थः। **इति बलवदिति**। इत्युक्तं मोक्षस्य ज्ञानसाध्यत्वे अव्यवहितं लिङ्गं बहुकर्मकृतोऽपीन्द्रस्य दुःखासम्भिन्नसुखरूपमोक्षार्थं तत्त्वज्ञानस्य प्रार्थनरूपज्ञापकं स्मृतेर्बलवत् निरवकाशत्वरूपप्राबल्योपेतमित्यर्थः। **इत्युपपत्तिरिति**। इति श्रुतिबोध्या कार्यत्वे सत्यन्यासाध्यत्वादित्येवंरूपमोक्षस्य ज्ञानैकसाध्यत्वे साक्षादुपपत्तिश्च स्मृतेर्बलवतीति सम्बन्धः। व्यभिचारादिदूषणशून्यत्वात् श्रौतत्वाच्चेति भावः। लिङ्गोपपत्त्योरुभयोः श्रौतत्वेऽपि मोक्षस्य ज्ञानैकसाध्यत्वे साध्ये व्यवहितत्वाव्यवहितत्वाभ्यां भेदः। श्रुतिस्तु जिज्ञासानये व्याख्याता। यस्मात् 'जन्तुः' शरीरी काम्येन कर्मणा बध्यते 'विद्यया च' अपरोक्षज्ञानेनैव विमुच्यते, तस्मात्कर्म न कुर्वन्ति 'यतयः' निगृहीतेन्द्रियाः 'पारदर्शिनः' संसृतेः पारभूतस्य ब्रह्मणो दर्शिन इति गीतास्मृत्यर्थः। **इतीति**॥ इतिवचनं स्मृतेर्बलवत् कर्मणो बन्धकत्वमुमुक्षुक्रियमाणत्वरूपयुक्तियुक्तत्वादित्यर्थः। भगवद्वचनमित्यनेन पूर्वपक्षिणा भगवद्वाक्यत्वादित्युक्तहेतोः साम्यम्। ततश्च तस्य सावकाशत्वमुक्तं भवति। प्रथमान्तानाम् अस्तीत्यध्याहृतेनान्वयः। ततः किमित्यतः साध्यसम्बन्धं दर्शयति- **अत इति**॥ बलवच्छ्रुत्यादेः सत्त्वादित्यर्थः। **नेति**॥ प्रमाणान्तरेण स्मृतिवचनेन बाधो नेत्यर्थः। विद्यैव मोक्षसाधनमित्युक्तस्येति शेषः।

'कर्मणैव' (गी.३-२०) इत्ययोगव्यवच्छेदः॥ ५०॥

नन्वेवं चेत् 'कर्मणैव' इति स्मृतिरप्रमाणमेवेति प्राप्तमित्यतः चशब्दसूचितार्थमाह- **कर्मणेति**॥ क्रियत इति शेषः। 'कर्मणैव' इति वाक्यगतैवकारेण कर्मयोगस्य तदसम्बन्धस्य व्यवच्छेदो निरासः क्रियते बोध्यत

॥ ३०. श्रुत्यधिकरणम् ॥

('ज्ञानात् मोक्षः' इति वचनं 'कर्मणा मोक्षः' इति वचनेन न बाधितम्)

सू– ॐ ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ॐ ॥ ५० ॥

सावधारणा बलवती श्रुतिः ।
'इन्द्रोऽश्वमेधांच्छतमिष्ट्वाऽपि राजा
ब्रह्माणमीड्यं समुवाचोपसन्नः ।
न कर्मभिर्न धनैर्नैव चान्यैः
पश्येत् सुखं तेन तत्त्वं ब्रवीहि ॥' इति बलवल्लिङ्गम् ।
'नास्त्यकृतः कृतेन' (मुं १-२-१२)इत्युपपत्तिश्च ॥
'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥'
इति युक्तिमद्भगवद्वचनम् । अतो न प्रमाणान्तरबाधः ॥

अस्मिन्नधिकरणे यत्साधनं भगवदुपास्तिः तस्य ज्ञानस्य मोक्षसाधनत्वं समर्थ्यते । 'कर्मणैव' इति वचनात् कर्मसाध्य एव मोक्ष इति प्राप्ते सिद्धान्ताभिधानाय सूत्रं पठति- **श्रुत्यादीति** ॥ अत्र मत्वर्थे ईयसुन् । श्रुत्यादिबलीयस्त्वादित्यस्य श्रुतिलिङ्गोपपत्तिस्मृतीनामतिबलवत्त्वात् । बलवच्छ्रुत्यादेरिति यावत् । इत्यर्थमभिप्रेत्य बलीयस्त्वे हेतुप्रदर्शनपूर्वकं सूत्राभिप्रेतां श्रुतिम्, आदिपदसूचितप्रमाणानि च दर्शयति- **सावधारणेति** ॥ 'तमेवम्' इति 'दृष्ट्वैव' (कौशिक) इति श्रुतिः 'कर्मणैव' इति स्मृतेर्बलवती यतः 'सावधारणा' निरवकाशेतरव्यवच्छेदरूपाऽवधारणेन युक्ता अत इत्यर्थः । यद्यपि 'नान्यः पन्थाः (श्वे. ३.८) इत्यवधारणार्थप्रतीतेः, 'दृष्ट्वैव' इत्यत्र च साक्षादवधारणश्रुतेः सावधारणेत्युक्तम् । राजा इन्द्रः शतसङ्ख्याकानश्वमेधाख्यक्रतून् कृत्वा ईड्यं ब्रह्माणम् उपसन्नस्समुवाच । किमिति ? हे ब्रह्मन् अहं 'कर्मभिः'

अश्वमेधाद्यैः धनैः 'अन्यैः' तपआदिभिः सुखं 'न पश्येत्' पश्येयं न पश्यामि। पश्य इति पाठोऽप्यस्ति। तदा पदिव्यत्ययः। आद्यपाठे पुरुषव्यत्ययः (यद्वा-इन्द्रः पश्येदिति परोक्षनिर्देशः। द्रोणं प्रति भीमवचनमेतत्) यत एवं 'तेन' कारणेन तदर्थं दुःखासंभिन्नसुखरूपमोक्षार्थं 'तत्त्वं' मोक्षसाधनज्ञानविषयं ब्रवीहीति श्रुत्यर्थः। **इति बलवदिति**। इत्युक्तं मोक्षस्य ज्ञानसाध्यत्वे अव्यवहितं लिङ्गं बहुकर्मकृतोऽपीन्द्रस्य दुःखासम्भिन्नसुखरूपमोक्षार्थं तत्त्वज्ञानस्य प्रार्थनरूपज्ञापकं स्मृतेर्बलवत् निरवकाशत्वरूपप्राबल्योपेतमित्यर्थः। **इत्युपपत्तिरिति**। इति श्रुतिबोध्या कार्यत्वे सत्यन्यासाध्यत्वादित्येवंरूपमोक्षस्य ज्ञानैकसाध्यत्वे साक्षादुपपत्तिश्च स्मृतेर्बलवतीति सम्बन्धः। व्यभिचारादिदूषणशून्यत्वात् श्रौतत्वाच्चेति भावः। लिङ्गोपपत्त्योरुभयोः श्रौतत्वेऽपि मोक्षस्य ज्ञानैकसाध्यत्वे साध्ये व्यवहितत्वाव्यवहितत्वाभ्यां भेदः। श्रुतिस्तु जिज्ञासानये व्याख्याता। यस्मात् 'जन्तुः' शरीरी काम्येन कर्मणा बध्यते 'विद्यया च' अपरोक्षज्ञानेनैव विमुच्यते, तस्मात्कर्म न कुर्वन्ति 'यतयः' निगृहीतेन्द्रियाः 'पारदर्शिनः' संसृतेः पारभूतस्य ब्रह्मणो दर्शिन इति गीतास्मृत्यर्थः। **इतीति**॥ इतिवचनं स्मृतेर्बलवत् कर्मणो बन्धकत्वमुमुक्षुक्रियमाणत्वरूपयुक्तियुक्तत्वादित्यर्थः। भगवद्वचनमित्यनेन पूर्वपक्षिणा भगवद्वाक्यत्वादित्युक्तहेतोः साम्यम्। ततश्च तस्य सावकाशत्वमुक्तं भवति। प्रथमान्तानाम् अस्तीत्यध्याहृतेनान्वयः। ततः किमित्यतः साध्यसम्बन्धं दर्शयति- **अत इति**॥ बलवच्छ्रुत्यादेः सत्त्वादित्यर्थः। **नेति**॥ प्रमाणान्तरेण स्मृतिवचनेन बाधो नेत्यर्थः। विद्यैव मोक्षसाधनमित्युक्तस्येति शेषः।

'कर्मणैव' (गी.३-२०) इत्ययोगव्यवच्छेदः॥ ५०॥

नन्वेवं चेत् 'कर्मणैव' इति स्मृतिरप्रमाणमेवेति प्राप्तमित्यतः चशब्दसूचितार्थमाह- **कर्मणेति**॥ क्रियत इति शेषः। 'कर्मणैव' इति वाक्यगतैवकारेण कर्मयोगस्य तदसम्बन्धस्य व्यवच्छेदो निरासः क्रियते बोध्यत

इत्यर्थः। तथा च जनकादयः 'कर्मणा सह' कर्म कुर्वन्त एव 'संसिद्धिं' मुक्तिं 'आस्थिताः' प्राप्ता इति न तस्याप्रामाण्यमिति भावः। उपलक्षणमेतत्। कर्मणा संसिद्धिमास्थिता एवेत्यपि योजनासंभवेन नासौ निरवकाश इत्यपि द्रष्टव्यम्। अनेन परकीयस्मृतेः सावकाशत्वाच्चेति सौत्रचशब्दार्थ उक्तो भवति।

॥ इति श्रुत्यधिकरणम् ॥ ३० ॥

॥ ३१. अनुबन्ध्याधिकरणम् ॥

(ब्रह्मदर्शनं श्रवणादिमात्रेण न, किन्तु हरिगुरुभक्तिशमदमादिभिश्च)

सू— ॐ ॥ अनुबन्ध्यादिभ्यः ॥ ॐ ॥ ५१ ॥

न केवलं श्रवणादिभिः गुरुप्रसादेन च ब्रह्मदर्शनम्। किन्तु भक्त्यादिभिश्च।

अत्राधिकरणे ब्रह्मज्ञानसाधनस्योपासनस्य भक्तिपूर्वकत्वं समर्थ्यते। प्रबल-गुरुप्रसादेनैव ब्रह्मदर्शनसम्भवान्न तदर्थं भक्त्यादिकमपेक्षितमिति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **अनुबन्धेति** ॥ सूत्रे पूर्वस्मादनुवृत्तस्य चशब्दस्यार्थमाह- **न केवलमिति** ॥ श्रवणमननादिभिः दर्शनासम्भवेऽपि प्रबलगुरुप्रसादादिना तत्सम्भवतीत्याशङ्कावारणाय गुरुप्रसादस्य पृथङ्निर्देशः। प्रसादेनापीत्यर्थः। 'ब्रह्मदर्शनं' भवतीति शेषः। अनेन सूत्रे दर्शनाच्चेत्यतो विपरिणामेन दर्शनमित्यनुवर्तनीयमित्युक्तं भवति। अनुबन्ध्यादिभ्य इत्यत्र अनुबन्धशब्दार्थमाह- **भक्तीति** ॥ 'अनुबन्धस्तु भक्तिः स्याद् बन्धः स्नेह उदाहृतः' (भा.ता.७.१.४७) इत्यभिधानात्। 'अनुबन्धो' माहात्म्यज्ञानानु-सारिस्नेहरूपभक्तिरित्यर्थः। अनुबन्धशब्देन हरिगुरुभक्त्योरुभयोर्ग्रहणमिति सूचनाय भक्तीति सामान्यनिर्देशः। आदिपदेन शमदमादयो गृह्यन्ते। तृतीया-पञ्चम्योरेकार्थत्वान्न सूत्रभाष्ययोर्विसंवादः शङ्क्यः। सूत्रे भाष्ये च तैर्विना तदसिद्धेरिति हेतोः सिद्धत्वादनुक्तिः।

'सर्वलक्षणसम्पन्नस्सर्वज्ञो विष्णुतत्परः ।
यद्गुरुस्सुप्रसन्नस्सन् दद्यात्तन्नान्यथा भवेत् ॥
तथाऽप्यनादिसंसिद्धभक्त्यादिगुणपूगतः ।
लभेद्गुरुप्रसादं च तस्मादेव च तद्भवेत् ॥' इति ॥

ननु नियामकभाव इत्यतोऽत्रार्थेऽनुवृत्तचशब्दसूचितस्मृतिमाह- **सर्वेति** ॥ स्वयोग्यषण्णवत्यङ्गुलत्वादिलक्षणसम्पन्नः स्वयोग्यसार्वज्ञोपेतः 'विष्णुतत्परो' विष्णुभक्तिमान् गुरुः सुप्रसन्नस्सन् शिष्याय 'यद्दद्यात्' उपदिशेत् 'तदन्यथा' फलविसंवादि न भवेदित्यर्थः । यद्यपि बलवद्गुरुप्रसादादेव दर्शनं भवति । तथापि भक्त्याद्यपेक्षितमिति शेषः । कुत इत्य आह- **अनादीति** ॥ यदनादिकालात्संसिद्धं स्वतः सिद्धमव्यक्तं भक्त्यादि स एव गुणपूगः गुणसमुदायः तस्माद्गुरुप्रसादं लभेदित्यर्थः । चशब्दाद्धरिप्रसादं चेति सूचयति । यत इति शेषः । तर्हि भक्त्यादिकं हरिगुरुप्रसादार्थमेव, न ज्ञानार्थं स्यादित्यत आह- **तस्मादेवेति** ॥ 'तस्मात्' अभिव्यक्तभक्त्यादेरेव, 'तत्' अपरोक्षज्ञानं भवेदित्यर्थः । तर्हि भक्त्यादि ज्ञानसाधनमेव न गुरुप्रसादस्येत्यतोऽप्याह- **तस्मादिति** ॥ 'तस्मात्' भक्त्यादेरेव तद्गुरुप्रसादादि भवेदित्यर्थः । न च भक्त्यादेरुभयसाधनत्वमयुक्तमिति वाच्यम् । यतोऽनादिसिद्धाव्यक्तभक्त्यादिना गुरुप्रसादः तेन भक्त्याद्यभिव्यक्तिः अभिव्यक्त्यादिना च ज्ञानमित्यभ्युपगम्यते ।

'भक्तिर्विष्णौ गुरौ चैव गुरोर्नित्यप्रसन्नताम् ।
दद्याच्छमदमादींश्च तेन चैते गुणाः पुनः ॥
तैस्सर्वैर्दर्शनं विष्णोः श्रवणादिकृतं भवेत् ॥'
इति च नारायणतन्त्रे ॥ ५१ ॥

भक्त्यादिगुणपूगत इत्यत्रादिशब्दोक्तं तस्मादिति सामान्येनोक्तं च

स्पष्टयति- **भक्तिरिति** ॥ विष्णौ गुरौ च स्वरूपभूताऽनादिसिद्धा सा भक्तिः यश्च शमदमादिस्तत्सर्वं गुरोर्नित्यप्रसन्नतां दद्यात्। तेन गुरुप्रसादेन च पुनरेते भक्त्यादिगुणाः व्यक्ता भवन्ति। व्यक्तैस्सर्वैस्तैर्भक्त्यादिभिः विष्णोर्दर्शनं भवेत्। नैतावता श्रवणादिवैयर्थ्यमित्याह- **'श्रवणादिकृतमिति'** दर्शनं श्रवणादिभिः साधनैश्च कृतं भवति। 'तस्मादेव च तद्भवेदिति' इति प्रथमेतिशब्दस्य 'श्रवणादिकृतं भवेदिति' इति द्वितीयेतिशब्दस्य च इति नारायणतन्त्र इत्यनेनान्वयः। सूत्रकृदुक्तमुक्तमिति शेषः।

॥ इत्यनुबन्धाधिकरणम् ॥ ३१ ॥

॥ ३२. प्रज्ञान्तराधिकरणम् ॥

(यथायथा उपासनाभेदः तथातथा दर्शनभेदः)

सू—

ॐ ॥ प्रज्ञान्तरपृथक्त्ववद्दृष्टिश्च तदुक्तम् ॥ ॐ ॥ ५२ ॥

उपासनाभेदवत्तद्दर्शनभेदः ।

अत्राधिकरणे उपासनासाध्यज्ञाने विशेषतारतम्यं समर्थ्यते। 'दृष्ट्वैव तम्' (कौशिक) इति श्रुताविशेषितज्ञानैव मोक्षोक्तेः सर्वेषां ज्ञानमेकप्रकारमेवेति पूर्वपक्षे सिद्धान्तयितुं सूत्रं प्रवृत्तम्- **प्रज्ञान्तरेति** ॥ अत्र प्रज्ञान्तरपृथक्त्ववदित्यनेन दृष्टान्तोक्तिमुखेन हेतुरुच्यत इत्याशयेन तत्पदं व्याचष्टे- **उपासनेति** ॥ चशब्दोऽवधारणे, पृथगित्यस्यानुकर्षणार्थश्चेति भावेन दृष्टिश्चेति साध्यांशं व्याचष्टे- **दर्शनभेद इति** ॥ अनेन प्रज्ञान्तरं प्रज्ञाविशेषः लिङ्गशब्दजन्याविच्छिन्नपरोक्षज्ञान-सन्ततिरूपध्यानं तस्य पृथक्त्ववत् भेदवदनेकप्रकारवत्त्ववत्, तदनुसारेण 'दृष्टिः' ब्रह्मदर्शनं च पृथक् भिन्नमनेकप्रकारमेव, फलस्य साधनानुसारित्वादिति सूत्रखण्डार्थ उक्तो भवति। न च ध्यानस्य परोक्षज्ञानसन्ततिरूपत्वे 'मानसवासनामयस्य वस्तुनो मनसाऽवलोकनं

ध्यानम्' इति सुधाविरोधः, 'क्रियामानसवत्' इति क्रियात्वविरोधश्चेति शङ्क्यम् । परमात्मविषये परोक्षत्वेऽपि तदधिष्ठानभूतवासनामयरूपविषये अपरोक्षत्वसम्भवात् । न च परमात्मांशे उपनीतभानरूपत्वान्न परोक्षत्वमिति वाच्यम् । उपनीतांशेऽपि लौकिकापरोक्षप्रत्यासत्त्यजन्यत्वेन श्रवणादिरूप-परोक्ष[1]ज्ञानोपनीतविषयत्वेन वा परोक्षत्वाभ्युपगमात् । केचित्तु- गुणादि-ध्यानमप्यत्र विवक्षितमिति तदंशे परोक्षत्वं युक्तमित्याहुः । तन्न, तस्यापि स्मृतिरूपस्य मनोजन्यत्वेन परोक्षत्वानुपपत्तेः । ध्यायत्यर्थत्वेन क्रियार्थत्व-सम्भवान्न तद्विरोधः ।

तच्चोक्तं कमठश्रुतौ । 'अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टय इति । देवा वाव सर्वदृष्टयस्तेषु चोत्तरोत्तर-माब्रह्मणोऽन्येषु यथायोगं यथा ह्याचार्या आचक्षते' इति ।

ननु साधनपृथक्त्वेऽपि साध्यपृथक्त्वं मास्तु, साध्यसाम्यमेव किं न स्यादि-त्यतस्तदुक्तमित्युक्तं सूत्रे तद्व्याचष्टे- तच्चोक्तमिति ॥ चो भिन्नक्रमः । अनेन सूत्रे चशब्दः उक्तं चेत्यपि संयोज्यः । तथा च न केवलं तद्दर्शनपृथक्त्वं साधन-पृथक्त्वयुक्तिसिद्धम् , किन्तु श्रुत्युक्तं चेति सूत्रखण्डार्थ उक्तो भवति । केचित् शरीरान्तर्ब्रह्मोपासकाः, अत एव तत्र ब्रह्मदर्शिनः । केचित् बहिरग्न्याद्यधिष्ठाने ब्रह्मोपासकाः, तत्रैव तद्दर्शिनश्च । केचित् अवतारोपासकाः, अत एव दिव्यदृष्ट्या रामकृष्णाद्यवतारदर्शिनः । केचित् व्याप्तोपासकाः, तत एव 'सर्वदृष्टयो' व्याप्त-दर्शिनः । यद्यपि सर्वेषामन्तर्बिम्बदर्शनमपेक्षितमेव, तस्य मोक्षार्थत्वादिति सुधोक्तेः । तथापि प्राचुर्यापेक्षया एवमुक्तिः । उपासाविधेयोक्तिरपि प्राचुर्या-पेक्षयैव । अन्यथा येषां बहिरुपासनेन मोक्षः तेषां ह्युपासनं किञ्चित्कार्यमेवेति बृहद्भाष्यविरोधापातात् । भाववोधे तु केचिदधिकारिणोऽवताराणां दिव्यदृष्ट्या दर्शनेनैव मुच्यन्ते, न तेषामन्तरुपास्तिरावश्यकी, बृहद्भाष्यं तु अवतारदृष्टि-

---

१. 'ज्ञानोपनायकत्वेन...

विशेषार्थमेवावान्तरोपास्त्यावश्यकतापरम्, अत एव 'अञ्जसा दृष्ट्यैव ह्यवतारणाम्' इत्युक्तम् । **इतीति** ॥ श्रुतिः व्याख्येयपदानि स्वयमेव प्रतीकत्वेन गृह्णाति । तत्र प्राधान्यक्रमानुसारेण व्याप्तदृष्टीन् प्रथमतः निर्दिशति- **देवा इति** ॥ 'तेषु' देवेष्वपि 'आब्रह्मणः' चतुर्मुखपर्यन्तम् 'उत्तरोत्तरम्' अधिकं व्याप्तदर्शित्वं ज्ञेयमित्यर्थः । तत्प्रकाशश्च 'ब्रह्मा तु सर्वगं पश्येत्' इत्यादिनोक्तः । अवतारादिदर्शिनः के ? तेषां च कथं स्थितिरित्याशङ्कायामाह- **अन्येष्विति** ॥ अवतारादिदर्शिष्वित्यर्थः । 'यथायोगं' योग्यतानुसारेण व्यक्तिविशेषो निर्णेतव्य इति शेषः । यद्वा- अन्येष्वपि यथायोगं उत्तरोत्तरमाधिक्यं ज्ञातव्यमित्यर्थः । ननु योग्यतैव कथं ज्ञायत इत्यत आह- **यथेति** ॥ 'आचार्याः' गुरवो यथा 'आचक्षते' उपदिशन्ति त्वमेतद्रूपदर्शनयोग्य इति तथेत्यर्थः ।

अध्यात्मे च -

'दृष्ट्यैव ह्यवताराणां मुच्यन्ते केचिदञ्जसा ।
दर्शनेनान्तरेणान्ये देवास्सर्वत्र दर्शनात् ॥
तेषां विशेषमाचार्यो वेत्ति सर्वज्ञतां गतः ॥' इति ॥ ५२ ॥

ननु यद्यस्ति दर्शनभेदः तर्हि न सर्वेषां मोक्षस्स्यात्, सम्पूर्णज्ञानेनैव मोक्षस्य 'तमेवं, दृष्ट्वा' इत्यादौ प्रमितत्वादित्यतस्तदुत्तरत्वेनापि तदुक्तमित्येतद् व्याचष्टे- **अध्यात्मे चेति** ॥ अध्यात्माख्यग्रन्थेऽपि तद्दर्शनपृथक्त्वमुक्तमित्यर्थः । तद्वाक्यं पठति - **दृष्ट्येति** ॥ दिव्यदृष्ट्येत्यर्थः ।

'प्रादुर्भावानपि यदा ज्ञानदृष्ट्यैव पश्यति ।
तदैव मुच्यते योगी ॥' इति काठकभाष्योक्तेः । (काठक.भा.२.४.१०)

तथा च केचिन्मनुष्याः 'अवताराणां' रामकृष्णादिरूपाणाम् 'अञ्जसा दृष्ट्या' दिव्यदृष्ट्या दर्शनेनैव मुच्यन्ते इत्यर्थः । एवकारस्त्वयोगव्यवच्छेदकः । भावबोधपक्षेऽधिकारिविशेषापेक्षयाऽन्ययोगव्यवच्छेदकः । केचित् ऋषयः

'आन्तरेण' हृदयान्तर्जातेन दर्शनेन मुच्यन्ते । सर्वत्र स्थितस्य ब्रह्मणो दर्शनाद्देवा मुच्यन्त इत्यर्थः । 'तेषां' अधिकारिणाम् । यद्वा- 'तेषा' देवानां 'विशेषं' तारतम्यं योग्यताविशेषं वा सर्वज्ञतां 'गतः' प्राप्त आचार्यो 'वेत्ति' जानातीत्यर्थः । अनेन 'विद्वान्, दृष्ट्वैव' इत्यादेः न सम्पूर्णतो जानन् दृष्ट्वैवेत्यर्थः, किन्तूदाहृतविशेषवाक्यबलाद्यथायोग्यमित्यभ्युपगमात् न तद्विरोध इत्युक्तं भवति । 'यावान्' इति वाक्यं चतुर्मुखविषयं सामान्यतः सार्वज्ञविवक्षया सर्वविषयं वेति ध्येयम् । इतीत्यस्याध्यात्म इत्यनेनान्वयः ।

॥ इति प्रज्ञान्तराधिकरणम् ॥ ३२ ॥

॥ ३३. न सामान्याधिकरणम् ॥

(स्वयोग्यरूपदर्शनादेव मुक्तिः)

सू— ॐ ॥ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ॐ ॥ ५३ ॥

न सामान्यदर्शनमात्रेण मुक्तिः । यथा मृत्युमात्रात् ।

अत्राधिकरणे उपासनासाध्यदर्शनस्य बिम्बशब्दितयोग्यात्मरूपविषयकस्यैव मुक्तिसाधनत्वं समर्थ्यते । भगवतस्सर्वरूपेष्वपि मोक्षदातृत्वगुणसाम्यात् यत्किञ्चिद्रूपदर्शनमेव मोक्षसाधनं न बिम्बविषयमेवेति नियम इति प्राप्ते सिद्धान्तयितुं प्रवृत्तं सूत्रम्- **न सामान्यादिति** ॥ अत्र 'सामान्यात्' साधारणात् उपलब्धेरिति सामानाधिकरण्यम् । लिङ्गव्यत्ययः शब्दस्वभावकृतः । यद्यपि तथापीत्यर्थे मात्रार्थे चापिशब्दः । उपलब्धेरपीत्यन्वीयते । मुक्तिरिति प्रकृत्वात्सम्बध्यते । तथा च यद्यपि भगवद्रूपाणां सामान्यं साम्यम्, अत एव तद्विषयकदर्शनानामपि समानत्वम् । तथापि 'सामान्यायाः' समानब्रह्मरूपविषयत्वेन स्वयोग्यरूपदर्शनेन समानतया वर्तमानायाः उपलब्धेरपि यत्किञ्चिद्रूपदर्शनमात्रात् तस्मादेव सर्वेषां न मुक्तिरित्यर्थः । यद्वा- उपलब्धेः

दर्शनस्य साम्यात् साधारणविषयत्वात् न तस्य मुक्तिरित्यर्थः । अथवा-ल्यब्लोपनिमित्ता पञ्चमीयम् । तथा च सामान्यमपेक्ष्य रूपसामान्यं विषयी-कृत्य 'सत्या उपलब्धेः दर्शनान्न मुक्तिरित्यर्थः । एतत्कल्पद्वये सामान्यादुप-लब्धेरिति वैयधिकरण्यमिति भावेन सामान्यादप्युपलब्धेरिति प्रतिज्ञांशं व्याचष्टे- **नेति** ॥ अपि तु स्वयोग्यात्मदर्शनादेवेति शेषः । तेनापीत्यस्यापि त्वित्यर्थाश्रयणेन उपलब्धेरित्यस्यावृत्त्या च अपि तु उप समीपे योग्यतया वर्तमानस्य बिम्बरूपस्य लब्धेर्दर्शनादेवेति सूत्रे प्रतिज्ञाशेषः प्रदर्शितो भवति । कुतो नेत्यतः तत्रोपलब्धेः सामान्यात् साधारणत्वादिति हेतु उपलब्धेरि-त्यनेनोक्तम्-

'मुक्त्यर्थमात्मयोग्यं तु विज्ञानं तदुदाहृतम् ।
समोऽपि भगवान् [२]बिम्बदर्शनेनैनं मोचयति ॥'

इत्यादिश्रुतेरिति हेतुं मनसि निधाय सामान्यमात्रान्न मुक्तिरित्यत्र दृष्टान्त-प्रतिपादनायोक्तं मृत्युवदित्यंशं व्याख्याति- **यथेति** ॥ **मृत्युमात्रादिति** ॥ मृतिमात्रादित्यर्थः । न मुक्तिरित्यनुषज्यते । तथा च यथा ब्रह्मज्ञानिनां सर्वमृतौ मृतित्वसाम्येऽपि न 'मृत्युमात्रात्' साधारणमृतेरनन्तरं मुक्तिः, किन्तु प्रारब्ध-कर्मक्षये चरममृत्यनन्तरमेव, तथा प्रकृतेऽपि रूपविशेषज्ञानादेव मुक्तिः, न साधारणादित्यर्थः । यद्वा- मृत्युशब्देन मारक उच्यते । संसृतेरिति शेषः । तथा च यथा ब्रह्मज्ञानिनां ज्ञाने संसारमृत्युत्वे समानेऽपि ज्ञानरूपमृत्युमात्रादनन्तरं न मुक्तिः, किन्तु प्रारब्धकर्मावसानकालीनत्वविशेषितान्मृत्योरवतरणानन्तर-मेव, एवं भगवद्रूपाणां साम्येऽपि रूपविशेषज्ञानमेव मोक्षसाधनं, न सामान्य-दर्शनमित्यर्थः । 'समोऽपि' इति श्रुतौ बिम्बशब्दो योग्यात्मपरः । न तु

'हृदिस्था या हरेर्मूर्तिः जीवो यत्प्रतिबिम्बकः ।
यद्वशे वर्तते जीवः सा तु जीवकला स्मृता ॥' (भा.ता. ११.२७.१२)

---

१. सत्या उपलब्धः इति मुद्रितपुस्तके ।

२. बिम्बदर्शनयैवेनम् इति मुद्रितपुस्तके ।

इत्युक्तहृद्गतरूपविशेषपरः। 'दृष्ट्वैव' इति वाक्यविरोधात्। जीवः कलांशो यस्यासौ जीवकला।

न हि लोकापत्तिमात्रं मुक्तिः।

ननु यदि सामान्यदर्शनान्न मुक्तिः, तर्हि तद्वैफल्यं स्यात्। न च ब्रह्मदर्शनस्य तद्युक्तं, अतः सफलत्वेऽवश्यंभाविनि यत्तस्य फलं स एव मोक्ष इति सामान्यदर्शनमपि मुक्तिसाधनं भवतीत्यतः प्रवृत्तम्- 'न हि लोकापत्तिः' इत्यंशं व्याचष्टे- न हीति॥ 'लोकापत्तिमात्र महरादिलोकप्राप्तिरेवेत्यर्थः। अनेन लोकापत्तिरित्यनन्तरमप्यपिशब्दोऽनुषञ्जनीयः। स चावधारणार्थमात्रार्थः। तथा च न सामान्यदर्शनस्य वैफल्यं शङ्क्यम्। यतः सामान्यादप्युपलब्धेर्लोकापत्तिः भवति अतः। न चैवं तस्य मोक्षसाधनत्वापत्तिः। 'हि' यतो न लोकापत्तिरेव मोक्ष इति 'हि' प्रसिद्धमत इति सूत्रांशयोजनोक्ता भवति।

'सामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मदर्शनात्।'

इति नारायणतन्त्रे।

ननु सामान्यदर्शनेन लोकापत्तिरेव न मुक्तिरिति कुत इत्यतो हिशब्दसूचितप्रमाणमाह- **सामान्येति**॥ योग्यात्मदर्शनातिरिक्तावतारादिदर्शनादित्यर्थः। 'लोकाः' महरादयः। **योग्येति**॥ स्वयोग्यपरमात्मरूपदर्शनादित्यर्थः। भवन्तीति शेषः। नारायणतन्त्रे उक्तत्वादिति शेषः। अस्य न हीत्यनेनान्वयः। न च 'दृष्ट्वैव' इत्युक्तिविरोधः। तस्याधिकारिविशेषविषयत्वात् अधिकारिविशेषाणां च अवतारदर्शनस्य सामान्यदर्शनत्वाभावात्, एवकारस्यायोगव्यवच्छेदार्थाभ्युपगमाद्वा।

'मुच्यते नात्र सन्देहो दृष्ट्या तु स्वात्मयोग्यया' इति च।

ननु यथा भगवद्दृष्टीनां मध्ये योग्यात्मदृष्टिरेव मुक्तिहेतुः, न तु रूपान्तरदृष्टिरिति विकल्पः, तथा योग्यात्मदर्शनेऽपि किञ्चिन्मुक्तिहेतुः किञ्चिन्नेति

विकल्पः स्यादित्यत आह- **मुच्यत इति** । तुरेवार्थे । स्वात्मयोग्यया दृष्ट्या मुच्यत एव नात्र संशय इत्यर्थः । इति नारायणतन्त्र इत्यन्वयः । भिन्न-प्रकरणस्थत्वात् पुनरितिशब्दः ।

'दर्शनेनात्मयोग्येन मुक्तिर्नान्येन केनचित् ॥'
इति चाध्यात्मे ॥ ५३ ॥

ननु सामान्यदर्शनेन यथा लोकापत्तिः तथा कचिन्मुक्तिश्च किं न स्यादित्यत आह- **दर्शनेनेति** ॥ 'आत्मयोग्येन' स्वयोग्यरूपविषयकेन दर्शनेनैव मुक्तिः 'नान्येन केनचित्' सामान्यदर्शनादिनेत्यर्थः । अवतारदर्शनमपि केषाञ्चित् स्वयोग्यमिति न तदत्र व्यावर्त्यमिति न 'दृष्ट्वैव' इत्यनेन विरोधः । यद्वा-मुक्तिर्नान्येनेत्यनेन अवतारादिदर्शनस्याव्यवधानेन मुक्तिसाधनत्वं निषिध्यते । 'दृष्ट्वैव' इत्यत्र तु व्यवधानेन तदुच्यते । अतो न विरोधः । यथोक्तं गीतातात्पर्ये ।

दृशिः - 'नियमेनैव मोक्षाय भवेद्योग्या भवेद्यदि ।
अयोग्या भक्तिजाता चेत् क्रमान्मुक्तिर्भवेत्तया ॥' इति ॥

इत्यध्यात्मे च सूत्रकृदुक्तमुक्तमिति शेषः ॥

॥ इति न सामान्याधिकरणम् ॥ ३३ ॥

॥ ३४. परेणाधिकरणम् ॥

(परमात्मप्रसादादेव अपरोक्षज्ञानम्, न भक्तिमात्रेण)

'भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी' इति माठरश्रुतेर्न परमात्मना दर्शनमिति चेत्-

अत्राधिकरणे 'अनुबन्धादिभ्यः' इत्यत्र दर्शनसाधनतयोपासनसाहित्ये-

नोक्तभक्तेः स्वातन्त्र्यं निरस्यते। पूर्वपक्षयति- **भक्तिरिति** ॥ भक्तिरेव 'एनं' परमात्मानमधिकारिणं नयति, न त्वन्यदित्यर्थः। यद्वा 'तयैवैनं वशं नयेत्' इति स्मृत्यनुसारेण भक्तिरेवैनं परमात्मानं वशं नयतीत्यर्थः। 'एवं' विष्णुं भक्ताय दर्शयति। पुरुषो हरिःभक्तिवशो भक्तचधीनः 'भूयसी' साधनेषु श्रेष्ठा। इति श्रुतेः 'परमात्मना' तत्प्रसादेन 'दर्शनं' दर्शनादि ब्रह्मसाक्षात्कारादि न भवतीति ज्ञायत इत्यर्थः।

न, 'तस्यैष आत्मा विशते ब्रह्मधाम' (मु.३-२-४) इति श्रुतेः।

सिद्धान्तयति- **नेति** ॥ परमात्मना दर्शनादि नेति न, किन्तु तेनैव दर्शनादि भवतीत्यर्थः। कुत इत्यतस्तत्र हेतुत्वेन चशब्दसूचितां श्रुतिमाह- **तस्येति** ॥ आथर्वणे -

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥
एतैरुपायैर्यतते यस्तु विद्वान् ॥'(मु.३-२-३)

इति पूर्ववाक्ये अयं परमात्मा भक्तिरहितैः प्रवचनमेधाश्रवणादिभिः न लभ्यते भक्तिपूर्वकैरपि स्वातन्त्र्यान्न लभ्यः, किन्तु 'एतैः' भक्तिप्रधानकैः प्रवचनाद्युपायैः 'यो' ब्रह्मदर्शनार्थं यतते इत्युक्तः, तस्याधिकारिणः एतैः प्रसन्नः परमात्मा 'ब्रह्मधाम' परब्रह्माधिष्ठानभूतं वायुं 'विशते' तत्र तस्याविर्भवतीत्यर्थः। 'प्रधानं धाम विष्णोस्तु प्राण एव प्रकीर्तितः' इत्याथर्वणभाष्योक्तेः। तत्त्वप्रदीपे तु ब्रह्मपुरं हृदयम् 'एषः' परमात्मा 'विशते' तत्र दृश्यते इत्युक्तम्।

कथं तर्ह्येषा श्रुतिः।

सू — ॐ ॥ परेण च शब्दस्य ताद्विध्यं
भूयस्त्वात्त्वनुबन्धः ॥ ॐ ॥ ५४ ॥

परमात्मैव भक्त्या दर्शनं प्राप्य मुक्तिं ददातीति प्रधान-साधनत्वाद्भक्तिः करणत्वेनोच्यते ।

यदि परमात्मनैव दर्शनादि कथं तर्हि भक्तेरेव तत्साधनत्वाभिधायक-श्रुतिरुपपद्यत इति शङ्कते- **कथमिति** ॥ 'एषा' भक्तेः कर्तृत्वाभिधात्री 'भक्ति-रेवैनम्' इति श्रुतिः कथमुपपद्यत इत्यर्थः । तत्परिहाराय सूत्रं पठित्वा व्याचष्टे- **परेण चेति** ॥ एवकारो भिन्नक्रमः । अत्रेति शेषः । परमात्मा भक्त्यैव 'दर्शनं प्राप्य' दर्शनविषयो भूत्वा मुक्तिं ददादीति हेतोः अत्र 'एतैरुपायैः' इति श्रुतौ भक्तिः करणत्वेनोच्यते यतोऽत एषा श्रुतिरुपपद्यत इति योजना । करणे कर्तृत्वोपचार इति भावः । ननु साधनान्तराण्यनुक्त्वा किं विशिष्याभिधीयते भक्तिरेवैनम्' इतीत्यत आह- **प्रधानसाधनत्वादिति** ॥ साधनेषु प्रधानत्वादि-त्यर्थः । भक्तिः करणत्वेनोच्यत इत्यत्र भक्त्यैव मुक्तिं ददातीत्यम् हेतुः । इति-शब्दस्य भक्तिरित्यप्यन्वयेन ज्ञापितायां विशिष्योच्यते इति प्रतिज्ञायाम् प्रधानसाधनत्वादित्थं हेतुः । अनेन भूयस्त्वादित्यस्यार्थ उक्तो भवति । सूत्रे चोऽप्यर्थोऽवधारणार्थश्रुतिसूचकश्च । प्रधानसूत्रात्तदुक्तमित्यनुवर्तते । तथा च 'अपि' यद्यपि 'एतैरुपायैः' इति श्रुतेः 'परेण च' परमात्मनैव तद्दर्शनादिकं, न तु भक्त्या। तथापि 'भक्तिरेनम्' इति श्रुतेः 'ताद्धिध्यम्' ईश्वरकर्तृत्वश्रुतिवत्कर्तृता-प्रतिपादकत्वमुपपद्यते । कथम् ? यतः 'अनुबन्धस्य' भक्तेः 'एतैः' इति श्रुतौ तत्करणत्वमुक्तमतः । तथा च करणे कर्तृत्वोपचार इति भावः । मुख्यकर्तृत्वाङ्गी-कारे तु 'एतैरुपायैः' इति निरवकाशविशेषश्रुतिविरोध इति तुशब्दाभिप्रायः । न च साधनान्तराणि विहाय किं विशिष्याभिधीयते 'भक्तिरेनम्' सति श्रुतावनुबन्धो भक्तिरिति वाच्यम् । तस्याः 'भूयस्त्वात्' साधनेषु प्रधानत्वादिति सूत्रार्थः ॥

मायावैभवे च -

'भक्तिस्थः परमो विष्णुस्तयैवैनं वशं नयेत् ।
तयैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया ॥

स्नेहानुबन्धो यस्तस्मिन् बहुमानपुरस्सरः ।
भक्तिरित्युच्यते सैव करणं परमेशितुः ॥' इति ॥

अत्रैव स्मृतिमाह- **मायेति** ॥ मायावैभवाख्यग्रन्थ इत्यर्थः । भक्तौ तिष्ठतीति भक्तिरत्र तिष्ठतीति वा भक्तिस्थः । भक्त्यामधिकारणो भक्तेः नियामकश्चेति तत्त्वप्रदीपोक्तेः । 'तया' अनादिसिद्धया भक्त्यैव 'एनं' स्वात्मानं 'वशं नयेत्' जीववशोऽहमिति ज्ञापयेत् । यद्वा- 'एनं' जीवं 'वशं नयेत्' तस्य भगवदीयोऽहमिति स्मृतिं जनयेदित्यर्थः । 'तयैव' गुरुप्रसादेनाभिव्यक्तभक्त्यैव करणेन दर्शनं 'यातः' प्राप्तस्तद्विषयो भूत्वा 'एतया' अतिपरिपक्वया भक्त्या जीवाय मुक्तिं प्रदद्यादित्यर्थः । भक्तिरित्यनेनानुबन्धशब्दार्थ उक्तः । तत्र प्रमाणमाह- **स्नेहेति** ॥ अनु स्वानुकूलं यथा तथा बध्नाति बद्धमिव वशयति स्वप्रभुमित्यनुबन्धः । 'यस्तस्मिन्' विष्णौ 'बहुमानपुरस्सरः' बहुः पूर्णता मानं ज्ञानं देशकालगुणैः पूर्णत्वज्ञानपूर्वकः स्नेहः स एवानुबन्धः सैव भक्तिरित्युच्यते इत्यर्थः । ननु दर्शनादौ हरेरेव कर्तृत्वे कथं 'भक्तिरेवैनम्' इति श्रुतिरुपपद्यत इत्यत आह - **सैवेति** ॥ 'परमेशितुः' परमेश्वरस्य दर्शनादिदाने सा भक्तिरेव करणमित्यर्थः । करणे कर्तृत्वोपचार इति भावः । करणं साधनेषु प्रधानमित्यनेन साधनान्तराण्यनुक्त्वा भक्तेरेवाभिधाने कारणमुक्तं भवति । इतीत्यस्य मायावैभव इत्यनेनान्वयः ।

सर्वशब्दानां ब्रह्मणि प्रवृत्तेश्च ॥ ५४ ॥

एवं 'हन्ता रामशरः' इतिवत्करणेऽपि कर्तृत्वव्यपदेशादर्शनात्करणार्थत्वेन 'भक्तिरेवैनम्' इति श्रुतिमुपपाद्य प्रकारान्तरेणाप्युपपादयति- **सर्वेति** ॥ भक्तिरित्यादिसर्वपदानामित्यर्थः । 'ब्रह्मणि' परब्रह्मणि 'प्रवृत्तेः' समन्वयात् परममुख्यवृत्तेः सत्त्वात् । ब्रह्मैवैनं नयतीत्याद्यर्थोपपत्तेश्चोपपन्ना श्रुतिरित्यर्थः । अनेन 'च' यतः 'परेण' वाच्येन निमित्तेन भक्त्यादिशब्दस्य 'तद्विध्यं' तस्य 'एतैरुपायैः' इत्यादिवाक्यस्य विधा प्रकार इवि प्रकारो यस्य स तद्विधस्तस्य

भावस्ताद्विध्यं तद्धत्नारायणस्य कर्तृत्ववादित्वं युक्तम्, अतो नेश्वरस्य दर्शनादिकर्तृत्वे श्रुत्यनुपपत्तिरिति सूत्रखण्डस्य अर्थान्तरमुक्तं भवति ॥

॥ इति परेणाधिकरणम् ॥ ३४ ॥

॥ ३५. एकाधिकरणम् ॥

(उपासना तत्तज्जीवयोग्यतानुसारिणी)

जीवांशानां पृथगुत्पत्तेर्नानादियोग्यताऽपेक्षेति न मन्तव्यम्, कुतः ?

सू— ॐ ॥ एक आत्मनश्शरीरे भावात् ॥ ॐ ॥ ५५ ॥

अंशांशिनोरेकत्वमेव । अंशिकर्मविनिर्मितशरीर एवांशस्य भावात् ॥ ५५ ॥

अत्राधिकरणे उपासनस्यानादियोग्यतासापेक्षत्वं समर्थ्यते । तत्र 'उपलब्धिवत्, व्यतिरेकः' इत्याभ्यां सूचितहेतूक्तिपूर्वकं पूर्वपक्षयति- **जीवेति** ॥ उपासनादाविति शेषः । पृथगिति भिन्नं पदम् पृथक्त्वादित्यर्थः । तथा च नोपासनाद्यर्थं योग्यताऽपेक्षाऽस्ति । कुतः ? योग्यतायाः सादित्वे तद्धदुपासनस्याप्यगन्तुकत्वप्रसङ्गात् अनादित्वं वाच्यम् । तच्च न युक्तं यत इन्द्रादिजीवांशानामर्जुनादीनां योग्यता नानादिः । न चासिद्धिः । इन्द्रादिजीवांशानामुत्पत्तेः सादित्वात् । धर्मिण एव सादित्वे तद्धर्मभूतयोग्यताया अनादित्वायोगादिति भावः । न चांशिनोऽनादित्वात् कथमंशानामुत्पत्तिः तयोरैक्यादिति वाच्यम् । इन्द्राद्यंशिजीवेभ्यस्तदंशानां पृथक्त्वात् भिन्नत्वात् । न चासिद्धिः । अंशानामिन्द्रादिजीवेभ्यः पृथक्त्वात् ज्ञानसुखादौ अनुसन्धाननानुसन्धानाख्यवैलक्षण्यवत्त्वादिति योजना । एवं प्राप्तं पूर्वपक्षं प्रतिषेधति - **नेति** ॥ कुतो न मन्तव्यमित्याक्षिपति- **कुत इति** ॥ तत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **एक इति** ॥ अत्र अंशोंऽशी चैक एवेति योजनामभिप्रेत्य एक इति प्रतिज्ञा-

वाक्यतात्पर्यमाह- **अंशेति** ॥ कुत इत्यतः षष्ठ्यर्थोक्तिपूर्वकं आत्मनश्शरीरे भावादिति हेत्वंशं व्याचष्टे- **अंशीति** ॥ 'भावात्' अभिमानितया सत्त्वादित्यर्थः। अनेनाऽत्मांश आत्मना अंशिना एक एव, न भिन्नः कर्मनिर्मितशरीरे आत्मनोऽशस्य भावात्सत्त्वादिति सूत्रार्थ उक्तो भवति।

सू—

ॐ ॥ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥ ५६ ॥

ज्ञानादिभेदे विद्यमानेऽपि नांशांशिनोः पृथग्भाव एव।
तदुपासनादिभोगादंशस्य ।

ननु ज्ञानादिभेदादंशांशिनोर्भेद एव युक्तो नाभेद इत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **व्यतिरेक इति** ॥ ज्ञानं वृत्तिरूपम्। आदिशब्देन तादृशसुखादिर्गृह्यते। व्यतिरेकशब्दार्थो भेद इति सप्तम्यन्ताद्धतिरिति भावेन भेद इति सप्तमीप्रयोगः । आत्मनोरिति विपरिणतपदस्यार्थः । **अंशांशिनोरिति** ॥ पृथग्भाव इत्यनेन व्यतिरेकशब्दस्योपमानोपमेययोरन्वयो दर्शितः । एवेति तुशब्दस्यार्थः। अनेनात्मनोर्नोपलब्धिवद्व्यतिरेक इति प्रतिज्ञांशो व्याख्यातः। कुत इत्यतस्तदुत्तरत्वेन तद्भावभावित्वादिति हेत्वंशं व्याचष्टे- **तदुपासनादीति** ॥ अंशिकर्तृकोपासनादिजातमहाफलभावादित्यर्थः । उपासनाजनितमहाफलानुसन्धानमेवाभेदे प्रयोजकं तदभावस्त्वसिद्ध इत्युक्तं भवति । अनेन 'उपलब्धिवत्' उपलब्ध्यादौ धर्मे व्यतिरेक इव भेद इव अनुसन्धाननानुसन्धानात्मकवैलक्षण्यमिव आत्मनोरंशांशिनोः धर्मिणोरपि परस्परं 'व्यतिरेक एव' अन्योन्याभावरूपपृथग्भाव एव, न त्वभेद इति न वाच्यम्। कुतः ? 'तद्भावभावित्वात्' भावशब्द आवर्तते। तत्रैकस्यानुभवोऽर्थः। भवतेरनुभवार्थत्वात्। अन्यस्य मानसक्रियारूपध्यानाख्यमुपासनमर्थः । अपरस्योपासनफलमानन्दवृद्धिरर्थः। 'भावो वृद्धिः समुद्भिष्टा क्वचिद्भावो मनः स्मृतम्' इति

वचनात् । तुशब्दस्यात्रान्वयः । स चाप्यर्थः । तथा च आत्मन उपलब्ध्यादौ ज्ञानादावनुसन्धाननुसन्धानरूपे अल्पत्वमहत्त्वरूपे वा व्यतिरेके विद्यमानेऽप्यात्मनोंऽशस्याल्पे वृत्तिज्ञानसुखादौ मानुषान्नोपभोगादिनाऽनुसन्धानाभावेऽपीति यावत्। 'तद्भावभावित्वात्' तस्यांशिनो भावस्य तत्कर्तृकप्रधानसाधनोपसानादिसम्बन्ध्यानन्दवृद्धिरूपमहाफलस्य भावित्वात् अनुसन्धातृत्वात् अंशत्वेऽपीति सूत्रार्थ उक्तो भवति ।

परमसंहितायां च -

'अंशिनस्तु पृथग्जाता अंशास्तस्यैव कर्मणा ।
पुनरैक्यं प्रपद्यन्ते नात्र कार्या विचारणा ।।' इति ।। ५३ ।।

आद्यसूत्रार्थे स्मृतिं प्रमाणयति- **परमेति** ।। न केवलं सूत्र इति चार्थः । 'अंशाः' अर्जुनादयः । 'तस्यैव' अंशिन एव 'कर्मणा' कर्मनिमित्तेनैव शरीरेण सह 'अंशिनः' इन्द्रादेः 'पृथक्' विभक्ततया भूम्यादौ जाताः सन्तः 'पुनः' कर्मपर्यवसानानन्तरं स्वस्थानं गताः अंशिनैक्यं 'प्रतिपद्यन्ते' प्राप्स्यन्तीत्यर्थः । नत्वन्यकर्मणेत्येवशब्दार्थः । अत्रार्थे 'विचारणा' चर्चा न कार्येत्यर्थः । इति परमसंहितायां सूत्रकृदुक्तमुक्तमित्यन्वयः ।

।। इत्येकाधिकरणम् ।। ३५ ।।

।। ३६. अङ्गावबद्धाधिकरणम् ।।

(अप्रधानत्वेन अन्यदेवता अपि उपास्याः)

सू —

ॐ ।। अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ।।ॐ।।५७।।

ब्रह्माद्यङ्गदेवतावबद्धोपासनादि प्रतिशाखं प्रतिवेदं च नोपसंहियते ।

हिशब्दात्

'समत्वाद्बोत्तमत्वाद्वा नाङ्गदेवाद्युपासनम् ।
उपसंहार्यमित्याहुर्वेदसिद्धान्तवेदिनः ॥'

इति ब्रह्मतर्कवचनात् ॥ ५७ ॥

अत्राधिकरणे भगवदुपासनस्य यथायोग्यं ब्रह्माद्यङ्गदेवतोपासनस्य युक्तत्वेन कर्तव्यता प्रतिपाद्यते । 'अन्या वाचो विमुञ्चथ' (मु. २-२-५) 'पूजयेन्नान्यदेवताः' इत्यादेर्नाङ्गाश्रितान्यदेवतोपसनं कार्यं, किन्तु केवलं ब्रह्मोपासनमेव, कार्यत्वे वा एकस्य प्रतीतगुणाः सर्वेषूपसंहर्व्या इति प्राप्ते सिद्धान्तयत्सूत्रं पठति- **अङ्गेति** ॥ अत्राङ्गशब्देन विष्णोरङ्गसमुद्भूते, विष्णोरङ्गानि देवताः' इति वचनादीशाङ्गजातत्वान्निमित्ताद्ब्रह्मादिदेवाः अङ्गानीत्युच्यन्ते । भावप्रधानोऽयमावर्तनीय इति भावेन अङ्गावबद्धा इति प्रतिज्ञांशं व्याचष्टे- **ब्रह्मादीति** ॥ ब्रह्मादयश्च ताः देवताश्च तदवबद्धं तत्सम्बद्धं च तदङ्गत्वावबद्धं च तत् उपासनादि चेति विग्रहः । प्रथमादिशब्देन रुद्रादयो गृह्यन्ते । द्वितीयेन परिचर्यानमस्काराद्युच्यते । कार्यमेव अधिकारिभिरिति शेषः । एवेत्यनेन सौत्रतुशब्दोऽवधारणार्थतयाऽपि व्याख्यातः । अङ्गावबद्धा इति वचनेनोदाहृतश्रुत्यादिविरोधः परिहृतः । श्रुत्यादौ प्राधान्येनोपासनस्यैव निषिद्धत्वात् अङ्गत्वेनोपासनस्य चाभ्युपगतत्वात् । अत एव -

'सर्ववर्णाश्रमैर्विष्णुरेक एवेज्यते सदा ।
रमाब्रह्मादयस्तस्य परिवारतयैव तु ॥' (स.स्मृ. ३२)

इति वचनम् ॥

अनेन अङ्गावबद्धाः ब्रह्मादिदेवविषयाः अङ्गत्वसम्बद्धाः तत्प्रकारकाः उपासनाद्याः कार्या एव सर्वैर्मुमुक्षुभिः । कुत एतत्? हिशब्दसूचितायाः 'समत्वात्' इति स्मृतेरेवेति सूत्रांशस्यार्थ उक्तो भवति । तर्हि सर्वगुणाः सर्वत्रोपसंहृत्योपास्याः स्युरिति शङ्कते- **त्विति** ॥ तदुत्तरत्वेन- न शाखासु

प्रतिवेदमित्येतद्व्याचष्टे- **प्रतिशाखमिति** ॥ 'प्रतिवेदं' सर्ववेदानां 'प्रतिशाखं' सर्वशाखास्वित्यन्वयः । उक्तमुत्तमानां गुणजातमवमेष्विति शेषः । चस्समुच्चये । शाखास्वित्येव पूर्तौ प्रतिवेदमित्याद्युक्तिः अविभक्तमूलवेदापेक्षयेत्युक्तं तत्त्वप्रदीपे । 'नोपसंहियते' अवमेषु नोपसंहार्यमिति । अनेन प्रतिवेदं प्रतिशाखासूक्ता अङ्गावबद्धा उत्तमाङ्गदेवतासम्बन्धिनो ब्रह्मणः सर्वगुणाः 'वेदाहमेतं पुरुषं महान्तम्' (तै.आ. ३-१२) इत्युक्ताः 'अवमेषु' रुद्रादिषु तद्गुणाः 'त्र्यम्बकाय त्रिपुरान्तकाय कालाग्निरुद्राय नीलकण्ठाय' इत्युक्ताः इन्द्रादिषु च नोपसंहर्तव्याः, किन्तु योग्या एवेति सूत्रखण्डस्यार्थ उक्तो भवति । न चायं विभागो न दृष्ट इति वाच्यम् । यथा खलु भगवत्परवाक्यानां न सर्वेषामन्यत्र ब्रह्मादिष्वन्वयः, अपि तु योग्यनामेव 'हिरण्यगर्भस्समवर्तताग्रे' (तै.सं.४-१-८) इत्यादीनां, तद्वदुपपत्तेरिति भावः । कुत एतत्सिद्धमित्यतः प्रवृत्तं हीत्येतद्व्याचष्टे- **समत्वादिति** ॥ सूचितादिति शेषः । अस्य वचनादित्यनेनान्वयः । स्मृतौ कार्यमिति उत्तमानां गुणजातमधमेष्विति च शेषः । उपासनाशब्द आवर्तते । तत्रैकः कर्मणि ल्युडन्तो गुणजातपरः । आदिशब्देन गन्धर्वादयो गृह्यन्ते । तथा च अङ्गदेवाद्युपासनं कार्यं मुमुक्षुभिः, परं तु उत्तमानां ब्रह्मादीनां गुणजातमधमेषु नोपसंहार्यमित्याहुरित्यर्थः । कुत इत्यतो हेतुमाह- **समत्वादिति** ॥ वाशब्दौ चार्थौ परस्परसमुच्चये । अयमर्थः- अन्यगुणानामन्यत्र उपसंहारे सर्ववेदानां साम्येनैव भाव्यं, तच्च नास्ति केषाञ्चित् समत्वात् केषाञ्चिदुत्तमत्वादिति सर्वसाम्याभावात् । तत्त्वप्रदीपे तु असमानां समत्वेनोपासनस्य उत्तमानामधमत्वेनोपासनस्य च निषिद्धत्वादित्येवं प्रकारसमर्पकतया व्याख्यातम् । हेत्वसिद्धिपरिहारायाह- **वेदेति** ॥ वेदनिर्णायकग्रन्थवेदिन इत्यर्थः । तथा च वेदसिद्धान्ते नानागुणत्वेनैवेषामुक्तेर्नासिद्धिरिति भावः । वचनादित्यस्य नोपसंहियत इत्यनेनान्वयः । इति ज्ञायत इति शेषः ।

सू — ॐ ॥ मन्त्रादिवद्वाऽविरोधः ॥ ॐ ॥ ५८ ॥

सर्वदेवतामन्त्रा यथाऽधीयन्ते एवमविरोधो वा ।

एवमेकत्र प्रतीतानां सर्वगुणानामन्यत्रोपसंहाराभाव उक्तः । इदानीमुपसंहाराभ्युपगमेऽपि न विरोध इत्याह सूत्रकृत्- **मन्त्रादिवदिति** ॥ अत्रादिशब्देन बहुवाक्यसमूहरूपविद्योच्यते । षष्ठ्यन्ताच्च वतिरिति भावेन सूत्रं व्याचष्टे- **सर्वेति** ॥ अग्र्याद्यधमसर्वदेवतामन्त्रादय इत्यर्थः । अधीयन्त इति अध्येतृभिरुत्तमसर्वदेवेष्विति शेषः । तेषां तत्प्रतिपादकत्वादिति भावः । 'एवम्' अधमगुणानामुत्तमेषूपसंहारे 'अविरोधो' विरोधाभावस्तेषु तद्गुणसत्त्वादित्यर्थः । अनुपसंहारस्यैवमुत्तमगुणविषयत्वात् उपसंहारवचनस्याधमगुणविषयत्वादिति भावेन भाष्ये सूत्रे च व्यवस्थितविकल्पार्थकवाशब्दः ।

'उपासनाऽङ्गदेवानां परमङ्गतया भवेत् ।
उपसंहृतिर्विशेषे तु फलानामन्यथा न तु ॥
पुरुषाणां विशेषाद्वा यथायोगं भविष्यति ।'

इति बृहत्तन्त्रे ॥ ५८ ॥

यदुक्तं अङ्गदेवतोपासनं कार्यम् एकत्र प्रतीतानामन्यत्र यथायोग्यगुणानामुपसंहारश्च कार्य इति, तद्भूयं किं सर्वैः कार्यं न वेत्यपेक्षायामाह – **उपासनेति** ॥ सर्वैः कार्येति शेषः । 'अङ्गदेवानां' ब्रह्मादीनां 'परमङ्गतया' परमात्मपरिवारत्वेनोपसना 'सर्वैः' मोक्षयोग्यैः कार्या भवेत्, न तु प्राधान्येनेति । तर्हि गुणोपसंहृतिरपि तथा स्यादित्यतो गुणोपसंहृतौ विशेषमाह- **उपसंहृतिरिति** ॥ विशेष इति तादर्थ्ये सप्तमी । उपसंहृतिस्तु 'फलानां विशेषे' अतिशयितफलार्थं तदपेक्षायामेव कार्या, 'अन्यथा' तदनपेक्षायां केवलमोक्षाय न कार्येत्यर्थः । यथोक्तं तत्त्वप्रदीपे- यथा विषभयादौ गरुडादिषु विषहरत्वादिगुणोपसंहृतिः' इति । फलविशेषापेक्षाऽपि पुरुषविशेषाणामेवेत्याह- **पुरुषाणामिति** ॥ 'विशेषात्' उत्तमाधिकारित्वरूपात् । अत्र फलविशेषार्थिनः पुरुषविशेषाश्चैके एव, वाशब्दस्तु पुरुषाणां विशेषादित्यनेनोत्तमाधिकारि-

रूपोपासकप्रतिपत्तौ सत्याम् उत्तमाधिकारिभिरपि फलातिशयापेक्षायां कर्तव्या, अन्यथा नेति उपसंहृतिरूपसाधनविषय एव विकल्पबोधकः, न तु फलविशेषार्थिभिः कर्तव्या नान्यैरिति ज्ञातव्यम् । तथा च उपसंहृतिस्तु पुरुषाणां विशेषम् उत्तमाधिकारित्वमपेक्ष्य 'यथायोगं फलानां विशेषे' यथायोग्यफलविशेषार्थं 'भविष्यति' भवति। 'अन्यथा' उत्तमाधिकारित्वाभावे तादृशफलयोग्यताया एवाभावात् न वा व कर्तव्या वेति व्यवस्थितो विकल्पः। यद्वा- ये फलविशेषार्थिनः ते गुणोपसंहारपूर्वकं उपासका इति पूर्वमुपासक-पुरुषप्रतिपत्तौ फलातिशयार्थित्वं साधनतयोक्तं, इदानीं तु ये पुरुषविशेषा उत्तमाधिकारिणः तेषां गुणोपसंहारपूर्वकम् उत्तमाधिकारित्वं साधनतयोच्यत इति उपासकप्रतिपत्तौ साधन एव विकल्पो वाशब्दार्थः, नोपासकविकल्पः। सा चोपसंहृतिः 'यथायोगम्' उपास्यानां देवानां योग्यगुणविषयिण्येव 'भविष्यति' भवतीत्यर्थः। बृहत्तन्त्र इति उक्तमिति शेषः।

॥ इत्यङ्गावबद्धाधिकरणम् ॥ ३६ ॥

॥ ३७. भूमाधिकरणम् ॥

(पूर्णत्वरूपगुणेन परमात्मा उपास्यः)

सू—

ॐ ॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॥ ॐ ॥ ५९ ॥

सर्वगुणेषु भूमगुणस्य ज्यायस्त्वं क्रतुवत् सर्वत्र सहभावात् ।
दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकः क्रतुः ।

अत्र भूमगुणस्य सर्वोपासकसाधारणत्वं समर्थ्यते । व्यर्थत्वाद्भूमगुणो न सर्वोपास्य इति पूर्वपक्षे सिद्धान्तयितुं सूत्रम्- **भूम्न इति** ॥ अत्र भूम्नः सर्वोपा-स्यत्वमिति साध्याध्याहारमभिप्रेत्य तत्र हेतुपरतया ज्यायस्त्वमित्येतद्व्याचष्टे- **सर्वेति** ॥ क्रतुवदित्यस्योभयत्रान्वयः । तथा च विष्णोर्ज्ञानानन्दादिसर्वगुणेषु

मध्ये 'भूमगुणस्य' पूर्णत्वरूपशुभधर्मस्य 'यो वै भूमा' (छा. ७-२४) इत्यत्र श्रुतस्य 'ज्यायस्त्वं' क्रतुवद्विशिष्टत्वमित्यर्थः। कुत इत्यतो भूमत्वमृते कस्यापि गुणस्यानुपास्यत्वात् सर्वस्यापि पूर्णज्ञानः पूर्णानन्द इत्यादिक्रमेण तदनुबन्धेनैवोपास्यत्वादिति भावेन विशिष्टत्वे साध्ये हेतुपरतयाऽपि क्रतुवदित्यंशं व्याचष्टे- **क्रतुवदिति ॥ सर्वत्रेति ॥** सर्वयागेष्विति दृष्टान्तार्थः। दार्ष्टान्तिके तु 'सर्वत्र' आनन्दादिगुणेष्वित्यर्थः। 'सहभावात्' स्वानुवृत्त्याऽङ्गिनः साफल्यसाधकत्वात्। अनेन सूत्रे क्रतुवदित्यस्यावृत्त्या साध्यहेत्वोरन्वयः। सर्वत्र सहभावादिति हेत्वध्याहारश्च सूचितः। ननु क्रतुशब्दः स्वाङ्गक्रियावचनः, न च तस्य सर्वक्रतुष्वनुवृत्तिरस्तीत्यतो नात्र क्रतुशब्दः स्वाङ्गप्रधानपरः, किन्तु अङ्गकलापपर इति भावेन क्रतुशब्दार्थमाह- **दीक्षेति ॥** ज्योतिष्टोमे दीक्षा नाम यजमानसंस्काररूपकर्मविशेषः। प्रायणीयोदयनीयौ तस्याद्यन्तयोः कर्तव्येष्टिविशेषौ। प्रातस्सवनं माध्यन्दिनसवनं तृतीयसवनं चेति सोमाभिषवरूपसवनत्रयम्। अवभृथो नाम 'अप्स्वभृथेन चरन्ति' इत्युक्तेष्टिविशेषः। एतदात्मकाङ्गकलापः सर्वत्र कर्तुं योग्यत्वान्निमित्तादिह क्रतुशब्देनोक्त इत्यर्थः।

'भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते।
तस्माद्भूमा गुणतो वै विशिष्टो यथा क्रतुः कर्ममध्ये विशिष्टः॥'
इति गौपवनश्रुतिः ॥ ५९ ॥

सूत्रकृत्स्वोक्तार्थस्य प्रामाणिकत्वप्रदर्शनाय तथा दर्शयति श्रुतिरित्याह। तमंशं व्याचष्टे- **भूमैवेति ॥** अत्र भूमनृशब्दो धर्मपरो धर्मिपरश्च। तथाच 'परमो देवो' नारायणो 'भूमा' सर्वगुणपूर्ण इति पूर्णत्वेनैव सर्वोपास्यो, नैवाभूमा। कस्मात्? 'हि' यतो भूमगुणो गुणराशिनः क्रतुवद्विशिष्टः, यथा 'क्रतुः' दीक्षाद्यङ्गकलापः कर्ममध्ये विकृतियागेषु विशिष्टः तेषां स्वसाहित्येन साफल्यप्रदत्वात्। तथा भूमगुणो 'गुणतो' गुणराशितो गुणेभ्यो वा 'विशिष्टः' प्रधानः। कथं विशिष्टः? 'हि' यस्मात् भूमैव गुणः सर्वगुणेषु प्रविष्टतयोपासितः

'एषाम्' अधिकारिणां फलं 'विधत्ते' ददाति । 'न त्वभूमा' अपूर्णत्व-मुपासितमपूर्णत्वेनोपासितो वा देवः, तस्मादित्यर्थः । तथा च भूमगुणस्यान्य-गुणेभ्यो वैशिष्ट्यं नाम भूमगुणानुबद्ध एव सर्वोऽपि गुणः उपासकानां फलं ददाति, नाभूमेत्येतदेव, न तु विष्णुगुणाः परस्परमुत्तमाधमभाववन्त इति भावः । श्रुतिरित्यस्य तथा च दर्शयतीत्यनुषङ्गेणान्वयः । अनेन- 'भूम्नः' पूर्णत्वस्य सर्वोपास्यत्वं, कुतः ? 'च' यतः सर्वगुणेषु क्रतुवज्ज्यायस्त्वम् । तदपि कुतः ? क्रतुवत्सर्वत्र सहभावात् । न चैतत्सर्वमप्रामाणिकं, यतः श्रुतिस्तथा दर्शयतीति सूत्रयोजनोक्ता भवति । तथा हीति सूत्रपाठे, हिशब्दो यस्मादित्यर्थो ज्ञातव्यः । मायावादखण्डने 'भूम्नो ज्यायस्त्वम्' इत्युक्तमिति । महाभारततात्पर्यनिर्णये च ज्यायस्त्वं मुख्यतः सर्ववेदादिप्रतिपाद्यत्व-मित्यर्थोऽभिमतः । स च सूत्राक्षराणां बह्वर्थत्वाभिप्रायेण तट्टीकायामुक्तः ।

॥ इति भूमाधिकरणम् ॥ ३७ ॥

॥ ३८. नानाशब्दाधिकरणम् ॥

(परमात्मगुणेषु पूर्णत्वं जीवानां योग्यतानुसारेण प्रतीयते)

सू— ॐ ॥ नानाशब्दादिभेदात् ॥ ॐ ॥ ६० ॥

'शब्दोऽनुमा तथैवाक्षो योग्यताभेदतस्सदा ।
ब्रह्मादीनामेकमर्थं बहुधा दर्शयन्ति हि ॥
अतः पूर्णत्वमीशस्य नानैवैषां प्रदृश्यते ।
अतः फलस्य नानात्वं नानैवोपासना यतः ॥'
इति ब्रह्मतर्के । अतो भूमत्वमपि नानैवोपास्यते ॥ ६० ॥

अत्राधिकरणेऽधिकारिणां भूमगुणस्य नानाप्रकारेण प्रतीतिः समर्थ्यते । भूमत्वे विशेषकल्पनायोगाद्भूमगुणः सर्वेषामेकप्रकारेणैव प्रतीयत इति प्राप्ते सिद्धान्तयितुं सूत्रं पठति- **नानेति** ॥ अत्र भूम्न इत्येतत् प्रथमान्ततया विपरि-

णम्यानुवर्तते । नानेति भावप्रधानम्, नानात्वेनेति । उपास्यते इति शेषः । एवं च प्रतिज्ञावाक्यसिद्धौ तत्र हेतुरुक्तः- **शब्दादिभेदादिति** ॥ भूमगुणप्रत्यायकैः शब्दानुमाप्रत्यक्षप्रमाणैः अधिकारियोग्यताभेदात् भूम्नो नानारूपेण प्रतीतेरिति तदर्थ इति भावेन अस्मिन्नर्थे प्रमाणोदाहणपूर्वकं सूत्रं व्याचष्टे- **शब्देति** ॥ प्रथमं तत्त्वनिर्णयोऽथ वेदार्थनियमोऽथापरोक्षज्ञानमिति कार्यक्रमानुसारेण स्मृतौ शब्दादीनां क्रमेण निर्देशः । एवं सूत्रेऽपि । शब्दः आगमः । अक्षः प्रत्यक्षम् । तथाशब्दः समुच्चये । आहत्यैते 'योग्यताभेदात्' योग्यताविशेषात् सदा ब्रह्मादीनामेकैकमर्थं पूर्णत्वादिरूपं 'बहुधा' अवान्तर-विशेषवत्त्वेन 'दर्शयन्ति' ज्ञापयन्ति 'हि' यतोऽतः 'एषां' ब्रह्मादीनामीशस्य पूर्णत्वं नानैव 'प्रदृश्यते' प्रतीयते उपासनकाले । यतः नाना प्रदृश्यतेऽतो नानाप्रकारेणैव पूर्णत्वोपासनं भवेत् । यतो नानोपासनमतः फलस्य 'नानात्वं' तारतम्यमुपपद्यत इति योजना । न चोपास्यभूमत्वप्रतीतेः शाब्दानुमानसाध्यत्वेऽपि कथं प्रत्यक्षसाध्यत्वमिति वाच्यम् । योगिनां मनसापि तत्प्रतीतिसम्भवेन तस्यास्त्रितयसाध्यत्वोपपत्तेः । ब्रह्मतर्क इत्यस्य यतः शब्दादिभेदान्नाना प्रतीयते भूमत्वमतो नानैवोपास्यतेऽपीत्युक्तमित्यन्वयः । न केवलं नाना प्रतीयतेऽपि तु नानैवोपास्यतेऽपीति सिद्धमित्यन्वयः । नानैवोपास्यतेऽपि नानैव फलप्रदमपीत्यपेरर्थः । न च भूमत्वविशेषानुपपत्तिः । अतीतवत्सराणां मासानां चानन्त्ये समेऽपि वत्सरानन्त्यान्मासान्त्ये विशेषवत् अधिकारियोग्यताविशेषात् प्रतीते पूर्णत्वेऽपि विशेषसम्भवादिति भावः ।

॥ इति नानाशब्दाधिकरणम् ॥

॥ ३९. विकल्पाधिकरणम् ॥

(विशिष्टफलापेक्षया बिम्बातिरिक्तरूपोपासना कर्तव्या)

सू— ॐ ॥ विकल्पो विशिष्टफलत्वात् ॥ ॐ ॥ ६१ ॥

स्वयोग्योपासनानन्तरं सामान्यस्यापि कस्यचिदुपासनं विकल्पेन भवति विशिष्टफलापेक्षया।

अत्र नये विम्बातिरिक्तरूपोपासनस्याकर्तव्यता निरस्यते। स्वयोग्यरूपातिरिक्तरूपविशेषविषयमुपासनं मुमुक्षुणा न कर्तव्यम्, मोक्षानुपयुक्तत्वात्। प्रत्युत क्रियमाणमपि तदुपासनं स्वयोग्योपासनविघ्नायैव भवेदिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य सामान्योपासनस्येति पदाध्याहारेण व्याचष्टे- **विकल्प इति ॥** अपिः समुच्चये। तथा च न केवलं स्वयोग्यस्य, किन्तु तदतिरिक्तस्य 'सामान्यस्य' वैष्णवत्वेन विम्बसमानतया वर्तमानस्य कस्यचित् नृसिंहरामकृष्णादिरूपविशेषस्याप्युपासनं स्वयोग्योपासनानन्तरं मुमुक्षोः 'विशिष्टफलापेक्षया' उत्तमफलापेक्षया ज्ञानादिप्रतिबन्धकदुरितविशेषनिवृत्तिलक्षणमोक्षोपयोगिफलेच्छया निमित्तभूतया 'विकल्पनैव भवति' प्रकारद्वयोपेतमेव न तु एकप्रकारोपेतमिति योजना। स्वयोग्योपासनानन्तरमिति सामान्योपासनस्य मोक्षार्थोपासनानन्तरभावित्वकथनेन प्रत्युतेत्युक्तदोषो निरस्तः। सूत्रे विशिष्टफलत्वादित्यनेन विकल्पे निमित्तं सूचितम्। तदपेक्षोपलक्षकतया विवृतम्- **विशिष्टफलापेक्षयेति ॥** तेन मोक्षानुपयुक्तत्वादिति दोषो निरस्तः। अनेन मुमुक्षोः विशिष्टफलत्वादिति बहुव्रीहिः। इच्छोपलक्षकमेतत्। ल्यब्लोपनिमित्ता पञ्चमी, विशिष्टफलापेक्षत्वमपेक्ष्येति भावेन विशिष्टफलापेक्षयेत्याह। विशिष्टफलापेक्षया सामान्योपासनस्य कर्तव्यतायां यस्य मुमुक्षोः दुरितमस्ति तन्निवृत्तिरूपविशिष्टफलापेक्षा चास्ति तेन कर्तव्यम्। यस्य तु मुमुक्षोर्न दुरितमस्ति तत्सत्त्वे वा स्वयोग्यतीव्रोपासनेनैव दुरितादिनिवृत्तिसिद्धेस्तदनिच्छा तेन न कर्तव्यमिति। अत एव न वैफल्यदोषः ॥

'मुक्त्यर्थमात्मयोग्यं हि कार्यमेव ह्युपासनम्।
नृसिंहादिकमन्यच्च दुरितादिनिवृत्तये ॥
उपासते यथायोगं न वा फलविभेतः ॥'

इति ब्रह्मतर्के ॥ ६१ ॥

अत्रार्थे स्मृतिमाह- **मुक्त्यर्थमिति** ॥ 'आत्मयोग्यं' स्वयोग्यरूपविषयक-मुपासनं यतो मुक्त्यर्थं 'हि' प्रसिद्धम्, अतः कार्यमेवेत्यर्थः । नृसिंहादिक-मन्यच्चेति विशेषणविशेष्यभावः । रूपमिति शेषः । चः समुच्चये । दुरितं दुरदृष्टम् । प्रथमादिशब्देन कृष्णरामहयशीर्षादिवैष्णवरूपं गृह्यते । द्वितीयेन अज्ञानमिथ्याज्ञानकामक्रोधादि । 'यथायोगं' यथायोग्यमुपासते मुमुक्षव इति शेषः । केचित् नरसिंहादिरूपं नैवोपासत इति । **उपास्यत इति पाठे तु** मुमुक्षुभिरिति शेषः । कुतो विकल्पः ? 'फलविभेदतः' दुरितादिनिवृत्तिरूप-फलविशेषाकाङ्क्षाभावात्' यद्वा - स्वयोग्योपासनाफलात् नृसिंहाद्युपासना-फलस्य भिन्नत्वात् भेदात् भेदमपेक्ष्येत्यर्थः । केषाञ्चित्तीव्रस्वयोग्योपासनादेव दुरितादिनिवृत्तिरूपफलसिद्धेर्न तदपेक्षेति भावः । यद्यपि नृसिंहादिकमपि केषाञ्चित्स्वयोग्यं रूपम्, तथापि तदतिरिक्ताधिकारिणां तत्सामान्यं, तेषामेव सामान्योपासने विकल्प उक्त इति न कुचोद्यावकाशः । ब्रह्मतर्के उक्तत्वादिति शेषः । अस्य विकल्पेन भवतीति पूर्वोक्तेनान्वयः ।

॥ इति विकल्पाधिकरणम् ॥ ३९ ॥

॥ ४० . कामाधिकरणम् ॥

(काम्यापेक्षी कामानुसारेण कामसाधनगुणविशिष्टतया उपासनां कुर्यात्)

सू— ॐ ॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ॐ ॥ ६२ ॥

अत्राधिकरणे ज्ञानसाधनोपासनस्यैव आवश्यकत्वं, न कामसाधन-भगवद्रूपगुणविषयोपासनस्येति समर्थ्यते । ज्ञानसाधनार्थादिसाधनत्वेन पूर्ववन्मोक्षोपयोगिफलत्वात् काम्योपासनमेवायं कर्तव्यमिति प्राप्ते सिद्धान्त-यत्सूत्रं पठति- **काम्या इति** ॥ तुशब्दो नृसिंहाद्युपासनादस्य विशेष-द्योतकोऽवधारणे च । इति शब्दोऽध्याहार्यः । विकल्प इत्यनुवर्तते । अत्र कामशब्दो घञन्तः काम्यपरः । कामस्येदं रूपं काम्यं, कामस्येमे गुणाः –

'वसुपूर्णकरं रत्नपर्वतस्थं विभावयन्।
वसुसिद्धिमवाप्नोति ॥' (तन्त्र.सं.४.११६)

इत्युक्ताः काम्याः । षष्ठ्यर्थसम्बन्धश्च साध्यसाधनभाव सति केचित् । वस्तुतस्तु काम्यत इति काम्यं रूपं, काम्यन्त इति काम्या गुणा इति विग्रहः । रूपगुणयोः काम्यसाधनत्वात्काम्यत्वम् । तथाच 'काम्यास्तु' काम्यसाधनरूपे श्रीकरादौ कामसाधनभगवद्गुणास्तु 'यथाकामं' स्वस्ववित्तादिकामं मोक्षादिकामं वाऽनतिक्रम्य तदनुसारेण 'समुच्चीयेरन्' उपसंहियेरन् । न वा विषयलम्पटैरमुमुक्षुभिरुपसंहर्तव्याः, तद्रहितैर्मुमुक्षुभिस्तु नोपसंहर्तव्या इति व्यवस्थितविकल्प एव स्यात्, न तु नियतिः । मुमुक्षुभिर्नेति कुतः ? 'पूर्वहेत्वभावात्' मुमुक्षातः पूर्वकालीनो यो वित्तादिकामाख्यो हेतुस्तदभावात् । यद्वा- मुमुक्षुभिरेव यथाकाममिच्छारूपेश्वरप्रसादमनतिक्रम्य तदर्थमुपसंहार्याः वित्तादिकाममनुरुध्य तदर्थं नोपसंहार्या इति विकल्पः स्यात् । नेति कुतः ? 'पूर्वहेत्वभावात्' पूर्वसूत्रोक्तदुरितादिनिवृत्तिरूपफलविशेषाख्यप्रबलहेतोरभावात् मुमुक्षापूर्वकालीनान्यकामाख्यहेत्वभावात् अर्थादिकं विना ज्ञानाभावाख्यहेत्वभावाच्चेति सूत्रार्थः ।

'यस्य यस्य हि यः कामः तस्य तस्य ह्युपासनम् ।
तादृशानां गुणानां च समाहारं प्रकल्पयेत् ॥
अकामत्वान्मुमुक्षूणां न वा तेषामुपासनम् ।
तुष्ट्यर्थमीश्वरस्यैव नैवोपासा विदुष्यति ॥'

इति बृहत्तन्त्रे ॥ ६२ ॥

अत्रैव स्मृतिमाह- **यस्येति** ॥ अत्र प्रथमयच्छब्दौ अधिकारिपरौ । तच्छब्दौ काम्यपरौ । न तु तावेकविषयौ । प्रथमान्तयच्छब्दस्यावृत्तिः । कामशब्दः सविषयेच्छार्थः । असावसाविति ग्राह्यम् । वाशब्दो व्यवस्थितविकल्पार्थः । तथा च यस्य यस्य पुंसोऽधिकारिणः यो यो वित्तादिकामोऽस्ति,

असावसौ मुमुक्षुः तस्य तस्य तत्तत्काम्यप्रदभगवद्रूपस्योपासनं 'प्रकल्पयेत्' कुर्यात् । 'हि' प्रसिद्धम् । न केवलमुपासनं, किन्तु, 'तादृशानां' काम-साधनानां गुणानां 'समाहारम्' एकबुद्ध्यारोपणं च प्रकल्पयेत् । 'मुमुक्षूणा-मुपासनं नेति वा । कुतः ? तेषाम् 'अकामत्वात्' अन्यकामनारहितत्वात् । एवमधिकारिभेदेन विकल्पमभिधायेदानीं चोपासनं नैव विदुष्यति । अन्य-कामार्थं तु दुष्यति । तदर्थं तैर्न कार्यमित्यर्थः । तत्त्वप्रदीपे तु- यस्य यस्य यो धनैश्वर्यादिकामो भवति । तस्य तस्य तदर्थमुपासनं कार्यं, स चोपा-सकस्तादृशानाममुक्तत्वर्थानां गुणानामुपसंहारं च प्रकल्पयेत् । न वा मुमुक्षूणां काम्योपासनं, तेषामकामत्वात् । अतोऽत्यन्तमापद्येव काम्यरूपगुणोपासनं तेषां, तदपि नान्यकामनया, किन्त्वीश्वरस्य तुष्ट्यर्थमेव । तदपि ह्याह - **तुष्ट्यर्थमिति** ॥ 'सकामेभ्योऽमितगुणा याऽकामैस्तु कृता क्रियाः' इत्यन्यत्र चाहेत्येवमेव व्याख्यातम् । इति बृहत्तन्त्रे सूत्रार्थ उक्त इति शेषः ॥

॥ इति कामाधिकरणम् ॥ ४० ॥

॥ ४१. अङ्गाधिकरणम् ॥

(देवैः स्वोत्पादकाङ्गवत्त्वेन परमात्मा उपास्यः)

सू— ॐ ॥ अङ्गेषु यथाऽऽश्रयभावः ॥ ॐ ॥ ६३ ॥

अङ्गदेवतानां यथा यथा परमेश्वराङ्गाश्रयत्वम् । 'चक्षोस्सूर्यो अजायत' (ऋ.१०.९०.१३) इत्यादि, तथा भावना कर्तव्या ॥ ६३ ॥

अत्राधिकरणे अङ्गाश्रितत्वेन देवतोपासनस्य कर्तव्यता समर्थ्यते । द्विविध-मङ्गदेवतोपासनं - परिवारत्वेन भगवदङ्गाश्रितत्वेन चेति । तत्राद्यं सर्वमुमुक्षु-साधारणम् 'अङ्गावबद्धाः' इत्यत्रोक्तम् । द्वितीयं देवतामात्राधिकारिकमत्र समर्थ्यते इति विवेकस्तत्त्वप्रदीपेऽभिहितः । ब्रह्मादिदेवानामीश्वराङ्गाश्रित-

त्वेनोपासनं न कर्तव्यम्, निरधिकारिकत्वात् । न तावत्तत्सर्वाधिकारिकम् । 'आनन्दादयः' इत्युक्तचतुर्गुणनियमव्याघातात् । नापि देवाधिकारिकम्, 'ब्रह्मा शिरसि ललाटे रुद्रः' इत्यादितत्प्रकरणेषु देवानामेतदुपासनमित्यनुक्तेरिति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **अङ्गेष्विति** ॥ अत्राङ्गेष्वित्यावर्तते । तत्रैकं षष्ठ्यन्ततया विपरिणतं देवतावाचि । द्वितीयं प्रकृतपरमाङ्गवाचि । यथेत्यप्यावर्तते । तथा तथेति च लभ्यते । उक्त इति कर्तव्य इति शेषः । भाव इतिशब्दो बुद्ध्या विविक्त उपासनापरपर्यायभावनावाची । तथा च 'चक्षोः सूर्यो अजायत' इत्यादीनामङ्गानां सूर्यादिदेवानामाश्रयिणां भगवतोऽङ्गेषु 'आश्रयभावः' आश्रयत्वं यथा यथोक्तः 'तथा तथा' तेन तेन प्रकारेण तेषां 'भावः' उपासनं कर्तव्यम् इति योजनामभिप्रेत्य सूत्रं व्याचष्टे- **अङ्गेति** ॥ परमेश्वराङ्गाश्रयत्वमिति बहुव्रीहिः । अङ्गदेतानामित्यस्य परमेश्वराङ्गाश्रयत्वमित्यनेन भावनेत्यनेन च सम्बन्धः । उक्तमिति शेषः । इत्यादीति लुप्तविभक्तिको निर्देशः । इत्यादिनेत्यर्थः । यद्यपि श्रुतावङ्गजातत्वमेवोक्तं, न तु तदाश्रितत्वं, तथापि 'तदाश्रिताश्च ते सर्वे', इति वचनाद्यत्र जन्म तत्रैव स्थितिरिति न दोषः । कर्तव्येति सावधारणम् । अत्र हेतुस्तु उत्तरसूत्रे चशब्देन अत्रापि उक्त इत्यध्याहृतपदेन च सूचितः । अन्यथा तदुक्तिवैयर्थ्यप्रसङ्गादित्येवंरूपो द्रष्टव्यः ।

सू— ॐ ॥ शिष्टेश्च ॥ ॐ ॥ ६४ ॥

यस्मिन् यस्मिन् यो हि चाङ्गे निविष्टः परस्य चिन्त्यः स तथा तथैव । इति पौत्रायणश्रुतेः ॥ ६४ ॥

अत्रैव युक्तयन्तराभिधानाय सूत्रम्- **शिष्टेश्चेति** ॥ तद्व्याचष्टे- **यस्मिन्निति** ॥ यो यो देवः 'परस्य' विष्णोः यस्मिन् यस्मिन् अङ्गे 'निविष्टः' प्रविष्टः आश्रितः । 'हि' प्रसिद्धः । स सः 'तथा तथा' तत्तदङ्गनिविष्टत्वेन 'चिन्त्यः' उपास्य इत्यर्थः । 'शिष्टिः' शिक्षाविधायकश्रुतिरिति फलितार्थ इति भावेनाह-

श्रुतेरिति ॥ श्रुतेरित्यनन्तरं सूत्रानुसारात् समुच्चयार्थकश्चशब्दोऽध्याहार्यः । अनेन- न केवलं 'चक्षोः' इत्यादावङ्गाश्रयत्वेनोक्तत्वन्यथाऽनुपपत्त्या तथा भावः कर्तव्यः, किन्तु 'शिष्टेः' 'यस्मिन्' इति श्रुतौ तथा विधानाच्चेति सूत्रार्थ उक्तो भवति ।

सू— ॐ ॥ समाहारात् ॥ ॐ ॥ ६५ ॥

'अङ्गैः पराद्ये हि देवा विसृष्टास्तत्तद्गुणान् परमे संहरेत ।
तांश्चापि तत्रैव विचिन्त्य देवान् स्थानं मुमुक्षुः परमं व्रजेत ॥'
इति काषायणश्रुतौ समाहारवचनाच्च ॥ ६५ ॥

ननु निरधिकारिकत्वात्तद्विधानादिवैयर्थ्यस्यैवोचितत्वाच्च नाङ्गदेवोपसनं युक्तमित्याशङ्कायां सूत्रम् **समाहारादिति** ॥ अत्र समाहारपदं सम्पूर्वकहृधातु-युक्तश्रुतिसूचकम् 'अस्यैव च' इति सूत्रे ऊष्मेतिपदवदिति भावेन समाहार-पदसूचितश्रुत्युदाहरणपूर्वकं सूत्रं व्याचष्टे- **अङ्गैरिति** ॥ क्रियासमुच्चये चः । कर्मसमुच्चयेऽपिशब्दः । तथा च 'परात्' परमात्मनः चक्षुराद्यङ्गैः करणैः ये ये देवाः 'विसृष्टाः' विविधप्रकारेण सृष्टाः 'हि' प्रसिद्धाः 'तत्तद्गुणान्' तत्तद्देव-सूर्यसोमादिमहाप्रकाशाह्लादकरत्वादीन् गुणान् 'परमे' परमाङ्गे 'संहरेत' उपसंहरेत । न केवलं गुणानङ्गेषु, किन्तु 'तांस्तान्' तत्तदङ्गजान् देवानपि 'तत्रैव' तत्तज्जनकाङ्गेष्वेव विचिन्तयीत । न चास्य फलाभावः । यत एवं विचिन्त्य 'परमं स्थानं' सायुज्यरूपं व्रजेत 'मुमुक्षुः' देवत्वयोग्य इति तत्त्वप्रदीपदिशा श्रुत्यर्थः । **समाहारवचनादिति** ॥ अत्रापि समाहारपदं श्रुतिसूचकम् । तथा च काषायणानां समाहारश्रुतिवचनादित्यर्थः । चस्समुच्चयं । अनेन- सूत्रेऽपि चशब्दोऽनुषञ्जनीय इति सूचितम् । अस्य तथा भावना कर्तव्या इत्यनेनान्वयः । अनेन संहरेतेति समाहारपदघटितश्रुतेरङ्गदेवतोपासनस्य परमस्थानरूपसायुज्यप्राप्तिफलकत्वावगमात्, अत एव देवताधिकारिक-त्वावगमान्न निरधिकारिकत्वं न वा तद्विधानादिवैयर्थ्यं कल्प्यमिति सूत्रार्थ

उक्तो भवति । तत्त्वप्रदीपे तु न केवलमङ्गेषु तत्त्वदेवतानां भावनयाऽधिकारी पूर्यते पूर्णफलभाग्भवति, किन्तु हरेरङ्गेषु चक्षुर्मन आदिषु तदाश्रित-सूर्यसोमादिगुणबिम्बानां महाप्रकाशाह्लादकरत्वादीनां गुणानां समाहारा-दुपसंहाराच्च । न चास्यासिद्धिः । 'अङ्गैः परात्' इति श्रुतौ समाहारोक्तेरिति व्याख्यातम् । अस्मिन् पक्षे सूत्रेऽनुषक्तश्चः हेतुसमुच्चये । श्रुतौ पूर्वांशस्योप-योगश्च, भाष्ये काषायणानां श्रुतौ समाहारोक्तेरित्यन्वयश्च ऋजुः । टीकाकृत्पक्षे तदन्वयो वक्रः । तत्पक्षे साध्यसमुच्चये चः । पूर्वांशस्तु श्रुतिसूचकः प्रमेयान्तर-सूचकश्चेति ध्येयम् ॥

सू— ॐ ॥ गुणसाधारण्यश्रुतेश्च ॥ ॐ ॥ ६६ ॥

साधारण्यात्सवर्गुणाः परस्य समाहार्यास्तत्त्वदृशो मुमुक्षोः ।
इति माण्डव्यश्रुतेश्च ॥ ६६ ॥

हेत्वन्तरेणाङ्गदेवोपासनस्य कर्तव्यतां समर्थयत्सूत्रं पठति- **गुणेति** ॥ गुणानां ज्ञानानन्दादीनां सूर्याद्याश्रयचक्षुष्ट्वादीनां भगवद्गुणत्वात् भगवद्गुणानां चोपास्यत्वेन साधारणस्य एते उपास्या एते तु नेति विभागं विहाय योग्यानां सर्वेषामुपास्यत्वस्य 'साधारण्यात्' इति श्रुतावुक्तत्वाद्देवैरङ्गाश्रितत्वेन अङ्ग-देवताभावना कर्तव्येति सूत्रयोजनामभिप्रेत्य सूत्रोपात्तश्रुतिमुदाहरन् सूत्रं व्याचष्टे- **साधारण्यादिति** ॥ 'तत्त्वदृशो' ब्रह्मज्ञानिनो 'मुमुक्षोः' तेन परस्य सर्वे गुणाः 'साधारण्यात्' साधारण्येन एते उपास्या एते तु नोपास्या इति विभागं विहाय यथाशक्ति सर्वे समाहार्या इति श्रुत्यर्थः । श्रुतेश्चेत्यस्य तथा भावना कर्तव्येति पूर्वेणान्वयः । तत्राङ्गाश्रितत्वेन देवतोपासनं देवाश्रयत्वेन तद्गुणबिम्बगुणवत्त्वेन च परमात्मोपासनं समनियतम्, अतः 'समाहारात्, गुणसाधारण्यश्रुतेः, दर्शनाच्च' इत्येतेषां विरोधो न शङ्कनीयः ॥ ४१ ॥

॥ इत्यङ्गाधिकरणम् ॥ ४१ ॥

॥ ४२. नवाधिकरणम् ॥

(पूर्वोक्ताङ्गोपासना देवव्यतिरिक्तैः न कर्तव्या)

सू— ॐ ॥ न वाऽतत्सहभावश्रुतेः ॥ ॐ ॥ ६७ ॥

न वाऽङ्गदेवतोपसंहारः कार्यः । उपसंहारस्य सहाश्रवणात् ॥ ६७ ॥

अत्राधिकरणे अङ्गदेवतोपासनस्य सर्वशाखानुक्तत्वेन प्राप्ताकर्तव्यत्वशङ्का-निरासेन कर्तव्यता समर्थ्यते । सूत्रमुपन्यस्यति- **न वेति** ॥ अत्राधिकारि-विशेषानिर्देशेन गूढाभिसन्धिना सूत्रकृतोक्तं न वेति प्रतिज्ञांशं व्याचष्टे- **न वेति** ॥ अङ्गेषु भगवदङ्गेषु अङ्गदेवतोपसंहारः तासामुपसंहृत्योपासनं न कर्तव्यं वेत्यर्थः । अनेन सूत्रे 'अङ्गेषु यथाश्रयभावः' इत्यस्यानुवृत्तिः सूचिता भवति । कुतो नेत्यतः अतत्सहभावश्रुतेरिति हेतुवाक्यं व्याचष्टे - **उपसंहारस्येति** ॥ उपसंहारपूर्वकाङ्गदेवतोपासनस्येत्यर्थः । **सहेति** ॥ सर्वशाखागतोपासन-सहभावेनेत्यर्थः । अनेन तच्छब्दस्य तेनेत्यावृत्तिः सूचिता । अश्रवणादित्यनेन सूत्रे नञो व्यत्यासेनान्वय उक्तो भवति । अनेन क्वचिदेवोक्तत्वात् सर्वशाखा-स्वनुक्तत्वात् देवैः कर्तव्यं न वा अन्यैरित्यभिसन्धिः प्रकटितो भवति । तथा च अङ्गेषु देवानां यथाऽऽश्रयभावोऽस्ति तथा भावरूपोपासना देवैः कर्तव्या । कुतः ? क्वचित्सहभावश्रुतेः । न कर्तव्या वा देवान्यैः । कुतः ? 'अतत्सह-भावश्रुतेः' तथोपासनस्य सर्वशाखागतोपासने सह सर्वत्र सहभावस्याश्रुत-त्वादिति सूत्रार्थ उक्तो भवति ।

सू— ॐ ॥ दर्शनाच्च ॥ ॐ ॥ ६८ ॥

'सत्यो ज्ञानः परमानन्दरूप
आत्मेत्येवं नित्यदोपासनं स्यात् ।

नान्यत्किञ्चित्समुपासीत धीरः
सर्वैर्गुणैर्देवगणा उपासते ॥' इति कमठश्रुतौ ॥ ६८ ॥

देवैरेव तथोपासनं कर्तव्यं, नान्यैरित्येतमेवार्थं युक्तिसिद्धं श्रुत्याऽपि समर्थयत्सूत्रं पठित्वा तां श्रुतिमुदाहरति- **दर्शनाच्चेति** ॥ न केवलं युक्तेः, किन्तु 'सत्यो ज्ञानः' इति श्रुतेश्च अङ्गदेवतोपसंहारो देवैः कार्यः, इतरैर्न वेति सूत्रार्थः । 'नित्यदा' योग्यसर्वकाले स्यात् सर्वमुमुक्षूणामिति शेषः । 'नान्यत्किञ्चित्' गुणादि 'सर्वैः' योग्यसर्वैः 'देवगणाः' ब्रह्मरुद्रादिदेव-समुदायाः । देवानां गणशोऽनेकत्वद्योतनाय गणा इति बहुवचनम् । कमठश्रुतौ दर्शनोक्तेश्च न वाऽङ्गदेवतोपसंहारो देवेतरैः कार्यः , किन्तु देवैरित्यन्वयः ।

॥ इति श्रीजगन्नाथतीर्थकृतायां ब्रह्मसूत्रभाष्यदीपिकायां
तृतीयाध्यायस्य तृतीयः पादः ॥

॥ अथ चतुर्थ पादः ॥

॥ १. पुरुषार्थाधिकरणम् ॥

(अपरोक्षज्ञानात् सर्वपुरुषार्थप्राप्तिः)

ज्ञानसामर्थ्यमस्मिन् पाद उच्यते ॥

सू —

ॐ ॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ ॐ ॥१ ॥

यद्दर्शनार्थमुपासनोक्ता तस्माद्दर्शनात्सर्वपुरुषार्थप्राप्तिरिति बादरायणो मन्यते ।

एतत्पादार्थं दर्शयति- **ज्ञानेति** ॥ यदर्थं पूर्वपादे उपासनोक्ता तस्य ब्रह्मापरोक्षज्ञानस्य 'सामर्थ्यम्' महिमा 'अस्मिन्' आरभ्यमाणे चतुर्थे 'उच्यते' अनुवर्ण्यत इत्यर्थः । तत्र ज्ञानिनां मोक्षेतरपुरुषार्थेषु विरक्तत्वेन तदिच्छाया एवाभावात्, इच्छाभावेऽपि तत्प्राप्तौ पुरुषार्थत्वहान्यापत्तेः ज्ञानस्य मोक्षमात्रे साधनत्वम्, न सर्वेषु पुरुषार्थेषु इति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्यति- **पुरुषार्थ इति** ॥ अत्र अतः पुरुषार्थ इति प्रतिज्ञाभागे सङ्गतिसूचकस्य अत इत्यस्यार्थमाह- **यद्दर्शनार्थमिति** ॥ ब्रह्मदर्शनस्यार्थमित्यर्थः । 'तस्मात्' अतो दर्शनतः । तत्त्वप्रदीपे तु यस्य विष्णोर्दर्शनार्थमुपासनोक्ता 'तस्मात्' तस्य प्रसादात् सञ्जाताद्दर्शनादित्यर्थ उक्तः । पुरुषार्थ इत्यस्यार्थमाह- **सर्वेति** ॥ पुरुषैरर्थ्यमानं यावच्छुभं तस्य सर्वस्यैव प्राप्तिर्भवति, न तु मोक्षमात्रस्येत्यर्थः । ब्रह्मदर्शन इति शेषः । अधिकारिणः फलसम्बन्धबोधनाय प्राप्तिपर्यन्तधावनम् । यद्यपि सूत्रे सर्वशब्दो न श्रूयते । तथापि पुरुषैरर्थ्यमानत्वरूपधर्माक्रान्तसर्वपुरुषार्थवाचि-पुरुषार्थशब्दपर्यालोचनया तल्लाभ इत्याशयेन सर्वेत्युक्तम् । 'इति बादरायणो मन्यते' इत्यस्य शब्दादित्यनन्तरमन्वयः । वादे ज्ञाने रतानामधिकतया आश्रय-त्वेन भगवत्तमो वेदेश्वर उच्यत इति तत्त्वप्रदीपोक्तरीत्या बादरायणशब्दार्थो ज्ञातव्यः ।

'यं यं लोकं मनसा संविभाति
विशुद्धसत्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामान्
तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥'(मु.३-१-१०)
इति शब्दात् ॥ १ ॥

ज्ञानात्सर्वपुरुषार्थ इत्येतत्कुत इत्यतः शब्दादिति हेत्वंशं व्याचष्टे- **यमिति ॥** यस्मात् 'विशुद्धसत्त्वो' निर्मलान्तःकरणो ब्रह्मज्ञानी 'यं यं लोकं' स्वर्गादिरूपं मनसा 'संविभाति' इच्छति, प्राप्तुमिति शेषः । 'यांश्च कामान्' काम्यान् 'कामयते' इच्छति तं तं लोकं तान् कामांश्च 'जयते' प्राप्नोति । तस्मादेवं परमात्मज्ञानस्य सर्वपुरुषार्थसाधनत्वात् तत्सिद्ध्यर्थम् 'आत्मज्ञं' ब्रह्मज्ञानिनं 'भूतिकामः' 'स वेदैतत्' इत्युत्तरवाक्योक्तसर्वपुरुषार्थकामो जनः 'अर्चयेत्' पूजयेदित्यर्थः । तत्त्वप्रदीपे तु धातूनामनेकार्थत्वाभिप्रायेण 'संविभाति' मनुते, 'भा ज्ञाने' इति धातोरिति व्याख्यातम् । **इतिशब्दादिति ॥** इत्याथर्वण-श्रुतेरित्यर्थः । अत्र ज्ञानिनां प्रायेणान्येच्छाभावेऽपि यस्य ज्ञानिविशेषस्य सौभरिकर्दमादिवत् भवतीच्छा, तस्य ज्ञानादेव सर्वपुरुषार्थप्राप्तिर्भवतीति सिद्धान्तिनो भावाभ्युपगमात् न 'परीक्ष्य' इत्यादिविरोधः ।

सू — ॐ ॥ शेषत्वात्पुरुषार्थवादो
यथाऽन्येष्विति जैमिनिः ॥ ॐ ॥ २ ॥

अस्त्येव मोक्षसाधनत्वं ज्ञानस्य स्वर्गादिषु तत्साधनकर्मशेष-त्वेन ।

यदुक्तं ज्ञानस्य सर्वपुरुषार्थसाधनत्वं तदाक्षिपत्सूत्रं पठति- **शेषत्वादिति ॥** अत्रान इत्यनुवर्तते । एतस्येति तदर्थः । पुरुषार्थ इत्यस्य पुरुषार्थसाधनत्ववचनमित्यर्थ इत्याशयेन सोपस्करं शेषत्वापुरुषार्थवाद इत्यंशं

व्याचष्टे- **अस्त्येवेति** ॥ एवकारो भिन्नक्रमः । दर्शनादिति पदस्य पष्ठ्यन्ततया विपरिणामेनानुषङ्गः । साधनत्वमित्येतद्बुद्ध्या विविच्यावर्तते । तत्रैकः साधनत्वोपलक्षकः । स्वर्गादिष्विति चावर्तते । तथा चेत्थं सूत्रभाष्ययोजना- 'अतः' एतस्य ब्रह्मदर्शनस्य मोक्षसाधनत्वमेवास्ति, न तु स्वर्गादिषु साधनत्वं, तत्साधनं तु कर्मैव । न चैवं 'यं यम्' इति वादविरोधः । यतः 'पुरुषार्थवादः' दर्शनस्य स्वर्गादिषु साधनत्ववचनं 'शेषत्वात् तत्साधनकर्मशेषत्वेन' तस्य स्वर्गादेः पुरुषार्थस्य साधनं यत्कर्म ज्योतिष्टोमादि तच्छेषत्वेन तेनैव सिद्ध्यत् स्वर्गादावाधिक्यसम्पादकत्वेन निमित्तेनैव प्रवृत्तो, न प्रधानसाधनत्वाभिप्रायेणात इति ।

'स्वर्गं धनाद्देहतो वै गृहाच्च प्राप्स्यन्ति धीरा न त्वधीराः कुतश्चित् ।' इति वदति जैमिनिः ॥ २ ॥

ननु शेषत्वे प्राधान्यप्रयोगानुपपत्तिः । तथाऽदर्शनादित्यतस्तदुत्तरत्वेन प्रवृत्तं शेषत्वात्पुरुषार्थवाद इत्यंशमावर्त्य यथाऽन्येष्वित्यत्राप्यन्वयमभिप्रेत्य व्याचष्टे- **स्वर्गं धनादिति** ॥ अन्येष्विति सम्बध्यते । तथा च 'स्वर्गं धनात्' इति श्रुतौ ज्ञानकर्मभ्यां 'अन्येषु' बहुवित्तव्ययात् 'देहतः' शरीरात् तदायासादेः 'गृहात्' गृहस्थाद्गृहस्थाश्रमाच्च एतत्साध्याद्यागादेरित्यर्थः । इति जैमिनिर्मन्यत इत्यनुषज्यते ।

सू— ॐ ॥ आचारदर्शनात् ॥ ॐ ॥ ३ ॥

ज्ञानिनामेव देवादीनामाचारदर्शनात् ॥ ३ ॥

ननु श्रुतिबलात् ज्ञानस्यैव सर्वपुरुषार्थसाधनत्वं किं न स्यात् , कुतः श्रुतेरर्थान्तरपरिकल्पनेत्याशङ्कां परिहरत्सूत्रं पठति- **आचारेति** ॥ अत्राध्याहार्यांशं दर्शयन् सूत्रं व्याचष्टे- **ज्ञानिनामेवेति** ॥ विशेषणसङ्गतैवकारोऽयोगव्यवच्छेदकः । तथा च 'नैव देवपदं प्राप्ताः ब्रह्मदर्शनवर्जिताः' इति

वचनात् पदप्राप्तेः पूर्वं ज्ञानिनामेव अथ देवादित्वं प्राप्तानां न ज्ञान-रहितानामित्यर्थः। आदिपदेन प्रजापादीनां ग्रहणम्। 'आचारः' कर्मानुष्ठानं 'दर्शनात्' श्रवणात् 'यज्ञेन यज्ञमयजन्त' (तै.आ.३-१२-७) इत्यादाविति शेषः। पूर्वपक्षिणा जैमिनिमतस्य सर्वविषयकत्वाश्रयणादेवादीत्युक्तम्। सूत्रे क्वचिच्चशब्दः पठ्यते। तदभिप्रायेण भाष्येऽपि चशब्दप्रयोग इति केचित्। तच्चिन्त्यम्। अस्य सूत्रस्य शङ्कापरिहारत्वेन हेत्वन्तरपरत्वाभावात्। आचारदर्शनादित्यस्य शेषत्वादेव पुरुषार्थवादः, न तु प्राधान्यादिति प्रकृसाध्येनान्वयः।

सू — ॐ ॥ तच्छ्रुतेः ॥ ॐ ॥ ४ ॥

'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा.१-१-१०) इति शेषत्वश्रुतेः ॥ ४ ॥

नन्वेवमस्तु ज्ञानकर्मणोरुभयोरपि स्वर्गादिसाधनत्वं, ज्ञानस्य कर्मशेषत्वं कुत इत्याशङ्कां परिहरत्सूत्रमुपन्यस्यति- **तदिति** ॥ अत्र तदिति व्यस्तं समस्तं च। 'तत्' कर्म प्रति 'तस्य' ज्ञानस्य शेषत्वस्य श्रुतेस्तच्छेषत्वमेव सिद्धमिति सूत्रयोजनामभिप्रेत्य सूत्राभिमतश्रुत्युदाहरणपूर्वकं सूत्रं व्याचष्टे- **यदेवेति** ॥ ज्ञानस्येत्यनुवर्तते। तथा च छान्दोग्यवाक्ये ज्ञानस्य कर्मशेषत्वश्रुतेरित्यर्थः। 'श्रद्धया' आस्तिक्यबुद्ध्या युक्तया 'उपनिषदा' तस्य ब्रह्मण उप समीपं निषादयति गमयति एनमित्युपनिषत् स्वयोग्यविद्या तया 'स्वयोग्यं तु परिज्ञानं यत्तरयोपनिषत्स्मृतम्' इति छान्दोग्यभाष्योक्तेः। 'विद्यया' ज्ञानेन ज्ञानी यत्कर्म करोति तदेव 'वीर्यवत्तरम्' अधिकफलसाधनं भवतीत्यर्थः। इयं श्रुतिः बादरायणमते मानुषविषया तत्कर्तृकज्ञानस्य शेषत्ववादिनी प्रतिबन्धकयुक्त-देवताविषया चेति ज्ञातव्यम्।

सू— ॐ ॥ समन्वारम्भणात् ॥ ॐ ॥ ५ ॥

'कर्मैव देहं दैविकं मानुषं वाऽप्यन्वारभेन्नापरस्तत्र हेतुः ।
भोगांस्तदीयांश्च यथाविभागं ददाति कर्मैव शुभाशुभं यत् ॥'
इति माठरश्रुतेश्च ।

संशब्दः प्राधान्यं दर्शयति ॥ ५ ॥

ननु यथा ज्ञानस्य 'यं यम्' (मु.३-१-१०) इति श्रुतमपि प्राधान्यं न स्वीक्रियते, किन्तु शेषत्वमेव, एवं 'यदेव विद्यया' (छा.१-१-१०) इति श्रुतमपि कर्मणः प्राधान्यं नाङ्गीकार्यं, किं नाम? ज्ञानशेषत्वं कर्मणः साम्यं वा भवेत् , विशेषप्रमाणाभावादित्याशङ्कां परिहरत्सूत्रं पठति- **समिति** ॥ अत्र समन्वारम्भणमिति विपरिणामेनावृत्तिर्वा तदित्यनुवृत्तिर्वा । तथा च 'समन्वारम्भणात्' 'कर्मैव' इति कर्मण एव प्राधान्येन स्वर्गाद्यारम्भकत्वश्रुतेः 'तत्' समन्वारम्भणं कर्मण एव स्वर्गाद्यारम्भकत्वमिति सूत्रयोजनामभिप्रेत्य समन्वारम्भणशब्दोपलक्षितश्रुत्युदाहरणपूर्वं सूत्रं व्याचष्टे– **कर्मैवेति ॥ इतीति ॥** एवंरूपसमन्वारम्भणवाचिमाठर श्रुतेरित्यर्थः । चशब्दोऽवधारणे साध्यसमुच्चये वा । तेन श्रुतेरित्यस्य समन्वारम्भणमिति साध्येनान्वयः सूचितो भवति । ननु कर्मणः स्वर्गाद्यारम्भकत्वमेव सूचितं न प्राधान्यं, तच्च परस्यापि सिद्धमित्याशङ्कोत्तरत्वेन संशब्दस्यार्थमाह– **समिति** ॥ 'दर्शयति' प्रतिपादयति कर्मण इति शेषः । सिद्धान्ते मनुष्यविषयेयं श्रुतिः, प्रतिबन्धकयुक्तदेवताविषया च । तथा च ज्ञानोत्तरकालीनं शुभाशुभं कर्मैव 'दैविकं' मनुष्याणामेव देवलोके ज्योतिर्मयदेहं मानुषं वा देहं प्रतिबन्धकयुक्तदेवानां चोभयं देहमन्वारभेत् । 'अपरः' कर्मातिरिक्तज्ञानादिः 'तत्र' शरीराद्युत्पादने 'हेतुः' प्राधान्येन कारणं न भवति । किन्तु कर्मशेषतयैव कारणं भवतीत्यर्थः । 'तदीयान्' देवमानुषीयान् भोगांश्च कर्मैव ददाति 'यथाविभागं' योग्यायोग्यविभागमनतिक्रम्य पुण्यं शुभफलं पापमशुभफलमिति विभागमनतिक्रम्येति वा । कर्मस्वरूपमाह– **शुभाशुभं यदिति** ॥ पुण्यपापात्मकमित्यर्थः । तत्त्वप्रदीपे तु नापरस्तत्र

हेतुरित्यर्थः, विष्णोरितरापेक्षया ना परः पुरुषस्स्वतन्त्रहेतुरिति चार्थ-सम्भवादित्युक्तम् ।

सू— ॐ ॥ तद्वतो विधानात् ॥ ॐ ॥ ६ ॥

'ज्ञानी च कर्माणि सदोदितानि कुर्यादकामः सततं भवेत ।'
इति कमठश्रुतौ ज्ञानवतोऽपि विधानात् ॥ ६ ॥

ननु तथापि न ज्ञानस्य कर्मशेषत्वं युक्तं, किन्तु स्वयमेव पुरुषार्थहेतुः । कस्मात् ? ज्ञानिकर्मणां फलाभावात् । फलाभावेऽप्याचारस्तु मुक्तवल्लील-यैवेत्याशङ्कां परिहरत्सूत्रमुपन्यस्यति- **तद्वत इति** ॥ अत्राप्यर्थकचशब्दोऽ-ध्याहार्य इत्याशयेन तद्वत इत्यस्यार्थमाह- **ज्ञानवत इति** । न केवलं ज्ञान-रहितस्येत्यपेरर्थः । **विधानादिति** । कर्मण इति शेषः । श्रुतौ विधानादिति हेतोर्न ज्ञानिनः कर्म लीलामात्रमित्यध्याहृतसाध्येनान्वयः । श्रुतिषु 'उदितानि' उक्तानि कर्माणि 'ज्ञानी च' ज्ञान्यपि सदा कुर्यात् । न केवलमेतावत्, किन्तु ज्ञानी सततमकामश्च भवेतेति श्रुत्यर्थः ।

सू— ॐ ॥ नियमाच्च ॥ ॐ ॥ ७ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥' (ई.२)
इति ॥ ७ ॥

इतश्च न ज्ञानिकर्म लीलामात्रमित्यभिदधत्सूत्रं पठति - **नियमाच्चेति** ॥ अत्र चस्समुच्चये । नियमोऽकरणे प्रत्यवायः । तेन तच्छ्रुतिर्गृह्यते । तथा च न केवलं विहितत्वान्न ज्ञानिकर्म लीलामात्रं, किन्त्वकरणे प्रत्यवायश्रुतेश्चेति सूत्रार्थ इत्याशयेन तां श्रुतिमुदाहरति- **कुर्वन्निति** ॥ इतीत्यस्य सूत्रेणान्वयः । 'कुर्वन्' इति मन्त्रार्थस्तु- 'शतं समाः' शतंवर्षाणि 'इह' मानुषादिजन्मनि यावत्

'जिजीविषेत्' जीवितुमिच्छेत् तावत् 'कर्माणि' स्वोचितानि 'कुर्वन्नेव' आमरणं भगवत्पूजात्मकानि असङ्कल्पितफलानि स्वोचितानि कर्माणि सर्वथा कुर्यादिति यावत्। 'एवं' कर्माणि कुर्वति 'नरे' मनुष्यमात्रेऽपि 'कर्म' पापं 'नं लिप्यते' स्वोचितेनासङ्गकर्मणा भगवत्पूजां कुर्वन्तमल्पाधिकारिणमपि प्रागुत्तराणि पापानि न बाधन्ते। ततश्च ज्ञानाधिकारी भवतीति यावत्। 'इतः' कर्मकरणात् 'अन्यथा' कर्माकरणे 'न लिप्यते इति नास्ति' भगवत्पूजामकुर्वन्तं पापानि बाधन्त एव, ततश्च नासौ ज्ञानेऽधिक्रियते, अतः कर्माणि कार्याणीति ईशावास्यटीकायामुक्तम्। तत्त्वप्रकाशिकायां तु- 'एवं' कर्मकरणे त्वयि कर्म न लिप्यते। 'इतोऽन्यथा' अकरणे 'नरे' न क्षीयत इति नरं ज्ञानं तद्वानपि नरः तस्मिन् ज्ञानिन्यपि त्वयि पापं कर्म न लिप्यत इति नास्तीत्यर्थ उक्तः। तत्त्वप्रदीपे तु - 'इह' परमेश्वरे अर्पितानि कर्माणि कुर्वन्नेव शतं समाः जिजीविषेत्। एवं त्वयि नरे न कर्म लिप्यते, इतोऽन्यथा कर्म न लिप्यत इति नास्तीत्यर्थ उक्तः। सः ईशावास्यटीकोक्तान्न भिद्यत इति ध्येयम्।

सू — ॐ ॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ॐ ॥ ८ ॥

'ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो ज्ञानादेव सर्वे कामाः सम्पद्यन्ते। तथापि यथा कर्म कुरुते तथा तथाऽधिको भवति' इति कौण्ठरव्यश्रुतेः। युधिष्ठिरादीनां राजसूयादिना फलाधिक्यदर्शनाच्चेति बादरायणस्य मतम् ॥ ८ ॥

एवं जैमिनिमतावलम्बेन चोदिते स्वमतं समर्थयत् सूत्रमुपन्यस्यति- **अधिकेति** ॥ अत्राधिकोपदेशादिति हेतुवाक्यं व्याचष्टे- **ज्ञानादेवेति** ॥ तथापीत्युक्तेर्यद्यपीति लभ्यते। अपवर्गो मोक्षः। 'कामाः' काम्याः 'यथा यथा' यद्यत् कुरुते पुरुषः 'तथा तथा' तेन तेन कर्मणा 'अधिको' ज्ञानफले

अतिशयितो भवतीत्यर्थः । अनेनाधिकोपदेशादित्यस्य ज्ञानादेव सिद्धत्वात्तु स्वर्गादिष्वधिकभावोपदेशादित्यर्थ उक्तो भवति । तद्दर्शनादिति हेत्वन्तरं, तत् चार्थकतुशब्दान्वयेन तच्छब्दावृत्त्या च व्याचष्टे- **युधिष्ठिरादीनामिति** ॥ अन्येषां देवजातीनां स्वर्गजुषां मध्ये 'युधिष्ठिरादीनां' धर्मादीनां राजसूयादिना फलाधिक्यस्य लिङ्गस्य दर्शनात् दृष्टत्वादित्यर्थः । उक्तं हि -

'राजसूयजितान् लोकान् अश्वमेधाभिवर्धितान् ।
प्राप्नुहि त्वं महाभाग तपसश्च महाफलम् ॥' (म.भा. १८.३.२६)

इति स्वर्गारोहणपर्वणि । तथा -

'ज्ञानिनामपि देवानाम् ॥' इति ब्रह्मतर्के च ॥

'लोकान्' लोके भवान् फलातिशयानित्यर्थः । श्रुतेर्दर्शनादित्यनयोः तस्माद्दर्शनादेव सर्वपुरुषार्थप्राप्तिरिति पूर्वसाध्येनान्वयः । एवं सौत्रहेतोः तदित्यस्य बुद्ध्या विभागेन तुशब्दस्यैवेति व्याख्यानेन च परिष्कृतेन तदेवमेवेति साध्यवाक्येन परम्परयाऽन्वयः । इतिशब्दाध्याहारेण बादरायण-स्येत्येतद्व्याचष्टे- **इतीति** ॥ अनेन- '**अधिकोपदेशात्**' ज्ञानादेव जायमानेषु स्वर्गादिपुरुषार्थेषु कर्मणा अधिकस्य आधिक्यस्यातिशयस्य 'ज्ञानादेव' इत्यत्रोपदेशात् उक्तत्वात् 'तद्दर्शनाच्च' तेषां मानिनामेवान्येषां देवजातीनां मध्ये युधिष्ठिरादीनां तेन राजसूयादिकर्मणा तस्य फलाधिक्यरूपलिङ्गस्य तत्र 'राजसूयजितान्' इत्यादौ दर्शनात् श्रवणाच्च तत् देवानां ज्ञानादेव सर्वं स्वर्गादिफलं, कर्मणस्तु तत्रातिशयाधायकत्वेन ज्ञानशेषत्वं सिद्धम् । यस्मा-देतत्सिद्धं तस्मान्नाचारादिवैयर्थ्यं न वा विध्याद्यनुपपत्तिः, यत एवमतो यदुक्तं ज्ञानादेव सर्वपुरुषार्थप्राप्तिरिति 'तदेवमेव' तत्तथैव, न तु ज्ञानं कर्मशेषतया पुरुषार्थसाधनमित्येवं बादरायणाचार्यस्य मतमिति सूत्रार्थ उक्तो भवति । तत्त्वप्रदीपे तु जैमिन्युक्तश्रुतीनामेवङ्गतेरित्यपि एवंशब्दार्थ उक्तः ।

सू— ॐ ॥ तुल्यं तु दर्शनम् ॥ ॐ ॥ ९ ॥

राजसूयादिकृतावकृतौ च सममेव तेषां विज्ञानम् ।

नन्वस्तु ज्ञानस्य सर्वपुरुषार्थहेतुत्वं, कर्मणस्तु तच्छेषत्वं, शेषत्वं च न ज्ञानफले ऽतिशयाधायकत्वेन, नापि तदुत्पत्त्युपयोगित्वेन तदुत्तरभावित्वात्, किन्तु ज्ञानेन फले साधयितव्ये सामर्थ्यसम्पादकतया ज्ञाने अतिशयाधायकत्वेनेति किं न स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति- **तुल्यं त्विति** ॥ अत्र तुशब्दस्यैवार्थत्वं तदित्यस्य विपरिणामेनानुवृत्तिं चाभिप्रेत्य सूत्रार्थमाह- **राजसूयादीति** ॥ आदिपदेन अश्वमेधादिर्गृह्यते । कृतिः करणम् । सममिति तुल्यमित्यस्य एवेति तुशब्दस्य कृतावकृतौ तेषामिति विपरिणततच्छब्दस्य ज्ञानमिति दर्शनशब्दस्य व्याख्यानमिति द्रष्टव्यम् । न तु विषममित्येवशब्दार्थः। अन्यथा कर्मकरणे ज्ञानं पुरुषार्थसाधने समर्थम् अकरणे असमर्थमिति ज्ञाने विशेषस्स्यादिति भावः । ज्ञानमित्यनन्तरं यत इति शेषः । अतो ज्ञानिकर्म न ज्ञाने अतिशयाधायकं, किन्तु ज्ञानफल इति साध्यसमर्पकैवंशब्देनास्यान्वयः ।

'विज्ञातमेतत्सर्वेषां मुनीनां ब्रह्मदर्शनात् ।
स्यादेव मोक्षो नान्यस्मादिति तत्रापि चित्रता ॥'

नन्वेवं तर्हि भगवन्मतविरोधेन जैमिनिमतस्याप्रामाण्यं प्रसज्यते । न च मुनिमतस्य तद्युक्तम् । जैमिनिमतस्य प्रामाण्ये तु भगवन्मतस्य अप्रामाण्यमित्याशङ्कां स्मृत्या परिहरति- **विज्ञातमिति** ॥ जैमिन्यादीनां व्यासशिष्याणां सर्वेषां मुनीनां ब्रह्मदर्शनादेव मोक्षः स्यात्, नान्यस्मात्कर्मण इत्येव 'विज्ञातं' सम्मतमिति यावत् । 'तत्रापि' तेषां मतेष्वपि मोक्षान्यफलविषयेऽपि 'चित्रता' आधिक्यं नानाप्रकारमस्ति ।

'स्वर्गादयः कर्मणैव नान्येनेत्यपरे विदुः ।
ज्ञानेनाधिक्यमित्याहुर्जैमिन्याद्यास्तु केचन ॥
अदृष्टमेव ज्ञानेन दृष्टं नैवोपलभ्यते ।

इति केचिद्विदः प्राहुः व्यासशिष्या इमेऽखिलाः ।
यस्माद्व्यासमतं सर्वं सत्यमेव ततोऽखिलम् ॥'

वैचित्र्यमेव दर्शयति- **स्वर्गादय इति ॥** 'अपरे' केचिदृषयः स्वर्गादयः कर्मणैव भवन्ति, न तु कर्मणोऽन्येन तच्छेषभूतेन ज्ञानेनेति 'विदुः' अभ्युपजग्मुः । इदं मतमपरोक्षज्ञानिष्वेव मनुष्येषु येऽधमाः तत्कर्तृकज्ञानविषयम् । केचन जैमिन्याद्यास्तु अपरोक्षज्ञानेन कर्मशेषभूतेन कर्मफले सर्वत्र दृष्टादृष्टरूपे आधिक्यमित्याहुः । इदं मतमुत्तममनुष्यविषयमिति प्राञ्चः भावबोधकाराश्च । अर्वाचीनास्तु इदं मतं योग्यमध्यममनुष्य विषयमित्याहुः । केचित्तु कर्मशेषभूतेन ज्ञानेन 'अदृष्टं' स्वर्गादिकं सर्वमेव 'उपलभ्यते' प्राप्यते, न तु दृष्टं पुत्रवृष्टिधनादिकमपीत्याहुः । इदं मतं मध्यममनुष्यविषयमिति प्राञ्चो भावबोधकाराश्च । अर्वाचीनास्त्विदं मतं योग्येषूत्तममनुष्यविषयमित्याहुः । अत्र यद्यपि प्राचीनपक्षे भाववोधपक्षे च स्वर्गादय इति स्मृतिक्रमभङ्गोऽस्ति । तथापि मानुषा अपि उत्तममध्यमाधमभेदभिन्ना यथायोग्यं विचित्रमतविषया भवन्तीति सुधोक्तेर्यथायोग्यमेव स्मृत्युक्तपक्षे योजनीयः । न चाधमक्रमेण योजने स्मृत्यानुगुण्यं सुधाविरोधश्च नास्तीति वाच्यम् । प्रमेयबाधात् । कर्मसाध्ये दृष्टादृष्टादौ सर्वत्र ज्ञानस्यानुप्रवेशो ह्युत्तमपक्षे । दृष्टमात्रप्रवेशो मध्यमे । अधमे तु न कुत्रापि ज्ञानस्य प्रवेश इति तत्त्वम् । व्युत्क्रमस्यापि क्रमत्वे सुधोक्तानुक्रमविरोधो यथायोग्यमित्युक्तिविरोधश्चात्रेति ध्येयम् । कर्मफले विचित्रतायामपि न मुनिमतानामसत्यत्वं शङ्क्यमित्याह- **इम इति ॥** यस्मादिमे एवं वदन्तोऽखिलाः सर्वेऽपि व्यासशिष्याः, तस्मादुक्तं 'सर्वं व्यासमतं' वेदव्यासमतान्तर्भूतं 'ततोऽखिलं' निश्शेषं सर्वं सत्यमेवाधिकारिभेदादित्यर्थः ।

'यथाऽऽकाशस्त्वनन्तोऽपि व्यामो हस्तावधिस्तथा ।
प्रादेशोऽपि हि सत्येन तथैतेषां मतानि तु ॥'

अत्र दृष्टान्तमाह- **यथेति** ॥ यथा आकाशोऽनन्तोऽपि 'सत्येन' सत्यत्वेन वर्तते, तथा तत्प्रभेदाश्च 'व्यामः' पुरुषप्रमाणः बाहुद्वयपरिमितो वा 'हस्तावधिः' हस्तपरिमितः प्रादेशपरिमितश्चेत्येते सत्यत्वेन वर्तन्ते, तथा भगवन्मतं तदन्तर्गतान्येतेषां मुनीनां मतानि च साकल्येन सत्यानीत्यर्थः । तुश्चार्थः चस्समुच्चये । तत्त्वप्रदीपे तु- यथा आकाशः कात्स्न्र्येन गृह्यमाणोऽनन्तोऽपि परिमाणभेदापेक्षया व्यामो हस्तप्रमाण इत्याद्युच्यते 'सत्येन' सत्यवचनेनैव, तथैतेषां मतान्यधिकारिभेदापेक्षया सत्यानीत्यर्थ उक्तः ।

'स्वयन्तु भगवान् व्यासो व्याप्तज्ञानमहांशुमान् ।
अनन्ताकाशवत्पश्यन्निखिलं पुरुषोत्तमः ॥
ज्ञानेनैवाप्यते सर्वं कर्मणा त्वधिकं भवेत् ।
इति प्राह महायोगी पुमर्थानां विनिर्णयम् ॥'

इति भविष्यत्पर्वणि ॥

ननु ज्ञानादेव सर्वे पुरुषार्थाः कर्मणा तु तदाधिक्यमिति भगवन्मतं, अन्येषां तु नैवं मतम्, अतः कथमनन्ताकाशवदन्तर्भावितान्यमतत्वं बादरायणमतस्येत्यत आह- **स्वयं त्विति** ॥ तुरप्यर्थः । अनन्ताकाशवदित्यस्य पूर्वेणान्वयः । भूतव्यावृत्त्यर्थं अनन्तेति । व्याप्तेत्यर्थः । दृष्टान्ते विधेयधर्मवैकल्यपरिहारायेदम् । तथा पुरुषोत्तमो भगवान् अनन्ताकाशवत् व्याप्तज्ञानमहांशुमान् 'महायोगी' महामुनिर्व्यासो नानाधिकारिकं निखिलं मतं पश्यन्नपि स्वमतत्वेनेति शेषः । अपरोक्षज्ञानेनैव सर्वं स्वर्गादिकमाप्यते, ज्ञानोत्तरकृतकर्मणा तु तदधिकं भवेदित्येवं देवतालक्षणाधिकारिविशेषविवक्षया 'पुमर्थानां विनिर्णयं' षष्ट्या अलुक्, व्यधिकरणबहुव्रीहिरयं, स्वर्गादिपुमर्थसाधनविषयकनिर्णयजनकं स्वमतं पृथक् प्राहेत्यर्थः । आकाशवद्व्याप्तज्ञानमहांशुमान् व्यास इति यथाश्रुतान्वयो न सम्भवति, व्याप्तज्ञानवत्त्वरूपविधेयधर्मस्य पक्षदृष्टान्तोभयान्वयाभावात्, किन्त्वाकाशवद्व्याप्तं च तत् ज्ञानं

चेति विधेयैकदेशेनान्वयो वाच्यः । तथाचायमनन्वयदृष्टान्तः । अत एव टीकाकृदनन्ताकाशवदित्यनन्वयदृष्टान्त इत्युक्त्वा तदुपपादयितुं यथाऽऽकाशो व्याप्तस्तथा ज्ञानमित्येकदेशान्वयं प्रदर्शितवान् । न च दृष्टान्तस्य अनेकविधत्वाभावः ।

'व्यत्यासासोऽनन्वयश्चैव प्रसिद्धोऽभूत एव च ।
सर्वसांहारिकश्चेति दृष्टान्तः पञ्चधा स्मृतः ।' (भा.ता.नि. १.१०.७५)

इत्युक्तेः । **'रमादिवन्नास्वतन्त्रो हरिः'** इति व्यत्यासदृष्टान्तः । अनन्वयस्य तु प्रकृतमेवोदाहरणम् । प्रसिद्धो महानसादिः ।, 'यथोर्णनाभिः' (मु.१-१-७) इति च । अभूतस्य 'दिवि सूर्यसहस्रस्य' इत्याद्युदाहरणम् । सर्वसांहारिकस्य 'कृष्णो नारायणवत्, रामः कृष्णवत्' इत्यादि । सर्वेषां नारायणकृष्णधर्माणां कृष्णे रामे चोपसंहारात् । 'गगनं गगनाकारम्' इत्यादि सर्वसंहारिकस्योदाहरणमिति केचिदाहुः । **भविष्यत्पर्वणीति** । मतानां प्रामाण्यमुक्तमिति शेषः ।

'ज्ञानिनामपि देवानां विशेषः कर्मभिर्भवेत् ।
चीर्णेऽकृते वा ज्ञानस्य न विशेषोऽस्ति कर्मणि ।।'
इति ब्रह्मतर्के ।। ९ ।।

नन्वेवं स्मृत्या मतानां प्रामाण्योक्तावपि परस्परविरुद्धत्वात्कथं तत्स्यादित्यतो भगवन्मतं देवताविषयं, जैमिन्यादिमतं मनुष्यविषयमतो न विरोध इति भावेनात्र स्मृतिमाह- **ज्ञानिनामिति** ।। तत्त्वप्रदीपे तु राजसूयादिना फलाधिक्यमित्युक्तं सममिति चोक्तम् । तत्र प्रमाणमाह- ज्ञानिनामपीत्यवतारितम् । यद्यपि देवाः ज्ञानिनः, तथापीत्यर्थेऽपिशब्दः । ज्ञानिनां देवानां ज्ञानेन सर्वफलसिद्धावपीति वा । 'विशेषः' आधिक्यं ज्ञानफल एव, न तु ज्ञाने इति शेषः । कुत इत्यत आह– **चीर्ण इति** ।। कर्मणि 'चीर्णे' अनुष्ठिते 'अकृते' अननुष्ठिते वा 'ज्ञानस्य' ज्ञाने 'विशेषः' अतिशयः पुरुषार्थसाधन-

सामर्थ्यासामर्थ्यरूपो नास्तीत्यर्थः। 'हि' यस्माद्ब्रह्मतर्के इति व्यासमतस्य देवताविषयत्वोक्तेर्न विरोध इति वाक्यशेषः। यद्वा- तत्त्वप्रदीपानुसारात् फलाधिक्यं ज्ञानानां विशेषश्चोक्त इति शेषः।

॥ इति पुरुषार्थाधिकरणम् ॥ १ ॥

॥ २. असार्वत्रिकाधिकरणम् ॥

(सर्वेषां ज्ञानेऽधिकारो नास्ति)

सवेषां पुरुषार्थापेक्षित्वात् ज्ञानाधिकारितेति।

अत्राधिकरणे ज्ञाने सर्वेषामधिकाराभावो वर्ण्यते। पूर्वपक्षयति– **सर्वेषामिति** ॥ 'सर्वेषां' जनानां पुरुषैरर्थ्यमानो यो ज्ञानसाध्यो मोक्षः तदपेक्षित्वात् निर्दुःखसुखमाप्नुवानीति तदर्थित्वादित्यर्थः। उपलक्षणमेतत्– सर्वेषां ज्ञानसाधने श्रवणादौ सामर्थ्यात्तदुपयोगिविद्वत्तासद्भावाच्चेत्यपि ज्ञातव्यम्। ज्ञानाधिकारिता स्यादिति शेषः। सर्वेषामधिकार इत्यनुक्त्वा अधिकारितेति स्त्रीलिङ्गप्रयोगेन वक्ष्यमाणसूत्रं विशेष्यपदोक्त्याऽनुकरोति।

अत आह -

सू— ॥ असार्वत्रिकी ॥ ॐ ॥ १० ॥

न सर्वेषामधिकारः ॥ १० ॥

सिद्धान्तयत्सूत्रमवतारयति- **अत इति** ॥ सूत्रं पठति- **असार्वत्रिकीति** ॥ ज्ञानाधिकारिता 'असार्वत्रिकी' सर्वेषां नेति व्याकृतमपि सूत्रं पुनः स्वोक्तिविवरणेन व्याचष्टे - **नेति** ॥ जनानामिति शेषः।

सू— ॐ ॥ विभागश्शतवत् ॥ ॐ ॥ ११ ॥

'नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु।
सोमाधिकारो वेदोक्तो ब्रह्मणी द्वे शताधिके ॥

यथा तथैवासङ्ख्येयाः प्रजास्तासु कियान् जनः ।
ज्ञानाधिकारी सम्प्रोक्तो विष्णुपादैकसंश्रयः ॥'
इति वचनात्सुखापेक्षासाम्येऽपि विभाग इष्यतेऽधिकारार्थम्
॥ ११ ॥

नन्वर्थित्वादेः सर्वेषामपि सद्भावात् कथं नाधिकारितेत्याशङ्कां परिहरत्सूत्र-मुपन्यस्तति - **विभाग इति** ॥ अत्र तुल्यमित्यतः तुशब्दोऽनुवर्तते । शतवदिति चावर्तते । तत्रैकस्य शतशब्दवतो वचनादित्यर्थ इत्याशयेन सूत्रं व्याचष्टे- **नव-कोट्य इति** ॥ 'नवकोट्यो' नवकोट्यः तावत् सङ्ख्याकाः 'हि' प्रसिद्धाः देवानां गणाः सन्तीति शेषः । कोटीशब्दो वा, तथात्वे सङ्ख्या इति शेषः । 'तेषां' नवकोटीनां मध्ये 'शतस्य तु' शतसङ्ख्याकदेवगणस्यैव 'सोमाधिकारः' सोमरस-द्रव्यकयागाधिकार इत्यर्थः । सोमपानाधिकार इति वा । न केवलं शतस्यैव, किन्तु शताधिकयोरपि अधिकारोऽस्तीत्याह– **ब्रह्मणी इति** ॥ विष्णुचतुर्मुखाख्यपरापरे ब्रह्मणी इत्यर्थः । यथाशब्दः शतस्येत्यतः प्राग्योजनीयः । अत्यन्तसाम्ये एवशब्दः । प्रजाः सन्तीति शेषः । कियान् जन इति जात्यैकवचनम् । अयोग्यजन-व्यावृत्त्यर्थमाह- **विष्णिवति** ॥ वचनादित्यनेन शतवदित्यंशः, सुखापेक्षा-साम्येऽपीत्यनेनानुवृत्ततुशब्दस्य सर्वेषां निर्दुःखानन्दरूपपुरुषार्थापेक्षासाम्येऽ-पीत्यर्थतया व्याख्यातः । इति वचनान्न सर्वेषां ज्ञानाधिकारः, किन्तु ज्ञानाधि-कारार्थं शतवद्विभागः 'इष्यते' अङ्गीक्रियते इति योजना । अनेन- 'शतवत्' शतस्येव यथा खलु नवकोटीनां देवत्वसाम्येऽपि न तेषां साधारण्येन सोमाधिकारः किन्तु परापरब्रह्मद्वयाधिकशतस्येति विभाग एव, तथा 'शतवद्वचनात्' शतशब्दयुक्तनवकोट्य इति वचनात् 'तु' अपि सर्वेषां पुरुषार्थापेक्षासाम्येऽपि न ज्ञानाधिकारः, किन्तु तदर्थं ज्ञानाधिकारार्थं 'शतवद्विभागः' पुरुषविभागोऽङ्गीकार्य इति सूत्रार्थ उक्तो भवति । सोमाधिकारिशतदेवास्तु तत्त्वप्रदीपेऽभिहिताः । तेषामयं सङ्ग्रहश्लोकः –

'प्रधानवायुर्मरुतोऽश्विनौ च वस्वर्करुद्राः पितरो गुरुश्च ।
द्यावापृथिव्यावृभवोऽपि विश्वे देवाः शतं सोमसवाधिकारिणः ॥'

इति । अत्र पितृपतीनां त्रित्वम्, अश्विनोर्द्वित्वम्, सहस्रऋभूणामेकत्वं च विवक्षितम् ।

कस्याधिकारः ?

सू— ॐ ॥ अध्ययनमात्रवतः ॥ ॐ ॥ १२ ॥

ननु यद्यर्थित्वादिसाम्येऽपि न सर्वेषामधिकारः, तर्हि कस्याप्यसौ न स्यात् । यदि केषाञ्चिदधिकारोऽस्ति तर्ह्यर्थित्वाद्व्यतिरिक्तमधिकारप्रयोजकविशेषणं वक्तव्यम्, न च तदस्तीति भावेनाक्षिपति- **कस्येति** ॥ अर्थित्वातिरिक्तस्य केन विशेषणेन युक्तस्य अधिकारः ? न केनापि युक्तस्येत्यर्थः । कस्याधिकार इति प्रयोगेन वक्ष्यमाणसूत्रापेक्षितसम्बन्धिपदं कात्स्न्यर्थः । तथा च यथाशक्त्य-खिलवेदाध्ययनरूपविशेषणवत इत्यर्थः । यथोक्तं तत्त्वप्रदीपे- मात्रशब्दः कात्स्न्येऽवधारणे च । तथा च साङ्गवेदाध्ययनवतः सफलाध्ययनवतः अशक्तौ च यथासम्भवं वेदाध्ययनवत इति । भवतीति ज्ञानाधिकार इति सम्बन्धः ।

'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते ।
गुरुभक्तिविहीनस्य शमादिरहितस्य च ॥
न च वर्णावरस्यापि तस्मादध्ययनान्वितः ।
ब्रह्मज्ञाने तु (हि) वेदोक्ते ह्यधिकारी सतां मतः ।'
इति ब्रह्मतर्के ॥

ननु यद्यध्ययनवतां ज्ञानाधिकारः तर्हि 'विभागः' इत्युक्ति भङ्गस्स्यात् । सर्वैरपि वेदस्याध्येतुं शक्यत्वादित्यत आह- **अवैष्णवस्येति** ॥ विष्णुभक्ति-विहीनस्येत्यर्थः । अपिः वैदिकेऽपीति समुच्चये, वेदोक्तेऽपि तर्हि अवैष्णव-स्यापीति वा । 'हि' यस्मात् । नञो द्विर्ग्रहणं सर्वत्र सम्बन्धं ज्ञापयति । अथ

वा- शूद्रस्य तन्त्रेऽधिकारसत्त्वात् पृथङ्निषेधः । आद्यश्चस्समुच्चये । द्वितीयोऽवधारणे । वर्णावरः शूद्रः । अपिस्समुच्चये । 'वेदोक्ते तु' वेदजन्य एव ब्रह्मज्ञाने । तन्त्रोक्ते त्वध्ययनानपेक्षेति तु शब्दाभिप्रायः । तृतीयोऽपिः भिन्नक्रमः विष्णुभक्तिरूपविशेषणसमुच्चयार्थः । **हिशब्दपाठे पुनः** हिशब्दः प्रसिद्धौ, सज्जनसम्मतेर्हेतुत्वद्योतको वा । तस्मादित्यस्य यस्मादध्ययने भगवद्भक्तिमतामेवाधिकारो नान्येषां, तस्मादध्ययनान्वितो ब्रह्मज्ञानेऽधिकारीति युक्तमित्यन्वयः । इतीति शेषः । न चाभक्तस्यानधिकारित्वे चतुर्मुखस्य विरोचनाध्यापने कथं प्रवृत्तिरिति वाच्यम् । अभक्तानामनधिकारितया तदध्ययनस्य वैफल्यमेवेति ज्ञापनायाध्यापनोपपत्तेः । अत एव तत्त्वप्रदीपे अध्ययनवत इत्येतत् सफलाध्ययनवत इति व्याख्यातम् । **इति ब्रह्मतर्क इति** । सूत्रकृदुक्तमुक्तमिति वाक्यशेषः ।

'पठेद्वेदानथार्थानधीयीताथ विचार्य ब्रह्म विन्देत्'
इति च कौषारवश्रुतिः ॥ १२ ॥

अध्ययनवतो वैदिकब्रह्मज्ञानेऽधिकार इति यत्स्मृत्या सिद्धं तत्र श्रुतिं चाह- **पठेदिति** ॥ 'पठेदिति ॥ 'वेदान् पठेत्' गुरूच्चारणमनूच्चारयेत् । 'अथ' अनन्तरम् 'अर्थान्' वेदार्थान् 'अधीयीत' गुरुमुखाज्ज्ञानीयात् अथैवं श्रवणोपासनानन्तरं 'ब्रह्म विचार्य' मत्वा ध्यात्वा च 'अथ विन्देत्' अपरोक्षतो जानीयात् । अथ प्राप्नुयादित्यर्थः । इति चेति चः पूर्वोक्तस्मृतिसमुच्चये । श्रुतिश्चेत्यन्वेति । अध्यनवतामेव वैदिकब्रह्मविद्याधिकार इत्यर्थमाहेति शेषः ।

॥ इत्यमार्वत्रिकाधिकरणम् ॥ २ ॥

॥ ३. अविशेषाधिकरणम् ॥

(सर्वेषामपि एकप्रकारेण ज्ञानाधिकारः न, किन्तु योग्यतातारतम्यानुसारेण)

सू— **ॐ ॥ नाविशेषात् ॥ ॐ ॥ १३ ॥**

न सामान्येनाधिकारो देवादीनाम् ।

अत्राधिकरणे ज्ञानाधिकारे तारतम्यं समर्थ्यते । तारतम्यकल्पकाभावात् सर्वेषाम् अविशेषेण ज्ञानाधिकार इति पूर्वपक्षे सिद्धान्तयत्सूत्रं पठति- **नेति** ॥ अत्राधिकार इत्यनुवर्तते । अविशेषादित्यावर्तते । नाविशेषादित्यैकपद्यं च । देवादीनामिति शेष इति भावेन सूत्रं व्याचष्टे- **नेति** ॥ तत्र द्वितीयस्य साम्य-प्रसङ्गादित्यर्थः । **देवादीनामिति** । 'देवानाम्' ऋषिगन्धर्वाणां मनुष्याणां च न साम्येनाधिकारः, तथा तेषां प्रत्येकमपि न साम्येनाधिकार इत्यर्थः । अनेन-देवादीनां ज्ञाने अधिकारः 'अविशेषात्' साम्येन न, कुतः? तथासति 'अविशेषात्' ज्ञानेऽपि साम्यप्रसङ्गात् । किन्तु ' नाविशेषात्' तारतम्येनेति सूत्रार्थ उक्तो भवति ।

'अथ पुमर्थसाधनान्यर्थो धर्मो ज्ञानमित्युत्तरोत्तरम् ।
तत्राधिकारिणो मनुष्या ऋषयो देवा इत्युत्तरोत्तरम् ॥'
इति कौण्डिन्यश्रुतिः ॥ १३ ॥

ज्ञानाधिकारतारतम्ये न केवलं युक्तिः प्रमाणमित्याशयेन श्रुतिं चाह- **अथेति** ॥ आरम्भे अथशब्दः । पुमर्थो मोक्षः । तथा च 'अर्थो' वित्तं 'धर्मः' सुकृतं 'ज्ञानं' ब्रह्मदर्शनमित्येतानि त्रीणि पूर्वपूर्वम् उत्तरोत्तरमपेक्ष्य पुमर्थ-साधनानीत्यर्थः । तत्रार्थस्य धर्मज्ञानद्वारा मोक्षसाधनत्वं, धर्मस्य ज्ञानद्वारा, ज्ञानस्य तु साक्षादिति विवेकः । एतेषु येऽधिकारिणः तेषां च तारतम्यमाह- **तत्रेति** ॥ त्रिष्वित्यर्थः । **इत्येते** उत्तरोत्तरमतिशयिताः प्रत्येकं प्रत्येकमधिकारिण इत्यर्थः । तत्त्वप्रदीपे तु- अर्थो धर्मो ज्ञानमित्युत्तरोत्तरतः पुमर्थानां काम-स्वर्गापवर्गाणां साधनानि साध्यं चोत्तरमधिकमित्यर्थः । तेषु त्रिष्वपि अधि-कारिणो मनुष्यर्ष्यादिदेवास्तु 'उत्तरोत्तरं' प्रत्येकं प्रत्येकं वेत्यर्थ इत्युक्तम् । अस्य नेति पूर्ववाक्येनान्वयः ।

॥ इत्यविशेषाधिकरणम् ॥ ३ ॥

॥ ४. स्तुत्यधिकरणम् ॥

(ज्ञानिनामपि यथेष्टाचरणं न विहितम्, सत्कर्मानुष्ठानेन फलाधिक्यं भवति। अनियता हि देवाः, विरिञ्चस्तु यथेच्छाचरणविधिमान्)

'अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति' (वृ. ५-५-१) ज्ञानिनो यथेष्टाचरणं विधीयत इति।

अत्राधिकरणे ज्ञानिनां सदसत्प्रवृत्त्योर्विशेषः साध्यते। पूर्वपक्षं सूचयति– **अथेति ॥** अथेत्यतः प्राक् ज्ञानिनः सदसतप्रवृत्त्योर्विशेषो नास्तीति साध्यमध्याहृत्य तत्र हेतुतया यतश्शब्दाध्याहरेणाथेत्यादि विधीयत इत्यन्तं वाक्यं योजनीयम्। **ईदृश एवेति ॥** इति श्रुताविति शेषः। 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति' बृहदारण्यकवाक्यस्यायमर्थः- यस्मादपरोक्षज्ञानान्मोक्षः, तस्माद्यो 'ब्राह्मणो' ब्रह्म अणितुं प्राप्तुं योग्योऽसौ 'पाण्डित्यम्' आगमजन्यं श्रवणरूपज्ञानं सम्पादयेत्। पाण्डित्यं 'निर्विद्य' नितरां लब्ध्वा 'बाल्येन' युक्तिरूपबलसहितेन तज्जन्येन मननरूपज्ञानेन 'तिष्ठासेत्' स्थातुमिच्छेत् बाल्यं सम्पादयेदिति यावत्। 'अथ' तदुभयलाभानन्तरं 'मुनिः' ध्यानी भवति मौनममौनं च निर्विद्येत्यनुवादात् अथ मुनिरपरोक्षज्ञानी भवतीति लभ्यते। अत एव व्यासतीर्थैर्यि 'अथ मुनिः' इत्यस्यानन्तरमध्याहृतस्यामुनिरित्यस्यार्थमाहेत्युक्तम्। तथा च एवं 'मौनम्' उपासनारूपज्ञानम् 'अमौनम्' अपरोक्षज्ञानं च निर्विद्याथ ब्राह्मणो जीवन्मुक्तो भवति तथोच्यते 'सः' जीवन्मुक्तो येन केन सता वा स्यादसता वा प्रकारेण कर्माचरणेन 'स्यात्' वर्तेत, 'तेन' यथेष्टाचरणेन 'ईदृश एव' ज्ञानफलमोक्षं प्राप्त एव भवति। न तावता तस्य मोक्षहानिरिति। यद्यपि बृहद्भाष्ये 'ब्रह्मणो' मुक्तो भवतीत्यर्थः। 'स' मुक्तो

येन केनापि वर्तयन् 'ईदृश एव' परमात्मनः सकाशादानन्दभिक्षुक एव, न कदाचित्स्वतन्त्रो भवतीति ब्राह्मणशब्दः परममुक्तपरतया येन केनेत्येतन्निमित्तपरतया च व्याख्यातः। तत्रैव

'प्रथमब्राह्मणो मुक्तो द्वितीयो योग्य उच्यते।
अपरोक्षविन्मुक्तयोस्तु तार्तीयेनोभयोर्ग्रहः॥' (बृ.भा. ३.४.१३)

इति प्रमाणोदाहरणेन अथ मुनिरित्यस्यानन्तरम् अध्याहारं विनैव ब्राह्मणपदानुषङ्गेण श्रुतिव्याख्यानायापरोक्षज्ञानिपरत्वस्याप्युक्तत्वादविराधः। न च प्रमेयदीपिकायां बलेन युतं बालं तस्य भावो बाल्यमित्याशयेन युक्तिबलोपेतत्वं बाल्यं, आगमज्ञत्वं पाण्डित्यं, 'अथ मुनिः' मननशीलो भवतीत्यर्थोर्विरोध इति वाच्यम्। गीताभाष्ये 'मननशीलत्वम्' इत्यस्यार्थे अस्याश्रुतेरुदाहृतत्वात् तदानुकूल्याय तथा व्याख्यानेऽप्यस्य प्रकारान्तरत्वसम्भवात्॥

अत आह –

सू— ॐ॥ स्तुतयेऽनुमतिर्वा॥ ॐ॥ १४॥

न विधिः। ज्ञानिनं स्तुतयेऽनुमतिमात्रं वा।

सिद्धान्तयत्सूत्रमवतारयति– **अत इति॥** सूत्रं पठति– **स्तुतय इति॥** अत्र 'नाविशेषात्' इत्यतः विपरिणामेन नाविशेष इत्यस्यानुवृत्तिं 'परामर्शम्' इत्यतः अचोदनेत्यस्याकर्षणं च अभिप्रेत्य सूत्रं व्याचष्टे– **न विधिरिति॥** न यथेष्टाचारविधिरित्यर्थः। 'केन स्याद्येन स्यात्' इति वाक्यमित्यस्ति। यत इति शेषः। न विधिरित्यस्यातो न विध्यनुपपत्तिदोष इत्युपस्कृतेनान्वयः। तस्य च अतो ज्ञानिनः सदसत्प्रवृत्त्योर्नाविशेषः किन्त्वस्त्येव विशेष इति परमसाध्येनान्वयः। तर्हि 'येन स्यात्' इति किमर्थमुच्यत इत्यतः तत्सार्थक्यकथनपरतया स्तुतयेऽनुमतिर्वेत्येतद्योजयति- **ज्ञानीति॥** ज्ञानीत्यतः प्राक् किन्त्विति शेषः। स्तुतिः सामर्थ्यप्रकटनम्। तथा च यथा कश्चिद्भृत्यं प्रति स्तुतये कथ्यते यथेष्टं कुर्वति न तु

विधिः तथैतदपि 'ज्ञानिनः स्तुतये एव' यदि ज्ञानी सता वाऽसता वा कर्मणा वर्तेत, तदाऽपि 'ईदृश एव' मोक्षवानेवेति ज्ञानिनो गुणवर्णनायैवोच्यते, न तु विधिः। अथ वा- अनुमतिरनुज्ञामात्रमेतत्। यदि ज्ञानी अनुष्ठेयानां सत्कर्मणां मध्ये येन केनापि वा वर्तेत, स्वेच्छया केषाञ्चित्सत्कर्मणां चरणं केषाञ्चिदचरणमित्येवंभाववान् स्यात्, तदापीदृश एव महाफलवानेव, तस्यानियतत्वेनावश्यं कार्याभावादित्येवमनुष्ठेयसत्कर्मणां यथेष्टाचाराभ्यनुज्ञामात्रमेतत्, सर्वथा न विधिरिति भावः। अधिकारिभेदेन पक्षद्वयप्रवृत्तेर्वाशब्दः।

युज्यते च ॥ १४ ॥

ननु न सदसत्प्रवृत्तिभ्यां ज्ञानिनो विशेषो युज्यते, तथासत्यसत्प्रवृत्या कुण्ठितशक्तेर्ज्ञानस्य मोक्षसाधनत्वाभावप्रसङ्गात्। तथाचानियम इत्युक्तव्याघातः, सत्कर्मसमुच्चितस्य मोक्षसाधनत्वप्रसङ्गाच्चेत्यत आह- युज्यते चेति। चोऽवधारणे। सदसत्प्रवृत्तिभ्यां विशेष इति शेषः।

सू— ॐ ॥ कामकारेण चैके ॥ ॐ ॥ १५ ॥

'कामचाराः कामभक्षाः कामवादाः कामेनैवेमं देहमुत्सृज्याथ परात्परमीयुरनारम्भणम्' (सामशाखा) इति चैके पठन्ति ॥ १५ ॥

नन्वसत्प्रवृत्त्या कुण्ठितशक्तेर्ज्ञानस्य मोक्षसाधनत्वाभावप्रसङ्गात्कथं युज्यत इत्याशङ्कां परिहरतसूत्रमुपन्यस्यति- **कामेति** ॥ अत्र चोऽप्यर्थः साध्यसूचकः। ज्ञानिनो मोक्षमिति पठन्तीति च शेषः। इत्याशयेन सूत्रसूचितश्रुत्युदाहरणपूर्वकं सूत्रं व्याचष्टे- **कामचारा इति** ॥ ज्ञानिन इति शेषः। अत्र विशेषणत्रयेण सौत्रकामकारपदं कामसञ्चरणभक्षणवचनेषु समं यत्कामकरणं तद्वाचीत्युक्तं भवति। उक्तं हि तत्त्वप्रदीपे- कामकारः कामितकरणं, तत्कामचारभक्षवादेषु त्रिष्वपि सममिति। 'कामेन' इच्छया 'इमं' कर्मनिमित्तं देहं त्यक्त्वा

'अनारम्भणम्' अनादिभूतं परात्परं ब्रह्म 'ईयुः' प्राप्नुयुरित्यर्थः। **इति चेति** ॥ चो यत इत्यर्थे साध्यसमुच्चये वा। 'एके' अन्ये सामशाखिनः। पठन्तीत्यस्यातो नासत्प्रवृत्त्या कुण्ठितशक्तित्वेन ज्ञानस्य मोक्षसाधनत्वाभावः प्रसज्यत इति चशब्दसूचितसाध्येनान्वयः।

सू— ॐ ॥ उपमर्दं च ॥ ॐ ॥ १६ ॥

'ओमित्युच्चार्यान्तरिममात्मानमभिपश्योपमृद्य पुण्यं च पापं च काममाचरन्तो ब्रह्मानुव्रजन्ति' इति च तुरश्रुतौ ॥ १६ ॥

इदमेव साध्यं कैमुत्येन साधयत्सूत्रं पठित्वा चशब्दस्य विषभक्षान्मृतेरिवानिवार्यतया प्राप्तस्य प्रारब्धकर्मणोऽपीत्येवमप्यर्थत्वेन कैमुत्यद्योतकत्वमभिप्रेत्य व्याचष्टे– **उपमर्दं चेति** ॥ उपमर्दः फलह्रासः। अन्तः हृदयस्येति। प्रतिमादेरुपलक्षणम्। तथा च मुक्तियोग्या ओमित्युच्चार्य श्रवणादिकं च कृत्वा हृदयस्य प्रतिमादेरन्तरिमं परमात्मानम् 'अभिपश्य' दृष्ट्वा प्रारब्धमनिष्टं पुण्यं पापं च किञ्चिद्भुक्तं ज्ञानेन 'उपमृद्य' फलह्रासेन विनाश्य 'कामं' यथेच्छं सदसत्कर्माचरन्तोऽपि ब्रह्म 'अनुव्रजन्ति' प्राप्नुवन्त्येवेति श्रुत्यर्थः।

सू— ॐ ॥ ऊर्ध्वरेतस्सु च शब्दे हि ॥ ॐ ॥ १७ ॥

'न तावता कामचाराणां ज्ञानेऽधिकारः।
'य इमं परमं गुह्यमूर्ध्वरेतस्सु भाषयेत्।
न तथा विद्यते भूयान्यं प्राप्यान्येऽपि भूयसः ॥'
इति माठरश्रुतेः ॥ १७ ॥

ननु यदि कामचाराणामपि ज्ञानिनां मुक्तियोग्यता, तर्हि तद्ब्रह्मजिज्ञासूनामपि कामचाराणां ज्ञानाधिकारः स्यादविशेषात् तथा च 'अध्ययनमात्रवतः' इत्युक्तस्य विष्णुभक्तिशमादिमतामेवाधिकार इत्यस्य बाधः स्यादित्याशङ्क्य

परिहरत्सूत्रं पठति– ऊर्ध्वेति ॥ अत्र ऊर्ध्वरेतस्स्वित्युक्तिः प्रधानत्वादुपलक्षणमन्यगुणानाम्। चशब्द एवार्थः साध्यसमुच्चये चेत्याशयेन चशब्दसूचितं प्रतिज्ञावाक्यं दर्शयति– न तावतेति ॥ कामचाराणामपि ज्ञानिनां मुक्तियोग्यताऽस्तीत्येतावतेत्यर्थः। तत्त्वजिज्ञासूनां ज्ञानाधिकारे मन्तव्य इति शेषः। सूत्रे हिशब्दो हेत्वर्थ इति ज्ञापनाय श्रुतेरिति पञ्चमीप्रयोगः। श्रुतेरित्यस्य न साक्षात् किन्तु ऊर्ध्वरेतस्त्वादिगुणवत्स्वेव ज्ञानोपदेशविधानादित्यध्याहृतहेतुद्वारा नेत्यनेनान्वयः। अनेन 'हि' यतः 'शब्दे' 'य इमम्' इति श्रुतौ 'ऊर्ध्वरेतस्सु च' गुरुकुलवासब्रह्मचर्यापरपर्यायोर्ध्वरेतस्त्वादिगुणवत्स्वेव ज्ञानोपदेशो विहितो न कामचारिष्वतो न तेषां मानाधिकार इति सूत्रार्थ उक्तो भवति। यः 'इमं' प्रकृतं 'गुह्यं' गोप्यं 'परमं' विष्णुमूर्ध्वरेतस्त्वादिगुणवत्स्वेव 'भाषयेत्' उपदिशेत् 'तथा' तद्वत् 'भूयान्' श्रेष्ठो नास्ति 'यं' उपदेशकं प्राप्यस्थिताः। शिष्यभावेनेति शेषः। कैमुत्यद्योतकोऽपिः 'अन्ये' शिष्या अपि 'भूयसो' भूयांसः श्रेष्ठा भवन्तीति श्रुत्यर्थः। यद्यप्यस्यां श्रुतावूर्ध्वरेतस्त्वादिगुणरहितानां कामचारणामुपदेश्यत्वाभावोक्तिमुखेन परोक्षज्ञानाधिकाराभाव एव अवगम्यते न त्वपरोक्षज्ञाने तदभावः। तथाऽप्यपरोक्षज्ञानस्य परोक्षज्ञानपूर्वकत्वात्परोक्षज्ञानाधिकारभावे सुतरामपरेक्षज्ञानाधिकारभावः सिद्ध्यतीति भावः।

सू— ॐ ॥ परामर्शं जैमिनिरचोदना चापवदति हि ॥ ॐ ॥ १८ ॥

'प्रातरुत्थाय सन्ध्यामुपासीत यत्सन्ध्यामुपासते ब्रह्मैव तदुपासतेऽथ देवान्नमेज्जुहुयाद्वेदानावर्तयीत नान्यत्किञ्चिदाचरेन्न सुरां पिवेन्न पलाण्डुं भक्षयीत न भृशं वदेन्न विस्मरेदात्मानं सोमं पिवेद्धुतशेषेण वर्तयेत्' इत्युक्ताचार-

परामर्शेन विधिबन्धवर्जितत्वेन कामत एव तस्य चरणं कामचार इति जैमिनिर्मन्यते ।

एवं 'केन स्यात्' इत्यस्य यथेष्टाचारविधित्वमनङ्गीकृत्य स्तुत्यनुमतिरूपार्थावुक्तौ । यथेष्टाचारविधित्वानङ्गीकारेणैव यज्जैमिनिनाऽर्थान्तरमुक्तं. तत्प्रतिपादयत्सूत्रमुपन्यस्यति– **परामर्शमिति** ॥ अत्र शब्देनेति कामकार इति विपरिणामेनानुवर्तते । तस्येत्युच्यमान इति च शेषः । अवधारणार्थकश्च-शब्दस्तस्येत्यनेन कामशब्देन कामकारपदेन च सम्बध्यते इत्याशयेन सूत्रं व्याचष्टे- **प्रातरिति** ॥ प्रातरित्यतः प्राक् 'केन स्यात्' इति वाक्ये 'कामचाराः' इति वाक्ये चेत्युपस्कार्यम् । **इत्युक्ताचारेति** । सत्यादिवाक्योक्तसदाचार-परामर्शेनित्यर्थः । न च 'कामचाराः' इत्यस्य प्रातः इत्युक्ताचारपरामर्शित्वेऽपि 'केन स्यात्' इत्यस्य न तत्परामर्शित्वमिति वाच्यम् । उभयोः समानार्थत्वेन तदुपपत्तेः । परामर्शो ग्रहणम् । परामर्शेनित्यनन्तरम् उच्यमान इति शेषः । 'कामतः' स्वेच्छया । एव शब्दस्य पूर्वेणोत्तराभ्यां च सम्बन्धः । **विधिवन्येति** । एवकारव्यावर्त्यार्थकथनम् । 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः' (तै.सं. ६-३-१०) इत्यादिश्रुतेरज्ञस्य तदकरणे प्रत्यवायलक्षणो यो विधिबन्धः तद्वर्जितत्वेनेत्यर्थः । तथा च 'कामचाराः, येन स्यात्' इत्यादिना 'प्रातः' इत्युक्ताचारपरामर्शेन तं परामृश्य 'उच्यमानो' विधीयमानः कामचारः 'तस्य' सदाचारस्यैव सत्कर्मण एव विधिबन्धवर्जितत्वेन कामत एव नियमेनाचरणरूपमेव न तु, निषिद्धस्याप्याचरणमिति योजना । नन्वस्य पक्षस्य मनुष्यविषयत्वात्कथं मनुष्याणां 'विधिनियता मनुष्याः' इत्युक्तिः, विधिबन्धवर्जितत्वविधिनियतत्वयोरेकत्र विरोधादिति चेन्न, विहितानामकरणेऽधःपातहेतुप्रत्यवायाभावाद्विधिबन्ध-वर्जितत्वम्, अकरणे प्रत्यवायमात्रफलह्रासादेर्भावाद्विधिनियतत्वमित्येवं तयोरेकत्राविरोधात् । न च सदाचारस्य स्वेच्छयाऽऽचरणे मनुष्याणां चतुर्मुखसाम्यप्रसङ्ग इति वाच्यम् । सर्वे विधय इच्छायां सत्यां विहितं कार्यमित्येव चतुर्मुखं प्रति

प्रवर्तन्ते, न त्ववश्यं कार्यमित्येव। इतरान् प्रति तु सत्यामसत्यां चेच्छायां विहितं कार्यमेव, अकरणे फलह्रासप्रत्यवायादेः सत्त्वादित्येवं प्रवर्तन्त इति विशेषसत्त्वात्। अनेन जैमिनिपक्षे तत्त्वप्रदीपरीत्या 'येन केन' इत्यस्य येन केन सन्ध्योपास्त्यादिसदाचारेणेत्यर्थः। स्यादिति विधौ लिङ्। तस्य कामतो नियमेन वर्तेतेत्यर्थः। एवं 'कामचाराः कामभक्षाः कामवादाः' इत्यस्य सन्ध्योपास्तिदेवप्रणामाग्निहोत्रहोमादीन् कामत् एव चरन्ति निषिद्धानि नाचरन्तीति कामचाराः। कामत एव सोमादिभक्षणात् सुराद्यभक्षणात्कामभक्षाः। कामत एव वेदानां शब्दतोऽर्थतश्चावर्तनादन्यभाषणवर्जनात् कामवादा इत्यर्थ उक्तो भवति। अनेन - 'कामचाराः' इत्युक्ताचारस्यैवानन्दाभिवृद्ध्यर्थं कामचारः 'कामत एव' स्वेच्छयैव नियमेनाचरणमेव पर्यवस्यति, न तु निषिद्धप्रवृत्तेरपि, न वा विधिबन्धेन, न वा सत्कर्ममध्ये कस्यचिदनाचरणम्। न चात्राचारानुक्तिदोषः। यतोऽयं शब्दस्तस्यैव 'प्रातरुत्थाय' इत्यादिश्रुतिस्मृत्युक्ताचारस्यैव सत्कर्मण एव 'परामर्शी' येन केनेति सर्वनाम्ना आचारादिपदेन च ग्रहणं विदधाति, न निषिद्धस्यापीति जैमिनिः मन्यत इति सूत्रखण्डार्थ उक्तो भवति। श्रुतावुत्थायेत्यनन्तरं शौचदन्तधावनस्नानादिकं कृत्वेत्यपि ग्राह्यम्। सन्ध्याशब्दार्थमाह- **ब्रह्मैवेति**॥ सन्ध्यामुपासते जना इति यत् 'तद्ब्रह्मैव' एतद्विषयो ब्रह्मैवेत्यर्थः। अनेन सन्ध्याकाले सम्यग्ध्येयत्वात् सन्ध्याशब्दवाच्यस्य परब्रह्मणो मन्त्रैरुपस्थानमेव सन्ध्योपास्तिरित्युक्तं भवति। 'देवान्' प्राच्यादिदिगवस्थितान् ब्रह्मेन्द्रादीन् 'नमेत्' प्रणमेत्। 'जुहुयात्' अग्निहोत्रहोमादीन् कुर्यात्। 'वेदानावर्तयीत' शब्दतोऽर्थतश्चाभ्यसेदित्यर्थः। अन्यत् 'निषिद्धम्। तदेव विवृणोति– **न सुरामित्यादिना**। 'पलाण्डुं' लशुनम्। 'न भृशं वदेत्' न निष्ठुरं वदेत् 'आत्मानं' परमात्मानं 'सोमं' सोमरसम्। हुतशेषेण वर्तयेदिति। पुनः पुनः होमानुष्ठानेन तच्छेषं तदा तदा भक्षयेदित्यर्थः। अत्र न भृशं वदेदित्यादिकं सर्ववर्णाश्रमिसाधारणम्। सन्ध्योपासनादिकं तु त्रैवर्णिकानामेव। अग्निहोत्रादिकं तु गृहस्थानामेवासाधारणमिति विवेकः प्रमेयदीपोक्तोऽनुसन्धेयः।

न च निषिद्धं कर्म कर्तव्यमेवेति चोदना । 'ब्राह्मणो न हन्तव्यः' इत्याद्यपवादश्च ॥ १८ ॥

ननु किमर्थं सत्प्रवृत्तावेव कामचरणं नियमेनात्रोक्तमित्युच्यते, निषिद्ध-प्रवृत्तिरप्यत्रोक्ता किं न स्यादित्याशङ्क्य किं निषिद्धं ज्ञानिनां कर्तव्यमिति स्फुटं विधिसद्भावेदेतदुच्यते ? उत निषेधाभावाद्वेति विकल्प्याद्योत्तरत्वेन नञः प्रसज्यप्रतिषेधार्थत्वमभिप्रेत्य- अचोदनेत्यंशं व्याचष्टे- **न चेति** ॥ चस्त्वर्थः । चोदना विधिः । द्वितीयोत्तरत्वेन- **अपवादेति** ॥ हीत्यंशं योजयति **ब्राह्मण इति** । अपवादो निषेधः । चस्समुच्चये । सूत्रस्थस्यैवायमनुवादः । न चायं निषेधोऽज्ञानिमात्रविषय इति वाच्यम् । सामान्यरूपत्वेन ज्ञानिष्वपि प्रवृत्तेः । अपवादश्चेत्यनन्तरमस्ति यत इति शेषः । अस्यातो न निषिद्धप्रवृत्तिविषयोऽयं कामचार इति जैमिनिर्मन्यत इत्यध्याहृतसाध्येनान्वयः । अनेन 'हि' यतः 'हि' प्रसिद्धा निषिद्धं कर्तव्यमेवेति स्पष्टचोदनाविधिर्नास्ति । प्रत्युत 'हि' प्रसिद्धा 'ब्राह्मणः' इति श्रुतिः ब्रह्महननादि निषिद्धं कर्म 'अपवदति' न कार्यमिति निषेधति च, अतः सदाचारस्यैव 'कामचारः, येन स्यात्' इति कामाचार उक्तः, न तु निषिद्धस्यापीति जैमिनिर्मन्यत इति सूत्रखण्डार्थ उक्तो भवति ।

सू— ॐ ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ ॐ ॥१९॥

अनुष्ठेयानां मध्य एव कामतश्चरणं कामतो निवृत्तिरिति बादरायणो मन्यते । 'केन स्याद्येन स्यात्तेनेदृश एव' (बृ. ५. ५.१) इति साम्यश्रुतेः ।

एवं 'येन स्यात्' इति वाक्यस्य जैमिनिमतानुसारेण स्वेच्छया सदाचार-श्रुत्यर्थतया प्रतिपादयत्सूत्रं पठति- **अनुष्ठेयमिति** ॥ अत्रानुष्ठेयमित्येतद्वि-भक्तिविपरिणामेन व्याचष्टे- **अनुष्ठेयानामिति** ॥ अनुष्ठेयत्वेन विहितकर्मणा-मित्यर्थः । यद्वा- अनुष्ठेयमपेक्ष्येत्यन्वयम्, अनुष्ठेयं कर्मचरणाचरण-

वत्त्वेनात्रोच्यत इति वाऽन्वयमुपेत्य तत्तात्पर्यमाह- **अनुष्ठेयानामिति** ॥ निधारणषष्ठीत्वाभिप्रायेण मध्य इत्युक्तं, न तु सर्वकर्मणामित्येवकारार्थः । सूत्रे कामचार इत्यनुवर्तत इत्याशयेन तत्पदं व्याख्याति- **कामत इति** ॥ इच्छ-येत्यर्थः । केषाञ्चिदिति शेषः । 'चरणं' करणं 'निवृत्तिः' अकरणम् । निवृत्तिरित्यनन्तरमित्यनुज्ञानमेव कामचारश्रुत्यर्थ इति शेषः । अनेन सूत्रे अनुमतिरिति पदस्यानुवृत्तिस्सूचिता । इति मन्यते इति शेषोक्तिः । एवं साध्यपदं व्याख्याय कुत इत्यतस्तत्र हेतुतया साम्यश्रुतेरित्यंशं व्याचष्टे - **केन स्यादिति** ॥ तथा चास्मिन् पक्षे ज्ञानी यदि 'येन केनचित्' किञ्चिद्धिहि-तानुष्ठानेन अननुष्ठानेन वा 'स्यात्' वर्तेत तदा 'ईदृश एव' सम एव, न तु तस्मिन् किञ्चिद्धिताकरणनिमित्तसाम्यासम्भवो वाच्य इति श्रुत्यर्थः । लिङस्तु आमन्त्रणमर्थ इति भावः । यद्यपि सर्वसदाचारपक्षेऽपि साम्यमस्त्येवेत्य-प्रयोजकता हेतोः । तथाऽपि जैमिनिपक्षे ज्ञानिनः सर्वसदाचारसद्भावात् साम्यसम्भावनैव ज्ञाप्यते, न तु बादरायणपक्ष इव साम्यासम्भवप्रसक्तिपूर्विका तन्निवृत्तिः । असम्भवनिवृत्तिरेव चेह श्रुतिज्ञाप्यतया ग्राह्या, न तु सम्भवः, सम्भवज्ञापनादप्यसम्भवनिवृत्तेर्ज्यायस्त्वात्, अतो नोक्तदोष इति भावः । अनेन– 'अनुष्ठेयम्' अनुष्ठेयानां मध्ये कामचारो यस्मिन् करवाणीति कामस्तस्य चरणं यस्मिन्न करवाणीति कामस्तस्यानाचरणमित्येवमनुष्ठेये कामचारानुमतिरेव शब्दे 'येन केन स्यात्' इति श्रुतावुच्यते, न तु सर्वेषां कामचारः । यद्वा– 'अनुष्ठेयं' चरणाचरणवत्त्वेनात्र श्रुतावुच्यत इति बादरायणो मन्यते । कुतो ? ज्ञानिनः करणाकरणयोः 'येन स्यात्' इति साम्यश्रुतेरिति सूत्रार्थ उक्तो भवति ।

'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥' (गी. ३-१७)
इति भगवद्वचनाच्च ॥ १९ ॥

सत्यमस्मिन् पक्षे साम्योक्तिः सम्यक्सम्बध्यत इति। तथापि तत्र युज्यते, कर्तव्यपरित्यागे साम्यायोगात्। अतो मुख्यासम्भवेऽमुख्याऽपि जैमिन्युक्तयोजनैव साध्वीत्यतः सूत्रेऽनुवृत्तचशब्दसमुच्चितगीतास्मृतिं दर्शयति– **यस्त्विति** ॥ इति वचनादिति। इति ज्ञानिनां कार्याभावोक्तेरित्यर्थः। अस्य न साम्यायोग इत्यध्याहृतसाध्येनान्वयः। 'आत्मरतिः' परमात्मदर्शननिमित्तसुखं प्राप्तः 'आत्मतृप्तः' आत्मना परमात्मना तत्प्रसादेन तृप्तः अन्यत्र विषयसुखेऽलम्बुद्धिमान्। न केवलं हरिप्रसादेन तृप्तिः, किन्तु हेत्वन्तरमस्तीत्याह– **आत्मनीति** ॥ परमात्मनि सन्तोषवान् तत्स्थ एव सन् सन्तुष्टः परमात्मदर्शनादिनिमित्तसुखवानित्यर्थः। 'सन्तोषः तृप्तिकारणं सुखम्' इत्यभिधानात् महासुखवतोऽल्पसुखेऽलम्बुद्धिर्भवत्येवेति तस्य तद्धेतुत्वोपपत्तिः। अत्र पूर्वविशेषणमेव पुनस्तृप्तिकारणत्वेनानूद्यत इति न पुनरुक्तिः। य एवंभूतो 'मानवो' ज्ञानी 'तस्य कार्यं' अवश्यं कर्तव्यं कर्म न विद्यत इत्यर्थः। यद्यपि 'यस्तु' इति वचनं तात्पर्यनिर्णये मुक्तपरतया भाष्ये समाधिस्थपरतया व्याकृतम्, तथापि समाधिस्थस्यापि ज्ञानित्वाद्वा ज्ञानिसामान्यपरत्वस्यापि सम्भवाद्वाऽत्रोदाहरणोपपत्तिः। न चास्य वाक्यस्य

'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः।
एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत् ॥' (ब्र.सू.भा. ३.४.३०)

इति हरिवंशे कार्योक्तिविरोधः शङ्क्यः। तेषां विहिताकरणे एष्यदर्थालाभात् तदर्थं कार्यत्वस्य तत्रोक्तावपि सिद्धहान्यभावेन नरकाद्यभावेन च कार्यं न विद्यत इत्युक्तिसम्भवात्।

सू— ॐ ॥ विधिर्वा धारणवत् ॥ ॐ ॥ २० ॥

'केन स्याद्येन स्यात्' (बृ.५-५-१) इति विधिर्वा। यथा वेदधारणं त्रैवर्णिकानां विहितं नान्येषाम्। एवं

स्वमतानुसारिणी प्रवृत्तिर्ज्ञानिनां विहिता । न तत्राधर्मशङ्का कार्या । नान्येषामिति वा ।

एवं 'केन स्यात्' इति वाक्यस्य यथेष्टाचारविधित्वाभावमभ्युपेत्य नियमेन सर्वसदाचारविधित्वमनुष्ठेयानां मध्ये कामचाराभ्यनुज्ञानमित्यर्थद्वयं स्तुत्यनुमतिरूपार्थद्वयं चोक्तं, अथायं स्वेच्छाचरणविधिर्वा भवतीत्यर्थप्रतिपादकं सूत्रं पठति- **विधिर्वा धारणवदिति ॥** अत्र विधिरित्यंशं व्याचष्टे- **केन स्यादिति ॥ विधिरिति ॥** यथेष्टाचरणविधिरित्यर्थः । वाशब्दोऽस्य पक्षान्तरत्वद्योतकः । ननु ज्ञानिनां न स्वेच्छाचरणविधिर्युक्तः, अमानिनामपि तथात्वप्रसङ्गादित्याशङ्क्योत्तरत्वेन प्रथमान्ताद्वतिमाश्रित्य धारणवदित्यंशं व्याचष्टे- **यथेति ॥** 'वेदधारणं' वेदाध्ययनम् अधीतवेदस्यापि स्मृत्यर्थं पुनः पुनः पाठो वा । अत एव तत्त्वप्रदीपे वेदपाठादिकमित्युक्तम् । 'त्रैवर्णिकानां' ब्रह्मक्षत्रियवैश्यानां सावधारणमेतत् 'विहितं' 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २-१५-१) 'वेदः कृत्स्नोऽधिगन्तव्यः' इत्यादिनेति शेषः । 'अन्येषां' शूद्रादीनाम् । प्रत्युत तेषामध्ययनादौ सति दण्ड एव श्रुत सति भावः । उक्तमर्थं दार्ष्टान्तिके संयोजयति- **एवमिति ॥ स्वमतानुसारिणीति ॥** स्वेच्छानुसारिणी प्रवृत्तिः ज्ञानिनामेव विहिता, नान्येषामित्यन्वयः । इति वेति न पक्षान्तरोक्तिः, किन्तु विधिर्वेत्युक्तस्यैव दृष्टान्तविवरणपूर्वं दार्ष्टान्तिकोपपादनव्याजेन विवरणमिति ध्येयम् । ननु नायं यथेष्टाचारविधिः सम्भवति, तथासति ज्ञानिनोऽधर्मकरणस्यापि विधिविषयत्वप्राप्त्याऽचोदनेत्युक्तविरोधः स्यादित्यत आह-**न तत्रेति ॥** 'तत्र' ज्ञानिप्रवृत्तिविषये 'अधर्मशङ्का' अधर्मत्वशङ्का' न कार्येत्यर्थः ॥

'स्वेच्छयैव प्रवृत्तिस्तु ब्रह्मणो विधिचोदिता ।
नाशङ्क्यं तन्मतं क्वापि विष्णोः प्रत्यक्षचोदना ॥
इतरेषां न विहिता स्वेच्छावृत्तिः कथञ्चन ॥'

इति ब्राह्मे ॥ २० ॥

कुत इत्यत आह- **स्वेच्छयेति** ॥ 'ब्रह्मणो' विधातुः 'विधिचोदिता' 'येन स्यात्' इति विधिविहितेत्यर्थः । यत इति शेषः । अतः 'तन्मतं' तस्य विरिञ्च-स्याभिप्रेतं वेदाविरुद्धत्वेन प्रतीतमपि पुत्रिकाकामनादि अधर्मत्वेन नाशङ्क्य-मित्यर्थः । हेत्वन्तरमाह- **विष्णोरिति** ॥ यतो विष्णोरेवं कुर्विति 'प्रत्यक्ष-चोदना' प्रेरणा विरिञ्चस्यास्त्यतोऽपि तन्मतं नाशङ्क्यमित्यर्थः । वेदस्तु विष्णोः परोक्षाज्ञारूप इति प्रत्यक्षाज्ञानुसारेण नेतव्य इति भावः । अत्र ब्रह्मण इत्युक्तेऽपि उपलक्षणया ज्ञानिनामित्यर्थो ज्ञातव्यः । अत एव स्ववाक्ये ज्ञानिनां विहितेत्युक्तम् । अन्यथा अत्रैव स्मृतौ ब्रह्मणस्स्वेच्छाचारविधिः मनुष्याणां स्वेच्छाचारेऽचोदनेति विषयव्यवस्थायां पारिप्लवार्था इति वक्ष्यमाणविषय-विभागो व्यर्थः स्यात् । तत्त्वप्रदीपे तु द्वितीयवाशब्दात् ज्ञानिनामपि केषाञ्चिदेवेति सूचितम् । विषयभेदं प्रकटयति- **स्वेच्छयैवेत्यादिनेति** । अनेनात्रैव विषयविभागः क्रियत इत्युक्तम् । तत्तु वक्ष्यमाणरीत्या वस्तु-स्थित्यभिप्रायकमेवेति ध्येयम् ।

सू— ॐ ॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ ॐ ॥ २१ ॥

स्तुतिमात्रमेव स्वेच्छाचरणं न विधिः । तैरपि सामान्य-विधिस्वीकारादिति चेन्न, अपूर्वत्वात् परवशत्वात् । सर्वविध्यतिक्रमेण स्तुतिमात्रविषयत्वं परब्रह्मण एव हि ।

उक्तमाक्षिप्य समादधत्सूत्रं पठति- **स्तुतीति** ॥ अत्राक्षेपांशं व्याचष्टे- **स्तुतीति** ॥ 'स्वेच्छाचरणं' 'येन स्यात्' इति स्वेच्छाचरणवचनं 'स्तुतिमात्रं' ज्ञानिनां स्तुतय इति पूर्वोक्तस्तुतिरेवेत्यर्थः । मात्रशब्दार्थमाह- **एवेति** ॥ तद्व्यावर्त्यमाह- **एवेति** ॥ तद्व्यावर्त्यमाह- **नेति** ॥ 'तैः' ज्ञानिभिः । कुत इत्यत उपादानादित्येतत्सम्बन्धिप्रदर्शनपूर्वकं व्याचष्टे- **सामान्येति** ॥

'सन्ध्यामुपासीत' इत्यादि सर्वजनसाधारणविधिस्वीकारादित्यर्थः। तत्त्वप्रदीपे तु ज्ञानदानादिसामान्यविधिस्वीकारादित्यर्थ उक्तः। स्वेच्छाचरणविधौ तदयोगादिति भावः। परिहारांशं व्याचष्टे- **नेति** ॥ ज्ञानिनां स्वेच्छाचरणविधिर्मास्तु, किन्तु स्तुतिमात्रमेतदिति न युक्तमित्यर्थः। कुतो नेत्यतस्तत्र तथा सति ज्ञानिनां सर्वविध्यतिक्रमेण स्तुतिमात्रविषयत्वं स्यादित्युत्तरवाक्यमावृत्त्या योजनीयम्। अथ न च तद्युक्तमिति नेत्यंश आवृत्त्या योज्यः। कुत इत्यतस्तत्र हेतुत्वेन - अपूर्वत्वादित्यंशो योज्यः। तस्य व्याख्यानम्- **परवशत्वादिति** ॥ परब्रह्माधीनत्वादित्यर्थः। न ह्ययं विरिञ्चः पूर्वमनादिब्रह्म भवति, किन्तु तस्य परब्रह्मणो वशग इति तत्त्वप्रदीपोक्तेः। अत्रानादिभिन्नत्वमपूर्वशब्दार्थः। तदधीनत्वं तु न्याय-सिद्धार्थः। अनादिभिन्नस्य कस्माच्चिदुत्पत्तेरावश्यकत्वेन तस्य तदधीनत्वात्। परमात्माधीनत्वेऽपि सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयं ज्ञानिनां किं न स्यादित्यत आह- **सर्वेति** ॥ 'हि' यस्मात्' सर्वविध्यतिक्रमेण' सर्वविधिनिषेधागोचरत्वेन विधिविषयत्वं विना स्तुतिमात्रविषत्वं परब्रह्मण एव, न तु विरिञ्चस्य, तस्मादित्यर्थः।

'विधीनां विषयास्त्वन्ये ब्रह्मणः स्वेच्छया कृतौ।
परस्य ब्रह्मणो ह्येव सर्वविध्यतिदूरता ॥'

इति ब्रह्मतर्के ॥ २१ ॥

ननु ज्ञानिनां सन्ध्योपास्त्यादिसामान्यविधिसद्भावात्स्वेच्छाविध्यभावेऽपि न सर्वविध्यतिदूरत्वमित्याशङ्कां परिहर्तुमुक्तार्थे स्मृतिं चाह- **विधीनामिति** ॥ सर्वविधीनामित्यर्थः। निषेधानामप्युपलक्षणम्। 'अन्ये' अज्ञानिनः। वस्तुतस्तु ब्रह्मेतरज्ञानिनः। अत एव तुशब्दात्तेष्वपि विशेषोऽस्ति, वक्ष्यते च 'विशेषितत्वादिति इति तत्त्वप्रदीपोक्तिः। ब्रह्मण इति ज्ञानिमात्रोपलक्षणम्। हेतुस्तु पूर्वोक्त एव। 'कृतौ' करणे। विधिविषयत्वमिति शेषः। 'हि' यस्मात्। ब्रह्मतर्के उक्तमिति शेषः। अस्य सर्वेत्यादिनाऽन्वयः।

सू— ॐ ॥ भावशब्दाच्च ॥ ॐ ॥ २२ ॥

'यथाविधानमपरे विधिर्भावे प्रजापतेः ।
ब्रह्मणः परमस्यैव सर्वविध्यतिदूरता ॥'
इति च तुरश्रुतौ ॥ २२ ॥

ननु ज्ञानिनां स्वेच्छाचरणविधेः स्फुटप्रमाणासिद्धत्वे भवेत् 'येन स्यात्' इति वाक्यं स्वेच्छाचरणविध्यर्थकं, विधेः स्फुटप्रमाणसिद्धत्वमेव कुत इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य तत्सूचितश्रुतिमेवोदाहरति- **भावेति** ॥ अत्र विधिरित्यनुवर्तते । तथा च इच्छावाचिभावशब्दघटितश्रुतेश्च ज्ञानिनां स्वेच्छाचरणविधिः सिद्ध इति सूत्रार्थः । यतः 'अपरे' ब्रह्मेतरज्ञानिनः वस्तुतस्तु मनुष्यज्ञानिनो 'यथाविधानं' नित्यनैमित्तिकविधिमनतिक्रम्य वर्तन्त च 'भावे' इच्छायां स्वेच्छाचरणविषये 'विधिः' येन स्यादित्यादिरूपोऽस्त्यथ परमस्य ब्रह्मणो हरेरेव सर्वविध्यतिदूरता ज्ञातव्या । मुक्तव्यावृत्त्यर्थम्– **अतीति** ॥ सर्वदेवेत्यर्थः । रमाऽपि हर्याज्ञाविधिविषयेति न तत्राप्यतिप्रसक्तिरिति भावः । श्रुतौ चेत्यन्वयः । ज्ञानिनां स्वेच्छाचरणविधिरुक्त इति शेषः । सूत्रे भाष्ये च न केवलं स्वेच्छाचरणविधिविषयत्वं सामान्यविध्यविषयाणां ज्ञानिनां सर्वविध्यतिदूरपरवशत्वान्यथाऽनुपपत्त्या, किन्तु श्रुतेश्चेति समुच्चये चशब्दः ।

सू— ॐ ॥ पारिप्लवार्था इति चेन्न
विशेषितत्वात् ॥ ॐ ॥ २३ ॥

'केन स्याद्येन स्यात्' (बृ. ५-५-१) इत्यादयः स्थिरत्वनिवृत्त्यर्था इति चेन्न, 'त्रेधा हि ज्ञानिनो ह वाव भवन्ति विधिनियता अनियताः स्वेच्छानियता इति । विधिनियता मनुष्या अनियता हि देवा ब्रह्मैव स्वेच्छानियत इति' गौपवनश्रुतौ विशेषितत्वात् ॥ २३ ॥

उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्यति- **पारिप्लवार्था इति** ॥ अत्र पूर्वपक्षांशे पारिप्लवार्था इत्यस्य विशेष्यं दर्शयति - **केनेति** ॥ इत्यादयो व्यपदेशा इति शेषः । पारिप्लवार्था इत्यस्य प्लु गताविति धातुः परिप्लवोऽव्यवस्था तत्सम्बन्धिनः पारिप्लवाः अव्यवस्थिताः ते च तेऽर्था इति विग्रहमभिप्रेत्य तत्पदं व्याख्याति- **स्थिरत्वेति** ॥ स्थिरत्वस्य निवृत्तिरभावोऽस्थिरत्वं तद्येषां ते स्थिरत्वनिवृत्तयः अस्थिरा इति यावत् । तेऽर्था येषां ते तथोक्ताः चञ्चलार्थका इत्यर्थः । अर्थचाञ्चल्यं च बुद्धिकृतमेवेति ध्येयम् । आदिपदेन '**कामचाराः**' इत्यादेर्ग्रहणम् । अयमाशयः- '**स ब्राह्मणः**' इति वाक्यं तावत्सर्वज्ञानिसाधारणमतो मनुष्यादिषु सर्वेषु स्तुतये भवतीति तत्त्वप्रदीपोक्तेः स्तुतिपक्षस्य ज्ञानिसाधारण्येनाविरुद्धत्वेऽपि नियमेन सर्वधर्माचरणानुष्ठेयानां मध्ये कामचारानुज्ञानस्वेच्छाचरणरूपप्रकारत्रयस्य एकधर्म्यगतत्वेन विरुद्धत्वात्तद्व्यपदेशानामपि विरुद्धत्वम् । एवं च यदा विरुद्धधर्मप्रतिपादकानेकवाक्यानामेव न यथाभूतार्थबोधकत्वं तदा सुतरामेकस्य '**येन स्यात्**' इतिवाक्यस्य तदभावो वस्तुनि विकल्पायोगादिति । सूत्रे परिहाराशं व्याचष्टे - **नेति** ॥ उक्तं नेत्यर्थः । कुतो नेत्यतो- **विशेषितत्वादित्युक्तम्** ॥ तस्य ज्ञानिनां मनुष्यदेवचतुर्मुखभेदेनानेकप्रकारत्वादित्यर्थमुपेत्य तस्यासिद्धिपरिहाराय श्रुतिपरतयाऽपि तमंशं व्याचष्टे- **त्रेधा हीति** ॥ **विशेषितत्वादिति** ॥ विशेषितत्वोक्तेरित्यर्थः । नासिद्धिरिति वाक्यशेषः । श्रुतौ '**हिः**' प्रसिद्धौ । **वावेत्यवधारणे** । त्रैविध्यमेव दर्शयति- **विधिनियता इति** ॥ विधिबन्धवर्जितत्वेन कामत एव नियमेन विहिताचरणवन्त इत्यर्थः । '**अनियताः**' अनुष्ठेयानां मध्ये कामचारानुज्ञावन्तः '**स्वेच्छानियताः**' स्वेच्छाचरणविधिनियता इत्यर्थः । इति त्रेधेत्यन्वयः । त्रीन् क्रमेण निर्दिशति- **विधीति** ॥

सू— ॐ ॥ तथा चैकवाक्योपबन्धात् ॥ ॐ ॥ २४ ॥

एवं सति विधिवाक्यानां स्वेच्छावृत्तिवाक्यानां च सम्बन्धो भवति ॥ २४ ॥

ननु ज्ञानिनामनेकप्रकारत्वोक्त्या कथं विरोधपरिहारो जात इत्याशङ्का-परिहाराय सूत्रम्- **तथाचेति** ॥ अत्रैकवाक्येति भावप्रधानो निर्देशः। समग्रसूत्रस्य चावृत्तिरित्याशयेन सूत्रं व्याचष्टे- **एवं सतीति** ॥ तथाचेत्यस्य व्याख्यानमेतत्। एवञ्चावर्तते। सम्बन्धो भवतीति चावर्तते। वृत्तिर्वर्तनं चरणम्। एकवाक्यतयेति शेषः। तथा च **'एवं सति'** ज्ञानिनां त्रैविध्ये सिद्धे **'विधिवाक्यानां'** 'प्रातरुत्थाय' इत्यादिसर्वसदाचारविधिवाक्यानां 'यस्त्वात्मरतिः' इति स्वेच्छावृत्त्यनुज्ञावाक्यानां तथा 'यथाविधानम्' इति स्वेच्छावृत्तिविधिवाक्यानां चैकवाक्यतया **'सम्बन्धः'** अविरोधो भवति। एवं सति 'केन स्यात्' इति वाक्यस्यापि तदनुसारेणार्थत्रयेऽप्येकवाक्यतया सम्बन्धो भवतीति योजना। अनेन- **'तथा चैवं'** सति ज्ञानिनां त्रैविध्ये सिद्धे सति, **'एकवाक्योपबन्धात्'** विधिवाक्यानां च स्वेच्छावृत्तिवाक्यानां चैकवाक्यत्वेन ज्ञानिभेदमाश्रित्याविरोधे सति 'केन स्यात्' इति वाक्यस्यापि तदनुसारेणार्थत्रयेऽप्येकवाक्यतया 'उपबन्धात्' उपपन्नत्वात् न 'केन स्यात्' इत्यादिव्यपदेशाः पारिप्लवार्थाः इति सूत्रार्थ उक्तो भवति। अनेन जैमिनिमतं मानुषज्ञानिविषयम्। द्वितीयं देवताविषयम्। तृतीयं हिरण्यगर्भविषयम्। स्तुतिपक्षस्तु समान इत्युक्तं भवति। ननु न देवाः सामान्यविधिविषयाः। नापि चतुर्मुखवत्स्वेच्छाचारविधिविषयाः, उदाहृतवचनात्। एवं च स्तुतिपक्षस्य ज्ञानिमात्रसाधारणत्वेन देवानां किञ्चिद्विध्यविषयाणां परमात्मवत्सर्वविध्यतिक्रमेण स्तुतिविषयत्वं स्यात्। ततश्च परमात्मन एव तदित्युक्तमयुक्तमिति चेन्न। देवानां चतुर्मुखवत्सर्वात्मना स्वेच्छाचारविधिविषयत्वाभावेऽपि प्रायः स्वेच्छाचरणविधिसद्भावात्। न चात्र मानाभावः।

'स्वेच्छानुवृत्त्यैव भवेद्ब्रह्मणः प्रायशस्तथा।
देवानामपि सर्वेषां विशेषादुत्तरोत्तरम्॥' (ब्र.सू.भा. ३.४.२५)

इति वचनात्। किञ्च, विध्यभावेऽपि देवानामनुज्ञाविषयत्वाभ्युपगमेन स्तुतिमात्रविषयत्वाभावान्नेश्वरसाम्यमिति ज्ञातव्यम्।

सू — ॐ ॥ अत एव चाग्नीन्धनाद्यनपेक्षा ॥ ॐ ॥ २५ ॥

अत एव ज्ञानस्य मोक्षदाने नाग्निहोत्रापेक्षा ।

एवं ज्ञानिनः 'केन स्यात्' इति श्रुतिबलेन सदसत्प्रवृत्त्योर्योऽविशेषः शङ्कितः स श्रुतेरर्थान्तरोक्त्या 'परामर्शम्' इत्यादिना परिहृतः । तत्र यदुक्तं ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषे ज्ञानस्यासत्प्रवृत्तिकुण्ठितशक्तेर्न मोक्षसाधनत्वमिति, तत् 'कामकारेण चैके' इत्यादिना परिहृतम् । यच्चाभिहितं मोक्षसाधनत्वे ज्ञानस्य सत्प्रवृत्तिसापेक्षत्वं स्यादिति तत्परिहाराय सूत्रं पठित्वा व्याचष्टे- **अत एवेति ॥** 'कामचाराः' इति श्रुतौ कामचाराणामपि मोक्षस्योक्तत्वादेवेत्यर्थः । न तत्र हेत्वन्तरं वक्तव्यमित्येवकाराभिप्रायः । सूत्रे अत इत्यावृत्तपदं व्याख्याति- **ज्ञानस्य मोक्षदान इति ॥** मोक्षदानकर्मणीत्यर्थः । मोक्षसाधन इत्यनुक्त्वा मोक्षदान इत्युक्त्या

'अज्ञानां ज्ञानदो विष्णुः ज्ञानिनां मोक्षदश्च सः ।'

(ब्र.सू.अनु. १.१.१ श्लो. ५)

'विष्णुर्हि दाता मोक्षस्य' (म.भा.ता.नि. १.७८)

'मोक्षदस्तु जनार्दनः' ॥ (ब्र.सू.अनु.१.१.१ श्लो.१५)

इत्यादिवचनात् ज्ञातो भगवानेव मोक्षदाता ज्ञानदाता च । ज्ञाने तु उपचरितं दातृत्वमिति सूचितं भवति । **नाग्निहोत्राद्यपेक्षेत्यनेन** अग्नेरिन्धनं समन्त्रकं सन्दीपनं यस्मिन् कर्मणि तदग्निहोत्रं तथोक्तम् । आदिपदेन स्वाश्रमवर्णधर्माः ग्राह्याः, तदपेक्षाभाव इत्येव अग्नीन्धनाद्यनपेक्षेति पदं नञ्व्यत्यासेन व्याख्यातं भवति । सूत्रे चोऽप्यर्थः । ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषसद्भावेऽपीति स्फुटत्वान्न व्याख्यातः । द्वितीयचोद्यपरिहारस्याद्यचोद्यपरिहारेण समुच्चये चशब्द इति केचित् ।

ब्रह्मतर्के च -

'येषां ज्ञानं समुत्पन्नं तेषां मोक्षो विनिश्चितः ।
शुभकर्मभिराधिक्यं विपरीतैर्विपर्ययः ॥

स्वेच्छानुवृत्त्यैव भवेद्ब्रह्मणः प्रायशस्तथा ।
देवानामपि सर्वेषां विशेषादुत्तरोत्तरम् ॥'

इति ॥ २५ ॥

ननु यदि सत्कर्मणा न मोक्षो निषिद्धकर्मणा न तत्प्रतिबन्धः कथं तर्हि ताभ्यां ज्ञानिनो विशेष इत्यतश्चशब्दसूचितस्मृतिमाह- **ब्रह्मतर्के चेति** ॥ न केवलं सूत्र इति चार्थः । तेषामित्यनन्तरं शुभाशुभकर्मकरणयोरपीति शेषः । अनेन सर्वसाधारणस्तुतिपक्षः सङ्गृहीतः । तर्हि शुभाशुभाभ्यां को विशेष इति तत्राह- **शुभेति** ॥ 'आधिक्यं' मोक्षे मनुष्याणामानन्दवृद्धिः । 'विपरीतैः' अशुभैः 'विपर्ययो' ह्रासो भवेत् । भवेदित्यत्राधिक्यमित्यनुषज्यते । मुक्तावपेक्षितसर्वाधिक्यमित्यर्थः । एवकारेण न तदर्थं श्रुतिविहिताग्निहोत्राद्यपेक्षा नापि लोकदृष्ट्या निषिद्धपुत्रिकाकाम-त्यागाद्यपेक्षाऽस्तीत्युच्यते । सर्वेषां ब्रह्मेतरदेवानामपि उत्तरोत्तरं विशेषादाधिक्येन प्रायशः स्वेच्छानुवृत्त्यैव मुक्तौ कृत्स्नसुखाधिक्यं भवेत् न तदर्थं प्रायः शुभाशुभकरणत्यागापेक्षाऽस्तीत्यर्थः । **इति ब्रह्मतर्के** इत्यन्वयः । उक्तत्वादिति शेषः । अस्य नेत्यनेनान्वयः ।

सू— ॐ ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ ॐ ॥ २६ ॥

सर्वधर्मापेक्षा च ज्ञानस्योत्पत्तौ 'विविदिषन्ति यज्ञेन दाने न तपसाऽनाशकेन' (बृ.६-४-२२) इति श्रुतेः ।

नन्वस्तु ज्ञानिनः सत्प्रवृत्त्या विशेषः । स च मोक्षप्राप्तिरूप एव, नाधिक्यरूपः । न चैवं ज्ञानिनां सुकृतौ कृतावकृतौ च मोक्षश्रुतिविरोधः । तत्प्रवृत्तेः मोक्षहेतुत्वेऽप्यसत्प्रवृत्तेरप्रतिबन्धकत्वेन तदुपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति- **सर्वेति** ॥ अत्र **चो**ऽवधारणे । ज्ञानस्योत्पत्ताविति**अध्याहृतेनान्वेती**त्याशयेन **सर्वापेक्षेत्यं**शं व्याचष्टे- **सर्वेति** ॥ उत्पत्तौचेति सम्बन्धः । चशब्दोऽवधारणार्थः । तादर्थ्ये सप्तमी । ज्ञानस्येत्यावर्तते । न मोक्षदान इत्यादि

पूर्वभाष्यमिहानुवर्तते । धर्मशब्देनाध्यापनशौर्यवार्ताशुश्रूषणादिरूपा वर्णधर्माः गुरुकुलवासाग्निहोत्रपञ्चयज्ञतपउपास्त्यादिरूपा आश्रमधर्माः शमदम-भक्त्यादिरूपाः सामान्यधर्माः श्राद्धादिरूपा नैमित्तिकधर्माश्च तत्त्वप्रदीपोक्ता गृह्यन्ते । तथा च ज्ञानस्य मोक्षदाने नाग्निहोत्रादिसत्प्रवृत्त्यपेक्षा । कुतः ? यतो ज्ञानस्य उत्पत्त्यर्थमेव सर्वधर्मेष्वपेक्षा न तत्फलसाधनत्वेऽपीति योजना । ज्ञानोत्पत्त्यर्थं कुतः सर्वापेक्षाऽवगम्यत इत्यतः प्रवृत्तस्य- यज्ञादिश्रुतेरित्यस्य यज्ञादीनां ज्ञानसाधनत्वश्रुतेरपीत्यर्थमभिप्रेत्य श्रुत्युदाहरणेन तमंशं व्याचष्टे- **विविदिषन्तीति** ॥ बृहदारण्यकश्रुतिरियम् । अत्र '**विविदिषन्ति**' इत्यस्य पूर्वेणान्वयः । अत्र '**अनाशकेन**' अनशनेन । 'यज्ञेन दानेन तपसाऽनाशकेन' इत्यस्य 'एतमेव विदित्वा मुनिर्भवति' इत्युत्तरवाक्येनान्वयः । एतं भगवन्त-मपरोक्षतो ज्ञात्वा मुनिनामको भवतीत्यर्थः । वस्तुतस्तु - विविदिषन्तीत्यारभ्य ग्रहणात् ये ब्राह्मणा विविदिषन्ति ते यज्ञादिना वर्तेरन्नित्यन्वयो बोध्यः । केचित्तु- 'तमेतं वेदानुवचनेन ब्राह्मणाः' इति पूर्वप्रकृता ब्राह्मणाः 'तं' पूर्वोक्तगुणवन्तं 'एतं' परमात्मानं वेदाध्ययनयज्ञादिना 'विविदिषन्ति' ज्ञातुमिच्छन्तीत्युक्तेः अश्वेन जिगमिषन्तीत्यादाविव यज्ञादेः धात्वर्थज्ञान-साधनतैवोक्ता भवतीति प्रकृतसङ्गतिरित्याहुः ।

यथा गतिनिष्पत्त्यर्थमश्वादयोऽपेक्ष्यन्ते न निष्पन्न-गतेर्ग्रामादिप्राप्तौ ॥ २६ ॥

ननु सर्वसत्कर्मणो ज्ञानार्थं अपेक्षितस्यापि मोक्षार्थमपेक्षितत्वं किं न स्यादित्याशङ्कोत्तरत्वेन अश्ववदित्यंशं अश्वस्य गतावपेक्षा यथेत्यर्थकतयोप-लक्षणाभिप्रायेण व्याचष्टे- **यथेति** ॥ गतिः प्रयाणम् । आदिपदाद्व्रजयानादयो गृह्यन्ते । निष्पन्नगतेरिति बहुव्रीहिः । निवृत्तगतेः पुरुषस्येत्यर्थः । **ग्रामादीति** ॥ प्राप्तिस्संयोगः । आदिपदात्पत्तनादिग्रहणम् । गतिसाध्यफल इति शेषः । अपेक्ष्यन्त इत्यनुषङ्गः ।

सू —

ॐ ॥ शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ ॐ ॥ २७ ॥

यद्यपि ज्ञानेनैव मोक्षो नियतः । तथापि ज्ञानी शमदमाद्युपेतः स्यात् ।

ननु यदि सदसत्प्रवृत्तिभ्यां मोक्षतदभावयोरभावः, तर्हि ज्ञानिनस्ताभ्यां विशेषो नास्तीति न तेन सत्कर्म कार्यमसत्कर्म त्याज्यम् । न च ताभ्यां मोक्षे आधिक्यादि भवतीत्युक्तमिति वाच्यम् । 'ज्ञानादेव सर्वे कामाः' (कौण्ठरव्य) इति श्रुतेर्ज्ञानादेव तदुपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति- **शमेति** ॥ अत्र पूर्ववाद्युक्तानुवादपूर्वं तथाऽपीत्यंशं व्याचष्टे- **यद्यपीति** ॥ ज्ञानिन इति शेषः । शमेति साध्यभागं व्याचष्टे- **ज्ञानीति** ॥ 'शमदमाद्युपेतः' शमादिसत्प्रवृत्तियुक्तो निषिद्धहीनश्च स्यादित्यर्थः । यद्यपि शमाद्युपेतः स्यादिति सुवचम् । तथापि श्रुतौ पृथङ्निर्देशात्सर्वत्र साहचर्याच्चोभयोपादानम् ॥

'आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्य शान्तो भवेद् दान्तो भवेदनुकूलो भवेदाचार्यं परिचरेत् परिचरेदाचार्यम्' इति माठरश्रुतौ ज्ञानिनोऽपि तद्विधेः ।

कुत इत्यतस्तद्धेतुत्वेन तद्विधेरित्यंशं व्याचष्टे- **आचार्यादिति** ॥ 'आचार्यात्' तदुपदेशात् 'विद्यां' परोक्षज्ञानं प्राप्य 'एतं' हृद्गतं परमात्मानं 'अभिपश्य' दृष्ट्वा 'शान्तो' भगवन्निष्ठावान् 'दान्तः' इन्द्रियनिग्रहवान् । 'शान्तिस्तु भगवन्निष्ठा दमो ह्यसुविनिग्रहः' इत्यभिधानात् । 'अनुकूलः' सतामिति शेषः । 'परिचरेत्' सेवेत । परिचरेदिति पुनरुक्तिस्तात्पर्यार्था । आचार्यसमं स्वस्माच्छ्रेयांसमाचार्यं बहुमानेन परिचरेदिति वा । 'ये के

चास्मद्विधाः श्रेयांसस्तानुपचरस्व' (पौष्यायण) इति श्रुतेरिति तत्त्वप्रदीपदिशा श्रुत्यर्थः । तन्त्राभिप्रायेणोक्तस्य तदित्यस्यार्थो ज्ञानिनोऽपीति । नियतमोक्षस्यापीत्यपेरर्थः । अपरोक्षज्ञानिन एवेत्यवधारणे वाऽपिशब्दः । तेन श्रुतेः परोक्षज्ञानिपरत्वशङ्का निरस्ता । **तद्विधेरिति** ॥ शमादिविधानादित्यर्थः । उपलक्षणमेतत् । 'न हन्तव्यः' इत्यादिनिषेधाच्चेत्यपि द्रष्टव्यम् । अनेन तस्यां श्रुतौ तस्य ज्ञानिनस्तस्य शमादेर्विधानादिति सूत्रखण्डो व्याख्यातः ॥

'ब्राह्मीं वाव त उपनिषदमब्रूमेति । तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनं यो वा एतामुपनिषदमेवं वेद' (केन.४-७,८,९) इति ज्ञानाङ्गतया तेषामवश्यानुष्ठेयत्वात् ।

ननु ज्ञानादेव संसारदुःखनिवृत्तिवदानन्दातिशयस्यापि सिद्धेर्व्यर्थः शमादिविधिरित्यतः प्रवृत्तं तदङ्गतयेत्याद्यंशमसिद्धिपरिहाराय श्रुत्युदाहरणपूर्वं व्याचष्टे- **ब्राह्मीमिति** ॥ प्रथमेतिशब्दः श्रुतिस्थः । एवं द्वितीयोऽपि । तृतीयो भाष्यकारीयः । **इतीत्यनन्तरं** श्रुत्याऽवगतयेति शेषः । **ज्ञानाङ्गतयेति** ॥ ज्ञानप्रतिष्ठापकत्वेनेत्यर्थः । निमित्तभूतयेति शेषः । तेषां ज्ञानोत्तरकालशमादीनां ज्ञानप्रतिष्ठापकत्वं नाम ज्ञानवृद्ध्यर्थत्वं प्रतिदिनं तत्सम्पादकत्वमिति यावत् । यथोक्तं तत्त्वप्रदीपे- शमादीनां ज्ञानवृद्ध्यर्थमवश्यानुष्ठेयत्वादिति । ज्ञानफलपूर्त्यर्थमित्यर्थः । अनुष्ठेयत्वादित्यस्य न वैयर्थ्यमित्यध्याहृतसाध्येनान्वयः । 'उपनिषदं भो ब्रूहि' इत्युमापतिना ब्रह्माणं प्रति 'भो भगवन्' इति सम्बोध्य पृष्टे सति तत्र किमुपनिषत्प्रतिपाद्यं पृच्छसि ? किं वोपनिषदुत्पन्नविद्याया अवस्थानकारणं ? किं वा विद्याया उत्पत्तिकारणमिति हृदि विकल्प्याद्यस्योत्तरमाह- **ब्राह्मीमिति** ॥ 'ते' तुभ्यं 'ब्राह्मीम्' परब्रह्मविषयां 'वाव' असंशयं 'उपनिषदं' तत्स्वरूपम् 'अब्रूम' इति ब्रह्मोवाचेत्यन्वयः । द्वितीयस्योत्तरमाह- **तस्या इति** ॥ 'तस्यै' तस्या विद्यायाः 'तपः' कृच्छ्रचान्द्रायणादि शास्त्रप्रवचनं वा 'दमः' इन्द्रियनिग्रहः

'कर्म' वर्णाश्रमोचितं 'प्रतिष्ठा' तद्धेतुः । तपआदिमत्सु सर्वविद्या प्रतितिष्ठतीत्यर्थः । तपआदीनां विद्याप्रतिष्ठापकत्वं विद्याऽभिवृद्ध्यर्थत्वम् । तृतीयस्योत्तरमाह- **वेदा इति** ॥ 'वेदाः' ऋगादयः तदनुकूलग्रन्थाश्च शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षड्वेदाङ्गानि 'सत्यं' मीमांसा 'निर्णीयते यतः सम्यगिदं सत्यमिति स्फुटम् ' इति वचनात् । 'आयतनं' उत्पत्तिकारणं तस्यां इत्यनुषङ्गः । एतदुपनिषज्ज्ञानिनः ! फलमाह- **य इति** ॥ 'यः' अधिकारी 'एतां' उपनिषदं 'वेद' सः 'अनन्ते' अपरिच्छिन्ने 'स्वर्गे' स्वरूपसुखज्ञानात्मके 'लोके' प्रकाशमाने 'ज्येये' ज्येष्ठे परे ब्रह्मणि प्रतितिष्ठतीति तलवकारश्रुत्यर्थः । यद्यप्यत्र वेदादिकारणकत्वोक्त्या परोक्षज्ञानमेव प्रतिपाद्यतया भाति । तथापि 'यो वा वेद' इति फलवाक्यपर्यालोचनया परोक्षज्ञानद्वाराऽपरोक्षज्ञानपर्यवसायित्वमस्य वाक्यस्य वक्तव्यमिति नासङ्गतिः । अत एव भाष्ये फलवाक्यपर्यन्तोदाहरणम् । न चास्य सूत्रस्य 'तुल्यं तु दर्शनं, चीर्णे कृते वा' इत्युक्तिविरोधः शङ्क्यः । ज्ञानस्य मोक्षसाधनत्वेऽविशेषस्य तत्रोक्तत्वादिह च ज्ञानवृद्ध्यर्थत्वोक्तेर्विरोधाभावात् ।

'यस्य ज्ञानं तस्य मोक्ष इति नात्र विचारणा ।
तस्य शान्त्यादयोऽङ्गानि तस्मात्तेषामनुष्ठितिः ॥
अवश्यकरणीया स्यादन्यचाऽल्पफलं भवेत् ।'
इत्याग्नेये । तु शब्दः पूर्णफलार्थत्वं सूचयति ॥ २७ ॥

ननु ज्ञानादेव मेक्षसिद्धौ किं प्रतिष्ठयेत्यत आह- **यस्येति** ॥ 'ज्ञानं' ब्रह्मापरोक्षज्ञानं 'तस्य' ज्ञानस्य 'शान्त्यादयः' शमादयः 'अङ्गानि' ज्ञानवृद्ध्यर्थानि ज्ञानेन सम्पूर्णमोक्षसाधने उपयुक्तानि भवन्तीत्यर्थः । 'तस्मात्' अङ्गत्वात् 'अन्यथा' शान्त्याद्यननुष्ठानेऽसत्कर्मानुष्ठाने च इत्यर्थः । 'अल्पफलं' प्राप्तव्यहासो यावदनभिव्यक्तिश्चेत्यर्थः । नन्वेतत् श्रुत्युक्तं प्रमेयं सूत्रे किं नोक्तमित्यत आह- **तुशब्द इति** ॥ शमादेरिति शेषः । 'पूर्णफलार्थत्वं'

फलपूर्तिप्रयोजकत्वम् । उपलक्षणमेतत् । असत्प्रवृत्तेरल्पफलत्वं च सूचयतीत्यपि द्रष्टव्यम् ।

सू—

ॐ ॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ ॐ ॥२८॥

'यदि ह वा अप्येवंविन्निखिलं भक्षयीतैवमेव स भवति' इति सर्वान्नानुमतिः प्राणात्ययविषया । 'न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानम्' (छा.१-१०-४) इति तद्दर्शनात् ॥ २८ ॥

ननु यदि सदसत्प्रवृत्तिभ्यामस्ति ज्ञानिनो विशेषः, तर्हि 'कथमेवंविन्निखिलं भक्षयीत' इति निषिद्धान्नभोजनेऽपि ह्रासाभावोक्तिः सम्भवति । तस्मान्न विशेषः स्यादिति पूर्वोक्तस्य तर्कपराहतिमाशङ्क्य परिहरत् सूत्रं पठति- **सर्वेति** ॥ अत्र चशब्दः शङ्काव्यावर्तकः । तथा च ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषाभ्युपगमे न 'एवंवित्' इति श्रुतिबाधो वाच्य इति प्रतिज्ञासिद्धौ तत्र हेतुत्वेन श्रुतेरन्यविषयत्वोक्तिपरं- सर्वान्नानुमतिश्च प्राणात्यय इत्यंशं व्याचष्टे- **यदीति** ॥ **इतीति** ॥ एवंरूपा शाखान्तरस्था **'सर्वान्नानुमतिः'** निषिद्धानिषिद्धसर्वभक्षणानुज्ञाश्रुतिरित्यर्थः । **प्राणात्ययविषयेति** ॥ यदि प्राणात्ययकाले ज्ञानी निषिद्धं भुञ्जीत, तर्हि न तेन तस्य विशेष इत्येवं प्राणहानिप्रसक्तिकालविषयेत्यर्थः । विषयेत्यनेन सप्तम्यर्थ उक्तः । एवमुक्तप्रकारेण ब्रह्मविद्यदि **'निखिलं'** निषिद्धानिषिद्धरूपं सर्वं भक्षयीत तदाऽपि सः **'एवमेव'** मुक्त एव भवति, न तु ह्रसत इति श्रुत्यर्थः । साधारणश्रुतेः कुतः प्राणात्ययविषयकत्वकल्पनेत्यतः तद्दर्शनादित्यंशं व्याचष्टे- **नवेति** ॥ **इति तद्दर्शनादिति** ॥ इत्येवंरूपाज्जीवनोपयुक्तनिषिद्धभक्षणानुमतितोऽधिकराग-प्राप्तानुपानप्रत्याख्यानरूपलिङ्गप्रतिपादकमुनिवचनादित्यर्थः । अतो ह्रासा-

भावोक्तेरन्यथोपपन्नत्वात् न तद्वलाज्ज्ञानिनः सदसत्प्रवृत्त्योरविशेषः शङ्कनीय इति ज्ञानिनाऽपि निषिद्धं न कार्यमेवेति भावः। अनेन- यतो 'यदि ह वा' इति सर्वान्नानुमतिश्रुतिः प्राणात्ययकालविषया अतो ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषाभ्युपगमे नैतच्छ्रुतिबाधः। कुतः श्रुतेरन्यकालविषयत्वकल्पनं ? **'तद्दर्शनात्'** तत्र श्रुतेः प्राणात्ययविषयत्वे तस्य लिङ्गस्य दर्शनात् **'न वा'** इति तल्लिङ्गप्रतिपादकश्रुतेरिति सूत्रार्थ उक्तो भवति। सूत्रे तल्लिङ्गादित्येव वक्तव्ये दर्शनपर्यन्तधावनमसिद्धिपरिहारार्थमिति ध्येयम्। **'न वा अजीविष्यम्'** इति छन्दोगश्रुतेरयमर्थः - चक्रायणस्यापत्यं चाक्रायणः उषस्तिनामा मुनिरतिवृष्ट्या दौर्भिक्ष्ये सति स्वजायया सह कस्यचित् 'इभ्यस्य' धनिकस्य इभपालकस्य वा ग्रामे उवास। स च तत्र तत्रान्नार्थी अटन् 'कुल्माषान्' मुद्गान् कुत्सित-वनमाषान् वा खादन्तमिभ्यं यदृच्छयोपलभ्य ययाचे। अथेभ्योऽस्मै कुल्माषान् दत्वा अनुपानम्' उच्छिष्टजलपानं कुर्विति मुनिं प्रार्थयामास। एवमिभ्येन प्रार्थितो मुनिरेतदुदकपाने उच्छिष्टं मया पीतं स्यादित्यनूवाच। तत्रेभ्यो बभाषे एतेऽपि कुल्माषा उच्छिष्टाः 'न स्वित्' न किमिति। तत्र मुनिरुवाच। किमिति? यदि 'इमान्' कुल्माषान् 'नाखादं' नाभक्षयं तर्हि 'न वाऽ-जीविष्यं'(न)जीविष्यामि। अतः प्राणात्यये दोषाभावात्ते मया भक्षिताः उदपानं तु 'मे कामो' ममेच्छाधीनं इदानीं वर्तते। वृथोच्छिष्टस्वीकारे दोषप्राप्तेस्तन्न पिबामीति। श्रुतावखादन्निति नञ्पूर्वकशत्रन्तः, अखादन्ना-जीविष्यमित्यन्वयः। लिङर्थं टीकायां लङ् लिङ् चेति ज्ञेयम्।

सू— ॐ ॥ अबाधाच्च ॥ ॐ ॥ २९ ॥

'अन्यायचरणाभावे न हि ज्ञानस्य बाधनम्।
अतो विद्वानपि न्याय्यं वर्तेतोत्कर्षसिद्धये ॥'

इति ब्रह्मतर्के ॥ २९ ॥

ननु ज्ञानिनां निषिद्धाकरणे बाधकसद्भावात् न सदसत्प्रवृत्तिभ्यां विशेषो

युक्त इत्याशङ्कां परिहरत्सूत्रं पठति- **अबाधाच्चेति** ॥ न केवलं निषिद्धकरणे साधकप्रमाणाभावात् ज्ञानिनः सदसत्प्रवृत्त्योरविशेषो न युक्तः, किन्तु निषिद्धाकरणे बाधकाभावाच्चेति सूत्रवृत्तिमभिप्रेत्याबाधादिति हेतोरसिद्धिपरिहाराय सूत्रं स्मृत्यैव व्याचष्टे- **अन्याय्येति** ॥ 'अन्यायाचरणं' निषिद्धानुष्ठानं 'हि' यतः । 'विद्वान्' ज्ञानी न केवलमविद्वानित्यपिशब्दार्थः । निषिद्धं त्यजेदिति भिन्नक्रमेण समुच्चये वाऽपि शब्दः । 'न्याय्यं' योग्यं सत्कर्म 'वर्तेत' अनुवर्तेत । उत्कर्षो मौक्तानन्दातिशयादिरूपः । ब्रह्मतर्के उक्तादिति शेषः । अस्याबाधादित्यनेनान्वयः । निषिद्धकरणे प्रमाणसत्त्वात् ज्ञानिना तत्कर्तव्यमिति पक्षान्तरं त्वसिद्धत्वादयुक्तमित्युक्तं- 'अचोदना' इत्यत्र ।

सू— ॐ ॥ अपि स्मर्यते ॥ ॐ ॥ ३० ॥

'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः ।
एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत्'
(विसर्जयेत्) ॥
इति हरिवंशेषु ॥३०॥

ननु ज्ञानिनो निषिद्धकरणनिषेधकप्रमाणाभावान्न सदसत्प्रवृत्त्योर्विशेषो युक्त इत्याङ्कां परिहरत्सूत्रं पठित्वा सूत्राभिप्रेतस्मृतिमुदाहरति- **अपीति** ॥ वक्ष्यमाणश्रुतिसमुच्चयेऽपिशब्दः । **हरिवंशेष्विति** ॥ स्मर्यतेऽपीत्यपिशब्दान्वयः । यतो निषिद्धाकरणमिति शेषः । अस्यातो नाविशेष इति प्रकृतसाध्यपदेनान्वयः । त्रयो लोकास्त्रैलोक्यं तस्य पापादुद्धरणक्षमः । किमु अनेतादृश इति कैमुत्यमपिशब्दार्थः । श्रुत्युक्तं 'श्रौतं' स्मृत्युक्तं 'स्मार्तं' 'आचारं' तदङ्गकं न विसर्जयेदित्यस्य सत्कर्मकरणं निषिद्धाकरणं च न परित्यजेदित्यर्थः ।

सू— ॐ ॥ शब्दश्चाऽतोऽकामचारे ॥ ॐ ॥ ३१ ॥

'स य एतदेवंविदेवं मन्वान एवं पश्यन्न कामचरितं चरेन्न कामं भक्षयीत न काममनुवर्तेत ।' इति कौण्डिन्यश्रुतौ ।

न केवलं स्मृतिरेव निषेधिका, अपि तु श्रुतिरपीत्याह सूत्रकृत्- **शब्द** इत्यादिना ॥ यतोऽकामचारे न केवलं स्मृतिः, अपि तु 'शब्दश्च' श्रुतिरप्यस्ति अतः । एवमतश्च कामाचारस्याल्पफलत्वाच्च न ज्ञानिनः कामचारो युक्त इत्यतोऽल्पफलत्वाद्योऽयमकामचारस्तत्र शब्दश्चास्तीति वा सूत्रवृत्तिमभिप्रेत्य तत्र शब्दपदोक्तां श्रुतिमुदाहरति- **स इति** ॥ 'यः' अधिकारी 'एतत्' ब्रह्म 'एवं' उक्तगुणवत्त्वेन 'वित्' श्रवणेन विषयीकुर्वन् 'मन्वानः' तद्विषयक-मननध्याने कुर्वन्नथ पश्यन्नास्ते सः 'कामचरितं' कामगमनं 'न चरेत्' न कुर्यात् । यद्वा- कामचरितं यथा भवति तथा 'न चरेत्' न गच्छेदित्यर्थः । 'कामं' यथेच्छं न भक्षयीत 'कमं' निषिद्धरागं सर्वं काम्यं वा नानुसरेदिति श्रुत्यर्थः । श्रुताविति्यस्य अकामचार उक्त इति विपरिणताध्याहृतपदाभ्या-मन्वयः ।

अत इत्यल्पफलत्वं सूचयति ।

'न निषिद्धानि वर्तेत पूर्णज्ञानफलेच्छया ।'

इति पाद्मे ॥ ३१ ॥

ननु निषिद्धकरणे बाधकाभावात्तत्क्रियत इत्यतस्तदुत्तरत्वेनात इत्यंशं व्याख्याति- **अत इति** ॥ अतश्शब्देन निषिद्धकरणसमानाधिकरणज्ञानस्य 'अल्पफलत्वं' तद्धेतुत्वं, यद्वा- निषिद्धकरणस्य 'अल्पफलत्वं' फलह्रास-साधनत्वं 'सूचयति' परामर्शयति सूत्रकृदित्यर्थः । पूर्वं 'तथापि तु' इति तुशब्देन सत्प्रवृत्तेः पूर्णफलकत्वसूचनेन असत्प्रवृत्तेरल्पफलत्वस्यार्थात् आगतत्वात्तस्य इहातश्शब्देन परामर्शो युक्त इति भावः । निषिद्धस्याल्प-फलहेतुत्वमेव कुत इत्यत आह- **नेति** ॥ वर्तेतेत्यावर्तते । तथाच यः **'पूर्ण-ज्ञानफलेच्छया'** पूर्णं यत् ज्ञानफलं तदिच्छया वर्तेत, तदिच्छुः सन् निषिद्धानि

कर्माणि नानुवर्तेतेत्यर्थः । **पाद्म** इति । वचन इति शेषः । अस्याल्पफलत्वमित्यादिनाऽन्वयः ।

सू— ॐ ॥ विहितत्वाच्चाश्रमकर्माऽपि ॥ ॐ ॥ ३२ ॥

न केवलं निषिद्धाकरणेन पूर्यते । कर्तव्यं च वर्णाश्रमविहितं कर्म ।

ननु निषिद्धाचरणे फलह्रासादिबाधकसद्भावादस्तु ज्ञानिनो निषिद्धं वर्ज्यम्, न तु सत्कर्मकरणमावश्यकम् । न चैवं पूर्णफलासिद्धिः । ह्रासकारणाभावे ज्ञानादेव तत्सिद्धेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति **विहितत्वादिति** ॥ अत्र चशब्दः साध्यांशे कर्तव्यमित्यध्याहृतपदेनाऽप्यन्वेतीत्याशयेन तं निषिद्धाकरणसमुच्चयार्थकतया व्याचष्टे- **नेति** ॥ 'पूर्यते' कर्मेति शेषः । पूर्णफलयुक्तो भवति पुरुष इति वा । साध्यांशं व्याचष्टे- **वर्णेति** ॥ वर्णेष्वाश्रमेषु च कर्तव्यतया विहितमित्यर्थः । वर्णेत्यपिशब्दार्थोक्तिः ।

'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन् ।
यदात्मनस्तु नियतमानन्दोत्कर्षमाप्नुयात् ॥'
इति कौषारवश्रुतौ विहितत्वाच्च ।
अपिशब्दो वर्णधर्मसमुच्चयार्थः ॥ ३२ ॥

कुत इत्यतो विहितत्वादिति हेतुं व्याख्याति- **पश्यन्निति** ॥ 'इमं' हृदयादिगतं परमात्मानं पश्यन्नपि, न केवलमपश्यन्नित्यपेरर्थः । 'अविचारयन्' असंशयानः कर्म कुर्यात् । कर्म किमित्यत आह- **यदिति** ॥ 'आत्मनः' कर्तृजीवस्य 'सुनियतं' वर्णाश्रमोचितम् । फलमाह- **आनन्देति** ॥ येनेति शेषः । यद्वा- 'यत्' यस्मादात्मनः 'सुनियतं' योग्यमानन्दोत्कर्षमाप्नुयादित्यर्थः । **विहितत्वाच्चेति** । न केवलमानन्दातिशयार्थत्वादिति चार्थः ।

वक्ष्यमाणसहकारित्वसमुच्चयार्थो वा । सूत्रेऽनुक्तो वर्णधर्मः आश्रमधर्मेण सह किमिति भाष्यत इत्यत आह- **अपिशब्द इति** ॥

सू— ॐ ॥ सहकारित्वेन च ॥ ॐ ॥ ३३ ॥

'यथा राज्ञस्सहकार्येव मन्त्री तथाप्यृते तं क्षितिपः कार्यमृच्छेत् । एवं ज्ञानं कर्म विनाऽपि कार्यं सहायभूतं न विचारः कुतश्चित् ॥' इति कमठश्रुतौ सहकारित्वोक्तेश्च ॥

ननु विहितत्वेऽपि न सत्कर्म ज्ञानिना कार्यं फलाभावात् । न च सम्पूर्णफलार्थं तत्कर्तव्यमिति वाच्यम् । तस्य ह्रासकारणाभावे स्वत एव सिद्धेः अन्यथा ज्ञानकर्मसमुच्चयवादापातादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे- **सहकारित्वेनेति** ॥ सम्पूर्णफलसिद्धौ ज्ञानसहकारित्वेनोक्तेश्च वर्णाश्रमविहितं कर्म कर्तव्यमिति सूत्रार्थः । सूत्रे हेत्वसिद्धिपरिहारायोक्तेरिति शेषः कार्यः, चः साध्यसूचकोऽपीत्याशयेन श्रुत्युदाहरणपूर्वं सूत्रं व्याचष्टे- **यथेति** ॥ यथा यद्यपि 'क्षितिपो' राजा 'तं' मन्त्रिणमृते राज्यकार्यं 'ऋच्छेत्' प्राप्नोति । तथापि राज्ञो मन्त्री सम्पूर्णकार्यसिद्धेः सहकार्येव, 'एवं' तथा यद्यपि ज्ञानं कर्म विनाऽपि मोक्षकार्यं साधयेदिति शेषः । तथापि कर्म सम्पूर्णफलसाधने सहायभूतं फलाधिक्यहेतुत्वात् । नात्र कुतश्चित्कारणात् संशयः कार्य इत्यर्थः । **सहकारीति** ॥ कर्मणः सम्पूर्णफलसिद्धौ ज्ञानसहकारित्वेनोक्तत्वाच्चेत्यर्थः । न केवलं विहितत्वादिति चार्थः । एतेन समुच्चयवादो निरस्तः, विनाऽपि कर्म ज्ञानमात्रेण मोक्षस्वरूपसिद्धेः ।

'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु ।
आनन्दो ह्रसतेऽकार्याच्छुभं कृत्वा तु वर्धते ॥'
इति ब्रह्माण्डे ॥

'एवं ज्ञानं कर्म विनाऽपि' इति श्रुत्युक्तार्थे स्मृतिं चाह- **ज्ञानादिति** ॥ ब्रह्मदर्शनादित्यर्थः । अकार्यं निषिद्धं कर्म । सर्वकार्याकृताबपीत्यपि व्याख्येयम् । ज्ञानिन इति शेषः । 'अकार्यात्' अनापदि निषिद्धकरणात् । 'शुभं' स्वस्ववर्णाश्रमोचितं ज्ञानिमात्रसाधारणं शमादिकर्म च कृत्वा, स्थितस्येति शेषः । वर्धते आनन्दः शुभमिति वा । ब्रह्माण्डे सहकारित्वेनोक्तत्वादित्यन्वयः । एवं ब्रह्मतर्क इत्यस्याऽपि ॥

'सर्वदुःखनिवृत्तिस्तु ज्ञानिनो निश्चितैव हि ।
उपासया कर्मभिश्च भक्त्या चानन्दचित्रता ॥'

इति वृहत्तन्त्रे (ब्रह्मतर्के) ॥

ननु यदि सम्पूर्णानन्दप्राप्तौ कर्म सहकृतं ज्ञानं साधनं, तर्हि समुच्चयवादापत्तिर्दुर्वारा । न च मोक्षस्वरूपमात्रं ज्ञानमात्रसाध्यं, न तत्र कर्माऽपि कारणमिति न समुच्चय इति वाच्यम् । सम्पूर्णानन्दप्राप्तिमन्तरेण मोक्षस्वरूपस्य पृथगभावादित्यत आह- **सर्वेति** ॥ स्वानुबन्धिसर्वदुःखनिवृत्तिरित्यर्थः । उपलक्षणमेतत् । बहुतरानन्दानुभवश्चेत्यपि द्रष्टव्यम् । तथा च सर्वदुःखनिवृत्तिरूपो मोक्षो ज्ञानैकसाध्य इति न दोष इति भावः । 'उपासया' ज्ञानोत्तरकृतब्रह्मोपासनेन 'कर्मभिः' निवृत्तकर्मभिः । **आनन्दचित्रतेति** । आनन्दानुभववैचित्र्यमित्यर्थः । उपलक्षणमेतत् । समग्रानन्दव्यक्तिश्चेत्यपि द्रष्टव्यम् । केचित्तु- आनन्दस्य बहुत्वाद्विचित्रता तारतम्यं क्रमेण आनन्दवृद्धिरित्यर्थ इत्याहुः ॥

'धर्मस्वरूपचित्रत्वाद्यो यो देवमनोगतः ।
स एव धर्मो विज्ञेयो न ह्येते लोकसम्मिताः ॥'

इति च पाद्मे ॥ ३३ ॥

यदुक्तमसत्प्रवृत्त्या आनन्दह्रास इति, न तद्युक्तम् । चतुर्मुखादीनां

पुत्रिकाकामाद्यसत्प्रवृत्त्या ह्रासाभावादित्यत आह- **धर्मेति** ॥ शुभकर्म-स्वरूपाणां विचित्रत्वादित्यर्थः । धर्मवैचित्र्यं तु यो देवादीनां धर्मः स मनुष्याणामधर्मः । योऽन्येषामधर्मः स देवादीनां धर्म इत्यादिरूपमिति ध्येयम् । 'देवमनोगतः' देवमनोवृत्त्या कर्तव्यतया विषयीकृतः, इतरेषामभावात् । तेषामेवायं विशेषः कथमित्यत आह- **न हीति** ॥ 'हि' यस्मात् 'एते' देवाः 'लोकसम्मिताः' इतरजनसदृशा नेत्यर्थः । **पाद्मे इति** ॥ निश्शङ्कं विवक्षितार्थोऽभिहित इति शेषः । इति च ब्रह्मण्ड इत्यारभ्य स्थिताश्चशब्दाः परस्परसमुच्चयार्थाः । **'अबाधाच्च'** इत्यादिसूत्राणा 'अचोदना चापवदति हि, शमदमाद्युपेतः स्यात् तथापि तु तद्विधेः, अत एव 'चाग्नीन्धनादि' इत्यादिवचनैः पौनरुक्त्यपरिहारस्तु 'अबाधाच्च' इत्यादिसूत्राण्युदाहृत्योक्तमेवार्थं प्रमाणान्तरैः प्रचुरतरं प्रपञ्चयतीति तत्त्वप्रदीप एवाभिहितः ।

॥ इति स्तुत्यधिकरणम् ॥ ४ ॥

॥ ५. उभयलिङ्गाधिकरणम् ॥

(श्रवणमननादिषु यत्नवतामपि ज्ञानयोग्यानामेव ज्ञानं जायते)

सू—ॐ ॥ सर्वथाऽपि तु त एवोभयलिङ्गात् ॥ ॐ ॥३४॥

सर्वप्रकारेणोत्साहेऽपि ये ज्ञानयोग्यास्त एव ज्ञानं प्राप्नुवन्ति नान्ये ।

अत्राधिकरणे ब्रह्मज्ञानस्याधिकारिमात्रप्राप्यत्वं वर्ण्यते । वेदानधिकारिणामवैष्णवानामपि वेदप्राप्तिदर्शनात् तद्वदनधिकारिभिरपि महाप्रयत्नेन ज्ञानमाप्तुं शक्यमिति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्यति- **सर्वथाऽपीति** ॥ सूत्रे महाप्रयत्नमात्रमप्रयोजकमिति ज्ञापनाय सर्वथाऽपीत्युक्तमिति भावेन तद् व्याचष्टे- **सर्वेति** ॥ प्रकारः अङ्गम् । उत्साहः प्रयत्नः श्रवणादिरूपः । इत्थंभूतलक्षणे तृतीया । साङ्गश्रवणादिप्रयत्नेऽपीत्यर्थः । अपिः यद्यपि

तथापीत्यर्थे । त इति तच्छब्दपरामर्शनीयं दर्शयति- **य इति** ॥ ज्ञानं प्राप्नुवन्तीति शेषोक्तिः । योग्यता त्वनादिभूता तत्तत्फलप्राप्तिसाधनागन्तुक-प्रयत्नादृष्टातिरिक्ताकारणानागन्तुकस्वभावविशेषाख्या बोध्या । एवकार-व्यावर्त्यमाह - **नेति** ॥ अन्य इत्यनन्तरं प्रत्युत विपरीतज्ञानं तादृशफलं वेति शेषः । तेन सौत्र'तु'शब्दो व्याख्यातः । उक्तं हि तत्त्वप्रदीपे- अयोग्यः उत्साहेनापि न ज्ञानं प्राप्नोति तुशब्दाद्विपर्ययं प्राप्नोति च । अमृतार्थं प्रयतमान इव राहुः शिरच्छेदमिति ।

'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजि-घत्सोऽपिपासः सत्यकामस्सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. ८-७-३) इति श्रुत्या आचार्योप-देशसाम्येऽपि विरोचनोविपरीतज्ञानमाप इन्द्रस्सम्यग्ज्ञान-मित्युभयविधलिङ्गात् ॥ ३४ ॥

एवं साध्यांशं व्याख्याय कुत इत्यतस्तद्धेतुत्वेनोभयलिङ्गादित्यंशं सर्वथाऽ-पीत्यस्यात्राप्यन्वयमभिप्रेत्य व्याचष्टे- **य आत्मेति** ॥ **इति श्रुत्येति** । अभेदे तृतीया । एवंरूपश्रुत्यात्मको योऽयमाचार्योपदेशः चतुर्मुखकर्तृकोपदेशः तस्य इन्द्रविरोचनयोः समत्वेऽपीत्यर्थः । विरोचनो नामासुरः । **विपरीतज्ञानमिति** ॥ चक्षुषि प्रतीयमानप्रतिबिम्ब एव अपहतपाप्मत्वादिलक्षणात्मेति विपरीतज्ञान-मित्यर्थः । सावधारणमेतत् । न तु सम्यग्ज्ञानमित्यवधारणार्थः । इन्द्र इति च सावधारणम् । न तु विरोचन इत्यवधारणार्थः । **सम्यग्ज्ञानमिति** ॥ अपेत्यनु-षज्यते । इत्युभयविधलिङ्गादिति । इत्येवंरूपमिन्द्रविरोचनयोः सम्यग्ज्ञान-प्राप्त्यप्राप्तिरूपं यत् उभयेषां योग्यायोग्यजनानां सम्यग्ज्ञानविपरीतज्ञान-प्राप्तिरूपोभयविधार्थप्राप्तिसाधकं यल्लिङ्गं तस्मादित्यर्थः । अनेन सूत्रे उभयशब्द आवर्तते । तत्रैक उभयशब्दपर्यायः । अपर उभयविधार्थकः । तथाच उभयोः इन्द्रविरोचनयोर्गुरूपदेशसाम्येऽपि उभयविधात् ज्ञानप्राप्त्यप्राप्तिरूपात्

योग्यायोग्यजनानां सम्यग्ज्ञानविपरीज्ञानप्राप्तिरूपोभयविधार्थस्य साधकलिङ्गादिति हेत्वर्थ उक्तो भवति । एवं हि छन्दोगोपनिषदि श्रूयते । 'तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति । तौ होचतुः य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ..... इति ह भगवतो वचो वेदयन्ते तमिच्छन्तावावास्तमिति । तौ ह प्रजापतिरुवाच य एषोऽन्तरक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच' (छा.८-७) इत्यादि । अस्यार्थः- 'तौ' पूर्वप्रकृताविन्द्रविरोचनौ द्वात्रिंशत्सहस्रसङ्ख्याकानि वर्षसहस्राणि गुह्यनियमाख्यं ब्रह्मचर्यव्रतं चरन्तावूषतुर्ह किल । एवं स्वसमीपवासिनौ प्रजापतिरुवाच ह । किमिति ? 'वां' युवामत्र किमिच्छन्तावावास्तमिति । तावेवं पृष्टौ ऊचतुर्ह । तदेवाह- 'य आत्मा' इत्यादिना 'विजिज्ञासितव्यः' इत्यन्तेन । इत्येवं 'भगवतः' पूज्यस्य ते 'वचो' वाक्यं 'वेदयन्ते' तदर्थभूतं परमात्मानं वेत्तुमिच्छन्ति देवासुरा इति शेषः । अतस्तमात्मानमुपदेष्टृतो ज्ञातुमिच्छन्तावावां 'अवास्तं' अवात्स्व पुरुषादिव्यत्यासः छान्दसः । 'तौ' एवं प्रकृटिताभिप्रायौ प्रजापतिः 'उवाच' उपदिदेश- **य एषोऽन्तरक्षिणीति** ॥ योऽक्षिस्थे विश्वनामा हरिरात्मा सोऽपगतपाप्मत्वादिगुणक इति । य आत्मेत्यादेरर्थस्तु दहरनयेऽभिहितः । यद्यपि **य** इत्यादि **विजिज्ञासितव्य** इत्यन्तं वाक्यं प्रजापतिना पूर्वोक्तमेवेन्द्रविरोचनाभ्यामनूद्यत इति नोपदेशरूपमतो नैतदुदाहरणार्हं, किन्तु य एषोऽन्तरक्षिणीत्याद्येवोदाहरणीयम् । तथापि भगवतो वच इत्यन्ते श्रवणादस्यापि चतुर्मुखोपदेशत्वावगमान्नासङ्गतिः । तथा च भाष्ये **विजिज्ञासितव्य** इत्यन्तोदाहरणं प्रतीकरूपमुपलक्षणाभिप्रायमन्यस्याप्युदाहरणीयत्वं ज्ञापयतीति द्रष्टव्यम् ।

सू— ॐ ॥ अनभिभवं च दर्शयति ॥ ॐ ॥ ३५ ॥

'दैवीमेव सम्पत्तिं देवा अभिगच्छन्त्यासुरीमेव चासुरा

नैवैतयोरभिभवः कदाचित्स्वभाव एव ह्यवतिष्ठते' इति स्वभावानभिभवं च दर्शयति ॥ ३५ ॥

ननु महता प्रयत्नेन अयोग्यताया अभिभावयितुं, शक्यत्वादयोग्यानामपि ज्ञानप्राप्तिः किं न स्यात् । दृष्टं हि विश्वामित्रस्य महता प्रयत्नेन विप्रत्वमित्याशङ्कां परिहरत्सूत्रं पठति- **अनभिभवं चेति** ॥ अत्र नायोग्यताऽभिभवेनायोग्यानामपि ज्ञानप्राप्तिर्युक्ता । कुतः ? अयोग्यत्वस्य स्वभावत्वादिति हेतुसाध्ये उपस्कृत्य तत्र हेतोरसिद्ध्यप्रयोजकत्वशङ्कापरिहारकतया सूत्रं व्याचष्टे- **दैवीमेवेति** ॥ देवसम्बन्धिनीं मुक्तियोग्यत्वरूपामित्यर्थः । न त्वयोग्यत्वमित्येवार्थः । 'सम्पत्तिं' स्वभावं 'देवाः' मुक्तियोग्याः 'अभिगच्छन्ति' प्राप्नुवन्तीत्यर्थः । अनेन देवानामपि प्रबलशापमहापचारादिना योग्यताभिभवसम्भवेन मिथ्याज्ञानप्राप्तिरपि स्यादिति शङ्काऽपि निरस्ता भवति । 'आसुरीं' असुरसम्बन्धिनीमयोग्यत्वरूपां सम्पत्तिमसुरा अभिगच्छन्तीत्यर्थः । 'एतयोः' देवासुरस्वभावयोः । यद्वा देवासुरयोः तथात्वे स्वभावस्येति शेषः । 'अभिभवः' 'अपायः' कदाचिदपि नास्ति, किन्त्वेते देवासुराः 'स्वभावे' योग्यत्वायोग्यत्वरूपेऽवतिष्ठन्त इत्यर्थः । 'हि' यतः इति श्रुतिरिति शेषः । **स्वभावानभिभवमिति** ॥ देवासुरस्वभावस्याभिभवाभावमित्यर्थः । स्वभावेत्युक्त्वा सूत्रे स्वभावस्येति शेषो दर्शितः । तेन स्वभावत्वादिति हेतुस्सूचितः । सूत्रे भाष्ये च चशब्दः न केवलं स्वभावानभिभवं दर्शयति श्रुतिः, किन्तु योग्यत्वायोग्यत्वयोः देवासुरस्वभावत्वं च प्रतिपादयतीति समुच्चयार्थः । तथा च नासिद्धिर्न वाऽप्रयोजकतेति भावः । एतेन क्षत्रियत्वादिप्रतिबन्दी निरस्ता । तेषामस्वभावत्वात् ।

सू— ॐ ॥ अन्तरा चापि तु तद्दृष्टेः ॥ ॐ ॥ ३६ ॥

सम्यग्ज्ञानविपरीतज्ञानयोरन्तरा स्थितानामपि देवासुरभावयोः दार्ढ्यदृष्टेः ॥ ३६ ॥

ननु मास्तु तमोयोग्यानां मुक्तियोग्यानां च अतिदाढ्र्येन स्वभावाभिभवायोगात् सम्यग्विपरीतज्ञानप्राप्तिः। तथापि सा मध्यममनुष्याणां भवतु, कोटिद्वयविषयकतया तज्ज्ञानस्य दाढ्र्याभावेन तत्स्वभावाभिभवस्य कर्तुं शक्यत्वादित्याशङ्कां पहिरत्सूत्रमुपन्यस्यति- **अन्तरेति** ॥ अत्रान्तराशब्दस्य ससम्बन्धिकत्वात् प्रकरणलब्धं तत्सम्बन्धिद्वयं दर्शयति- **सम्यगिति** ॥ 'अन्तरा' मध्ये स्थितानामिति शेषोक्तिः। मानवानामिति शेषः। अपिशब्दो न केवलं देवासुराणां, किन्तु मिश्रबुद्धीनामपीति समुच्चयार्थः। अपीत्यन्तस्यानभिभव एवेति विपरिणतेन सम्बन्धः। अनेनापिशब्दोऽनभिभवाकर्षकोऽपीत्युक्तं भवति। देवासुरभावयोरित्यत्रापि सम्बध्यते। स्थितिरिति शेषः। तेनान्तराशब्दस्यावृत्तिः सूचिता। एवं साध्यांशं व्याख्याय तद्दृष्टेरिति हेत्वंशं व्याख्याति- **देवासुरभावयोरिति** ॥ देवासुरोभयस्वभावयोरित्यर्थः। विमिश्रज्ञान इति यावत्। सावधारणमेतत्। **दाढ्र्यदृष्टेरिति**। विशेषेणेति शेषः। अनेन तदित्येतत् तेषां तत्र तस्येत्यावृत्त्या व्याख्यातम्। तथा चशब्दोऽवधारणार्थतया तुशब्दो विशेषार्थतया च व्याख्यातो भवति। स च विशेषः एकेषामुभयत्रापि बहुमतिः, केषाञ्चिदुभयत्राऽपि निन्दा, औदासीन्यमन्येषामित्यादिरूपस्तत्त्वप्रदीपेऽभिहितः। दृष्टेरित्यस्य श्रुतितो लोकतश्च विशेषो दृश्यत इति तत्त्वप्रदीपवाक्यादर्थो ज्ञेयः। 'लोकतः' स्मृतित इत्यर्थः। अनेन न केवलं देवासुराणां, किन्तु सम्यग्ज्ञानविपरीतज्ञानयोः 'अन्तरा' मध्ये स्थितानां मानवानामपि अन्तरा देवासुरभावयोः स्थितेर्मिश्रज्ञानत्वस्यानभिभव एव, मिश्रज्ञानित्वमेवेति यावत्। न तु ज्ञानादिप्राप्तिः। कुतः ? 'तद्दृष्टेः' तेषां ' तत्रैव' मिश्रज्ञान एव 'तु' विशेषेण 'तस्य' दाढ्र्यस्य दर्शनाच्छ्रुतिस्मृत्युदितत्वादिति सूत्रार्थ उक्तो भवति।

सू— ॐ ॥ अपि स्मर्यते ॥ ॐ ॥ ३७ ॥

'असुरा आसुरेणैव स्वभावेन च कर्मणा।
ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात् ॥

देवा दैवस्वभावेन कर्मणा चाप्यसंशयम् ।
सम्यग्ज्ञानेन परमां गतिं गच्छन्ति वैष्णवीम् ॥
नानयोरन्यथाभावः कदाचित्कापि विद्यते ।
मानुषा मिश्रमतयो विमिश्रगतयोऽपि च ॥'

इति स्कान्दे ॥ ३७ ॥

ननु देवदानवमानवानां सम्यग्ज्ञानादिस्वभावत्वे तद्योग्यतास्वभावत्वे च भवेदभिभवाभावः । तदेव कुतः, तादृशस्वभावत्वे च तथा फलेन भाव्यम्, तदपि कुत इत्याशङ्कां स्मृत्या परिहरत्सूत्रमुपन्यस्य तां स्मृतिमुदाहरति- **अपीति** ॥ स्वभावेनेति समासान्तर्गतमासुरस्वभावेनेति भिन्नं च पदं ज्ञान-कर्मणोर्विशेषणं, तथा आसुरेणेति पदं समासप्रविष्टदेवपदं च तयोरेव विशेषणम् । ज्ञानादेर्दैवत्वादिकं 'सर्वभूतेषु येनैकम्' (भ.गी.१८.१०) इत्यादि-गीतावाक्येनोक्तं सात्त्विकतामसत्वरूपं ज्ञातव्यम् । केचित्तु- आसुरेण कर्मणा विपरीतेन ज्ञानेनेत्यन्वयमाहुः । एके तु- आसुरेणेत्यस्य विवरणम्- विपरीते-नेत्याहुः । तथा 'असुराः' अयोग्याः 'आसुरेण' तामसेन स्वभावेन योग्यतया 'स्वभावेन' तदनुसारिणा कर्मणा, तथा आसुरेणा स्वभावेन विपरीतेन ज्ञानेन च 'विनिश्चयात्' निस्सन्देहं तमो यान्त्येव । 'देवाः' मुक्तियोग्याः 'दैव-स्वभावेन' दैवेन सात्त्विकेन स्वभावेन स्वभावानुसारिणा कर्मणा तादृशेन ज्ञानेन च असंशयं 'परमां वैष्णवीं गतिं' सर्वोत्तमं विष्णुस्वरूपं तत्स्थानं वा गच्छन्ति । 'अनयोः' दैवासुरस्वभावयोस्तत्फलयोश्च कदाचित्काले कापि पुरुषे 'अन्यथाभावो' व्यत्यासो न विद्यते । 'मानुषाः' नित्यसंसृतियोग्याः सम्यग्-विपर्ययमिश्रराजसबुद्धयः तादृशकर्मिणश्च, अत एव 'विमिश्रगतयो' विमिश्र-फलशालिनोऽपीति स्मृत्यर्थः । **स्कान्द** इति । **स्मर्यत** इत्यन्वयः । अनेन- यतो देवादीनां तत्तत्स्वभावत्वं अपिशब्दात्सूचितं तादृशफलं च स्मर्यते, अतस्तदुभयं सिद्धमिति सूत्रार्थ उक्तो भवति ।

सू —ॐ ॥ विशेषानुग्रहं च ॥ ॐ ॥ ३८ ॥

'शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति नेनीयमानः ।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो
मनुष्यान् ॥' (ऋ.६-४७-१६)

इति विशेषानुग्रहं च दर्शयति देवेषु परमेश्वरस्य ।

हेत्वन्तरेण देवानामेव सम्यग्ज्ञानतत्फले, नान्येषामित्यर्थप्रतिपादकं सूत्र-मुपन्यस्य तदपेक्षितं पूरयति- **विशेषेति** ॥ इति श्रुतिरिति शेषः । चो भिन्नक्रमः समुच्चये । तथा च न केवलं स्मृत्युक्तत्वात्, किन्तु यतः 'शृण्वे' इति श्रुतिः 'देवेषु' योग्येषु परमेश्वरस्य 'विशेषानुग्रहं' तत्फलसद्भावं च 'दर्शयति' प्रतिपादयत्यतोऽपि देवानामेवेश्वरानुग्रहसाध्ये सम्यग्ज्ञानफले, नान्यषामिति योजना । श्रुत्यर्थस्तु- 'वीरः' अध्यवसायान्तगामी स्वनिश्चयानुसारेण स्वकार्यसम्पूर्तिकर्ता नरसिंह इति वा 'स इन्द्रः' परमेश्वरः 'उग्रमुग्रं' सर्वान् दुष्टप्रकृतीन् 'दमायन्' दमयन् नित्यनरकं प्रापयन् । यद्वा- अन्धेतमसि दण्डयन् 'अन्यमन्यं' दुष्टेभ्योऽन्यान् तद्विरुद्धान् सर्वान् सत्स्वभावान् 'अति' संसारमतिक्रम्यातिक्रमयित्वा 'नेनीयमानः' भृशं स्वपदं नयन् सुधारीत्या संसारं भृशमतिक्रमयन्निति वा 'एधमानद्विट्' स्वयोग्यतातिरेकेणैधमानं वर्धमानं द्वेष्टात्येधमानद्विट् 'शृण्वे' वेदादिषु श्रूयते । कुत एधमानद्विट् ? यतः 'उभयस्य' देवासुरवर्गस्य राजा, किञ्च स एव मनुष्यान् 'विशः' प्रजाः स्वर्गाद्युद्दिश्य कर्मकरणाद्विश इव विशो मध्यमजीवान् 'चोष्कूयते' नित्यं संसार एवावर्तयतीति । परमेश्वरस्येत्यनेन श्रुतिस्थमिन्द्रपदं व्याख्यातं भवति ।

'असुरान् दमयन् विष्णुः स्वपदं च सुरान्नयन् ।
पुनःपुनर्मानुषांस्तु सृतावावर्तयत्यसौ ।'
इति भविष्यत्पर्वणि ॥ ३८ ॥

श्रुत्यर्थनिश्चायिकां स्मृतिं चाह- **असुरानिति** ॥ 'असौ' विष्णुः 'असुरान्' अयोग्यान् । 'स्वपदं' स्वस्थानं 'सुरान्' मुक्तियोग्यान् 'मानुषान्' मिश्रान् पुनःपुनः 'सृतावावर्तयति' स्वर्गे भूमौ नरके च भ्रामयतीत्यर्थः । इति भविष्यत्पर्वणि वचनमिति शेषः । अस्य विशेषानुग्रहमित्यादिनाऽन्वयः । श्रुतिस्मृत्योः समुच्चये चशब्दः ।

सू— ॐ ॥ अतस्त्वितरज्यायोलिङ्गाच्च ॥ ॐ ॥ ३९ ॥

देवभागादसुरभाग एव बहुलः । 'तस्मान्न जनतामियात्' (बृ.३-३-२०) इति लिङ्गात् । चशब्दात् 'ततः कनीयसा एव देवा ज्यायसा असुराः' (बृ.३-३-१) इति श्रुतेश्च ॥

यदुक्तं श्रुतिस्मृतिभ्यां न दैत्यानां तत्स्वभावाभिभवेन देवत्वप्राप्तिरिति, तदेव युतचाऽपि समर्थयत्सूत्रं पठित्वा व्याचष्टे- **अत इति** ॥ देवभागादित्यनेनातश्शब्दः असुरभाग इत्यनेनेतरपदं बहुल इत्यनेन ज्याय इति पदं व्याख्यातं भवति । न तु देवभाग इत्येवशब्दार्थः । बहुल एवेति सम्बन्धः, न तु कदाचिदून इत्येवार्थः । अनेन भिन्नक्रमस्तुशब्दो व्याख्यातः । सूत्रे अतस्तु इत्यपि सम्बन्धः । तेन अवतारिकोक्तार्थस्य व्यापकता सिद्ध्यति । ज्यायस्त्वमेव कुत इत्यतः प्रवृत्तं हेत्वंशं व्याख्याति- **तस्मादिति** ॥ **इति लिङ्गादिति** ॥ इति बृहदारण्यकवाक्यबोध्यात् ज्याय एवेत्याद्युक्तार्थसाधकात् ज्ञानाङ्कुरसंरक्षणार्थं जनताप्रवेशनिषेधोक्त्यन्यथाऽनुपपत्तिरूपलिङ्गादित्यर्थः । सौत्रचशब्दार्थमाह- **चशब्दादिति** ॥ सूचितायां इति शेषः । 'ततः' तयोर्देवासुरभागयोर्मध्ये देवाः 'कनीयसाः' कनीयांसः सङ्ख्यातोऽल्पा इत्यर्थः । 'असुराः' अयोग्याः 'ज्यायसाः' ज्यायांसो बहुला इत्यर्थः । कनीयसा ज्यायसा इत्यकारान्ते पदे । केचित्तु सकारान्ते द्वितीयाबहुवचनान्ते इत्याहुः पक्षद्वयेऽपि छान्दसं रूपं प्रथमे अकारप्रत्ययस्य द्वितीये दीर्घस्य च प्रापकाभावात् । श्रुतेश्चेत्यस्यापि ज्याय एवेत्यनेनैव सम्बन्धः ।

'असुरा वहुला यस्मात्तस्मान्न जनतामियात् ।'

इति च ब्राह्मे ॥ ३९ ॥

ननु जनताप्रवेशनिषेधोऽसुरबाहुल्यनिमित्त एवेति कुत इत्यत आह- **असुरा इति ॥** 'जनतां' जनसङ्घं 'नेयात्' न प्रविशेदित्यर्थः । ब्राह्मे पुराणे उक्तं चेति शेषः । केचित्तु- 'तस्मान्न जनताम्' इति स्मृतिवाक्यं लिङ्ग-प्रदर्शकत्वेन प्रागेकदेशेनोदाहृतं पुनस्तस्यैव समग्रस्य । ननु जनताप्रवेश-निषेधोऽसुरब्राहुल्यनिमित्त एवेति कुत इत्याशङ्कापरिहारकत्वेनोदाहरणं कृतमित्याहुः । अपरे तु- उभयोः स्मृतित्वमुपेत्य पूर्ववाक्यमन्यदिदं तु समग्रं स्मृत्यन्तरभाष्ये चशब्दार्थतयोदाहृतमित्याहुः । तत्राद्यपक्षो बृहदारण्यके 'तस्मान्न जनतामियात्' इति स्पष्टं श्रवणेन पूर्ववाक्यस्य श्रुतित्वादुत्तरस्य स्मृतित्वेनोभयोर्भिन्नत्वादनुपपन्नः । द्वितीयपक्षस्तु पूर्ववाक्यस्य स्मृतित्वा-भावादेवायुक्तः । सूत्रे अत इत्यावर्तते । अत्रैकोऽनभिभवपरामर्शकः । तुरवधारणे । चस्समुच्चये । तथाच न दैत्यानां स्वभावाभिभवेन देवपदप्राप्तिः, 'अत एव' असुरस्वभावानभिभवादेव 'अतो' देवभागादितरत् असुरबृन्दं 'ज्यायस्तु' बहुलमेवेत्येतदुपपद्यते । अन्यथा तेषां कदाचिदूनत्वापत्त्या तदनुपपत्तिः स्यात् । न च ज्यायस्त्वस्यासिद्धिः । लिङ्गाच्छ्रुतेश्च तत्सिद्धेरिति सूत्रार्थः ।

सू— ॐ ॥ तद्भूतस्य तु तद्भावो जैमिनेरपि

नियमाऽतद्रूपाऽभावेभ्यः ॥ ॐ ॥ ४० ॥

असुरजातेरेवासुरत्वं देवजातेरेव देवत्वं जैमिनेरपि सिद्ध-मेव । 'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च गतिमीयुरात्मीयामेव जातिमनुभवन्ति' इति नियमश्रुतेः । 'नासुराणां दैवं रूपं न देवानामासुरं न चोभयं मनुष्याणां

यो यद्रूपः स तद्रूपो निसर्गो ह्येष भवति' इत्यतद्रूपत्वश्रुतेः। 'तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्वा अप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूरित्यसुरास्ते ह परावभूवुः' (ऐ.आ. २-१-८) इत देवासुराणां भावाभाव-श्रुतेश्च।

जैमिनिमतेनापि स्वरूपाभिभवो नेत्येतमर्थं समर्थयत्सूत्रं पठति– **तद्भूतस्येति॥** अत्र तच्छब्दो देवासुरनरपरामर्शकः। भूतशब्दः स्वभावरूपजात्यर्थकः। यद्वा - तदिति भावप्रधानं, भूतशब्दः प्राप्तौ, तुशब्दोऽवधरणे। तद्भावस्तत्त्वम्। सिद्धमिति शेषः इत्याशयेन तद्भूतस्य तु तद्भावो जैमिनेरपीति प्रतिज्ञांशं व्याचष्टे - **असुरेति॥** असुरजातेरिति बहुव्रीहिः। जातिः स्वभावः। तथा चासुरस्येत्यर्थः। देवजातेरित्यप्येवमेव व्याख्येयम्। उपलक्षणमेतत्। मनुष्यजातेरेव मनुष्यत्वमित्यपि द्रष्टव्यम्। यद्यप्यभ्यर्हितत्वात् देवजातेरेव देवत्वमिति प्रथमं वक्तव्यम्। तथापि श्रुत्यनुसारेणैवमुक्तम्। जैमिनेरपीति। न केवलं व्यासस्येत्यपेरर्थः। अनेन पुरुषार्थादिनय इवात्र व्यवस्थितविकल्पो नास्तीति सूचितम्। केन हेतुना जैमिनेस्तत्सिद्धिरित्यतो नियमेत्याद्युक्तं सूत्रे। तत्र नियमादिशब्दस्तच्छ्रुतिलक्षकः। तद्रूपं प्राग्विद्यमानस्वभावः, तन्नेत्यतद्रूपं, भावप्रधानमेतत्। अभावशब्दो भावस्याप्युपलक्षक इति भावेन तमंशं व्याचष्टे- **नासुरा इति॥** 'असुराः' अयोग्याः 'दैवीं गतिं' देवस्वभावं 'नेयुः' न प्राप्नुवन्ति। एवं देवा मनुष्याश्च स्वस्वान्यगतिं न यान्ति। किन्त्वात्मीयां स्वीयामेव 'जातिं' स्वभावमनुसृत्य भवन्तीत्यर्थः। **रूपमिति॥** रूप्यते निरूप्यते व्यावर्त्यते वस्त्वनेनेति रूपं सम्यग्ज्ञानादिधर्मः। यो जनो यद्रूपो यल्लक्षणोपेतः स तद्रूप एव। कुतः ? 'हि' यस्मात् 'एषः' सम्यग्ज्ञानादिधर्मः 'निसर्गः' स्वभावो भवतीत्यर्थः। 'देवाः' योग्याः 'तं' परमात्मानं 'भूतिः' ज्ञानैश्वर्यादिभूतिप्रदः तद्रूप इति उपास्तिं चक्रिरे। तेन भूतिमन्तो बभूवुः। सुधायां तु मुक्ता इति शेष इत्युक्तम्। तस्माद्देवानां

भूतिरित्युपासकत्वादेव 'एतर्हि' अद्यापि सर्वदेवोत्तमः 'सुप्तः' सुप्तजनेषु स्थितो वायुः 'भूर्भूरित्येव' ज्ञानैश्वर्यादिरूपस्तत्प्रदश्चेत्येव 'प्रश्वसिति' प्रश्वासनियमपूर्वकं स्तौति। 'अभूतिः' अस्माकमनैश्वर्यहेतुरतद्रूप इति 'असुराः' अयोग्या उपासते। अतस्ते 'पराबभूवुः' भूत्यादिगुणहीना नित्यनिरयं प्राप्ता बभूवुरित्यर्थः। इति श्रुतेरित्यन्वयः। भावाभावशब्दाभ्यां भूत्यभूती तथोपासनं च गृह्यते। तथा च तं भूतिरित्येवंरूपेण देवासुराणां परस्परविपरीतस्य भूतित्वेनाभूतित्वेनोपासन-नियमस्य भूत्यभूतिरूपतत्फलनियमस्य च श्रुतेरित्यर्थः। अन्यथा स न स्यादिति भावः। चशब्दः पूर्वोक्तश्रुतिसमुच्चये।

'देवानां भूतिरित्येव मनो विष्णौ स्वभावतः।
असुराणामभूतित्वेनैतन्नैयमतोऽन्यथा॥
देवाः शापाभिभूतत्वात्प्रह्लादाद्या बभूविरे।
अतस्सुगतिरेतेषां नान्यथा व्यत्ययो भवेत्॥'

इति चाध्यात्मे॥ ४०॥

ननु प्रह्लादादीनां दैत्यानामेव सम्यग्ज्ञानतत्फलयोर्दर्शनात्ते देवानामेवेत्येतत् कथमित्यतः उक्तार्थे स्मृतिं चाह- **देवानामिति॥** यतो देवानां विष्णौ स्वभावतो भूतिरित्येव मनः स्यात्। तेषां तथैवोपासनं स्यादिति यावत्। अतः फलमपि तथैव स्यादिति शेषः। असुराणां 'अभूतित्वेन' तद्विषय एव मनः स्यात्। फलमपि तादृशमेव स्यात्। अत एव तदुपासनं फलं च। 'अतः' उक्तात् 'अन्यथा' अनियतधर्मिकतया 'नेयं' ज्ञेयं नेत्यर्थः। तथा च प्रह्लादादीनां भूतित्वेनोपासकत्वान्न दैत्यत्वमिति नोक्तनियमभङ्ग इति भावः। तर्हि देवानां प्रह्लादादिभावः किंनिबन्धन इत्यत आह- **देवा इति॥** शापाभिभूतत्वात्' शापेन तिरोहितस्वभावत्वादित्यर्थः। 'अतो' देवत्वादेव 'तेषां' प्रह्लादादीनां 'सुगतिः' सम्यग्ज्ञानतत्फले। 'अन्यथा' कारणान्तरात् 'व्यत्ययः' उक्तस्यान्यथाभावो न भवेदित्यर्थः। केचित्तु - 'अतो' देवत्वात्

'अन्यथा' दैत्यत्वेन निमित्तेन उक्तस्य व्यत्यय इत्येतत् न भवेदिति व्याचख्युः। न चैवं यथा कथञ्चिद्देवानामसुरत्वं प्राप्तमिति वाच्यम्। असुरत्वस्यौपाधिकत्वेन प्राप्तस्यापि निवर्तनात् पुनर्देवत्वप्राप्तेः। तदुक्तं गीतातात्पर्ये-

'देवाः शापबलादेव प्रह्लादादित्वमागताः।
अतः पुनश्च देवत्वं ते यान्ति निजमेव तु॥
हेतुतः सोऽन्यथाभावो रक्तता स्फटिके यथा॥' (गी.ता. १६-२४)

इति। 'अध्यात्मे' ग्रन्थे उक्तत्वादिति शेषः। पञ्चम्यन्तानां सौत्र-साध्यपदेनान्वयः।

॥ इत्युभयलिङ्गाधिकरणम् ॥ ५ ॥

॥ ६. आधिकारिकाधिकरणम् ॥

(उत्तमाधिकारिणां पदम् अधमाधिकारिभिः नापेक्षणीयम्)

सू — ॐ ॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ॐ ॥ ४१ ॥

न च परमात्मैश्वर्यादिकमाकांक्ष्यम्। ब्रह्मादीनामपि नाकाङ्क्ष्यम्, किमु परस्येति सूचयितुमपिशब्दः। चशब्दस्तु ज्ञानार्थिनां पूर्वोक्तादित्थंभावान्तरसूचकः॥

अत्राधिकरणे ब्रह्मज्ञानस्य देवतापदाकांक्षाशून्यैरेव प्राप्यत्वमहिमा वर्ण्यते। देवादिषु नियतं ज्ञानं तदन्यैर्न प्राप्यमित्युक्तम्। ज्ञानाक्षेपकतया सङ्गतं देवता-पदमन्यैः प्राप्यं न वेतीदानीं विचार्यते।

'स्वधर्मनिष्ठः शतजन्मभिः पुमान्।
विरिञ्चतामेति ततः परं हि माम्॥' (भाग. ४-२४-२९)

इत्यादेः देवतापदमन्यैः प्राप्यं, किं बहुना ? प्रयत्नैर्भगवदैश्वर्यमपि प्राप्तुं

शक्यते, किमु देवतापदमिति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- **न चेति** ॥ सूत्रे तदिति व्यस्तं समस्तं च । तत्र व्यस्तेन पूर्ववाद्युक्तस्य परामर्शः । तथा च यत्पूर्वपक्षिणा देवतापदं भगवदैश्वर्यं चान्यैः प्राप्यमित्युक्तं , तन्नेत्यर्थः । कुतो नेत्यतस्तदयोगात् इति हेतुर्योज्यः । अत्र तच्छब्देन सूत्रकारबुद्धिस्थदेवपद-परमात्मैश्वर्याकांक्षा गृह्यते । सावधारणमेतत् । तथा च तस्याः तदुभयाकांक्षाया एवायोगादित्यर्थः । तदाप्तिस्तु दूरोत्सारितेति भावः । ननु सूत्रे न चाधिकारिकमित्यनेन तदयोगादित्युक्ताकांक्षान्वये सति ब्रह्मादिपदानाकांक्षैवोच्यते । अतः कथं न परमात्मैश्वर्यादिकमाकांक्ष्यमिति भण्यते । सूत्रे मुखतस्तदुक्तस्य ब्रह्मादिपदस्यापिपदेन ग्रहणं अपिपदसूचितस्य मुखतो ग्रहणं चायुक्तमित्यत आह- **ब्रह्मादीनामिति** ॥ पदमितिशेषः । 'नाकांक्ष्यं' नाकांक्षार्हं रुद्रादि-पदयोग्यैः । 'परस्य' विष्णोः । ऐश्वर्यमित्यनुवर्तते । ब्रह्मादीनामित्यनेन उत्तमाधिकारिणां ब्रह्मादिदेवानां यस्य यस्मिन्नधिकारः श्रुतिस्मृतिप्रसिद्धः तत्पदमाधिकारिकमित्याधिकारिकपदं आख्यातं भवति । कैमुत्यसूचकतया चाप्याधिकारिकमपीत्यपिपदं व्याचष्टे- **ब्रह्मादीनामपीति** ॥ तथा च कैमुत्ये आक्षेप्याक्षेपकभावापन्नयोरुभयोरप्यपिपदाधिकारिकपदगृहीतत्वान्नोत्सूत्रत्वं भाष्यस्य । अपिपदेन सूचितस्यापि परमात्मैश्वर्यस्य प्राधान्यान्मुखतोग्रहणं च युक्तमिति भावः । नन्वेतत्प्रतिपादनं न पादसङ्गतमित्याशङ्कानिरासकतया सौत्रं चशब्दं व्याचष्टे- **चशब्दस्त्विति** । **पूर्वोक्तादिति** । 'ऊर्ध्वरेतस्सु च' इत्यत्रोक्तादित्यर्थः । समुदायैकवचनमेतत् । **इत्थंभावान्तरेति** । **इत्थंभाव** इतिकर्तव्यता । अन्य इत्थंभाव इत्थंभावान्तरम् । तथा च ज्ञानार्थिनामपेक्षितः पूर्वोक्तेभ्यो ब्रह्मचर्यादिभ्योऽन्यो य इत्थंभावः परब्रह्मणो देवानां चैश्वर्याद्याकांक्षा-करणरूपस्तत्सूचक इत्यर्थः ।

अयोग्यमारोढुं प्रयतन् प्रपतन् हि दृश्यते । एवमयोग्यस्य परमात्मैश्वर्यस्य ब्रह्मादिपदस्य चाकांक्षायां पतनमनुमीयते ।

ननु भगवदैश्वर्याद्याकांक्षाऽयोगः कुतः प्रमाणादवसीयत इत्यतः प्रवृत्तं = पतनानुमानादित्यंशं व्याचष्टे- **अयोग्यमिति** ॥ वृक्षादिकमिति शेषः । 'प्रयतन्' प्रयत्नं कुर्वन् 'प्रपतन्' पतनक्रियावान् हि दृश्यते लोके । अनेन दृष्टान्तभूते अयोग्यारोहप्रयत्नवति जने हेतुसाध्ये दर्शिते । दार्ष्टान्तिकमाह - **एवमयोग्यस्येति** ॥ सूत्रे मुखतः पूर्वगृहीतस्यापि ब्रह्मादिपदस्याप्राधान्यात् पश्चान्निर्देशः । 'आकांक्षायां' प्रयत्नविशेषरूपायां कृतायामिति शेषः । अनेन पक्षे हेतुसत्त्वमुपपादितम् । 'अनुमीयते' आकांक्षावत इति शेषः । **अयोग्यस्येति** वचनात् तत्पदयोग्यस्य तत्पदाकांक्षायां नैव दोष इति सूच्यते । अनेनेत्थमनुमानप्रयोगस्सूचितः– ब्रह्मादिपदाकांक्षावान् पतति, अयोग्यारोहप्रयत्नवत्त्वात् । अयोग्यवृक्षारोहप्रयत्नयुक्तवदिति । न च केवलाकांक्षावति प्रयत्नरूपहेतोरसिद्धिः । इच्छाया अपि प्रयत्नविशेषत्वात्, यथोक्तं सुधायाम्- 'साधनगोचराविच्छाप्रयत्नौ प्रवृत्तिरित्युच्येते' इति ।

'न देवपदमन्विच्छेत्कुत एव हरेर्गुणान् ।
इच्छन् पतति पूर्वस्मादधस्ताद्यत्र नोत्थितिः ॥'
इति ब्रह्माण्डे ॥

ननु निर्मूलानुमानमप्रमाणमित्यतोऽनुमानादित्येतदनुकूलस्मृतिमानादित्यर्थकतयाऽपि व्याचष्टे- **नेति** ॥ यदा चैवं तदा 'हरर्गुणान्' ऐश्वर्यादीन् 'कुतः' कथमेवान्विच्छेदित्यर्थः । 'यत्र' स्थाने पतितस्येति शेषः । नोत्थितिस्ततः 'पूर्वस्मात्' पूर्वतनस्वस्थानादधस्तात् स्थिते तमसि पततीत्यर्थः । ब्रह्माण्डे उक्तत्वादिति शेषः । अस्यायमर्थोऽनुमीयत इति पूर्वेणान्वयः ॥

'स्वकीयमिच्छमानं तु राजाद्याः पातयन्ति हि ।
एवमेव सुराद्याश्च हरिश्च स्वपदेच्छुकम् ॥'
इत्याद्यनुमानरूपकवाक्याच्च ।

नन्वयोग्यारोहप्रयत्नस्य पतनकारणत्वेऽपि इच्छामात्ररूपस्य प्रयत्नस्य तददर्शनान्न तावन्मात्रं बाधकमित्यतः इच्छाया अपि पतनकारणत्वं स्मृत्युक्तानुमानेन दर्शयन् पतनानुमानादित्येतत्प्रकारान्तरेण व्याचष्टे- **स्वकीयमिति** ॥ पदमिति शेषः । तुरवधारणे । **हिः** प्रसिद्धौ । प्रथमाद्यपदममात्यादिपरम् । द्वितीयं गन्धर्वादिपरम् । चः परस्परसमुच्चये । यद्वा- एकश्चशब्दः पातयन्तीत्यस्यानुकर्षणार्थः । स्वपदमिच्छतीति स्वपदेच्छुः, स्वार्थे कः । स्वपदेच्छुकं पातयतीत्यन्वयः । **इत्यादीति** । अनुमानं रूपयति ज्ञापयतीत्यनुमानरूपं, स्वार्थे कः एवमादिरूपं च तदनुमानरूपकवाक्यं चेति विग्रहः । अनेन विमतो देवादिभिः पात्यते, अशक्तत्वे सति तत्पदेच्छुत्वात्, राजपदेच्छुवदित्यनुमानं सूचितं भवति । **वाक्याच्चेति** । चस्समुच्चये । अस्याप्ययमर्थोऽनुमीयते ज्ञापत इति पूर्वेणान्वयः ।

'मायाभिरुत्सिसृप्यत इन्द्र द्यामारुरुक्षतः ।
अव दस्यूंरधूनुथाः' (ऋ.८-१४-१४)

इति श्रुतिश्च ॥ ४१ ॥

नन्वत्र मूलाभाव इत्यतोऽनुमानादित्येतन्मूलभूतश्रुतेरित्यर्थकतयाऽपि व्याचष्टे- **मायाभिरिति** ॥ हे इन्द्र परमेश्वर 'मायाभिः' मोहिकाभिः कुविद्याभिः 'उत्' उत्तमत्वं 'सिसृप्सतः' सृप्लृ गतौ, प्राप्तुमिच्छतः 'द्यां' स्वर्गं, 'अरुरुक्षतः' आरोढुं चेच्छतो 'दस्यून्' 'ऐकात्म्यं नाम यदिदं केचिद् ब्रूयुरनैपुणाः' इत्यादिनोक्तान् ब्रह्मस्तेनान् 'अव' अन्धे तमसि 'अधूनुथाः' अवाक्षिप इति श्रुत्यर्थः । **इति श्रुतिश्चेति** । उक्तार्थे प्रमाणमिति शेषः । अत्र तत्त्वप्रदीपे रुद्रादिपदयोग्यैरित्याभिप्रायेण ब्रह्मादीनामित्युक्तम् । ते नैवाकांक्षन्ति अतस्तेषामधःपातशङ्का दूराद्दवीयसी, यतस्त उत्पन्नज्ञानाः स्वेच्छानुवृत्त्या प्राय. सुखाद्युत्कर्षवन्तो भवन्ति, ये तूत्पन्नज्ञानत्वेऽपि विधिनियतास्तेषामेव ज्ञानात्प्राक् पूर्वस्मादधःपतनं तत्र वैशेषिको विधिः । ये पुनः

श्रुतिस्मृतिभिः बहुभिः निवारिता अप्ययोग्यपदमारुरुक्षन्ति, तनैवज्ञानायोग्याः, तानुद्दिश्येह- **मायाभिरिति** विशेष उक्तः। अस्यार्थः- पदं नाकांक्ष्यं, रूद्रादि-पदयोग्यैः 'दूराद्दवीयसी' दूराद्दूरतरा। 'उत्पन्नज्ञानाः' उत्पन्नापरोक्षज्ञानाः रूद्रादियोग्याः 'अनुवृत्त्या' आचारेण। 'विधिनियताः' मनुष्याः 'अधःपतनं' तदाशङ्का। तत्र वैशेषिको विधिरिति। तानुद्दिश्य न ब्रह्मादिदेवपदमिच्छेदिति विधिः प्रवर्तत इति॥

सू — ॐ॥ उपपूर्वमपीत्येके

भावशमनवत्तदुक्तम्॥ ॐ॥ ४२॥

उपदेवपदं च नाकांक्ष्यमित्येके। भावशमनवदृषिपदवदेव। तच्चोक्तमिन्द्रद्युम्नश्रुतौ 'अथ यथर्षीन् प्रजापतीन्नाकांक्षेदेवं न गन्धर्वान्न विद्याधरान्न सिद्धान्' इति।

कैमुत्येनापि देवतापदाकांक्षाऽयोगं साधयत्सूत्रं पठति- **उपेति**॥ अत्रोप-शब्दः समीपवर्तिवाची। पूर्वपदं च पूर्वसूत्रे आधिकारिकपदेन प्रकृतदेव-परामर्शकम्। अपिशब्दः कैमुत्यार्थकः। यदोपदेवपदं नाकांक्ष्यं किमु देवमित्याशयेनोपपूर्वमित्येतद्व्याचष्टे- **उपेति**॥ दैवानामुपवर्तिनां गन्धर्वा-दीनामित्यर्थः। चोऽप्यर्थः। नाकांक्ष्यमिति शेषोक्तिः। 'इत्येके' केचन वदन्तीति शेषः। भावे चित्ते चेष्टायां च शमनात् शान्तेर्भावशमना ऋषयः तेन तत्पदं लक्ष्यत इत्याशयेन भावशमनवदित्येतदनूद्य सावधारणतया व्याचष्टे- **भावेति**॥ ऋषिपदेन प्रजापतयोऽप्युपलक्ष्यन्ते। न तत्र दृष्टान्तान्तरं गवेष-णीयमित्येवशब्दार्थः। एवेत्यनन्तरं अपरे तु ऋषित्वादिसामान्याकारा-श्रयणेनाकांक्ष्यमिति वदन्तीत्युपस्कर्तव्यम्। ऋष्यादिपदाकांक्षायोग एव कुत इत्यतस्तद्धेतुत्वेन तदुक्तमित्येतद्व्याचष्टे- **तच्चोक्तमिति**॥ न केवलं सूत्रे, किन्तु श्रुतौ चेदमुदितमिति चशब्दार्थः। आरम्भार्थेऽथशब्दः। 'यथर्षीन्'

आर्षान् तद्धर्मान् नाकांक्षेत्, एवं ज्ञानार्थी 'प्रजातीन्' प्राजापत्यान् 'गन्धर्वान्' गान्धर्वान् 'विद्याधरान्' वैद्याधरान् 'सिद्धान्' सैद्धान् धर्मान् नाकांक्षेदित्यर्थः। इत्युक्तत्यन्वयः। यद्यपि गन्धर्वादिपदस्यानाकांक्ष्यत्वे ततोऽपि न्यूनमृषिपदं न दृष्टान्तीकर्तुं शक्यं, तत्रानाकांक्ष्यत्वानिश्चये ततो न्यूने सुतरां तदनिश्चयात्। तथापि 'यथा ऋषीन्' इत्यादि श्रुत्यनुसारेणेयमुक्तिः। साऽपि तस्यापि साध्यत्वाभिप्राया।

बृहत्संहितायां च -

'न दैवानभिकांक्षेत कुत एव हरेर्गुणान्।
प्राजापत्यान्नं चार्षांश्च गान्धर्वादीनपि क्वचित्॥
ऋष्यादिषु विशेषे तु दोषो नैवाविशेषतः॥'

इति विशेषदर्शनार्थमेक इत्युक्तम्॥ ४२॥

न चेति उपेति सूत्रद्वयार्थे स्मृतिं दर्शयति- **बृहदिति॥** ज्ञानार्थी यदा 'दैवान्' देवगुणानेव नाभिकांक्षेत तदा 'हरेर्गुणान्' ऐश्वर्यादीन् 'कुतः' कथमभिकांक्षेतेत्यर्थः। 'प्रजापत्यान्' कश्यपकर्दमादिप्रजेश्वरगुणान् नाभिकांक्षेतेति सर्वत्र सम्बन्धः। 'आर्षान्' ऋषीणामिमे आर्षाः तान् गुणान्, 'एवं गान्धर्वान्' आदिपदेन वैद्याधरादयो गृह्यन्ते। 'क्वचित्' काले। एवं सूत्रद्वयार्थे स्मृतिवाक्यमुदाहृत्येदानीं तच्छेषमेव प्रमाणीकृत्यैक इत्युक्तेरभिप्रायमाह- **ऋष्यादिष्विति॥** ऋषिगन्धर्वादिष्वित्यर्थः। स्थित इति शेषः। 'विशेषे' विशिष्टत्वादिविशेषधर्मे आकांक्ष्यमाणे इति शेषः। तेनैवशब्दान्वयः। यथा वसिष्ठस्स्यां विश्वामित्रस्स्यां तुम्बुरुः स्यामिति। दोषो भवतीति शेषः। 'अविशेषतः' अविशेषे सामान्यधर्मे ऋषित्वमात्रे आकांक्ष्यमाणे तु न दोषः, यथाऽहं कश्चिद्दृष्टिः स्यामिति तत्त्वप्रदीपदिशा स्मृतिशेषार्थः। अविशेषित इति पाठे ऋष्यादावविशेषिते सतीत्यर्थः। ननु सामान्याकांक्षाऽपि कथं युज्यते 'अयोग्यमिच्छन् पुरुषः' इति दोषोक्तेः। शतकोटिसङ्ख्याकेष्वपि ऋषिषु

एकेनैक्यज्ञानं विना तथाऽऽकांक्षाऽयोगेन सामान्याकांक्षायामपि विशेषे पर्यवसानादिति चेन्न, केषाञ्चित् सत्कुलजननतपःकरणादियोग्यानामृषि-गन्धर्वक्षितिपादीनां तथाऽऽकांक्षासम्भवात्। न च देवत्वेऽपि केषाञ्चिद्योग्यानां तथाऽऽकांक्षाऽस्त्विति वाच्यम्। यतो यथा देवत्वस्य नवकोटिष्वेव भावोऽ-न्यत्राभावः न तथा ऋषित्वस्य शतकोटिष्वेव भावोऽन्यत्राभावोऽस्ति। कुत एतत् ? राजर्षीणां दूर्वासःप्रभृतीनां च ऋषित्वदर्शनात्। एवमयोग्यानां द्रमिडादीनां गन्धर्वादित्वदर्शनाच्चेति दिक्। **इतीति** ॥ इति शब्दः आवर्तते। तत्रैकस्य इति बृहत्संहितायामित्यनेनान्वयः। अन्यस्य इति विशेषदर्शनार्थ-मित्युत्तरेणान्वयः। योजनाप्रकारस्तु- इत्येवं रूपस्य 'ऋष्यादिषु' इति प्रमाण-शेषेणोक्तस्य विशेषविवक्षवो नाकांक्ष्यमिति ब्रुवन्ति, सामान्यविवक्षवस्त्वा-कांक्षायां न दोष इत्याहुरिति विशेषस्यार्थविशेषस्य दर्शनार्थं प्रदर्शनार्थमेव सूत्रकृतैक इत्युक्तम्, न तु सामान्यविशेषभावमपहाय एकस्मिन् अनाकांक्ष्य-त्वविषये विप्रतिपत्तिसूचनार्थम्, सर्वज्ञेन बादरायणेन आकांक्ष्यत्वाना-कांक्ष्यत्वयोरन्यतरस्यानाकांक्ष्यत्वस्य निर्धारितत्वात्, दैवपदादौ वस्तुनि आकांक्ष्यत्वतदभावरूपविकल्पासम्भवाच्चेति भाव इति। अनेन यदा 'भाव-शमनवत्' ऋषिपदवत् यदा ऋषिपदं नाकांक्ष्यं एवं 'उपपूर्वं' पूर्वेषां पूर्वसूत्रे आधिकारिकपदेन प्रकृतानां देवानामुपवर्तमानानां गन्धर्वादीनामपि पदं नाकांक्ष्यम्, तदा किमु देवानां पदं नाकांक्ष्यमिति एके वसिष्ठत्वादि-विशेषमवलम्ब्य वदन्ति। ऋषित्वादिसामान्याकारेण त्वाकाङ्क्षत्वमित्यपरे ब्रुवन्ति। न च ऋष्यादिपदाकांक्षायोगासिद्धिः। यतस्तदृष्यादिपदस्याना-कांक्ष्यत्वं श्रुत्युक्तमत इति सूत्रार्थ उक्तो भवति। केचित्तु- सूत्रे पूर्वशब्दः प्रभृत्यर्थकः। आधिकारिकाणामिति षष्ठ्यन्तं पदं चानुवर्तते। तथा च आधि-कारिकाणां देवनामुपवर्तिगन्धर्वप्रभृतीनां पदमिति सूत्रखण्डार्थमाहुः। एके तु उपेतिशब्दः पूर्वो यस्य तदुपपूर्वं उपदेवपदं तद्वाच्यानां पदमित्यर्थमाहुः।

सू—

ॐ ॥ बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ॐ ॥ ४३ ॥

देवर्षिगन्धर्वादिपदेभ्योऽन्यत्रशुभविषय आकांक्षायामनाकांक्षायां च न पतनम् ।

ज्ञानार्थिना यथा देवादिपदं नाकांक्ष्यं, एवं ज्ञानभक्त्यादिकमाकांक्ष्य न वेति सन्देहं पराकुर्वत्सूत्रं पठित्वा व्याचष्टे- **बहिरिति** ॥ सूत्रे बुद्ध्या विवेकेन विपरिणाम्यानुवृत्तस्य पूर्वेभ्य इति पदस्य व्याख्यानम्- **देवर्षीत्यादि** ॥ आदिपदात् प्रजापत्यादि गृह्यते । पदाब्दः सर्वत्र सम्बध्यते । बहिरित्यस्यार्थः । अन्यत्रेति । तद्विवृणोति- **शुभविषय इति** ॥ ज्ञानभक्त्यादिरूपशुभधर्मविषय इत्यर्थः । विषय इत्यनन्तरं विशेषार्थकस्तुशब्दः संयोज्यः । उभयथेत्येतद् व्याचष्टे- **आकांक्षायामिति** ॥ ननु

'विज्ञानभक्त्यादिकमप्यतीव न साधनं कामबहिष्कृतं चेत् ।
अकामितोऽवाग्गतिमेव दद्यात् ॥' (म.ता.नि. १९.५२)

इति भारततात्पर्यनिर्णये ज्ञानभक्त्यादेरनाकांक्षायामनर्थोक्त्या आकांक्ष्यत्वविधानादनाकांक्षायां पतनाभावोक्तिः कथमिति चेन्न, नियमाभावे तात्पर्यात् । उक्तवचनस्य सार्वकालिकानाकांक्षाविषयत्वात् । शुभशब्देन ज्ञानसाधनैश्वर्यादि गृह्यते । तदाकांक्षायां अनाकांक्षायां च न पतनमित्यर्थः । ज्ञानं प्रत्यैश्वर्यादेरनियतसाधनत्वादिति भावः । न पतनमिति सूत्रे शेषोक्तिः ।

'देवर्षिगन्धर्वाणां पदाकांक्षी पतेद् ध्रुवम् ।
अन्यत्र शुभमाकांक्षन्न पतेदविरोधतः ॥' इति स्मृतेः ॥

कुतो न पतनमित्यतः प्राप्तं स्मृतेरिति हेत्वंशं व्याचष्टे- **देवर्षीति** ॥ पदेष्वाकांक्षा यस्येति वा पदान्याकांक्षतीति वा विग्रहः । नित्यसापेक्षत्वात् पदाकांक्षी इति समासः अन्यत्रेत्यतः प्राक् एतेभ्य इत्युपस्कार्यम् । 'अन्यत्र'

अन्यत् 'शुभं' ज्ञानादि तत्साधनैश्वर्यादिकं च । कुतो न पतेदित्यत आह- **अविरोधत इति** ॥ ज्ञानादिकामस्य श्रुत्याद्यविरुद्धत्वादित्यर्थः ।

'नानात्वमेव कामानां नाकामः क्व च दृश्यते ।
अतोऽविरुद्धकामस्स्यादकामस्तेन भण्यते ॥'

इत्याचाराच्च ॥ ४३ ॥

ननु - विहाय कामान्यः सर्वान् पुमांश्चरति निस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति । (भ.गी.२.७१)

इति मोक्षाङ्गत्वेन सर्वकामप्रहाणिविधानात् कथं शुभकामे पतनाभाव इत्याशङ्कोत्तरत्वेनाचारादित्यंशं स्मृतिपरतया व्याचष्टे- **नानात्वमिति** ॥ स्यादित्यतः परमप्येवशब्दस्य तेनेत्यतः परं चशब्दस्यान्वयः । तथा च कामयमानः पुमान् 'अविरुद्धकामः' अनिषिद्धेच्छावान् स्यादेवेति प्रतिज्ञा । न चाकामत्ववचनविरोधः, यतः पुमान् श्रुत्यविरुद्धानिषिद्धकामत्वेनाप्यकामो 'भण्यते' उच्यते अतः । तथा च सामान्याभावोक्तेः विशेषाभावपरत्वादविरोध इति भावः । ननु कुतः सङ्कोच इत्यत आह- **नानात्वमिति** ॥ यतः कामानां 'नानात्वं' निषिद्धकामत्वानिषिद्धकामत्वाभ्यां विलक्षणत्वमतः पुरुषेष्वविरुद्धमेव दृश्यते । अविरुद्धकामत्वमेव युज्यत इति यावत्, न त्वकामत्वमेवातः संकोच इत्यर्थः । यत्किञ्चित्प्रतियोगिमिति सामान्याभावासम्भवादिति भावः । ननु पुरुषेषु केवलाकामत्वायोगः कुत इत्यत आह- **नेति** ॥ यतः 'अकामः' काममात्रशून्यः पूमान् 'क्वापि' देशे न दृश्यते । यद्वा- 'अकामः' काममात्राभावः 'क्वापि' पुरुषे 'न दृश्यते' न प्रतीयते अतोऽकामः काममात्राभाववान्न युज्यत इत्यर्थः । तदेतदुक्तं तत्त्वप्रदीपे- निषिद्धकामत्वमनिषिद्धकामत्वमिति कामानां नानात्वं बहुविधत्वमेव दृश्यते लोके न पुनरकामत्वं क्वापि अतः कामयमानः पुमान् 'अविरुद्धकामः स्यात्' श्रुत्यविरुद्धमेव कामयीत । तेन निषिद्धं न कामयीतेत्यकाम उच्यत इति ।

इत्याचाराच्चेति ॥ एवंरूपं यदविरुद्धकामाचारप्रतिपादकं वाक्यं तस्मादित्यर्थः । चः पूर्वस्मृतिसमुच्चये । न च टीकायामाचारादित्यस्य शङ्कापरिहारकत्वोक्तिविरोधः । शङ्कापरिहारकत्वेऽप्येतत्समुचितस्यैव स्मृत्याख्यपूर्वहेतोः पतनाभावसाधकत्वेन समुच्चयाविरोधात् । यद्वा- सूत्रभाष्ययोस्तत्त्वप्रदीपोक्तरीत्या 'ऋषभं मा समानानाम्' इति श्रुतिसमुच्चये चशब्दः । अस्यामपि श्रुतौ मां समानानां सज्ञानानां ऋषभं श्रेष्ठं कुर्विति ज्ञानाद्यविरुद्धकामस्योक्तत्वेन प्रकृतार्थसाधकत्वात् ।

॥ इत्याधिकारिकाधिकरणम् ॥ ६ ॥

॥ ७. फलश्रुत्यधिकरणम् ॥

(ज्ञानादिफलम् इन्द्रियाद्यभिमानिदेवानामेव मुख्यं प्रजानाम् अल्पम्)

सू— ॐ ॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ॐ ॥ ४४ ॥

'ब्रह्मविदाप्नोति परम्' (तै.२-१) इत्यादि फलं स्वामिनां देवानामेव भवति । 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति यदु किञ्चेमाः प्रजाः विजानते देवा एव तद्विजानते देवानां ह्येतद्भवति स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाणः' इति माध्यन्दिनायनश्रुतेरित्यात्रेयो मन्यते ॥ ४४ ॥

अत्राधिकरणे ब्रह्मज्ञानस्य सन्निधिमात्रेणास्वामिनोऽपि पराधीनस्य ज्ञानिनः कर्तुः फलदातृत्वमहिमा वर्ण्यते । तत्र पूर्वपक्षप्रदर्शकं सूत्रमुपन्यस्य व्याचष्टे- **स्वामिन इति** ॥ इत्यादीति लुप्तविभक्तिकम् । उक्तमिति शेषः । फलं स्वामिनामित्यनेन स्वामिन इति समुदायैकवचनान्तं हेतुगर्भं, फलेति लुप्तविभक्तिकमिति सूचितम् । तथा च 'ब्रह्मवित्' इत्यादिनोक्तं ज्ञानफलं 'स्वामिनो' ज्ञानस्वामिनां देवानामेव भवति, न प्रजानाम् । कुतः? श्रुतेः, 'यदु किञ्चेमाः' इति फलश्रुतेः ।

देवानामिन्द्रियादिप्रेरकत्वेन ज्ञाने स्वामित्वाच्चैवमाचार्य आत्रेयोऽपि मन्यत इति योजना। श्रुतावुशब्द एवार्थः। तथा चेमाः प्रजाः यदेव किञ्चन शुभं कर्माचरन्ति तदेवा एवाचरन्ति। तेषां कर्मसाधनेन्द्रियादिप्रेरकत्वेन तत्स्वामित्वादिति भावः। एवं प्रजाः यदेव किमपि विजानते तदेवा एव जानन्तीत्यर्थः। भावस्तु पूर्वोक्त एव। ननु प्रजाकर्तृकयोः कर्मज्ञानयोः कथं देवस्वामिकत्वमित्यत आह- **देवानां हीति** ॥ 'हि' यतो देवानामेतच्छुभकर्मादि भवत्यतस्तेषामेव फलं भवतीत्यर्थः। ननु कर्तुरेव फलावश्यंभावात् कथं स्वामिनः फलमित्यतो दृष्टान्तमाह- **स्वामी हीति** ॥ लोक इति शेषः। कृष्यादिस्थले तथा दर्शनादिति हिशब्दार्थः। तत्त्वप्रदीपे तु न ह्यन्य उपास्ते न ह्यन्यः फलमश्नुत इति समञ्जसं भवेदित्यादिना प्रजानामेव फलं न स्वामिनामिति प्राप्ते स्वामिनामपि फलं, तस्य महत्त्वाद्भाष्ये एवशब्दः। प्रजानां त्वल्पमिति सिद्धान्तपरतयेदं सूत्रं व्याख्यातम्।

सू— ॐ ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ॐ ॥ ४५ ॥

सत्रयागेष्वृत्विजामपि फलदर्शनादल्पं फलं प्रजानामपि भवतीत्यौडुलोमिर्मन्यते। तदर्थं देवैः क्रियमाणत्वात् ॥ ४५ ॥

एवमात्रेयमतावलम्बेन पूर्वपक्षिते सिद्धान्तयत्सूत्रं पठति– **आर्त्विज्यमिति** ॥ अत्रार्त्विज्यमिति लुप्तोपमानम्। ऋत्विजामिदमार्त्विज्यम्। ऋत्विजां यज्ञफलमिवेति यावदित्याशयेन सूत्रं व्याचष्टे– **सत्रयागेष्विति** ॥ ऋत्विजामपीति। अग्रहपतीनामिति शेषः। न केवलं ग्रहपतेरित्यपेरर्थः। अग्रहपतीनामपीति वा। फलं यज्ञफलम्। अनेन फलभागित्वे साध्ये पूर्वोक्तस्वामित्वहेतोरप्रयोजकत्वमुक्तं भवति। तस्मा इत्येतत् षष्ठ्यन्ततया प्रथमान्ततया तृतीयान्ततया च विपरिणम्य व्याचष्टे- **अल्पं फलमिति** ॥ **ज्ञानफलमित्यर्थः** ॥ **प्रजानामपीति** ॥ न केवलं देवानामेव फलं, किन्तु प्रजानामपीत्यपेरर्थः। प्रजानामपि फलभाक्त्वं कुत इत्यतः प्रवृत्तं तस्मै हीत्यादि व्याचष्टे– **तदर्थमिति** ॥ प्रजार्थमेवेत्यर्थः। अनेन सूत्रे

तच्छब्दः प्रजापरः, तादर्थ्ये चतुर्थीत्युक्तं भवति । **क्रियमाणत्वादिति** । सम्पाद्यमानत्वादित्यर्थः । ज्ञानस्येति शेषः । अनेन हिशब्दो हेत्वर्थः परिक्रियते इत्यस्य क्रियते इत्यर्थ उक्तो भवति । तथा चायं सूत्रार्थः 'आर्त्विज्यं' आर्त्विज्यमिव यथा सत्रयागेऽग्रहपतीनामप्यृत्विजां यज्ञफलं तथा 'तासां' प्रजानामस्वामिभूतानामपि तदल्पफलमस्ति । कुतो? 'हि' यतः 'तस्मै' प्रजाफलार्थं 'तैः' प्रजास्थितैः तत्तत्करणप्रेरकैर्देवैः 'तत्' ज्ञानादि 'परिक्रियते' सम्पाद्यतेऽत इति । तत्त्वप्रदीपे तु यथा सत्रयागेषु न केवलं ग्रहपतेरेव, किन्तु, 'ऋत्विजां' इष्टप्रथमयज्ञानां स्वान् स्वानग्नीन् तदग्निषु समारोप्य दीक्षिता-नामनात्तदक्षिणानामल्पं फलं दृश्यते ग्रहपतेः द्रव्यादिसृष्टुरसमत्वेऽपि, तथा देवैः क्रियमाणस्य ज्ञानयज्ञस्यार्त्विज्यं प्रजाभिः परिक्रियते । 'तत्' आर्त्विज्यं तासामप्यल्पफलदं भवत्येव । कुतो ? 'हि' यतः 'तस्मै' तदर्थं प्रजानामपि फलसिद्ध्यर्थमेव तासु स्थित्वा तत्तत्करणानि व्यापरायद्भिर्देवैः ज्ञानयज्ञः 'परिक्रियते' अनुष्ठीयते अत इति सूत्रार्थो वर्णितः । एतत्पक्षे आर्त्विज्यमित्या-वर्तते । एवं परिक्रियत इत्येतदपि । अस्यार्त्विज्यमित्यनेन ज्ञानस्य इत्यध्याहृतेन चान्वयः । तथा च सत्रयागेष्वार्त्विज्यमित्यनेन ज्ञानयज्ञं इत्यध्याहृतेन चान्वयः । तथा च सत्रयागेष्वार्त्विज्यमृत्विजामल्पफलदं तथा देवैर्यो ज्ञानयज्ञः क्रियते तस्यार्त्विज्यं यत्प्रजाभिः क्रियते तदार्त्विज्यं प्रजानामप्यल्पफलद भवत्येव । कुतो हि यत इत्यादिरूपा सूत्रयोजना द्रष्टव्या ।

सू — ॐ ॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ॐ ॥ ४६ ॥

तृतीयः स्वपक्षः ।

यदि देवैः प्रजार्थं ज्ञानादि साध्यते तर्हि तत्फलं प्रजानामेव भवेत्, न किञ्चिद्देवानां इत्याशङ्कां परिहरत्सूत्रमुपन्यस्यति- **सहकारीति** ॥ अत्र तृतीयमित्यस्यैतदित्यध्याहृतेनान्वयः । पक्षेणेति च भावप्रधानम् । तथाच

'एतत्' वक्ष्यमाणं पक्षत्वेन तृतीयमित्यर्थ इत्याशयेन सम्बन्धिप्रदर्शनपूर्वकं पक्षेण तृतीयमित्यस्य फलितार्थमाह- **तृतीय इति** ॥ स्वेति सावधारणम्। तथा च पूर्वोपन्यस्तपक्षद्वयापेक्षयाऽयं तृतीयः स्वस्यैव भगवतो बादरायणस्यैव पक्षः न त्वौडुलोमिना ज्ञात इत्यर्थः। यद्यपि पूर्णफलापेक्षया देवानामेव फलमिति श्रुत्यवष्टम्भेन प्रवृत्तस्याद्यपक्षस्य, अल्पफलापेक्षया प्रजानामपीति युक्त्यवष्टम्भेन प्रवृत्तस्य द्वितीयपक्षस्य तदुभयोपपादकस्य अस्य तृतीयपक्षस्य च विरोधाभावात्पक्षत्रयमपि बादरायणीयमेव, उत्तरप्रस्थाने तथैव विवृतत्वात्। तथापि मन्दानामत्रेयमतस्यापाततो विरुद्धतया प्रतीतेरेवमुक्तम्। न चैवं पक्षत्रयस्य वस्तुतोऽविरोधसम्पादने आद्यद्वितीयाभ्यां तृतीयस्य तदुभयोपपादकस्य कथं भेद इति वाच्यम्। यतो देवानां महाफलं प्रजानां त्वल्पफलमित्येवं सदृष्टान्तमौडुलोमिनाऽभिहितं, न तु वक्ष्यमाणं ज्ञातम्, बादरायणेन तु प्रधानाङ्गभावोक्तिपूर्वकं तदुपपादनं क्रियत इति। उक्तं हि तत्त्वप्रदीपे देवानामेव महत्फलमित्यत्र श्रुतिमात्रेण श्रावयामास। प्रजानामप्यल्पफलमस्तीत्यत्र युक्तिमौडुलोमिना प्रयोजयामास। स्वयन्तु सर्वविद्याचार्यतमः आचार्यप्रवेशेन प्रवक्तृत्वं प्रजासु स्थित्वा तत्तदिन्द्रियप्रवर्तनेन ज्ञापनमित्येतदुभयं देवानां फलाधिक्ये कारणं, सहकार्यन्तराभावे स्वविहितज्ञानदानासम्भवेन विहितानुष्ठानाङ्गत्वात् प्रजानामपेक्ष्यत्वं, तासामप्यल्पफलभावे कारणं, प्रजानामाचार्यस्य देवानां च फलेयत्ताविशेषं चेति बहून् विशेषानाहेति तृतीयः स्वपक्ष इत्याहेति। एवं प्रथमसूत्रे स्वामिभृत्यभावमुखेन द्वितीये यजमानऋत्विग्भावेन तृतीये प्रधानाङ्गभावेन महदल्पफलत्वोपपादनाद्भेद इत्यपि समाधानं द्रष्टव्यम्। नन्वेवमपि तत्त्वप्रदीपे सूत्रत्रयमपि सिद्धान्तपरतया व्याख्याय, यत्तु न्यायविवरणेऽन्यथा व्याख्यानम्, तदात्रेयमतानुवादमुखेन मन्दाशङ्कानुवादपरमिति न तत्प्रत्यनीकत्वं सिद्धान्तवादस्येति भाष्यस्य न्यायविवरणविरोधस्याऽपि परिहृतत्वात्तद्विरोधः स्यादिति चेन्न, आपाततो विरोधमाश्रित्य न्यायविवरणभाष्ययोः प्रवृत्तिसम्भवात्। तदनुसारेण टीकाया अपि प्रवृत्तेः। तत्त्वप्रदीपस्य च वस्तुस्थित्या प्रवृत्तत्वात् ॥

देवानां ज्ञानादिकर्मणि सहकार्यन्तरत्वेन प्रजा विधीयन्ते । यथा प्रजावतो राज्ञः प्रजाः सहकारित्वेन विधीयन्ते । यथा वाऽऽचार्यस्य शिष्याः ।

कोऽसौ तृतीयः पक्ष इत्यतस्तत्प्रदर्शनार्थं प्रवृत्तं सहकार्यन्तरविधिरित्यंशमपेक्षितोपस्कारेण व्याचष्टे- **देवानामिति ॥** सहकार्यन्तरत्वेनेत्यनेन सूत्रे भावप्रधानो निर्देशः तृतीयातत्पुरुषश्चेत्युक्तं भवति । सूत्रे भाष्ये च आचार्यापेक्षया प्रजानां सहकार्यन्तरत्वात्तदन्तरशब्दप्रयोगः । केचित्तु अन्तरशब्दो विशषार्थकः, स चानुग्राह्यत्वरूप इत्याहुः । विधीयन्त इत्यनन्तरं यत इति शेषः । अस्यात उभयोरपि महदल्पफले स्त इत्युपस्कारेणेतिशब्दाध्याहारेण च तृतीय इत्यनेनान्वयः । तत्र देवानां प्रजाकृतपुण्यफलभात्त्वमेव, न तु पापफलभात्त्वं तत्फलं त्वसुराणामिति विवेको द्रष्टव्यः । कथं विधिरित्यतः प्रवृत्तं तद्वतो विध्यादिवदित्यंशं व्याचष्टे - **यथेति ॥** तद्वत इत्यस्य व्याख्या प्रजावत इति । तस्य विवरणम्- **राज्ञ इति ॥ सहकारित्वेनेति ॥** पालनकर्मणीति शेषः । तद्वत इति प्रकारान्तरेण व्याचष्टे- **आचार्यस्येति ॥** शिष्यवत इत्यादावुपस्कर्तव्यम् । शिष्याः सहकारित्वेन विधीयन्त इति सम्बन्धः । अत्राप्यत उभयोरपि महदल्पफले स्त इति वाक्यशेषः । तेन सौत्रादिशब्दार्थ उक्तो भवति । यथा प्रजावत इत्यादेः शिष्याः इत्यन्तस्य तथाशब्दाध्याहारेण देवानामित्यादिनाऽन्वयः ।

वाराहे च –

'ज्ञानादिदानं देवानां विष्णुना साधु चोदितम् ।
वेदे च तेषां विहितं तत्राचार्यो महत्तरः ॥
विहितस्सहकारित्वे सहकार्यन्तरं प्रजाः ।
पातृत्वेन यथा राज्ञो यथा शिष्या गुरोरपि ॥

तस्माच्छ्रुतं फलं तासामाचार्याणां महत्तरम् ।
ततो महत्तरं प्रोक्तं देवानामुत्तरोत्तरम् ॥' इति ॥ ४६ ॥

अत्रैवार्थे स्मृतिमाह- **वराहे चेति** ॥ देवानां प्रजाभ्यो 'साधु' सम्यक्-साक्षादिति वा ज्ञानादिदानं विष्णुना 'चोदितं' आज्ञप्तम् । आदिशब्देन मोक्षादिर्गृह्यते । 'तेषां' देवानां वेदे विहितं चेति चशब्दान्वयः । 'तत्र' स्व-विहिते ज्ञानदाने 'आचार्यो' गुरुः 'महत्तरो' महान् मुख्यः । स्वार्थे तरप् । 'सहकारित्वे' सहकारित्वेन तद्विषये वा विहितः । सहकार्यन्तरं प्रजा इति पूर्वोत्तराभ्यां सम्बध्यते । तत्र दार्ष्टान्तिके अन्तरशब्दोऽमुख्यान्यपरः, दृष्टान्ते व्यक्तिविशेषार्थकः । अत एव प्राक् स्ववाक्ये सहकारित्वेनेत्येतावदेवोक्तम् । राज्ञः पातृत्वेन निमित्तेन प्रजास्तस्य सहकार्यन्तरमित्यन्वयः । पालने व्याख्याने चेति क्रमेण शेषः । तस्मादेवानां ज्ञानदाने प्रजानां सहकारिमात्रत्वादाचार्याणां मुख्यसहकारित्वात्तासां प्रजानां 'यावच्छ्रुतं' यावत्प्रमाणसिद्धं तावत्फलं भवति । अतो 'महत्तरं' महत्फलं आचार्याणां भवति । 'ततः' आचार्यात् 'देवानां' ब्रह्मान्तानां 'उत्तरोत्तरं' महत्तरं मुक्तावष्टगुणं शिष्याद्गुरुराप्नोति' इत्युक्तरीत्याऽतिशयितं फलं भवतीत्यर्थः । इति वाराहे इत्यन्वयः । न केवलं सूत्रकृतेति चशब्दार्थः । वाराह इत्यनन्तरं देवानामित्यादिनोक्तमभिहितमिति वाक्यशेषः ।

सूत्रार्थस्तु 'तत्' वक्ष्यमाणं 'पक्षेण' पक्षत्वेन 'तृतीयं' तृतीयः पक्षः । स च स्वस्य भगवतो बादरायणस्यैव पक्षः, औडुलोमिना ज्ञातः । कोऽसौ ? यो देवानां स्वविहिते ज्ञानदाने कर्मणि प्रजानां 'सहकार्यन्तरविधिः' यद्देवैरा-चार्याणां सहकारित्वेन प्रजानां सहकार्यन्तरत्वेन कारणम्, अत एवोभयोः फलवैलक्षण्यं च । तत् कथं ? 'तद्वतो विध्यादिवत्' यथा प्रजावतो राज्ञः शिष्यवतो गुरोश्च पालने व्याख्याने च प्रजानां शिष्याणां च सहकारितया विधिः तथेति । आदिशब्दो गुरां राज्ञश्च महत्फलमिति सूचयति ।

॥ इति फलश्रुत्यधिकरणम् ॥ ७ ॥

॥ ८. कृत्स्नभावाधिकरणम् ॥

(आश्रमिषु यतय एव उत्तमाः)

सू— ॐ ॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ॐ ॥ ४७ ॥

'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधत्' इत्युक्त्वा 'न च पुनरावर्तते न च पुनरावर्तते' (छा. ८.१५१) इति गृहिणोपसंहारः क्रियते । तस्माद् गृहस्थस्यैवोत्तमत्वमिति न वाच्यम् । यतः कृत्स्नगृहस्थान् देवानपेक्ष्यैवोपसंहारः क्रियते ।

अत्राधिकारणे ब्रह्मज्ञाने विशेषाधिकारिणां यतीनां सर्वाश्रमिभ्योऽतिशयसमर्थनेन ज्ञानमहिमा वर्ण्यते । पूर्वपक्षादिप्रदर्शनाय सूत्रं पठति- **कृत्स्नेति ॥** अत्र गृहिणोपसंहार इत्यंशसूचितं सयुक्तिकपूर्वपक्षमाह- **कुटुम्ब इति ॥** कुटुम्ब इत्यतः प्राक् तत्रेति, उक्त्वेत्यतः प्राक् मोक्षमिति चोपस्कर्तव्यम् । गृहिणेत्यावर्तते । षष्ठ्यर्थे तृतीया । उपसंहार उपनिषत्समापनम् । तथाचेत्थं योजना- गृहस्थस्यैव मुक्तावुत्तमत्वं, कुतो ? यस्मात् 'तत्र' छन्दोगोपनिषदि 'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि प्रतिष्ठाप्याहिंसन् सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते' इति 'गृहिणा' गृहिणः गृहस्थस्यैव मोक्षमुक्त्वा 'न च पुनरावर्तते' इति 'गृहिणोपसंहारः' तद्विषयकोपसंहारः क्रियते तस्मादिति । न ह्याधिक्याभावे सर्वेषा मोक्षे समाने विशिष्योक्तिर्युक्तेति भावः । उपसंहारपदप्रयोगेनास्य वाक्यस्याधिक्ये तात्पर्यं सिद्धमिति ज्ञापितम् । उपसंहारस्य तात्पर्यनिर्णायकत्वात् । श्रुत्यर्थस्तु– 'यथाविधानं' विधिमनतिक्रम्य 'आचार्यकुलात्' वंशात् वेदमधीत्य 'यथाविधानं' सेवारूपं कर्म 'अतिशेषेण'

अशेषेण अभिसमावृत्य' कृत्वा 'कुटुम्बे' गृहस्थाश्रमे वर्तमानः शुचौ देशे स्थित्वा 'स्वाध्यायं' वेदमधीयानो 'धार्मिकान्' धर्मसम्बन्धिनो व्यापारान् 'विदधत्' कुर्वन् तादृशजनान् पुत्रादीन् विशेषेण धारयन्निति वा 'आत्मनि' परमात्मनीन्द्रियाणि 'सम्प्रतिष्ठाप्य' नियम्य 'तीर्थेभ्यो' यज्ञेभ्यः 'अन्यत्र' तानि विना सर्वाणि भूतान्यहिंसन् यावदायुषं स्वात्मानमेवं प्रवर्तयन् परमात्मानं दृष्ट्वाऽथ परब्रह्मलोकं 'अभिसम्पद्यते' प्राप्नोति। स्वर्गं प्राप्त इवायं पुनरावर्तते किं ? नेत्याह- **न चेति** ॥ चोऽवधारणे। कदाचिदपि केनापि निमित्तेन नैवावर्तत इति। श्रुतौ कुटुम्बीति क्वचित् पाठः तत्त्वप्रदीपविरुद्धः। पूर्वपक्षं प्रतिषेधति- **न च वाच्यमिति** ॥ कुतो नेत्यतस्तत्र पूर्वपक्षहेतोरन्यथा-सिद्ध्युक्तिपरं कृत्स्नभावादिति सूत्रांशं हेतुत्वेन व्याचष्टे- **यत इति** ॥ कृत्स्न-गृहस्थानिति हेतुगर्भम्। कृत्स्नाः सम्पूर्णाः गृहस्थधर्मा येषां ते तथोक्ताः। अस्य विवरणम्- **देवानिति** ॥ अनेन कृत्स्नो भावो गृहस्थधर्मो यस्य देववर्गस्य कृत्स्नस्य गृहस्थधर्मस्य भावो यस्मिन्निति वा स तथोक्त इति सौत्रपदं व्याख्यातं भवति। सूत्रे एकवचनं जात्यभिप्रायम्। 'अपेक्ष्य' विषयीकृत्येत्यनेन सूत्रे पञ्चमी ल्यब्लोपनिमित्तेत्युक्तं भवति। एवेति तुशब्दार्थोक्तिः। न तु मनुष्य-गृहस्थानिति तदभिप्रायः। यतो देवाः कृत्स्नगृहस्थाः अतो योग्यत्वात्कृत्स्न-गृहस्थान् देवानपेक्ष्योपसंहारः क्रियते, न तु मनुष्यगृहस्थान्। यत एवमतो न तद्बलात् गृहस्थस्यैवोत्तमत्वमिति वाच्यमिति योजना। तथा च मनुष्योत्तमेषु स्वरूपगृहिभ्यः स्वरूपयतीनामेवोत्तमत्वम्। स्वरूपयतीनां साधनकाले कदाचिद् गृहस्थजन्मप्राप्तावपि यतिजन्मबाहुल्याद्यतित्वमेव। मानुषयतिभ्यस्तु देवानामेवोत्तमत्वं बोध्यम्। क्रियत इत्यनन्तरं न च देवानामपि यतेरुत्तमत्वं कथमिति वाच्यम्। 'कृत्स्नभावात्' कृत्स्नयतिधर्मस्य देवेषु भावात् सद्भावादिति सौत्रपदस्य व्याख्यानान्तरमुपस्कर्तव्यम्।

'कृत्स्ना ह्येते गृहिणो देवाः कृत्स्ना ह्येते यतयोऽत एतेषां न पुत्रा दायमुपयन्ति न चैते गृहान्विसृजन्त्यरागा अद्वेषा

अलोभाः सर्वभोगाः सर्वज्ञाः सर्वकर्तारः' इति पौत्रायण-श्रुतिः ॥ ४७ ॥

ननु देवानां कृत्स्नगृहस्थत्वं कृत्स्नयतिधर्मत्वं च कुतः सिद्धमित्यतः कृत्स्नभावादिति पदोपलक्षितां श्रुतिमाह- **कृत्स्ना हीति** ॥ हिः प्रसिद्धौ । तथा च प्रसिद्धा देवा एव 'कृत्स्नाः' पूर्णाः 'गृहिणो' गृहस्थाः । एते देवाः कृत्स्नाः यतय इति प्रतिज्ञाद्वयम् । तत्र यतित्वसाधकमाह- **अत इति** ॥ 'अतः' कृत्स्नयतित्वादेव 'एतेषां' देवानां पुत्राः 'दायं' विभागात्पूर्वं पित्रादि-सम्पादितद्रव्यादि दायः तं नोपयन्ति' न प्राप्नुवन्तीत्यर्थः । तथा च यथा यतिपुत्राणां यतिसम्पादितप्राप्त्यभावः, एवं इन्द्रादिदेवपुत्राणां जयन्तप्रभृतीनां इन्द्राद्यैश्वर्यप्राप्त्यभावोऽपीति देवानां यतित्वं सिद्धमिति भावः । यथोक्तं द्वितीयतात्पर्ये–

अदायादास्तु पुत्राणामुद्रिक्तज्ञानचक्षुषः ।
नारायणपरा देवाः ..... ॥ इति ॥ (भा.ता. २.६.१९)

गार्हस्थ्यसाधकमाह- **न चेति** ॥ एते देवाः 'गृहान्' गृहस्थाश्रमं भवनं वा न विसृजन्तीत्यर्थः । प्रसिद्धगृहस्था अपि तथेति भावः । अरागा इत्यादि-विशेषणानि त्रीणि यतित्वस्यैवोपपादकान्तराणि । पुनर्गार्हस्थ्ये साधनान्तर-माह- **सर्वभोगा इति** ॥ पुनर्यतित्वे उपपादकमाह- **सर्वज्ञा इति** ॥ यथा यतीनां गृहिवद्व्यासङ्गाभावादधिकज्ञानसम्पादनं विद्यते एवं देवानां सार्वज्ञं वर्तत इत्यतोऽपि तेषां यतित्वमिति भावः । पुनर्गार्हस्थ्ये साधकान्तरमाह- **सर्वकर्तार इति** ॥ पुत्रकृत्त्वादिसर्वकर्तार इत्यर्थः । अत्र श्रुतौ कृत्स्ना यतय इति यतित्वस्याप्युक्तिर्देवानामपि यत्यपेक्षया कथमुत्तमत्वमिति शङ्कानिरासाय । गार्हस्थ्ययतित्वसाधकहेतूनां व्यामिश्रोक्तिस्तु देवेषु तयोरविरोध इति प्रति-पादनायेति ध्येयम् । **इतीति** ॥ इति पौत्रायण श्रुतिर्देवानां कृत्स्नगार्हस्थ्ययतित्वे आहेति न हेत्वसिद्धिरिति वाक्यशेषः । तथाचायं सूत्रार्थः - यतः यः 'कुटुम्बे'

इत्यादिना गृहिणो मोक्षमुक्त्वा 'न च पुनरावर्तते' इति 'गृहिणा' गृहिणो गृहस्थाश्रमिणः 'उपसंहारः' उपनिषत्समापनं सः 'कृत्स्नभावात्तु' कृत्स्न-गृहस्थधर्मवतो देवानपेक्ष्यैव कृतः, अतो यतेरेव सर्वाश्रमिषु उत्तमत्वं, न गृहिण इति सिद्धान्तवादस्य न तद्विराध इति वाक्यशेषः। देवानपेक्ष्येति कुतः ? तेषां 'कृत्स्नभावात्' कृत्स्नगृहस्थधर्मवत्त्वेन गृहिविषयकोपसंहारयोग्यत्वात्। न च देवानामपि यतेः सकाशादुत्तमत्वं कथमिति वाच्यम्। 'कृत्स्नभावात्' कृत्स्नस्य सम्पूर्णयतिधर्मस्य तेषु सद्भावात्। न चाश्रमद्वयसत्त्वे मानाभावः। 'कृत्स्न-भावात्' कृत्स्नोभयभावश्रुतेरिति।

सू— ॐ ॥ मौनवदितरेषामप्युपदेशात् ॥ ॐ ॥ ४८ ॥

न चाश्रमद्वयमेव देवानाम्। 'देवा एव ब्रह्मचारिणो देवा एव गृहस्था देवा एव वनस्था यथा ह्येते मुनय एव सर्ववर्णाः सर्वाश्रमाः सर्वं ह्येते कर्म कुर्वन्ति' इति कौण्ठ-रव्यश्रुतौ यतित्वदृष्टान्तेन अन्येषामप्युपदेशात् ॥ ४८ ॥

युक्त्यन्तरेण मानुषयतिभ्यो देवानामुत्तमत्वं समर्थयत्सूत्रमुपन्यस्यति-**मौनवदिति** ॥ अत्रापिशब्दो दृष्टान्तदार्ष्टान्तिकयोः समुच्चये कैमुत्ये च। अप्यन्त आवर्तते। भावस्सिद्ध इति शेष इत्याशयेन सशेषाप्यन्तसूत्रांशोक्तं साध्यमाह- **न चेति** ॥ **आश्रमद्वयमेवेति**। गृहयत्याश्रमरूपाश्रमद्वय-कर्मित्वमेवेत्यर्थः। न तु सर्वाश्रमकर्मित्वमित्येवशब्दार्थः। देवानामित्यनन्तरं किन्तु सर्वाश्रमकर्मित्वमपीति प्रतिज्ञाशेषः। एतत्सूचनाय चशब्दः। कुत इत्यतस्तद्धेतुत्वेनोपदेशपदोक्तश्रुत्युदाहरणपूर्वकं मौनवदितरेषामप्युपदेशा-दित्यंशं व्याचष्टे- **देवा इति** ॥ देवा एव ब्रह्मचारिण इत्याद्युक्तार्थस्य 'यथा ह्येते मुनयः' इत्यादिनोपपादनं क्रियते। अत्र 'यथा ह्येते' देवाः 'मुनयो' यतयः प्रसिद्धाः 'एवं' तथा सर्वाश्रमा इत्येवंशब्दस्य व्यवधानेनान्वये सर्वाश्रमा इति दार्ष्टान्तिकोक्तिः। एवंशब्दस्य समुच्चयार्थत्वे न केवलं यतयः, किन्तु

सर्ववर्णास्सर्वाश्रमाश्चेति स्वस्थानेऽन्वयः । सर्ववर्णास्सर्वाश्रमा इत्युभयत्र हेतुमाह- **सर्वं हीति** ॥ 'हि' यतः सर्ववर्णाश्रमोचितं कर्म कुर्वन्तीत्यर्थः । मुनेर्भावः कर्म वा मौनमित्याशयेन मौनवदित्येतद्व्याचष्टे- **यतित्वेति** ॥ कर्माप्युपलक्ष्यते । इतरेषामित्यस्य प्रतिपदम्- **यतित्वादन्येषामिति** ॥ ब्रह्मचर्यादीनामित्यर्थः । 'उपदेशात्' उक्तत्वात् । अनेन देवानां 'मौनवदितरेषामप्युपदेशात्' मौनवद्यतित्ववदितरेषामप्याश्रमधर्माणां तेषु भावः सिद्धः, न त्वाश्रमद्वयकर्मित्वमेव तेषां, तथा च यदाऽऽश्रमद्वयकर्मित्वेनैव देवानां यतिभ्य उत्तमत्वं सिद्ध्यति तदा किमु वाच्यं सर्वाश्रमकर्मित्व इति सूत्रार्थ उक्तो भवति ।

॥ इति कृत्स्नभावाधिकरणम् ॥ ८ ॥

॥ ९. अन्वयाधिकरणम् ॥

(अयोग्यानाम् उपदेशः न कर्तव्यः)

सू— ॐ ॥ अनाविष्कुर्वन्नन्वयात् ॥ ॐ ॥ ४९ ॥

'एतां विद्यामधीत्य ब्रह्मदर्शी वाव भवति । स एतां मनुष्येषु विब्रूयात् । यथा यथा ह्वै ब्रूयात्तथा तथाऽधिको भवति' इति माठरश्रुतौ विद्यादानं श्रूयते । तच्च बहूनां स्वीकरणार्थमाविष्कारेणेति न मन्तव्यम् । अन्वयात् युक्तेः । आविष्कारेऽयोग्यनामपि स्वीकारप्राप्तिः । तच्च निषिद्धम् ।

अत्राधिकरणे अपरोक्षज्ञानसङ्गतपरोक्षज्ञानस्यातिगोप्यत्वमहिमा समर्थ्यते । सूत्रं पठति- **अनाविष्कुर्वन्निति** ॥ अत्र विषयोदाहरणपूर्वकमनाविष्कुर्वन्नित्यनेन सूचितं पूर्वपक्षं दर्शयति- **एतामिति** ॥ अत्रेत्थं योजना- यतः 'एताम्' इति माठरश्रुतौ विद्यादानं कर्तव्यं श्रूयते, तथा स्वाधिक्यानुसारेण फलप्रदं चोच्यते । अतः ज्ञानदात्रा स्वस्याधिकफलार्थं तदुपयोगितया 'बहूनां'

शिष्याणां स्वीकारार्थं 'तत्' विद्यादानं 'आविष्कारेणैव' उच्चैः कार्यमिति । 'एतां' प्रकृतां 'विद्यां' ब्रह्मज्ञानसाधनवेदविद्यां 'अधीत्य' तदर्थं मत्वा ध्यात्वा वेदविद्यां विचार्येति वा 'ब्रह्मदर्शी' ब्रह्मापरोक्षज्ञानी भवति शिष्यः ह प्रसिद्धौ । वाव इत्यवधारणे । 'सः' गुरुरेतां 'मनुष्येषु' बहुजनमध्ये यथा यथाऽधिकमिति शेषः । 'विब्रूयात्' उच्चैः सम्यक् उपदिशेत् 'तथा तथा' उपदेशाधिक्यानुसारेण फलेऽधिको भवतीति श्रुत्यर्थः । एवं प्रदर्शितं पूर्वपक्षं निषेधति- **इति न मन्तव्यमिति** ॥ किन्त्वनाविष्कुर्वन्नेवोपदिशेदिति प्रतिज्ञाशेषः । कुत एतदित्यतः प्रवृत्तमन्वयादिति हेतुमनूद्य व्याचष्टे- **अन्वयादिति** ॥ 'युक्तेः' उपपत्तेः । काऽसावुपपत्तिरित्यत आह- **आविष्कार इति** ॥ सभाचत्वरादावित्यादावुपस्कार्यम् । सभाचत्वरादावुपविश्योपदेशे इत्यर्थः । **स्वीकारेति** ॥ 'स्वीकारो' विद्यास्वीकारः । नन्वयोग्यानां ग्रहणप्रसङ्गेऽपि कुतोऽनाविष्कारेण वाच्यमित्यत आह- **तच्चेति** ॥ चस्त्वर्थः । 'तत्' अयोग्येभ्यः कथनं तु श्रुत्यादिनिषिद्धमित्यर्थः ।

'मा नः स्तेनेभ्यो ये अभिद्रुहस्पदे
निरामिणो रिपवोऽन्नेषु जागृधुः ।
येषां नैतन्नापरं किं च नैकं
ब्रह्मणस्पते ब्रूहि तेभ्यः कदाचित् ॥' (ऋ.२-२३-१६) ॥

'अथोपशमेनोपरता मनुष्याः
ये धर्मिणो ब्रूहि तेभ्यः सदा नः ।
आदेवानामोहते विव्रयो हृदि
बृहस्पते न परः साम्नो विदुः ॥' (ऋ.२-२३-१६) इति ॥

तां श्रुतिमुदाहरति मान इति ॥

मा नस्स्तेनेभ्यो ये अभिद्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
येषां नैतन्नापरं किञ्चनैकं ब्रह्मणस्पते ब्रूहि तेभ्यः कदाचित् ॥
अथोपशमेनोपरता मनुष्या ये धर्मिणो ब्रूहि तेभ्यः सदा नः ।
आदेवानामोहते विव्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥

इति ऋङ्मन्त्रद्वयस्यैतरेयभाष्यसुधातत्त्वप्रदीपटीकारीत्याऽयमर्थः- एतद्वायुं प्रति विद्यादेवतानां प्रार्थनरूपं वचनम् । तथा च हे ब्रह्मणस्पते 'आसन्यं प्राणमूचिरे .... एष उ एव ब्रह्मणस्पतिः' (बृ. ३-३-२१) इति श्रुतेः ब्रह्मणो वेदस्य पते वायो ये रमणरूपत्वाद्रामो भगवान् स एव स्वामीति ज्ञानमेषामस्ति रामिणः तस्मान्निष्क्रान्ताः तस्य विमुखाः निरामिणः भगवदुत्तमत्वाज्ञानिनः, निरो निषेधार्थत्वात् निरामिणस्तदज्ञानिनः प्रत्युत तस्य जीवरूपत्वज्ञानेन तन्नीचतावेत्तृत्वात्तद्विरोधिनः । यद्वा - रामो रमणमस्यास्तीति रामी भगवान् तस्मान्निष्क्रान्ताः तस्य विमुखाः निरामिणः, अत एव तस्य रिपवः 'अन्नेषु' अन्नादिषु भोगेष्वेव 'जागृधुः' आकांक्षां चक्रुः । अकांक्षावन्त इति यावत् । ते 'अभिद्रुहस्पदे' अभितो द्रोहस्य विष्णुवैष्णवद्रोहफलस्य नित्यनिरतिशय-दुःखस्यास्पदे' आकरे तमसि स्थातुं योग्या भवन्तीति शेषः । यतोऽतस्तेभ्यः स्तेनेभ्योऽस्मान् मा वोचः न ह्यस्मच्छ्रवणवान् दुःखमर्हतीति भावः । एवमेषां एतद्वासुदेवाख्यं परं ब्रह्म न, अपरं तदपरं जगच्च नास्ति, किन्तु 'किञ्च' यत्किञ्चित् निर्गुणं ब्रह्म 'नैकं' एकविधभिन्नं सदसद्विलक्षणं अनिर्वाच्यं च जगदभिमतं 'तेभ्यो' ब्रह्मस्तेनेभ्यो 'नः' अस्मान् मा ब्रूहि । अथ किं नाम ? हे 'बृहस्पते' 'वाग्धिबृहती' (छा. १-२-११) इति श्रुतेः बृहत्या वाचः पते वायो ये 'शमेन' विष्णुनिष्ठया 'उप' समीपे तस्मिन्नेव 'रताः' मनुष्याः मननशीलाः 'धर्मिणो' निष्कामकर्मिणः ये च देवानां 'व्रयः' नपुंसकं पद-मेतत् । वरं नियामकं च ब्रह्म हृदि वि आ ओहते व्यूँहते वहन्ति । सर्वत्र समत्वात् 'साम्नो' विष्णोः सकाशात् 'परः' परं उत्तमं च न विदुः तेभ्यो नः अस्मान् सदा ब्रूहीति । ऐतरेयभाष्ये तु 'तदेव' सामैव वासुदेवादिरूपेण 'हृदा'

स्वेच्छया 'ओहते' प्राप्नोति सर्वमिति ओहते इत्येतत् भगवद्विषयतया व्याख्यातम्। यद्यपि भाष्योदाहृतऋग्द्वये पूर्वोत्तरार्धयोरेव पाठः सांव्यावहारिकः। तथापि 'मा नस्स्तेनेति पूर्वासु ह्यूनता दृश्यतेऽर्थतः' इति ऋग्भाष्योक्तेः मध्यगतं 'येषां नैतत्, अथोपशमेन' इत्यर्धर्चद्वयमवान्तरवेदे अन्तर्हितं मूलवेदे पठितमिति ध्येयम्। इतीत्यस्य निषिद्धमित्यनेनान्वयः।

विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि।
अनार्यकायानृजवे शठाय मा स्म ब्रूया ऋजवे ब्रूहि नित्यम्॥
इति च॥ ४९॥

श्रुत्यन्तरं पठति- **विद्येति॥** 'ब्राह्मणं' वायुं प्रति विद्यादेवता आजगाम। आगत्य च हे वायो मां'गोपाय' गोपय रक्ष तेऽहं 'शेवधिः' निधिरस्मि। मां 'अनार्यकाय' भागवते-

'तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्।
मत्कृते त्यक्तकर्माणः त्यक्तस्वजनबान्धवाः॥
मदाश्रयः कथाहृष्टाः .....॥' (भा.ग.३.२७.२१)

इत्यादिनोक्तार्यकलक्षणरहिताय 'अनृजवे' अविपरीतचित्तादिप्रवृत्तिमान् ऋजुः तद्भिन्नाय 'शठाय' मूर्खाय दोषदृशो वा मा स्म ब्रूयाः। माशब्दोऽयं निषेधार्थः, न माङ्। तर्हि कस्मै वाच्येत्याकांक्षायामाह- **ऋजव इति॥** आर्यकाद्युपलक्षणमेतत्। तथाचार्यकाय अशठाय ऋजवे 'नित्यं' नियमेन मां ब्रूहीति प्रार्थयामासेति श्रुत्यर्थः। अत्रापि इतीत्यस्य निषिद्धमित्यनेनान्वयः। श्रुतिसमुच्चये चः।

॥ इत्यन्वयाधिकरणम्॥ ९॥

॥ १०. ऐहिकाधिकरणम् ॥

(प्रारब्धकर्मप्रतिबन्धाभावे श्रवणमननादिभिः तज्जन्मन्येव ज्ञानं सम्भवति, अन्यथा जन्मान्तरे)

सू- ॐ ॥ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ॐ ॥५०॥

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'(बृ. ४-४-५) इति दर्शनार्थं श्रवणादि विधीयते । तच्च दर्शनमैहिकमेव प्रारब्धप्रतिबन्धाभावे ।

अत्राधिकरणे अपरोक्षज्ञानस्य प्रतिबन्धाभावे साधनसम्पत्तिजन्मन्येवोत्पत्तिः समर्थ्यते । साधनसम्पूर्तावपि ज्ञानानुदये कारणाभावात् साधनसम्पूर्तिजन्मन्येव ज्ञानस्य भाव्यत्वात् । तदभावे तु कदाऽपि तदनुदय इति पूर्वपक्षे सिद्धान्तयत्सूत्रं पठति- **ऐहिकमिति** ॥ अत्र तदिति व्यस्तं समस्तं च । तत्र व्यस्तमावृत्तं विपरिणतं च श्रुतिप्रकृतपरामर्शीत्याशयेन तत्पदार्थं वदन् तस्यैहिकपदेनान्वयं प्रदर्शयति- **आत्मेति** ॥ तच्च तद्दर्शनं चेति विग्रहः । दर्शनं ब्रह्मदर्शनम् । चशब्दो विशेषणसमुच्चये । तथा च 'आत्मा' इति श्रुतौ यद्दर्शनार्थं श्रवणादि विधीयते तच्छ्रवणादिसाध्यत्वेन श्रुतं दर्शनं 'ऐहिकं' इह जन्मनि भवमेव यस्मिन् जन्मनि श्रवणादिसम्पत्तिः तज्जन्मभवमेव, न तु तस्मिन् जन्मन्येवेति नियम इत्यर्थः । न च क्वचिच्छ्रवणादिसम्पत्तिजन्मनि ज्ञानानुदयविरोध इत्यतः प्रवृत्तस्याप्रस्तुतप्रतिबन्ध इत्यस्यार्थमाह **प्रारब्धेति** ॥ ज्ञानोदयविघटकत्वेन प्रसक्तप्रतिबन्धकाभावे इत्यर्थः । तथा च प्रतिबन्धकाभावे, तद्दर्शनमैहिकमेव प्रतिबन्धे तु जन्मान्तर इति अनियमाभ्युपगमात् । क्वचित्कारणे सत्यपि कार्यानुदयस्य प्रतिबन्धकप्रयुक्तत्वान्नोक्तदोष इति भावः । अनेन सूत्रे ऐहिकमित्यावर्तते तच्च सावधारणम् । तदिति व्यस्तमावर्तते । तथाच तच्छ्रुतौ श्रवणादिफलत्वेनोक्तं ब्रह्मदर्शनमैहिकमेव । न च क्वचित्तदभावविरोधः । यतस्तद्दर्शनं प्रस्तुतप्रतिबन्धे जन्मान्तरे

भवं अप्रस्तुतप्रतिबन्धे त्वैहिकमेवेत्यनियमाभ्युपगमोऽत इति सूत्रखण्डार्थ उक्तो भवति।

'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य
इहैव दृष्टिं परमस्य विन्देत्।
यद्यारब्धं कर्म निबन्धकं स्यात्
प्रेत्यैव पश्येद्योगमेवान्ववेक्ष्य॥'

इति सौपर्णश्रुतौ तद्दर्शनात्॥

उभयं कुत इत्यतः तद्दर्शनादित्येतद्व्याचष्टे- **श्रुत्वेति॥** 'आत्मानं' परमात्मानं श्रुत्वा अथ 'मतिपूर्वं' मननपूर्वकं 'उपास्य' ध्यात्वा 'इहैव' श्रवणादिसम्पत्तिजन्मन्येव 'परमस्य' विष्णोर्दर्शनं 'विन्देत्' प्राप्नुयात्। प्रारब्धप्रतिबन्धाभाव इति शेषः। तत्सत्त्वे त्वाह- **यदीति॥** 'निबन्धकं' नितरां बन्धकं आरब्धं ज्ञानप्रतिबन्धकं कर्म यदि स्यात्। तर्हीति शेषः 'प्रेत्य' अस्माच्छरीरान्मृत्वा

ज्ञानं तु योगमुद्दिष्टं युज्यते तेन यत्सुखम्।
क्वचिद्योग उपायस्स्यात्क्वचिच्चित्तनिरोधनम्॥

इत्यभिधानाद्योगशब्दोक्तं श्रवणाद्युपायं पुनः किञ्चित् 'अन्ववेक्ष्य' अपेक्ष्यैव कृत्वैव परमस्य दृष्टिं विन्देदित्यर्थः। श्रुतौ दर्शनादित्यनेन तस्यां श्रुतौ तस्यार्थस्य प्रतिबन्धकसदसत्त्वयोरैहिकानन्तर्यकत्वरूपार्थस्य दर्शनादुक्तत्वादिति सूत्रखण्डार्थ उक्तो भवति।

'अनादिजन्मसम्बन्धं निर्भेत्तुं पापपञ्जरम्।
यावत्या सेवया शक्यं तावत्कार्यं न संशयः॥
यावद्दूरे स्थितो गम्यात्तावद्गन्तव्यमेव हि।
इह जन्मान्तरे वाऽपि तावत्यैव तु दर्शनम्॥'

श्रुतिसिद्धार्थे स्मृतिं चाह- **अनादीति॥** पञ्जरशब्दोऽस्त्रीलिङ्गः पतत्रि-

गतिप्रतिबन्धकनीडवाची । तथा च प्रवाहतोऽनादिजन्मभिः सम्बन्धो यस्य तत्, अनादिजन्मसम्बन्धं अनादिजन्मकारणं पापमेव पञ्जरसदृशं पापरूपज्ञान-प्रतिबन्धकं 'यावत्या सेवया' यावज्जन्मभवेन सेवनेन 'निर्भेत्तुं' विदारयितुं शक्यं तावत्सेवनं कार्यमित्यर्थः । अनादीति व्यस्तं वा पदं पापविशेषणम् । तथात्वे जन्मसम्बन्धमिति कर्मणि घञन्तं, जन्मभिः सम्बन्धं यदनादिपापं तदेव पञ्जरमित्यर्थः । अत्र निदर्शनमाह- **यावदिति** ॥ 'गम्यात्' प्राप्याद्ग्रामादेस्तदपेक्ष्य यावद्दूरे स्थितो जनः तावद्दूरं तेन गन्तव्यमिति हि प्रसिद्धमित्यर्थः । ननु 'तद्यथा पुष्करपलाशे' (छा. ४.१४.३) 'यथैषीकातूलम्' (छां.५.२४.३) इत्यादिश्रुतेः ब्रह्मदर्शनैकसाध्यः पापपञ्जरनिर्भेदः कथं सेवया भवेदित्यत आह- **इहेति** ॥ इह सेवाजन्मनि जन्मान्तरे वा यावत्या सेवया पापपञ्जरं निर्भेत्तुं शक्यं तावत्यैव सेवया दर्शनं भवति । अथ पापपञ्जरनिर्भेदो भवतीत्यर्थः । तुशब्दः प्रतिबन्धकाभावभावयोरिह जन्मान्तरे वेति विशेषद्योतकः । तथा च पापपञ्जरनिर्भेदस्येह जन्मनि जन्मान्तरे वा सेवासाध्यदर्शनसाध्यत्वाभ्युपगमात् साक्षात्सेवासाध्यत्वानभ्युपगमात् न श्रुतिविरोध इति भावः ।

'श्रवणं मननं चैव निदिध्यासनमेव च ।
परे गुरौ च या भक्तिः परिचर्यादिकं हरेः ।
एषां सेवेति सम्प्रोक्ता यया तद्दर्शनं भवेत् ॥'

इति वृहत्संहितयाम् ॥ ५० ॥

ननु श्रवणाद्येकसाध्यं ज्ञानं कथं शुश्रूषारूपसेवया स्यादित्यत आह- **श्रवणमिति** ॥ चशब्दः परस्परसमुच्चये । एवशब्दावेवमित्यर्थौ । 'परे' परमात्मनि विषये परिचर्या पूजा । आदिपदान्नमनादिग्रहः । प्रथमयच्छब्दस्य या भक्तिः यच्च परिचर्यादिकमित्युभयत्रान्वयः । अयमेव न सर्वत्र सेवाशब्दार्थः, किन्तु ज्ञानसाधनविषयैवेत्याह- **ययेति** ॥ यया तद्दर्शनं ब्रह्मदृष्टिर्भवति सा सेवा 'एषा' श्रवणादिरूपा सम्प्रोक्तेत्यर्थः । एवं च यावत्या सेवयेत्यत्र सेवा-

शब्दार्थत्वेन श्रवणादिसेवैव सम्प्रोक्ता, न शुश्रूषा, अतो न ज्ञानस्य श्रवणादि-साध्यत्वप्रतिपादकात्मा वा अरे इत्यादिप्रमाणविरोध इत्यर्थः । बृहत्संहितायामुक्तत्वादुक्तं युक्तमिति शेषः ।

॥ इत्यैहिकाधिकरणम् ॥ १० ॥

॥ ११. मुक्तिफलाधिकरणम् ॥

(ज्ञानिनोऽपि प्रारब्धकर्मप्रतिबन्धाभावे तच्छरीरपातानन्तरमेव मोक्षः)

सू— ॐ ॥ एवं मुक्तिफलानियमस्तदवस्थाव-धृतेस्तदवस्थावधृतेः ॥ ॐ ॥ ४१ ॥

एवमेव प्रारब्धकर्माभावे शरीरपातानन्तरमेव मोक्षः । तद्भावे जन्मान्तराणीत्यनियमः ॥

अत्राधिकरणे ब्रह्मज्ञानस्य स्वोत्पत्तिजन्मानन्तरमेव प्रतिबन्धकाभावे मुक्तिसाधनत्वमहिमा वर्ण्यते । तत्र कारणे सति कार्यानुदये हेत्वभावाद्यच्छरीरे ज्ञानमुत्पन्नं तच्छरीरपातानन्तरमेव मोक्ष इति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्यति- **एवमिति** ॥ अत्र एवं मुक्तिफलानियम इति साध्यांशं एवकारगर्भिततया व्याचष्टे- **एवमेवेति** ॥ यथा ज्ञाने चानियमः, एवं मुक्तिफलेऽप्यनियम एव न तु नियम इत्यर्थः । ननु निष्कारणमनियमे कदाऽपि मोक्षाभावप्रसङ्ग इत्यत एवमित्येतद्विवृणोति- **प्रारब्धेति** ॥ प्रारब्धकर्माख्यमुक्तिप्रतिबन्धकाभाव इत्यर्थः । 'तद्भावे' प्रतिबन्धकसत्त्वे जन्मान्तराणीति द्वितीयाबहुवचनं, बहुत्वमविवक्षितम् । जन्मान्तरमित्यर्थः । प्राप्यैवेति शेषः । तथा च प्रारब्धभावाभावयोरनियमकारणत्वात् नोक्तदोष इति भावः ।

'धर्मी स्वर्गं विधर्मी निरयमेत्येव ब्रह्मसंस्थोऽमृतत्वमेत्येव ब्रह्मसंस्थोऽमृतत्वमेत्येव' इति ब्रह्मसंस्थस्य मोक्षस्यैवावधारणात् ।

ननु कुतोऽत्र प्रतिबन्धककल्पनमित्यतः तत्र हेतुत्वेन तदवस्थावधृतेरित्यंशं तच्छ्रुत्युदाहरणपूर्वकं व्याचष्टे- **धर्मीति** ॥ 'धर्मी' पुण्यकर्मवान् 'विधर्मी' पापकर्मवान् तत्कर्ता 'ब्रह्मसंस्थो' ब्रह्मदर्शी 'अमृतत्वं' मुक्तिं 'एति' प्राप्नोति एवशब्देन क्वचित् तदयोगं व्यवच्छिनत्ति एत्येव ब्रह्मसंस्थोऽमृतत्वमिति ॥ द्विर्वचनं तात्पर्यद्योतनार्थम् । इतीत्यनन्तरं श्रुताविति शेषः । 'ब्रह्मसंस्थस्य' ब्रह्मदर्शिन ब्रह्मज्ञानस्येति यावत् । 'मोक्षस्यैव' मुक्तिहेतुत्वस्यैव । आवर्तनीयोऽयमेवशब्दः । तथा चैवशब्देन मुक्तिहेतुत्वस्यैवावधारणात् एतज्जन्मन्येवेत्यनवधारणादित्यर्थः । अनेन प्रतिबन्धकदशायां सति ज्ञाने मोक्षाभावेनावधारणानुपपत्तिः । प्रतिबन्धकाभावेऽपि ज्ञाने सति मोक्षाभावे तु ब्रह्मसंस्थस्य तद्दर्शनस्य मोक्षहेतुत्वावधारणानुपपत्तिरेव । अतः श्रौतमोक्षहेतुत्वावधारणान्यथाऽनुपपत्या प्रतिवन्धककल्पना युक्ता । तथा च प्रतिबन्धकसद्भावोऽनियमहेतुः । तदाक्षेपकं चावधारणं, तस्यासिद्धिनिवारिका श्रुतिरित्युक्तं भवति । अथवा- ज्ञानिनः तद्देहपातानन्तरमेव मोक्षो जन्मान्तराणि प्राप्य वा इति मोक्षकालनियमे एव श्रुतिः प्रमाणम् । अत्र पक्षे श्रुतौ ज्ञानिनो मोक्षस्यैवावधारणादेतद्देहपातानन्तरमेवेत्येवंरूपनियमस्यानवधारणान्नियमायोगस्याव्यवच्छेदान्नियमानुक्तेरितिहेतुवाक्यार्थस्यैवं मुक्तिफलानियम इति साध्येनान्वयः । अत्र भाष्यस्थैवकारोऽन्ययोगव्यवच्छेदकः, श्रुतिगतस्त्वयोगव्यवच्छेदक इति द्रष्टव्यम् ।

'विद्वानमृतमाप्नोति नात्र कार्या विचारणा ।
अवसन्नं यदारब्धं कर्म तत्रैव गच्छति ॥
न चेद्बहूनि जन्मानि प्राप्यैवान्ते न संशयः ॥'

इति नारायणाध्यात्मे ॥ ५१ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये
तृतीयाध्यायस्य चतुर्थः पादः ॥

ननु श्रुतौ नियमानुक्तिमात्रं नानियमसाधकमित्यतः स्मृतिमुदाहरति- **विद्वानिति** ॥ 'विद्वान्' ब्रह्मापरोक्षज्ञानी 'अमृतं' मुक्तिमाप्नोत्येव । नात्र सन्देहः कार्य इत्यर्थः । परन्तु यस्मिन् जन्मनि ज्ञानमुत्पन्नं तदेहपातानन्तर-मेवेति न नियम इत्याह- **अवसन्नमिति** ॥ 'यत्' यदि आरब्धं कर्म 'तत्रैव' तदेह एव 'अवसन्नं' पर्यवसन्नं तदेहपातानन्तरमेवामृतं 'गच्छति' प्राप्नोति । अवसन्नं न चेत् बहूनि जन्मानि प्राप्यैव 'अन्ते' प्रारब्धक्षयान्ते अमृतं गच्छति नात्र संशय इत्यर्थः । नारायणाध्यात्म इत्यस्य 'प्रारब्धकर्माभावे' इत्यादिनोक्तो नियमः युक्त इति पूर्वेणान्वयः । सूत्रे फलशब्दो ज्ञानफलेषु मोक्षस्य प्राधान्यज्ञापनार्थः । तदुक्तं तत्त्वप्रदीपे- सर्वपुरुषार्थप्राप्तिदर्शनादित्युक्तेऽपि इतरेषामानुषङ्गिकत्वं साक्षात्फलत्वं मुक्तेरेवेति **फलशब्द** इति । द्विरुक्ति-स्त्वेतदध्यायार्थस्य प्रामाणिकत्वसूचनार्थेति द्रष्टव्यम् । तदुक्तमैतरेयभाष्ये-

'सर्वप्रमाणसिद्धत्वं वक्तुमाध्यायमूलतः ।
अध्यायान्ते द्विरुक्तिस्स्यात्पूर्वोक्तस्यावधारणे ॥' (ऐ.भा.द्वि.प्र.) इति ॥

'अवधारणे' निर्णायकग्रन्थे । 'आध्यायमूलतः' अध्यायमूलमारभ्य-पूर्वोक्त-स्यार्थस्य सर्वप्रमाणसिद्धत्वं वक्तुं अध्यायान्ते द्विरुक्तिस्स्यादित्यर्थः ।

॥ इति मुक्तिफलाधिकरणम् ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणा
श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीजगन्नाथयतिना कृतायां
श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां तृतीयाध्यायस्य चतुर्थः पादः ॥
॥ तृतीयाध्यायस्समाप्तः ॥

॥ सूत्रदीपिका ॥

तृतीयाध्यायस्य प्रथमः पादः

॥ तदन्तराधिकरणम् ॥ १ ॥

१. ॐ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॐ

तदन्तरप्रतिपत्तौ शरीरान्तरप्राप्त्यर्थम्। जीवः **सम्परिष्वक्तः** पृथिव्यादिभूतसंयुक्त एव । **रंहति** इमं देहं परित्यज्य लोकान्तरं गच्छतीति ज्ञायते । कुतः? **प्रश्ननिरूपणाभ्यां** 'वेत्थ यथा'[१] इति श्वेतकेतुमृषिं प्रति प्रवाहणस्य राज्ञः प्रश्नात् । तथा 'इति तु'[१] इति प्रवाहणोक्तपरिहाराच्चेत्यर्थः ॥ १ ॥

॥ त्र्यात्मकत्वाधिकरणम् ॥ २ ॥

२. ॐ त्र्यात्मकत्वात्तु भूयस्त्वात् ॐ

जीवः सर्वभूतपरिष्वक्त एव गच्छति । नाद्भिरेव । आप इति विशेषोक्तिस्तु **त्र्यात्मकत्वात्** अपां क्षितिसलिलानलात्मकत्वात् । तेष्वप्यपां **भूयस्त्वात्** बाहुल्यात् युज्यते । अतो न तद्विरोध इत्यर्थः ॥ १ ॥

॥ प्राणगत्यधिकरणम् ॥ ३ ॥

३. ॐ प्राणगतेश्च ॐ

भूतव्याप्तप्राणशब्दितेन्द्रियाणां जीवेन सह गमनश्रवणाच्च । जीवो भूतसम्परिष्वक्त एव गच्छतीत्यर्थः ॥ १ ॥

---

१. '**वेत्थ यथा** पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.५-३-५)

॥ अग्र्याद्यधिकरणम् ॥ ४ ॥

४. ॐ अग्र्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॐ

अग्र्यादिगतिश्रुतेः प्राणानां यत्रेति अग्र्यादीन् प्रति गमनस्योक्तेर्न जीवेन सह गमनम् **इति चेन्न**। कुतः **भाक्तत्वात्** 'यत्र'[१] इति श्रुतेः प्राणभागविषयत्वादित्यर्थः ॥ १ ॥

॥ प्रथमाधिकरणम् ॥ ५ ॥

५. ॐ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॐ

प्रथमे तस्मिन्नित्युपक्रमे। **प्रथमे** द्युनामके। प्रथमाग्नौ होमश्रवणात् भूतानां जीवसाहित्यश्रवणाभावाच्च। न जीवो भूतसहितो गच्छति **इति चेन्न**। कुतः? **हि** यतः। **ता एव** प्रस्तुता आप एवोपक्रमगतश्रद्धाशब्देनोच्यन्ते। अतः तत्कुतः **उपपत्तेः** 'आपः पुरुषवचसो भवन्ति'[२] इत्युपसंहारोपपत्तेरित्यर्थः ॥ १ ॥

॥ अश्रुतत्वाधिकरणम् ॥ ६ ॥

६. ॐ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॐ

अश्रुतत्वात् भूतानां जीवेन सह गमनस्य 'अग्निं वागप्येति' इतिवत् प्रत्यक्षश्रवणाभावान्न तेषां सह गमनम् **इति चेन्न**। कुतः 'अथैनम्'[३] इति श्रुत्या **इष्टादिकारिणां** यागहोमकृताम्। **प्रतीतेः** प्रत्यक्षत एव भूतवियोगसहयोगयोरवगमादित्यर्थः ॥ १ ॥

॥ भाक्ताधिकरणम् ॥ ७ ॥

७. ॐ भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयति ॐ

---

१. '**यत्रास्य** पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः' (बृ.५-२-१३)

२. ' इति तु पञ्चम्यामाहुतावापः **पुरुषवचसो भवन्ति**' (छां.५-३-१.)

३. '**अथैनं** यजमानं किं न जहाति भूतान्येव भूतैरेव गच्छति भूतैर्भुङ्क्ते भूतैरुत्पद्यते भूतैश्चरति भूतैर्विचरति' (कौण्डिण्यश्रुतिः)

काम्यकर्मिणां उक्तममृतत्वं **भाक्तं** अमुख्यम् । कुतः **अनात्मवित्त्वात्** तेषामब्रह्मज्ञानित्वात् । वाशब्देन जिज्ञासुज्ञानिकृताकाम्यकर्मजन्यामृतत्वमपि न संसारनिवृत्तिरूपमुख्यामृतत्वरूपम् । किन्तु अन्तःकरणशुद्ध्यानन्दातिशय-रूपनिरतिशयपरममुख्यमिति पक्षद्वयं सूचयति । कुत एतत् हि यस्मात् । 'अमृतो वा'[१] इति, 'स एनमिति'[२], 'कर्मणा'[३] इति, 'आत्मानम्' इति च श्रुतिः **तथा** उक्तार्थान् दर्शयति प्रतिपादयति । तस्मादित्यर्थः ॥ १ ॥

॥ कृतात्ययाधिकरणम् ॥ ८ ॥

८. ॐ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्याम् ॐ

कृतात्यये कृतस्य कर्मणः स्वर्गादौ भोगेन **अत्यये** क्षये सति । **पुनरनुशयवान्** भुक्तशेषवानेवेमं लोकं प्रत्यागच्छतीति ज्ञायते । कुतः **दृष्टस्मृतिभ्याम्** । 'ततः शेषेण'[४] इति दृष्टशब्दितश्रुतेः । 'भुक्तशेष–'[५] इति स्मृतेश्चेत्यर्थः ॥ १ ॥

॥ यथेताधिकरणम् ॥ ९ ॥

९. ॐ यथेतमनेवञ्च ॐ

जीवेन **यथा** येन मार्गेण स्वर्गादिकम् । **इतं** प्राप्तम् । तथा तेन । **अनेवं** अन्येन मार्गेण **च** । जीव इमं लोकमागच्छतीत्यर्थः ॥ १ ॥

---

१. '**अमृतो** वाव सोमपो भवति यावदिन्द्रो यावन्मनुर्यावदादित्यः'

२. '**स एनमविदितो** न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतं यदि ह वा अप्येनं विन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते' (बृ.३–४–१५)

३. '**कर्मणा** ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणि यत एनममृतत्वं नयन्ति'

४. '**ततः शेषेणेमं** लोकमायाति पुनः कर्म कुरुते पुनर्गच्छति पुनरागच्छति'

५. '**भुक्तशेषानुशयवानिमां** प्राप्य भुवं पुनः । कर्म कृत्वा पुनर्गच्छेत्पुनरायाति नित्यशः ॥
आ चतुर्दशमाद्वर्षात् कर्माणि नियमेन तु । दशावराणां देहानां कारणानि करोत्ययम् ।
अतः कर्मक्षयान्मुक्तिः कृत एव भविष्यति ॥

॥ चरणाधिकरणम् ॥ १० ॥

१०. ॐ चरणादिति चेन्न तदुपलक्षणार्थेति काष्णाजिनिः ॐ

गतागतं न यज्ञादेर्भवति । किन्तु **चरणात्** यज्ञाङ्गभूताचारादेव । चरणाचार इति श्रुतेः **इति चेन्न** । कुतः यतः श्रुतिः **तदुपलक्षणार्था** जहत्स्वार्थलक्षणया यज्ञाचारोभयप्रतिपादिकेति **काष्णाजिनिराचार्यो** मन्यते । अत इत्यर्थः ॥१॥

११. ॐ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॐ

उपलक्षणार्थत्वे चरणशब्दस्य **आनर्थक्यम्** । कुतः रमणीयकपूयपदाभ्यामेव कर्मोपलक्षणसम्भवात् **इति चेन्न** कुतः **तदपेक्षत्वात्** तस्य साध्वसाधुयज्ञादि-मत्त्वस्य तदपेक्षत्वात् आचारादिसापेक्षत्वात् । तथाच तद्बोधार्थं तत्पदसार्थक्यं सम्भवतीत्यर्थः ॥ २ ॥

१२. ॐ सुकृतदुष्कृते एवेति तु बादरिः ॐ

सुकृतदुष्कृते साध्वसाधुकर्मणी एव श्रुतिस्थचरणशब्दवाच्ये न तु तदङ्गा-चरणम् **इति बादरिः** आचार्यो मन्यत इत्यर्थः । तुशब्दात् स्वशब्दात् स्वसिद्धान्तोऽपि स एव इति सूचयति ॥ ३ ॥

॥ अनिष्टाधिकरणम् ॥ ११ ॥

१३. ॐ अनिष्टादिकारिणामपि च श्रुतम् ॐ

चशब्दो दुःखान्तरसमुच्चये । न केवलमिष्टादिकारिणामेव गतागतं किन्त्विष्ट-शब्दितयागादिकर्मविरुद्धपापकारिणाम् **अपि** । कुतः यतः **श्रुतं** 'तद्य इह'[1] इति श्रुत्या तथोक्तम् । अत इत्यर्थः ॥ १ ॥

१४. ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॐ

---

१. 'तद्य इह शुभाकृतो ये चाशुभकृतस्तेऽशुभमनुभूयावर्तन्ते पुनः कर्म कुर्वन्ति पुनर्गच्छन्ति पुनरागच्छन्ति' (भाल्लवेयश्रुतिः)

तुशब्दोऽवधारणे । सप्तमी द्वितीयार्थे । **संयमने** नरके । सम्यग्यमशासनम् **अनुभूय** एव स्थितानाम् **इतरेषामिष्टादिकारिभ्योऽन्येषां मध्ये आरोहावरोहौ** केषाञ्चिदारोहः नरकादुत्थानं केषाञ्चिदवरोहः ततोऽपि नीचस्थाने नित्यनरके पातो भवति । कुतः **तद्गतिदर्शनात्** तेषां अनिष्टादिकारिणां तद्गतेः एवंविधगतेः दर्शनात् 'सर्वे'[१] इति श्रुतावुक्तत्वादित्यर्थः ॥ २ ॥

१५. ॐ स्मरन्ति च ॐ

स्मृतिकर्तारः उक्तमर्थं 'गच्छन्ति' इत्यादिस्मृतिभिः प्रतिपादयन्ति च इत्यर्थः ॥ ३ ॥

॥ अपि सप्ताधिकरणम् ॥ १२ ॥

१६. ॐ अपि सप्त ॐ

स्मर्तारः रौरवादिसप्तविधान् **अपि** नरकान् 'रौरवः'[२] इति स्मृतिभिः प्रतिपादयन्तीत्यर्थः ॥ १ ॥

॥ तत्राप्यधिकरणम् ॥ १३ ॥

१७. ॐ तत्रापि च तद्व्यापारादविरोधः ॐ

चशब्दो दुःखानुभवं विनैवेत्यर्थसूचकः । तथाच **तत्रापि** नरकेऽपि । **तद्व्यापारात्** दुःखानुभवं विनैव तस्येश्वरस्य प्रेरणाख्यव्यापारसत्वात् **अविरोधः** । ईश्वरस्य

१. सर्वे इत्यतः परं 'इह' इति मुद्रितपुस्तके अधिकं दृश्यते । अन्वयस्तु मृग्यः ।
'**सर्वे** वा एतेऽशुभकृतः संयमने प्रपतन्ति तत्र ये परद्विषो गुरुद्विषः श्रुतिद्विषस्तदवमन्तार शठा मूर्खा इति ते वै ततोऽवरुह्य तमसि प्रपतन्ति नैवेत उत्तिष्ठन्तेऽपि कर्हिचित् वत्र वा एतदित्याहुरथ येऽन्ये ब्रह्मद्विषः स्तेनाः सुरापा इति ते वै तदनुभूयेमं लोकमनुव्रजन्ति' (कांण्ठरव्यश्रुतिः)

२. 'रौरवोऽथ महांश्चैव वह्निवैतरणी तथा ।
कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि च ॥
तामिस्रश्चान्धतामिस्रो द्वौ नित्यौ सम्प्रकीर्तितौ ।
इति सप्त प्रधानानि बलीयस्त्वोत्तरोत्तरम् ।
एतानि क्रमशो गत्वैवारोहोऽधावरोहणम् ॥ (भारते)

नरके स्थित्वा तत्स्थजीवानियन्तृत्वे 'सर्वं'[1] इति श्रुतिविरोधः। तन्नियन्तृत्वे दुःखभोक्तृत्वमित्युभयविरोधो नेत्यर्थः ॥ १ ॥

॥ विद्याधिकरणम् ॥ १४ ॥

१८. ॐ विद्याकर्मणोरिति तु प्रकृतत्वात् ॐ

तुशब्दोऽवधारणे। 'अथैतयोः पथोः'[2] इति श्रुतावेतयोरित्यस्य ज्ञान-कर्मणोरित्येवार्थः। न तु धूमार्चिरादिमार्गयोरिति। येन जीवस्य फलस्वातन्त्र्यं स्यात्। कुतः प्रकृतत्वात्। 'तद्य इत्थम्'[3] इति तयोरपि प्रकृतत्वादित्यर्थः ॥ १ ॥

॥ न तृतीयाधिकरणम् ॥ १५ ॥

१९. ॐ न तृतीये तथोपलब्धेः ॐ

तृतीये 'तिर्यग्यातना तमः'[4] इत्युक्ताधोगतिषु तृतीये तमसि। न सुखमस्तीति शेषः। कुतः तथोपलब्धेः तथा प्रतीतेरित्यर्थः ॥ १ ॥

२०. ॐ स्मर्यतेऽपि च लोके ॐ

अन्धे तमसि सुखराहित्यं 'नान्धे तमसि'[5] इति स्मृतिकर्त्रा स्मर्यते च स्मृत्या च प्रतिपाद्यते। किञ्चैतत् लोकेऽपि लोकदृष्टव्याप्तिकानुमानेनापि सिद्धमित्यर्थः ॥ २ ॥

---

१. 'सर्वं विसृजति सर्वं विलापयति सर्वं रमयति सर्वं न रमयति सर्वं प्रवर्तयत्यन्तरस्मिन्निविष्टः' (कौषारवश्रुतिः)

२. 'अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्रमिश्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम्' (छां.५-१०-८)

३. 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ति। अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' (छां.५-१०-१)

४. 'अथाविद्वान्कर्मा वाग्गच्छति। त्रिधा ह वाव गतिस्तिर्यग्यातना तम इति। द्वे वा सुखानुवृत्ते न तमस्सुखानुवृत्तं केवलं ह्येवात्र दुःखं भवति'

५. 'तिर्यक्षु नरके चैव सुखलेशो विधीयते।
नान्धे तमसि मग्नानां सुखलेशोऽपि कथ्यते' (भविष्यत्पर्वः)

२१. ॐ दर्शनाच्च ॐ

तृतीये सुखराहित्यं हिरण्यगर्भप्रत्यक्षाच्च सिद्धमित्यर्थः ॥ ३ ॥

२२. ॐ तृतीये शब्दावरोधः संशोकजस्य ॐ

तृतीय इत्यावर्तते । तृतीये तमसि । तत्रापि तृतीये अन्धे तमसि तद्विषये । यः शब्दः । तेन संशोकजस्य सम्यक् शोकजस्य । मोहस्य अवरोधः प्राप्तिर्भवतीत्यर्थः ॥ ४ ॥

२३. ॐ स्मरणाच्च ॐ

तमस्त्रैविध्यस्य तृतीयतमसः श्रवणे श्रोतृमोहप्राप्तिश्च 'महातमः'[१] इति स्मृत्या तदुभयं सिद्धमित्यर्थः ॥ ५ ॥

॥ तत्स्वाभाव्याधिकरणम् ॥ १६ ॥

२४ ॐ तत्स्वाभाव्यापत्तिरुपपत्तेः ॐ

कर्मणि तत्स्वाभाव्यापत्तिः तस्य धूमादिदेवस्य स्वाभाव्यस्य स्वभावसदृशस्वभावस्य । प्राप्तिरेव । न तदैक्यं तत्पदप्राप्तिर्वा । कुतः उपपत्तेः अन्यस्यान्यैक्यादृष्ट्याऽस्यैवार्थस्य युक्तत्वादित्यर्थः ॥ १ ॥

॥ नातिचिरेणाधिकरणम् ॥ १७ ॥

२५. ॐ नातिचिरेण विशेषात् ॐ

स्वर्गान्निर्गतः कर्मी नातिचिरेण अचिरेणैव । भूमावागत्य ब्राह्मणादियोनिं प्राप्नोति । न चिरेण । कुतः विशेषात् 'तद्य इह'[२] इति विशेषवचनादित्यर्थः ॥ १ ॥

---

१ 'महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम् ।
श्रवणादेव मूर्छादिरधरस्य यतो भवेत् ।
तस्माच्च विस्तरेणैतत् कथ्यते राजसत्तम ॥ (कौर्म.)

२. 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्' (छां.५–१०–७)

॥ अन्याधिकरणम् ॥ १८ ॥

२६. ॐ अन्याधिष्ठिते पूर्ववदभिलापात् ॐ

कर्मिणो **अन्याधिष्ठिते** अन्यजीवाभिमन्यमानव्रीह्यादिशरीरे प्रवेश एव न तु तदभिमानित्वम् । येन दुःखं स्यात् । तर्हि 'व्रीहियवाः' इत्यभेदोक्तिः कथमित्यत उक्तम्– **पूर्ववत्** इति । यथा 'धूमो भूत्वा'[1] इत्यादौ धूमादिभावोक्तिः तथा । कुत एतत् **अभिलापात्** 'सोऽवाग्गतः'[2] इति श्रुतौ तथाभिधानादित्यर्थः ॥ १ ॥

२७. ॐ अशुद्धमिति चेन्न शब्दात् ॐ

हिंसारूपत्वाद् यज्ञस्य कर्मासिद्धं दुःसाधनम् **इति चेन्न** । कुतः **शब्दात्** श्रुतिवाक्यविहितत्वादित्यर्थः ॥

॥ रेतोऽधिकरणम् ॥ १९ ॥

२८. ॐ रेतःसिग्योगोऽथ ॐ

कर्मिणः प्रथमं **रेतःसिग्योगः** रेतःसिचा पित्रा योगः सम्बन्धः । तत्प्रवेश इति यावत् । **अथ** अनन्तरम् । मातृप्रवेशो भवति न तु प्रथममेवेत्यर्थः ॥ १ ॥

॥ योन्यधिकरणम् ॥ २० ॥

२९. ॐ योनेः शरीरम् ॐ

ल्यब्लोपे पञ्चमी । कर्मी पितृद्वारा मातृयोनिं प्रविश्यैवाथ तत्र **शरीरं** लभते न तद्विनेत्यर्थः ॥ १ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
तृतीयाध्यायस्य प्रथमः पादः ॥ ३ ॥ १ ॥

---

१. 'धूमो भूत्वा [अ]भ्रं भवति' (छां.५-१०-५)

२. 'सोऽवाग्गतः स्थावरान् प्रविश्याभोगेनैव व्रजन् स्थूलं शरीरमेति स्थूलाच्छरीराद्भोगा-नुभुङ्क्ते' (कौषारकश्रुतिः)

तृतीयाध्यायस्य द्वितीयः पादः

॥ सन्ध्याधिकरणम् ॥ १ ॥

१. ॐ सन्ध्ये सृष्टिराह हि ॐ

हि यस्मात् 'अथ रथान्'[१] इति श्रुतिः **सन्ध्ये** जाग्रत्सुषुप्तिसन्धौ भवतीति स्वप्ने भगवतः सृष्टिम् **आह** । अतः **सृष्टिः** स्वप्नपदार्थसृष्टिः । भगवत एव जायत इत्यर्थः ॥ १ ॥

२. ॐ निर्मातारं चैके पुत्रादयश्च ॐ

चो यतः । **एके** शाखिनः । एनं भगवन्तम् । 'य एषु सुप्तेषु'[२] इति **स्वप्नपदार्थनिर्मातारम्** आमनन्ति । अपरे च **पुत्रादयः** । तस्माद् विष्णोरेव जायन्त इति वदन्ति । तस्माद् विष्णोरेव स्वाप्नसृष्टिरित्यर्थः ॥ २ ॥

३. ॐ मायामात्रन्तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॐ

तुरेवार्थे । सन्ध्यं **मायामात्रं** निमित्तोपादानभूताभ्यां मायाशब्दितेच्छावासनाभ्यामेव निर्मितं न बाह्यकारणकम् । कुतः **कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्** बाह्यवत् सम्यगनभिव्यक्तस्वरूपत्वादित्यर्थः ॥ ३ ॥

४. ॐ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॐ

---

१. 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ.६-३-१०)

२. 'य एषु सुप्तेषु जागर्ति कामन्कामं पुरुषो निर्ममाणः' (कठ.२.२.८)

चो यतः । स्वाप्नपदार्थः **सूचकः** शुभाशुभज्ञापकः । अतोऽपि नासत्यः । तत्कृतः 'यदा'[1] इति श्रुतेः । प्रत्यक्षतः फलदर्शनाच्चेति **हि** शब्दः । किञ्च **तद्विदः** स्वाप्नविदो व्यासादयः **आचक्षते च** । 'यदा'[1] इति श्रुतौ स्वाप्नार्थानामर्थक्रियाकारित्वं वदन्त्यतोऽर्थात्यर्थः ॥ ४ ॥

॥ पराभिध्यानाधिकरणम् ॥ २ ॥

५. ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ

हि यस्मात् । **ततः** परमात्मनः सकाशात् । **अस्य** जीवस्य । **बन्धविपर्ययौ** बन्धमोक्षौ भवतः । तस्मात् **पराभिध्यानात्तु** परमात्मेच्छयैव । **सन्ध्यं तिरोहितं** लीनं भवति । न कारणान्तरादित्यर्थः ॥ १ ॥

॥ देहयोगाधिकरणम् ॥ ३ ॥

६. ॐ देहयोगाद्वासोऽपि ॐ

देहयोगाद्वासोऽपि देहाभिमानेनावस्थितिरूपजाग्रदवस्थाऽपि पराभिध्यानादेव भवति नान्यत इत्यर्थः ॥ १ ॥

॥ तदभावाधिकरणम् ॥ ४ ॥

७. ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॐ

अस्य जीवस्य **नाडीषु आत्मनि** नाडीस्थिते परमात्मन्येव । **तदभावः** जाग्रत्स्वप्नयोरभावः । सुषुप्तिर्जायते । तस्य तदा तत्प्रवेशो भवति । कुतः **तच्छ्रुतेः** 'आसु तदा नाडीषु'[2] इति श्रुतेः तथा श्रवणादित्यर्थः । **ह** इत्यस्यार्थस्य युक्ततामाह ॥ १ ॥

---

१. **'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेऽभिपश्यति ।**
समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने' (छां.५-२-८)

२. **'आसु तदा नाडीषु सृप्तो भवति'** (छां.८-६-३)

॥ प्रबोधाधिकरणम् ॥ ६ ॥

८. ॐ अतः प्रबोधोऽस्मात् ॐ

अस्य जीवस्य **प्रबोधः** सुप्तेरुत्थानम् । **अस्मात्** परमात्मन एव भवति नान्यतः । कुतः 'एष एव'[१] इति श्रुतत्वादित्यर्थः ॥ १ ॥

॥ कर्मानुस्मृत्यधिकरणम् ॥ ६ ॥

९. ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ

चशब्दोऽप्यर्थे । **स एव** ईश्वर एव । सर्वेषामपि सर्वदा सर्वावस्थाप्रेरकः । न देशकालान्तरेऽन्यः । कुतः **कर्मानुस्मृतिशब्दविधिभ्यः** 'एष ह्येव'[२] इति कर्मणामीशाधीनत्वश्रुतेः । प्रदर्शक इत्यनुकूलस्मृतेश्च । 'एषः'[३] इति शब्दाच्चात्मानमिति विधेश्चेत्यर्थः ॥ १ ॥

॥ सम्पत्त्यधिकरणम् ॥ ७ ॥

१०. ॐ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॐ

मुग्धे मूर्छायाम् । जीवस्य **अर्धसम्पत्तिः** परमात्मन्यर्धप्रवेशः । कुतः **परिशेषात्** प्रसक्तप्रतिषेधपूर्वकानुमानादित्यर्थः ॥ १ ॥

॥ न स्थानतोऽप्यधिकरणम् ॥ ८ ॥

११. ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ

परस्य परमात्मनः **स्थानतोऽपि** अक्ष्यादिस्थानभेदादपि । **उभयलिङ्गं** भिन्न-रूपम् । **न** अस्ति । किन्तु सर्वत्र सर्वस्थानेषु स्थितं रूपमेकमेव । कुतः **हि** यस्मात् । 'सर्वेषु'[४] इति श्रुतिरत्रास्ति । अत इत्यर्थः ॥ १ ॥

---

१. 'एष एव सुप्तं प्रबोधयत्येतस्माद्वीव उत्तिष्ठत्येष प्रभातेष परमः' (कौण्डिन्यश्रुतिः)

२. 'एष ह्येव साधु कर्म कारयति (कौ.३-८)

३. 'एष स्वप्नान् प्रदर्शयत्येष प्रबोधयत्येष एव परम आनन्दः'

४. 'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते' (ऐ.आ.३-२-३)

१२. ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ

भेदात् 'कार्यकारणबद्धौ'[1] इति स्वप्नजाग्रदनुभवजनकत्वरूपभेदकत्वधर्म-श्रवणात् विश्वादिरूपाणां नाभेद इति **चेन्न**। कुतः **प्रत्येकं** परस्परम्। तेषां रूपाणाम्। **अतद्वचनात्** 'एष त आत्मा'[2] इत्यभेदश्रुतेरित्यर्थः ॥ २ ॥

१३. ॐ अपि चैवमेके ॐ

यत **एवम्** अभेदं चशब्दादनन्तरूपत्वं **चैके** शाखिनः 'अमात्रः'[3] इति श्रुतौ पठन्ति। **अपि** अभेदेऽपि भेदव्यपदेशः स्यानभेदाद् युज्यते इत्यर्थः ॥३॥

॥ अरूपाधिकरणम् ॥ ९ ॥

१४. ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ

ब्रह्म **अरूपवदेव** प्राकृतरूपरहितमेव। कुतः **तत्प्रधानत्वात्** प्रकृत्याद्युक्त-मत्वात्। **हि**शब्दसूचितास्थूलमिति[4] श्रुतेश्चेत्यर्थः ॥ १ ॥

१५. ॐ प्रकाशवच्चावैयर्थ्यम् ॐ

चो हेतुसूचकः। **प्रकाशवत्** लोकविलक्षणचक्षुरादिप्रकाशे नास्ति प्रकाश इति व्यवहारस्येव। **अवैयर्थ्यं** न ब्रह्मणो रूपित्वश्रुतीनामप्रामाण्यम्। कुतः तस्यारूपित्वेऽपि विलक्षणरूपित्वाभ्युपगमादित्यर्थः ॥ २ ॥

१६. ॐ आह च तन्मात्रम् ॐ

---

१. '**कार्यकारणबद्धौ** तावित्यते विश्वतैजसौ।
प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिद्ध्यतः' (मां.२-१६)

२. '**एष त आत्मा**ऽन्तर्याम्यमृतः' (बृ.५.७.३)

३. '**अमात्रो**ऽनन्तमात्रश्च द्वैतस्योपशमः शिवः।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः' (मां.४-७)

४. '**अस्थूलमनणु**' (बृ.५-८-८)

यत 'ऐकात्म्य–'[1] इति श्रुतिः ब्रह्मणः **तन्मात्रं** विज्ञानानन्दैकस्वरूपं रूपम् **आह** वक्तीत्यर्थः । अतो न वैलक्षण्यानिरुक्तिरिति **च**शब्दार्थः ॥ ३ ॥

१७. ॐ दर्शयति चाथो अपि स्मर्यते ॐ

चो यतः । **चः** समुच्चये । न केवलं ब्रह्मणः आनन्दाद्यात्मकत्वं **दर्शयति** । किन्तु 'तद्विज्ञानेन'[2] इति श्रुतिः ज्ञानस्य ब्रह्मात्मकत्वमपि दर्शयति प्रतिपादयति । **अथो** इत्यर्थान्तरवाचि । **अथो** विज्ञानस्य **अपि** ब्रह्मरूपत्वं **स्मर्यते** व्यासादिभिः 'शुद्धस्फटिक–'[3] इत्यादिना । अतो न ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वमप्रामाणिकमित्यर्थः ॥ ४ ॥

॥ उपमाधिकरणम् ॥ १० ॥

१८. ॐ अत एव चोपमा सूर्यकादिवत् ॐ

अत एव ईशतद्रूपाणामभेदोक्तेरेव । **अत एव** चेतनत्वादिहेतोरेव । **उपमा** जीवस्य मत्स्यादिसाम्यम् । मत्स्यादिवदीश्वराभेद इति चेत् । नेति शेषः । **च**शब्देन भिन्नत्वसाम्ये समुच्चिनोति । कुतः यतः **सूर्यकादिवत्** यथा जलप्रतिबिम्बितसूर्यकादेः सूर्यादिप्रतिबिम्बत्वाद् भिन्नत्वं तथा जीवस्य प्रतिबिम्बत्वात् भिन्नत्वमित्यर्थः । **यद्वा** । **अत एव** मत्स्यादीनां ब्रह्मणो ज्ञानादिगुणैरविशेषोक्तेरेव । **अत एव सूर्यकादिवत्** । **उपमा** सूर्यकाद्युपमा । जीवस्य मत्स्यादितुल्यांशत्वे तदविशेषापत्तेरेव उपमा ब्रह्मप्रतिबिम्बतेत्यर्थः । **अत एव** ब्रह्मप्रतिबिम्बत्वादेव **सूर्यकादिवत्** न ब्रह्माभिन्नो जीव इति **च**शब्दार्थः । अथवा । **अत एव** प्रकृताभ्यां तदधीनत्वतत्सदृशत्वाभ्यामेव । **उपमा सूर्यकादिवत्** इत्युपमा । जीवस्येश्वरप्रतिबिम्बत्वात् नोपाध्यधीनत्वादिना न तन्निवृत्त्या प्रतिबिम्बतानिवृत्तिरित्यर्थः ॥ १ ॥

---

१. 'ऐकात्म्यप्रत्यपसारम्' (मां.२-७)

२. 'तद्विज्ञानेन परिपश्यन्ति धीराः आनन्दरूपममृतं यद्विभाति' (मुं.२-२-८)

३. 'शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जनम् ।
चिन्तयीत पतिनान्यं ज्ञानरूपाद्धरेः' (मात्स्ये)

॥ अम्बुवदधिकरणम् ॥ ११ ॥

१९. ॐ अम्बुवदग्रहणात्तु न तथात्वम् ॐ

सादृश्यार्थे वतिः । सादृश्यं स्नेहाख्यविशेषेण विवक्षितम् । तथाच यतः अम्बुवदग्रहणात् स्नेहसहितमाहात्म्यज्ञानाभावात् । भक्तिं विनेति यावत् । तथात्वं सुखाद्यात्मकत्वरूपेश्वरसादृश्यम् । न तु सम्यग्व्यज्यते । अतो भक्तिरेव सम्यक् स्वरूपाभिव्यक्तिजनिकेति तदर्थं सा कर्तव्येत्यर्थः ॥ १ ॥

॥ वृद्धिह्रासाधिकरणम् ॥ १२ ॥

२०. ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ

वृद्धिह्रासभाक्त्वं भक्त्यादेः साधकेष्वाधिक्यन्यूनता न तावदङ्गीकार्यम् । कुतः अन्तर्भावात् महदल्पफलवतां ब्रह्मादीनामन्येषां च भक्तत्वेऽन्तर्भावात् । तथापि कुतो वृद्धिह्रासभाक्त्वम् । एवं भक्तितारतम्ये सत्येव । उभयसामञ्जस्यात् उभयान् महदल्पफलान् ब्रह्मादिजीवान् प्रति फलदातुरीश्वरस्य सामञ्जस्यात् वैषम्येन फलदानस्य भक्तितारम्येन युक्तत्वात् । अन्यथा अयुक्तत्वात् । अतस्तदङ्गीकार्यमित्यर्थः ॥ १ ॥

२१. ॐ दर्शनाच्च ॐ

'अथात'[1] इति श्रुतौ 'यथा'[2] इति स्मृतौ च फलतारतम्यदर्शनात् उक्तत्वाच्चोक्तं युक्तमित्यर्थः ॥ २ ॥

॥ प्रकृताधिकरणम् ॥ १३ ॥

२२. ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ

---

१. 'अथात आनन्दस्य मीमांसा भवति' (तै.२-८)

२. 'यथा भक्तिविशेषोऽत्र दृश्यते पुरुषान्तरे ।
तथा मुक्तिविशेषोऽपि ज्ञानिना लिङ्गभेदने'

हि यतः । 'नैतावदेना'[1] इति श्रुतिः **प्रकृतैतावत्त्वं** प्रकृतस्य सृष्ट्यादि-कर्तृत्वस्य । **एतावत्त्वं** सृष्टिसंहारकर्तृत्वमात्रपर्यवसितत्वम् । **प्रतिषेधति** निरा-चष्टे । **ततः** सृष्ट्यादिकर्तृत्वात् । **भूयः** अधिकम् । **पालकत्वं च ब्रवीति** । अतः पालकत्वात् सृष्टिं चेति सूचितपालकत्वाख्यं महिमान्तरमपि हरेरस्तीति ज्ञापयतीत्यर्थः । **च**शब्देन 'सृष्टिं च'[2] इति स्मृतिः सूचिता ॥ १ ॥

॥ अव्यक्तत्वाधिकरणम् ॥ १४ ॥

२३. ॐ तदव्यक्तमाह हि ॐ

तत् ब्रह्म । **अव्यक्तं** पुरुषप्रयत्नेन द्रष्टुमशक्यस्वभावम् । **कुतः हि** यस्मात् । **अव्यक्तं च** 'निष्कलम्'[3] इति श्रुतिस्तथा **आह** तस्मादित्यर्थः ॥ १ ॥

२४. ॐ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॐ

अपि भक्तिरहिताराधनेनापि न ब्रह्म व्यक्तीकर्तुं शक्यम् । **कुतः संराधनेऽपि** सम्पूजनेऽपि । अव्यक्तत्वस्य **प्रत्यक्षानुमानाभ्यां** ज्ञानिप्रत्यक्षसूक्ष्मत्व-हेतुकानुमानाभ्यां सिद्धत्वादित्यर्थः ॥ २ ॥

२५. ॐ प्रकाशवच्चावैशेष्यम् ॐ

चो नञर्थः । **प्रकाशवत्** यथाग्नेः स्थूलसूक्ष्माभ्यां व्यक्तत्वाव्यक्तत्वे । तथा ब्रह्म न किन्तु स्वतोऽव्यक्तमेव । **कुतः** यतः **अवैशेष्यं** ब्रह्मणि स्थूलसूक्ष्मत्व-विशेषो नास्ति । अत इत्यर्थः ॥ ३ ॥

२६. ॐ प्रकाशश्च कर्मण्यभ्यासात् ॐ

---

१. 'नैतावदेना परो अन्यदस्त्युक्षा स दाधार पृथिवीं विभर्ति' (ऋ.१०-३१-८)

२. 'सृष्टिं च पालनं चैव संहारं नियमं तथा ।
एक एव करोतीशः सर्वस्य जगतो हरिः' (ब्रह्माण्ड)

३. 'अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलम् ।
यज्ज्ञात्वा मुच्यते जन्तुरानन्दश्चाक्षयो भवेत्' (कौण्डिन्य.)

प्रकाशश्च अपरोक्षज्ञानाच्च । **कर्मणि** विषयभूते ब्रह्मणि । **अभ्यासात्** श्रवणादेरावर्तनात् । भवतीत्यर्थः ॥ ४ ॥

२७. ॐ अतोऽनन्तेन तथाहि लिङ्गम् ॐ

अतः अव्यक्तत्वे प्रत्यक्षत्वे प्रमाणसद्भावात् । तदन्यथाऽनुपपत्त्या । **अनन्तेन** अपरिच्छिन्नेन ब्रह्मणा तत्प्रसादेनाव्यक्तस्यापरोक्ष्यं भवतीति ज्ञायते । न केवलमनुपपत्तिमात्रात् किं तर्हि । **हि** यस्मात् । **तथा लिङ्गं** तस्याभिध्यानादित्युक्तमीशप्रसादस्य बन्धनिवृत्तिहेतुत्वरूपम् । प्रसादस्य दर्शनहेतुत्वज्ञापकमस्ति तस्मादित्यर्थः ॥ ५ ॥

॥ अहिकुण्डलाधिकरणम् ॥ १५ ॥

२८. ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ

ब्रह्म आनन्दगुणकं तद्रूपञ्च भवति । कुतः **उभयव्यपदेशात्** 'आनन्दो ब्रह्म'[1], 'आनन्दं ब्रह्मणः'[2] इत्यादिश्रुतिषु गुणात्मकत्वेन गुणित्वेन च ब्रह्मणः उक्तत्वात् । तदपि कथम् । **अहिकुण्डलवत्** यथाऽहेः सर्पस्य । कुण्डलत्वं कुण्डलित्वञ्च । विशेषात्तथेत्यर्थः ॥ १ ॥

२९. ॐ प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ

यथा प्रकाशाश्रयस्यादित्यस्य प्रकाशरूपत्वं तदाश्रयत्वञ्च तद्वत् ब्रह्मणोऽपि । अन्यपरित्यागेनादित्यदृष्टान्ते को हेतुरित्यत उक्तम् । **तेजस्त्वात्** इति । ब्रह्मादित्ययोरुभयोरपि तेजोरूपत्वात् तदभिप्रायेण तद्दृष्टान्तीकरणमित्यर्थः ॥ २ ॥

३०. ॐ पूर्ववद्वा ॐ

यथा कालः पूर्वेणाभिन्नोऽपि पूर्वकाल इति पूर्वपदेन विशिष्यते तथा ब्रह्म आनन्देन विशिष्यत इत्यर्थः । आदरार्थं स्थूलसूक्ष्मबुद्धिविवक्षया वा दृष्टान्तत्रयोक्तिः ॥ ३ ॥

---

१. (तै.२-६) २. (तै.२-४)

३१. ॐ प्रतिषेधाच्च ॐ

ब्रह्मगुणानां ब्रह्मणश्च 'नेह नानास्ति'[१] इति भेदस्य । **प्रतिषेधाच्च** ब्रह्म गुणात्मकमित्यर्थः ॥ ४ ॥

॥ परमताधिकरणम् ॥ १६ ॥

३२. ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ

ब्रह्मगुणजातं परं लोकविलक्षणम् । कुतः **सेतून्मानसम्बन्धव्यपदेशेभ्यः** 'एष सेतुः'[२] इति सेतुत्वोक्तेः । 'यतो वाचः'[३] इत्युन्मानशब्दितपूर्णत्वोक्तेः । 'एतस्यैवानन्दस्य'[४] इति बिम्बप्रतिबिम्बभावसम्बन्धोक्तेः । अन्यज्ज्ञानन्त्विति लौकिकानन्दाद् भेदोक्तेश्चेत्यर्थः ॥ १ ॥

३३. ॐ दर्शनात् ॐ

अन्यानन्दादीनां प्रत्यक्षसिद्धत्वान्मनोवाग्विषयत्वाच्च ब्रह्मानन्दस्यातथात्वादेव लोकविलक्षणत्वमित्यर्थः ॥ २ ॥

३४. ॐ बुद्ध्यर्थः पादवत् ॐ

यथा लोकपादविलक्षणेषु जीवाख्यभूतेषु 'पादोऽस्य विश्वा भूतानि'[५] इति पादपदप्रयोगः । बुद्ध्यर्थः भूतानां ईशांशत्वज्ञापनार्थः । तथाऽलौकिकेऽपि ब्रह्मानन्दादावानन्दपदप्रयोगः । **बुद्ध्यर्थः** अनुकूलतया वेदनीयत्वादिधर्मज्ञापनार्थ इत्यर्थः ॥ ३ ॥

॥ स्थानविशेषाधिकरणम् ॥ १७ ॥

३५. ॐ स्थानविशेषात् प्रकाशादिवत् ॐ

---

१. **'नेह नानास्ति किञ्चन'** (कठ.२–४) २. **'एष सेतुर्विधृतिः'**(छा.८–४–१)

३. **'यतो वाचो निवर्तन्ते'** (तै.२–४)

४. **'एतस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्ति'** (बृ.६.३.२२) ५.(ऋ.१०.९०.३)

प्रकाशादिवत् यथा सूर्यकान्तादिगतसूर्यादिप्रतिबिम्बेऽग्निजनकत्वादिवैचित्र्यम् । स्थानविशेषात् सूर्यकान्तादिस्थानगुणवैचित्र्यादुपपद्यते । तथा ब्रह्मादिस्थानगतभक्त्यादिगुणवैचित्र्याद् भगवदानन्दप्रतिबिम्बेषु ब्रह्माद्यानन्देष्वपि वैचित्र्यमुपपद्यत इत्यर्थः ॥ ४ ॥

३६. ॐ उपपत्तेश्च ॐ

बिम्बभूतभगवदैश्वर्यवशादेव प्रतिबिम्बभूतब्रह्माद्यानन्दवैचित्र्योपपत्तेश्च तत्प्रतिबिम्बत्वमितरेषां युक्तमित्यर्थः ॥ ५ ॥

॥ तथान्यत्वाधिकरणम् ॥ १८ ॥

३७. ॐ तथाऽन्यत्प्रतिषेधात् ॐ

यथा जीवानन्दादि ब्रह्मानन्दादेर्विलक्षणम् । तथा ध्यानकाले प्रतीतं वासनात्मकं वस्तु । ब्रह्मणः अन्यत् तद्भिन्नम् । कुतः 'यन्मनसा'[1] इति श्रुतावन्यस्य ब्रह्मत्वप्रतिषेधात् इत्यर्थः ॥ १ ॥

॥ सर्वगतत्वाधिकरणम् ॥ १९ ॥

३८. ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्यः ॐ

अनेन भगवतैव । सर्वदेशकालयोः सृष्ट्यादिर्भवति । न तु देशकालान्तरयोरन्येन । कुतः **सर्वगतत्वमायामयशब्दादिभ्यः** 'एष सर्वगतः'[2] इति सर्वगतत्वश्रुतेः । तस्य च सृष्ट्याद्यर्थत्वात् । विष्णौ प्रयुक्तमायामयशब्दव्याख्यानरूपसर्वत्रेत्यादि[3] श्रुतेश्चेत्यर्थः । अन्यत्र प्रमाणाभावाच्चेत्यादिशब्दार्थः ॥ १ ॥

---

१. 'यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (केन. १-६)

२. 'एष सर्व एष सर्वगत एष सर्वेश्वर एषोऽचिन्त्य एष परमः' (भाल्लवेयश्रुतिः)

३. 'सर्वत्र सर्वमतस्मात् सर्वदा सर्ववस्तुषु ।
स्वरूपभूतया नित्यशक्त्या मायास्त्र्यया यतः' (चतुर्वेदशिखा.)

॥ फलाधिकरणम् ॥ २० ॥

३९. ॐ फलमत उपपत्तेः ॐ

फलं स्वर्गादि । **अतः** ईश्वरादेव भवति । न कर्मतः । **कुतः उपपत्तेः** ईश्वरस्य चेतनत्वेन फलदातृत्वस्य युक्तत्वादित्यर्थः ॥ १ ॥

४०. ॐ श्रुतत्वाच्च ॐ

श्रुतत्वाच्च 'रातिः'[1] इति श्रुत्युक्तत्वाच्चेश्वरस्यैव फलदातृत्वमित्यर्थः ॥ २ ॥

४१. ॐ धर्मं जैमिनिरत एव ॐ

जैमिनिः आचार्यः धर्मं फलप्रदमाह । तं च धर्मम् । **अत एव** ईश्वरादेव जन्यं मन्यते । कुतः **अत एव** 'एष ह्येव'[2] इति श्रुतेरेवेत्यर्थः ॥ ३ ॥

४२. ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ

बादरायणाचार्यस्तु पूर्वं पूर्वोक्तम् । ब्रह्म धर्मं चोभयं फलहेतुं मन्यते । तत्र ब्रह्मकर्तृत्वेन कर्म करणत्वेन हेतुरिति विशेषः तुशब्दार्थः । कुतः **हेतुव्यपदेशात्** 'पुण्येन'[3] इति श्रुतौ ब्रह्मकर्मणोः कर्तृत्वकरणत्वरूपहेतुत्वस्योक्तत्वादित्यर्थः ॥ ४ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

—०—

१. 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्' (बृ.४–१.–२८)

२. 'एष ह्येव साधुकर्म कारयति' (कौ.३–८)

३. 'पुण्येन पुण्यं लोकं नयति पापेन पापम्' (तै.३– ७)

तृतीयाध्यायस्य तृतीयः पादः

॥ सर्ववेदाधिकरणम् ॥ १ ॥

१. ॐ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॐ

पूर्वसूत्रे पूर्वपदोदितं ब्रह्म **सर्ववेदान्तप्रत्ययम्** । बहुव्रीहिः । यथाशक्ति सर्ववेदविषयकश्रवणाद्युत्पन्ननिर्णयजन्यज्ञानविषयम् । कुतः **चोदनाद्यविशेषात्** 'आत्मा'[1] इत्यादिविधीनामादिपदोदितानां 'अत्र ह्येते'[2] इत्यादिवाक्योक्त-युक्तीनां चाविशेषात् । सर्वाधिकारिसाधारणत्वादित्यर्थः ॥ १ ॥

२. ॐ भेदान्नेति चेदेकस्यामपि ॐ

चेदिति नेति भेदादिति अपीति चावर्तते । तर्हीति शाखायामिति च लभ्यते । तथाच चेत् यदि सर्वशाखोक्तार्थानां भेदात् पृथक्त्वात् । एकैकेन सर्वशाखोक्तं ज्ञेयं न । किन्तु स्वस्वशाखोक्तमेवेत्युच्यते । तर्हि **अपि** स्वस्व-शाखोक्तमपि । न ज्ञेयं स्यात् । कुतः **एकस्यां** शाखायामपि **भेदात्** अर्थभेद-दर्शनात् । अथ यदि तत्र धर्मभेदादेकस्मिन् धर्मिणि भिन्नधर्मविधानात् प्रसक्तभेदाच्चेति परिहार उच्यते तस्य सर्वशाखोक्तपरिज्ञानेऽपि सम इत्यर्थः ॥ २ ॥

---

१. 'आत्मेत्येवोपासीत' (बृ. ३-४-७)

२. 'अत्र ह्येते सर्वे एकीभवन्ति' (बृ ३-४-७)

३. ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॐ

स्वाध्यायस्य 'स्वाध्यायोऽध्येतव्यः'[१] इति विधेः । **तथात्वेन** सर्वसाधारण्येनाध्ययनविधायकत्वेन । **समाचारे** सर्ववैदिककर्मकरणे । **अधिकारात्** सर्वेषामधिकारसद्भावात् **च** । **हि** इति सूचितायाः 'वेदः कृत्स्नोऽधिगन्तव्यः'[२] इति स्मृतेश्च एकैकेनापि सर्वशाखाध्ययनेन ब्रह्म ज्ञातव्यमित्यर्थः ॥ ३ ॥

४. ॐ सलिलवच्च तन्नियमः ॐ

चोऽवधारणे । **तन्नियमः** इत्यत्र पञ्चमीतत्पुरुषकर्मधारयौ । **सलिलवत्** सलिलमिव । **तन्नियमः** यथा सर्वेषां सलिलानां प्रतिबन्धाभावमपेक्ष्यैव समुद्रैकाश्रयत्वनियमः । तथाऽत्रापि तस्याः पुरुषशक्तिमपेक्ष्यैव तन्नियमः । सर्ववेदोक्तप्रकारेण ध्यानेन ब्रह्म ज्ञातव्यमिति नियम इत्यर्थः ॥ ४ ॥

५. ॐ दर्शयति च ॐ

श्रुतिः स्मृतिश्च सर्वशाखोक्तमार्गेण ब्रह्म ज्ञातव्यमित्यर्थं **दर्शयति** ज्ञापयतीत्यर्थः ॥ ५ ॥

॥ उपसंहाराधिकरणम् ॥ २ ॥

६. ॐ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॐ

विधिशेषवत् विधिविहितस्येव । यथा विधिविहितत्वात् सन्ध्यावन्दनादिकमवश्यं कर्तव्यम् । तथा **अर्थाभेदात्** भेदो विभागः । सर्ववेदार्थभूतानामानन्दादिगुणानामपहतपाप्मत्वादिदोषाभावानां चाभेदात् अविभागात् । तानविभज्येति यावत् । **उपसंहारः** सर्वगुणानामप्येकबुद्ध्यारोहणरूपोपसंहारः । 'उपास्यः एकः'[३] इति श्रुतौ विहितत्वात् कर्तव्यः । सोऽपि **समाने**

---

१. (तै.आ.२–१५) २. 'वेदः **कृत्स्नोऽधिगन्तव्यो** सरहस्यो द्विजन्मना'

३. '**उपास्यः एकः** परतः परो यो वेदैश्च सर्वैरमल चेतिहासैः ।
सपञ्चगत्रैस्सपुराणैश्च देवः सर्वैर्गुणैस्तत्र तत्र पतीतैः' (भाल्लवेयश्रुतिः)

च समानविषय एव। ये ब्रह्मणि योग्याः पूर्णत्वाविरोधिनो गुणाः। तद्विषय एव। न त्वयोग्यरोदनादौ। तथा सत्यनर्थप्राप्तेरित्यर्थः ॥ १ ॥

७. ॐ अन्यथात्वं च शब्दादिति चेन्नाविशेषात् ॐ

अन्यथात्वं सर्वगुणोपसंहारः कार्य इत्युक्तस्यान्यथाभावः। तस्याकर्तव्यत्वमेवावश्यमङ्गीकार्यम्। कुतः **शब्दात्**। 'आत्मेत्येवोपासीत'[1] इत्युपसंहारश्रुतेः **इति चेन्न**। **अविशेषात्** एते गुणा नोपसंहार्या इति विशेषप्रमाणाभावात्। सर्वैर्गुणैरित्यविशेषेणोपसंहारे तु विशेषप्रमाणसद्भावाच्चेत्यर्थः। आत्मेत्येवेत्येवकारस्त्वयोगव्यवच्छेदक इति भावः ॥ २ ॥

८. ॐ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॐ

परोवरीयस्त्वादिवत् 'यथा स एषः'[2] इत्युक्तानां निरवधिकसर्वोत्तमत्वरूपपरोवरीयस्त्वादिगुणानामेवोपासनार्थमुपसंहारो न सर्वगुणानाम्। तद्वत् सर्वगुणोपसंहारो न कर्तव्यो **वा**। कुतः **प्रकरणभेदात्** परोवरीयो वैश्वानरादिप्रकरणभेदात्। अन्यथा तत्र स्यादित्यर्थः ॥ ३ ॥

९. ॐ सञ्ज्ञातश्चेतदुक्तमस्ति तु तदपि ॐ

सञ्ज्ञातः सर्वविद्यानां भगवन्नामत्वेन तद्गुणोक्तिरूपत्वात्। सर्वविद्योक्तगुणोपसंहारः कार्य इति चेत्। **तदुक्तं** तत्र चोद्ये तदिष्टमेवेति समाधानं तेनोपसंहारसूत्रेणोक्तमित्यर्थः। न केवलं युक्तिसिद्धमेतत्। किन्तु तदपि तस्मिन्नर्थे 'नाम वा एता'[3] इति प्रमाणमपि **अस्ति**। तु अस्त्येवेत्यर्थः ॥४॥

॥ प्राप्त्यधिकरणम् ॥ ३ ॥

१०. ॐ प्राप्तेश्च समञ्जसम् ॐ

---

१. (बृ.३-४-७) २. (छां.१-९-२)

३. 'नाम वा एता ब्रह्मणः सर्वविद्यास्तन्मादकः सर्वगुणैर्विचिन्त्यः' (कौण्डिन्यश्रुतिः)

उपसंहारानुपसंहारयोः कर्तव्यत्वम् । **समञ्जसं** युक्तम् । कुतः **प्राप्तेः** तत्तद्योग्यपुरुषभेदेन तयोर्व्यवस्थितत्वादविरोधप्राप्तेश्चेत्यर्थः ॥ १ ॥

॥ सर्वाभेदाधिकरणम् ॥ ४ ॥

११. ॐ सर्वाभेदादन्यत्रेमे ॐ

इमे सर्वगुणोपसंहर्तृब्रह्मादयः । **अन्यत्र** तदनुपसंहर्तृभ्योऽन्यत्र । तत्फलविलक्षणमहाफले भवन्ति तद्भाजो भवन्ति । कुतः **सर्वाभेदात्** सर्ववेदोक्तगुणानां अविभागेनोपसंहर्तृत्वेनोपासनादित्यर्थः ॥ १ ॥

॥ आनन्दाधिकरणम् ॥ ५ ॥

१२. ॐ आनन्दादयः प्रधानस्य ॐ

आनन्दादयः आनन्दो ज्ञानं सच्छब्दोदितं निर्दोषत्वं आत्मपदोदितस्वामित्वमित्येते चत्वारो गुणाः । **प्रधानस्य** मोक्षस्यार्थे सर्वमुमुक्षुभिः उपास्या इत्यर्थः ॥ १ ॥

॥ प्रियशिरस्त्वाधिकरणम् ॥ ६ ॥

१३. ॐ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॐ

सर्वेषामधिकारिणां **प्रियशिरस्त्वाद्यप्राप्तिः** । 'तस्य प्रियमेव शिरः'[1] इत्यादिश्रुत्युक्तप्रियशिरस्त्वादिगुणोपासनयोग्यता नास्ति । किन्तु केषाञ्चिदेव । कुतः **हि** यस्मात् । तेषां **भेदे** फलभेदे फलतारतम्ये हि प्रसिद्धा 'नैव सर्व–'[2] इति स्मृतिरस्ति । यस्माच्च भेदे फलभेदसिद्ध्यर्थं **उपचयापचयौ** उपासने वृद्धिह्रासौ । तारतम्यमिति यावत् । अपेक्षितौ तस्मादित्यर्थः ॥ १ ॥

॥ इतराधिकरणम् ॥ ७ ॥

१४. ॐ इतरेत्वर्थसामान्यात् ॐ

---

१. (तै.उ.२–५–२)

२. 'नैव सर्वगुणाः सर्वैरुपास्या मुक्तिभेदतः ।
विरिञ्चस्यैव यन्मुक्तावानन्दस्य गुणांतता' (वाराह.)

तुशब्द एवार्थे । **अर्थसामान्यात्** । ल्यब्लोपनिमित्ता पञ्चमी । उपासनस्य स्वस्वप्राप्यफलसाम्यमपेक्ष्य इतरे चतुर्थ्यः सर्वेभ्यश्चेतरे मध्यमा गुणाः देवादिभिरुपसंहर्तव्या एवेत्यर्थः ॥ १ ॥

॥ आध्यानाधिकरणम् ॥ ८ ॥

१५. ॐ आध्यानाय प्रयोजनाभावात् ॐ

वेदेषु सर्वगुणोक्तिरुपसंहारश्च **आध्यानाय** सम्यग्ज्ञानाध्यानार्थम् । कृत्स्नो भवेत् । कुतः **प्रयोजनाभावात्** गुणोक्तेस्तदुपसंहारस्य च ध्यानं विना प्रयोजनाभावादित्यर्थः ॥ १ ॥

१६. ॐ आत्मशब्दाच्च ॐ

'आत्मेत्येवोपासीत'[1] इत्यत्रात्मेति भावप्रधानं सावधारणञ्च । आत्मत्वमात्रोपास्तिविधायकः शब्द **आत्मशब्दः** । आत्मेत्येवोपासीतेति शब्दः । तस्माद् गुणान्तरव्यावृत्तिपूर्वमात्मत्वोपास्तिविधायकशब्दादनुपसंहारश्च सिद्ध्यतीति चार्यः ॥ २ ॥

॥ आत्मगृहीत्यधिकरणम् ॥ ९ ॥

१७. ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ

यतः **इतरवत्** 'सत्यं ज्ञानम्'[2] इत्यादिवाक्ये सत्यादिपदैरन्येषां गुणानामिव **आत्मगृहीतिः** आत्मैवेति वाक्येऽप्यात्मशब्देन चतुर्णां गुणानां ग्रहणं सम्भवति । कुतः **उत्तरात्** 'अत्र होते'[3] इत्युत्तरवाक्याच्च । अतो न चतुर्गुणोपास्त्युक्तेस्तद्विरोध इत्यर्थः ॥ १ ॥

॥ अन्वयाधिकरणम् ॥ १० ॥

१८. ॐ अन्वयादिति चेत् स्यादवधारणात् ॐ

---

१. (बृ.३-४-७) २. (तै.२-१) ३. (बृ.३-४-७)

नन्वात्मेति वाक्यस्यानुपसंहारमानत्वमयुक्तम् । कुतः **अन्वयात्** आत्मशब्दे सर्वगुणानामन्वयात् । तस्य तद्बोधकत्वादिति यावत् । **इति चेत् स्यात्** यत्परोक्तं तत्तथा स्यादेव । तथापि नानुपपत्तिः । कुतः **अवधारणात्** । आत्मेत्येवेत्यवधारणात् । न चानिर्णयः । आत्मशब्दो हि ब्रह्मादीन् प्रत्येव सर्वगुणान् वदति नान्यान् प्रतीति निर्णयोपपत्तेरित्यर्थः ॥ १ ॥

॥ कार्याधिकरणम् ॥ ११ ॥

१९. ॐ कार्याख्यानादपूर्वम् ॐ

कार्याख्यानात् ध्यानकार्यस्य मोक्षस्यालौकिकत्वोक्तेः । **अपूर्वं** अलौकिकं गुणजातम् । ध्यातव्यमित्यर्थः ॥ १ ॥

॥ समानाधिकरणम् ॥ १२ ॥

२०. ॐ समान एवञ्चाभेदात् ॐ

एवञ्च एवमपि । ब्रह्मगुणानामलौकिकत्वेऽपि । वाण्याः **समाने** योग्यगुण-विषय **एव** उपसंहारः न त्वयोग्यक्रियासु । तत्र तु **अभेदात्** अभेदमपेक्ष्य त्रिविक्रमत्वादीनां कादाचित्कानां क्रियाणां तत्सजातीयनित्यविक्रान्त्या-दिष्वन्तर्भावोपसंहारो भवेदित्यर्थः ॥ १ ॥

२१. ॐ सम्बन्धादेवमन्यत्रापि ॐ

हिरण्यगर्भस्य तु **अन्यत्रापि** त्रिविक्रमत्वादिक्रियाविशेषेऽपि । एवं सर्वदोप-संहारो युज्यते । कुतः **सम्बन्धात्** क्रियाणां ब्रह्मणा तादात्म्यरूपसम्बन्धेन नित्यत्वादित्यर्थः ॥ २ ॥

॥ नवाधिकरणम् ॥ १३ ॥

२२. ॐ न वा विशेषात् ॐ

आत्मेति वाक्यस्थात्मशब्देन सर्वगुणानां ग्रहणं नवाऽभ्युपगम्यते । कुतः विशेषात् अधिकारियोग्यताविशेषमपेक्ष्य तस्य तद्योग्यगुणाभिधायकत्वादित्यर्थः ॥ १ ॥

२३. ॐ दर्शयति च ॐ

'सर्वान्'[1] इति श्रुतिः स्वोक्तार्थं प्रतिपादयतीत्यर्थः ॥ २ ॥

॥ सम्भृत्यधिकरणम् ॥ १४ ॥

२४. ॐ सम्भृतिद्युव्याप्त्यपि चातः ॐ

आदिपदेन नञः समाकर्षः । चशब्द एवार्थः । सम्भृतिद्युव्याप्ती सम्यग्भरणप्रकाशव्याप्ती । न सर्वस्योपास्ये । किन्तु देवाद्युपास्ये एव । कुतः अत एवाधिकारियोग्यतायां विशेषसद्भावादेवेत्यर्थः ॥ १ ॥

॥ पुरुषाधिकरणम् ॥ १५ ॥

२५. ॐ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॐ

पुरुषविद्यायामपि सर्वविद्योत्तमत्वेन प्रतिज्ञातायाम् अपि । पुरुषसूक्ताख्यविद्यायां केषाञ्चिदेवोक्तत्वात् इतरेषां तत्रोक्तेभ्योऽन्येषाञ्च गुणानाम् अनाम्नानात् । कर्तव्य एव सर्वविद्यागुणोपसंहार इत्यर्थः ॥ १ ॥

॥ वेधाधिकरणम् ॥ १६ ॥

२६. ॐ वेधाद्यर्थभेदात् ॐ

अर्थभेदात् वेधाद्युपासनफलस्य हिंसादेर्यत्यादियोग्यफलाद् विलक्षणत्वात् वेधादि 'भिन्धि विद्धि शृणीहि'[2] इत्युक्तवेधादिकं न सर्वोपास्यमित्यर्थः ॥ १ ॥

---

१. 'सर्वान् गुणानात्मशब्दो ब्रवीति ब्रह्मादीनामितरेषां न वेद' (भाष्यवचनम्)

२. 'भिन्धि विद्धि शृणीहीति फलभेदेन सर्वेशः । यत्यादीनां तेष्वयोगान्नाधिकारिकता भवेत् । अयोग्योपासनादीपूरनर्थं चार्थनाशनम्' (बृहत्तन्त्रम्)

॥ हान्यधिकरणम् ॥ १७ ॥

२७. ॐ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्द-स्तुत्युपगानवत्तदुक्तम् ॐ

तुरवधारणे । यतः **हानौ** बन्धहानिरूपमुक्तौ । **तदुक्तं** मुक्तानां 'एतत्साम'[१] इति श्रुतावुपासनमुक्तम् । अतो मोक्षेऽपि तेषामुपासनमस्त्येवं । तदपि **कुशाच्छन्दस्तुत्युपगानवत्** एव न विधितः । यथा नियतब्रह्मयज्ञानां द्विजानां नियतसन्ध्योपासनानन्तरमपि कुशैराच्छन्देन स्वेच्छयैव स्तुत्युपगान इवोभयत्र नाम्नोरध्ययनम् । तथा स्वेच्छयैव न विधितः । कुतः **उपायनशब्दशेषत्वात्** । उपायनं मोक्षः उपासनाविधीनां मोक्षवाक्यशेषत्वादित्यर्थः । तथाच मोक्षार्थ उपासनाविधयः कथं तत्रापि ता विदध्युरित्यर्थः ॥ १ ॥

२८. ॐ साम्पराये तर्तव्याभावात् तथा ह्यन्ये ॐ

साम्पराये मोक्षे । उपासनं स्वेच्छयैवेत्यङ्गीकार्यम् । न त्वनिष्टनिवृत्त्यर्थम् । कुतः **तर्तव्याभावात्** मुक्तैः परिहर्तव्यानिष्टस्यैवाभावात् । तदपि कुतः **हि** यस्मात् । **अन्ये** शाखिनः **तथा** 'तीर्णो हि'[२] इति श्रुतिं पठन्ति । तस्मादित्यर्थः ॥ २ ॥

॥ छन्दाधिकरणम् ॥ १८ ॥

२९ ॐ छन्दत उभयाविरोधात् ॐ

मुक्ताः **छन्दतः** स्वेच्छामनुसृत्यैव कर्म कुर्वन्ति न विधितः । कुतः **उभयाविरोधात्** कर्मकरणाकरणयोः विधिबन्धप्रत्यवाययोः अभावादित्यर्थः ॥ १ ॥

३० ॐ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॐ

---

१. 'एतत्साम गायन्नास्ते' (तै.३–१०)

२. 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति' (बृ.६–३–२२)

हिर्हेतौ । **उभयथा** हि बन्धप्रत्यवाययोरभावादेव । **गतेः** मुक्तेः । पुरुषार्थत्वम् । **अन्यथा** मुक्तौ बन्धप्रत्यवाययोर्भावे । **विरोधः** मुक्तेः संसारसमत्वेनापुरुषार्थत्वरूपविरोधः स्यादित्यर्थः ॥ २ ॥

३१. ॐ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॐ

यथा लोके यागाङ्गविष्णुक्रमणस्य क्रियानुष्ठाननियमः न यागसम्पूर्त्यनन्तरमपि अस्ति । किन्तु कदाचिदेव । तथा मुक्तानां कदाचित् कर्म कुर्वन्ति न वेत्येवं तावत् **उपपन्नः** युक्ताः । कुत एतत् । **तल्लक्षणार्थोपलब्धेः** तल्लक्षणस्य परम्परया कर्मसाध्यस्यार्थस्य मोक्षस्य । उपलब्धेः प्राप्तत्वादित्यर्थः ॥ ३ ॥

॥ अनियमाधिकरणम् ॥ १९ ॥

३२. ॐ अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्याम् ॐ

अनियमः अपरोक्षज्ञानिनां मध्ये केषाञ्चिन्मोक्षः केषाञ्चिन्नेत्येवंरूपव्यवस्थाभावो ज्ञायते । कुतः **सर्वेषाम्** अपि मोक्षे । **अविरोधात्** निषेधकाभावात् । किञ्च **शब्दानुमानाभ्यां** 'न कश्चित्'[1] इति श्रुतेः तन्मूलकानुमानाच्चेत्यर्थः ॥१॥

॥ यावदधिकरणम् ॥ २० ॥

३३. ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ

आधिकारिकाणां योग्यतानुसार्युपासनशीलनां ब्रह्मादीनां स्वस्वाधिकारानुसारेणैव मुक्तौ । **अवस्थितिः** । अवस्थितानामुपासनावत्तारतम्येनैव मुक्तौ तेषां फलमित्यर्थः ॥ १ ॥

३४. ॐ अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॐ

---

१. 'न कश्चिद् ब्रह्मवित् सृतिमनुभवति मुक्तो ह्येव भवति तस्मादाहुः सृतिर्हेति' (कौण्डिन्यश्रुतिः)

तुशब्दोऽप्यर्थः । अक्षरधियां ब्रह्मज्ञानिनाम् । विषमत्वेपि अविरोधः विरोधो नास्ति । कुतः ब्रह्मधीत्वात् । किञ्च सामान्यतद्भावाभ्यां सर्वेषां दोषाभावात् उत्तमेभ्यः अधमानां उपकारभावाच्च । कथम् । औपसदवत् सच्छिष्यवत् । किञ्च तदुक्तं तत् असमत्वेऽपि विरोधो नास्तीत्येतत् 'नाना–'[१] इति तुरश्रुता-वुक्तमतोऽप्यविरोध इत्यर्थः ॥ २ ॥

॥ इयदाम्ननाधिकरणम् ॥ २१ ॥

३५. ॐ इयदाम्ननात् ॐ

अधिकारितारतम्यं इयत् एव प्राणावधिकमेव । कुतः आम्ननात् 'प्राणो वाव'[२] इति श्रुतेरित्यर्थः ॥ १ ॥

३६. ॐ अन्तरा भूतग्रामवदिति चेत्तदुक्तम् ॐ

भूतग्रामवत् यथा नामादिप्राणसमूहे एकस्मादेक उत्तमो दृष्टः । तथा अन्तरा परमात्मानं श्रियञ्च विना प्राणादप्युत्तमः अस्तु इति चेत् । नेति शेषः । यतः तदुक्तं तत्र प्राणादुत्तमाभावे 'नहि'[२] इति प्रमाणमुक्तम् । अत इत्यर्थः ॥ २ ॥

३७. ॐ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॐ

अन्यथा प्राणादप्युत्तमाभावे । प्राणपरमात्मनोर्भेदानुपपत्तिरिति चेन्न । कुतः यतः उपदेशवत् यथा श्रुतावुक्तं तथाऽङ्गीक्रियते । अतो नोक्तदोष इत्यर्थः ॥ ३ ॥

---

१. 'नानाविधा जीवसङ्घा विमुक्तौ न चैव तेषां ब्रह्मधियां विरोधः ।
दोषाभावाद् गुरुशिष्यादिभावाल्लोकेऽपि नासौ किमु तेषां विमुक्तेः' (तुरश्रुतिः)

२. 'नहि सर्वेभ्यो भूयान्न हि प्राणाद् भूयान् प्राणो ह्येव भूयांस्तस्माद् भूयान्नाम'
(कौण्डरब्यश्रुतिः)

॥ व्यतिहाराधिकरणम् ॥ २२ ॥

३८. ॐ व्यतिहारो विशिंषन्ति हीतरवत् ॐ

व्यतिहारः प्राणप्रकरणादनन्तरं विष्णोः प्रकरणात् प्राक् प्रश्नप्रतिवचनयोरध्याहारः कार्यः । कुतः **हि** यस्मात् । **इतरवत्** नामादितो वागादिकमिव प्राणवादिनः सकाशात् सत्याख्यविष्णुवादिनः छन्दोगाः 'एष तु वा'[1] इति तुशब्देन **विशिंषन्ति** व्यावर्तयन्ति । तस्मादित्यर्थः ॥ १ ॥

॥ सत्याधिकरणम् ॥

३९. ॐ सैव हि सत्यादयः ॐ

हि यस्मात् । **सत्यादयः** अहमात्मान्ताः पदार्थाः । **सैव** ईश्वराख्यपरदेवतैव । तस्मात् प्राणाधिकाः बहवः न । किन्तु श्रीतदीशावेवेत्यर्थः ॥ १ ॥

॥ कामाधिकरणम् ॥ २४ ॥

४०. ॐ कामादितरत्र तत्र चायतनादिभ्यः ॐ

लक्ष्मीः तत्र भगवत्समीपे स्थिता सती । **इतरत्र** च भूम्यादावपि । **कामात्** ईश्वरेच्छयैवावतारान् करोति । कुतः **आयतनादिभ्यः** सर्वगतत्वप्रतिपादकसर्वायतनेत्यादिश्रुत्यादिभ्य इत्यर्थः ॥ १ ॥

४१. ॐ आदरादलोपः ॐ

आदरात् भगवति निरुपाधिकभक्त्यतिशयात् । **अलोपः** श्रियो भगवदुपासनाभावो नेत्यर्थः ॥ २ ॥

४२. ॐ उपस्थितेस्तद्वचनात् ॐ

---

१. 'एष तु वा अतिदिशति' (छां. ७–१६)

श्रियो नित्यमुक्तत्वं युज्यते। कुतः उपस्थितेः हरिसमीपे सदा स्थितेः। श्रियो नित्यसमीपस्थत्वं च। तद्वचनात् 'द्वावेतौ'[1] इति नित्यसम्बन्धित्ववचनात्। ज्ञायत इत्यर्थः ॥ ३ ॥

॥ निर्धारणाधिकरणम् ॥ २५ ॥

४३. ॐ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॐ

यतः तन्निर्धारणार्थनियमः वेदार्थनिश्चयो वेदार्थनियमश्चेत्येतद्रूपम्। श्रवणमननफलम्। ध्यानफलभूतायाः। तद्दृष्टेः ब्रह्मदर्शनात्। पृथक् एव भिन्नमेव। अतो न ब्रह्मदृष्टिः श्रवणादिना भवतीत्यर्थः। तथाऽपि न श्रवणमननवैयर्थ्यम्। कुतः हि यस्मात्। अप्रतिबन्धः ब्रह्मदृष्टिप्रतिबन्धकनिवृत्तिः। तन्निश्चयः तन्नियमद्वारा श्रवणमननयोः फलम्। अतो ध्यानसाध्याऽपि दृष्टिः प्रतिबन्धकनिवृत्तिद्वारा श्रवणादिसाध्या भवति। तदर्थं श्रवणादिकमपि कार्यमेवेत्यर्थः। हिशब्देन 'आत्मा वा अरे'[2] इति श्रुतिः सूचिता ॥ १ ॥

॥ प्रदानाधिकरणम् ॥ २६ ॥

४४. ॐ प्रदानवदेव हि तदुक्तम् ॐ

प्रदानवत् सम्यक् प्रीतिपूर्वकं गुरूपदेशयुक्तमेव श्रवणादिकं ज्ञानसाधनं न केवलम्। कुतः हि यतः। तदुक्तम्। तस्य ज्ञानस्य गुरुप्रसादार्धीनत्वं 'आचार्यवान्'[3] इति श्रुतावुक्तमत इत्यर्थः ॥ १ ॥

---

१. 'द्वावेतावनादिनित्यावनादिमुक्तौ नित्यमुक्तावनादिकृतौ नित्यकृतौ योऽयं परमां या च प्रकृतीं रमते ह्यस्यां परमां रमते ह्यस्मिन् प्रकृतिः स्वस्मिन् हि रमते परमां न स्वस्मिन् प्रकृतिरत एनमाहुः परम इति' (गौपवनश्रुतिः)

२. 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.४–४–५)

३. 'आचार्यवान् पुरुषो वेद' (छां.३–१४–२)

॥ लिङ्गभूयस्त्वाधिकरणम् ॥ २७ ॥

४५. ॐ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॐ

तत् गुरुप्रसादपूर्वकप्रदानमात्रम् । बलीयः अतिशयेन बलवत् । कुतः लिङ्ग-भूयस्त्वात् वृषभहंसजलवायसरूपेभ्यो वाय्वग्निवरुणेभ्यः श्रुतविद्येनापि सत्यकामेन वचनात् । लिङ्गभूयस्त्वात् गुरुप्रदानादिरूपलिङ्गबाहुल्य-दर्शनात् । तथाऽपि तदपि श्रवणादिकमपि कार्यम् । कुतः 'श्रोतव्यः'[1] इति श्रुतेरित्यर्थः । हिशब्दः श्रुतिसूचकः ॥ १ ॥

॥ पूर्वविकल्पाधिकरणम् ॥ २८ ॥

४६. ॐ पूर्वविकल्पः प्रकरणात् स्यात्क्रियामानसवत् ॐ

क्रियामानसवत् मानसक्रियारूपध्याने यथा विकल्पः तथा पूर्वविकल्पः पूर्वप्राप्तेन गुरुणा समस्य पश्चात्प्राप्तस्य गुरोः । विकल्पः ग्राह्यो वा नवेति विकल्पः स्यात् । न तु स्वीकार्य एवेति विधिः । कुतः प्रकरणात् । प्रकृष्टा-नुग्रहमपेक्ष्य गुरोः स्वीकार्यत्वादिति भावः ॥ १ ॥

४७. ॐ अतिदेशाच्च ॐ

पूर्वगुरुणैव स्वसमोत्तमगुरुस्वीकाराय अतिदेशात् । 'यथा'[2] इति पौष्यायण-श्रुत्याऽतिदिश्यमानत्वात् । युक्तमेव पश्चात्तनस्वीकरणमित्यर्थः ॥ २ ॥

॥ विद्याधिकरणम् ॥ २९ ॥

४८. ॐ विद्यैव तु निर्धारणात् ॐ

---

१. 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.४-४-५)

२. 'ब्रह्मोपास्व ब्रह्मोपचरस्व तच्छृणु हि तत्त्वामवतु। यथा ब्रह्मोपचरेरेवं मामुपचरेर्यो चाऽन्येऽ-स्मद्विधाः श्रेयसश्च तानुपास्व तानुपचरस्व तेभ्यः शृणु हि ते त्वामवन्तु' (पौष्यायणश्रुतिः)

'नान्यः पन्थाः'[1] इति **निर्धारणात्** अन्यनिषेधेन ज्ञानस्यैव मोक्षसाधनत्वनिश्चयात्। **विद्यैव** मोक्षसाधनं न कर्मादिकमित्यर्थः। श्रुतेः प्राबल्यद्योतकस्तुशब्दः ॥ १ ॥

४९. ॐ दर्शनाच्च ॐ

न केवलं परोक्षज्ञप्तिरूपविद्ययैव मोक्षः। किन्तु **दर्शनाच्च** ब्रह्मसाक्षात्कारादपि। अतो न ध्यानवैयर्थ्यमित्यर्थः ॥ २ ॥

॥ श्रुत्यधिकरणम् ॥ ३० ॥

५०. ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ

मोक्षस्य ज्ञानसाध्यत्वेऽबाधः कर्मणैवेति स्मृतिविरोधो नास्ति कुतः। **श्रुत्यादिबलीयस्त्वात्** ज्ञानस्य मोक्षसाधकत्वोपपादकत्वं 'एवं विदित्वा'[1] इत्यादिश्रुतिलिङ्गादेरतिबलवत्त्वेन स्मृतिगतैवशब्दस्यायोगव्यवच्छेदार्थत्वोपपत्तेरित्यर्थः। एतत्सूचनाय **च**शब्दः ॥ १ ॥

॥ अनुबन्धाधिकरणम् ॥ ३१ ॥

५१. ॐ अनुबन्धादिभ्यः ॐ

न केवलं श्रवणादिना। नापि प्रबलगुरुप्रसादेन ब्रह्मदर्शनं भवति। किन्त्व**नुबन्ध**शब्दितहरिगुरुभक्तिशमादिभ्यश्चेत्यर्थः ॥ १ ॥

॥ प्रज्ञान्तराधिकरणम् ॥ ३२ ॥

५२. ॐ प्रज्ञान्तरपृथक्त्ववद्दृष्टेश्च तदुक्तम् ॐ

प्रज्ञान्तरं प्रज्ञाविशेषः। ध्यानमिति यावत्। तस्य **पृथक्त्ववत्** अनेकप्रकारत्ववत्। तदनुसारेण **दृष्टेश्च** ब्रह्मदृष्टिरपि अनेकप्रकारा न सर्वेषामेकविधा।

---

१. 'तमेवं विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे.३ ८)

किञ्च तदुक्तम्। तद्दृष्टेरनेकविधत्वं 'अन्तर्दृष्टयो'[1] इति श्रुतावुक्तञ्चेत्यर्थः ॥ १ ॥

॥ न सामान्याधिकरणम् ॥ ३३ ॥

५३. ॐ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॐ

मृत्युवत् मृत्युमात्रानन्तरं यथा न मुक्तिः। किन्तु चरममृतिविशेषानन्तरमेव। तद्वदत्रापि भगवद्रूपाणां साम्येऽपि **उपलब्धेः**। भगवद्दृष्टिसामान्यात् साधारणरूपापरोक्षज्ञानात्। न सर्वेषां मुक्तिः। किन्तु स्वस्वबिम्बदर्शनादेव। न चैवं सामान्यदर्शनस्य वैफल्यम्। तस्य महरादिलोकप्राप्तिसाधनत्वात्। न चैतावता तस्य मोक्षहेतुत्वं प्राप्नोति। **हि** यतः। **लोकापत्तिः** लोकप्राप्तिमात्रं न मुक्तिः। तस्मादित्यर्थः। हीत्यनेन 'सामान्यदर्शनात्'[2] इत्यादि प्रमाणप्रसिद्धिश्च सूचिता ॥ १ ॥

॥ परेणाधिकरणम् ॥ ३४ ॥

५४. ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॐ

तुरपि यद्यपि। **परेण च** परमात्मनैव। ब्रह्मदर्शनम्। तथापि **शब्दस्य** 'भक्तिरेवैनम्'[3] इति श्रुतेः **ताद्विध्यं** परमात्मन इव भक्तेः स्वातन्त्र्येण ब्रह्मदर्शनहेतुत्ववाचित्वं युज्यते। कुतः दर्शनादौ कारणत्वादिति हेतुरुपस्कर्तव्यः। यद्वा **परेण** वाच्येन निमित्तेन **शब्दस्य** भक्तिरिति श्रुतेः। **ताद्विध्यं** युक्तमित्यर्थः। तर्हि कथं भक्तिरिति वाक्येन सत्स्वप्यन्यसाधनेषु **अनुबन्धो** भक्तिः विशिष्योच्यत इत्यत उक्तम्– **भूयस्त्वात्** इति। तस्याः साधनेषु **भूयस्त्वात्** प्राधान्यात्। तदभिप्रायेण **अनुबन्धो** भक्तिर्विशिष्योच्यत इत्यर्थः ॥ १ ॥

---

१. 'अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयस्सर्वदृष्टय इति। देवा वाव सर्वदृष्टयस्तेषु वोत्तरोत्तरमात्रह्मणोऽन्वेषु यथायोगं यथा ह्याचार्या आचक्षते' (कण्ठश्रुतिः)

२. 'सामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मदर्शनात्' (नारायणतन्त्रम्)

३. 'भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी' (माठरश्रुतिः)

॥ एकाधिकरणम् ॥ ३५ ॥

५५. ॐ एकः आत्मनः शरीरे भावात् ॐ

अंशोऽशीतिपदयोः अर्थः एक एव । अंशांशिनोरैक्यमेव । कुतः आत्मनः अंशिनः । इन्द्रादेः शरीरे कर्मनिर्मितशरीरे । अंशस्यार्जुनादेः । भावात् तदभिमानितया सत्त्वादित्यर्थः ॥ १ ॥

५६. ॐ व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॐ

उपलब्धिवत् ज्ञानसुखादौ परस्परं भेद इव । अंशांशिनोरपि । व्यतिरेको भेद इति तु न । कुतः तद्भावभावित्वात् अंशस्यांशिकृतभावशब्दितोपासनजन्यफलानुभवित्वात् । अन्यथा तत्र स्यादित्यर्थः ॥ २ ॥

॥ अङ्गावबद्धाधिकरणम् ॥ ३६ ॥

५७. ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ

तुशब्दो विशेषे । अङ्गावबद्धाः हरेरङ्गाश्रिताः । देवा अपि तत्परिवारत्वेन देवैरुपास्याः । तदुपसंहारे तु विशेषोऽस्ति । कः? देवानां प्रतिवेदं सर्ववेदगतासु शाखासु उक्तं यत् ब्रह्माद्यङ्गदेवतावबद्धगुणजातं तत्सर्वं रुद्रादिषु न उपसंहार्यम् । किन्तु योग्यमेवेत्येवंरूप इत्यर्थः । हि इत्यनेन 'समत्वाद्वा'[1] इति स्मृतिप्रसिद्धिः सूचिता ॥ १ ॥

५८. ॐ मन्त्रादिवद्वाऽविरोधः ॐ

मन्त्रादिवत् यथाऽग्र्याद्यधमदेवतावाचिमन्त्रविद्यानां ब्रह्माद्युत्तमदेवतावाचित्वं तथा अविरोधः अधमगुणानामुत्तमेपूपसंहारेऽपि विरोधो नास्तीति वाऽभ्युपगम्यत इत्यर्थः ॥ २ ॥

---

१. 'समत्वाद्वोत्तमत्वाद्वा नाङ्गदेवाद्युपासनम् ।
उपसंहार्यमित्याहुर्वेदसिद्धान्तवादिनः' (ब्रह्मतर्क.)

॥ भूमाधिकरणम् ॥ ३७ ॥

५९. ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथाच दर्शयति ॐ

क्रतुवत् यथा क्रतुशब्दितप्रायणीयाद्यङ्गजातस्य । विकृतिक्रतुषु अनुवृत्तिं अनुष्ठेयत्वं च । तथा **भूम्नः** पूर्णत्वगुणस्येतरगुणेभ्यो **ज्यायस्त्वं** विशिष्टत्वम् । आनन्दादिगुणेष्वनुवृत्तितयोपासनस्य सफलत्वं सर्वोपास्यत्व चेत्येवं रूपं पुज्यते । कुत एतत् हि यस्मात् । 'भूमैव देवः'[1] इति श्रुतिः । **तथा दर्शयति** प्रतिपादयति । तस्मादित्यर्थः ॥ १ ॥

॥ नानाशब्दाधिकरणम् ॥ ३८ ॥

६०. ॐ नाना शब्दादिभेदात् ॐ

भूमगुणः सर्वैर्यथायोग्यं **नानाप्रकारेणोपास्यः** । न त्वेकप्रकारेण । कुतः । **शब्दादिभेदात्** । शब्दादिप्रमाणेरधिकारिभेदात् । भूमगुणस्य नानाप्रकारेण प्रतीतेरित्यर्थः ॥ १ ॥

॥ विकल्पाधिकरणम् ॥ ३९ ॥

६१. ॐ विकल्पो विशिष्टफलत्वात् ॐ

विकल्पः स्वस्वमोक्षसाधनान्यनृसिंहाद्युपासनं कार्यं न वेति द्विविधः प्रकारः स्यात् । कुतः **विशिष्टफलत्वात्** तथोपासनस्य दुरितनिवृत्तिरूपफलविशेषमपेक्ष्य कर्तव्यत्वेन तदनुसारेण विकल्पस्यैव युक्तत्वादित्यर्थः ॥ १ ॥

॥ काम्याधिकरणम् ॥ ४० ॥

६२. ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॐ

---

१. 'भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते ।
तस्माद्भूमा गुणतो वै विशिष्टो यथा क्रतुः कर्ममयेषु विशिष्टः' (गौपवनश्रुतिः)

काम्यास्तु काम्यसाधनरूपे कामितसाधनभगवद्गुणास्तु । **यथाकामं** । स्वस्वफले कामानुसारेण । **समुच्चीयेरन्न वा** । अमुमुक्षुभिरुपसंहर्तव्याः मुमुक्षुभिस्तु नोपसंहर्तव्या इति । वा व्यवस्थितविकल्पः स्यात् । कुतः **पूर्वहेत्वभावात्** मुमुक्षूणां मोक्षेच्छापूर्वकालीनपूर्वसूत्रोक्तान्याकामाख्यहेत्वभावात् । एवं मुमुक्षुभिरेवेश्वरप्रीत्यर्थमुपसंहार्या फलार्थं नोपसंहार्या इति वा विकल्पः स्यादित्यर्थः ॥ १ ॥

॥ अङ्गाधिकरणम् ॥ ४१ ॥

६३. ॐ अङ्गेषु यथाऽऽश्रयभावः ॐ

अङ्गेषु भगवदङ्गेषु । **यथाऽऽश्रयभावः** 'चक्षोः सूर्योऽजायत'[1] इत्यादौ यथा यथाऽऽश्रयत्वमुक्तं तथा तैरुपासनं कर्तव्यमित्यर्थः ॥ १ ॥

६४. ॐ शिष्टेश्च ॐ

'यस्मिन्'[2] इति श्रुतिविहितत्वाच्च तथोपासनं कर्तव्यमित्यर्थः ॥ २ ॥

६५. ॐ समाहारात् ॐ

समाहारशब्देनोपसंहारफलश्रुतिर्गृह्यते । देवानां स्वस्वजनकाङ्गकत्वरूप-गुणोपसंहारे फलवचनाच्च । तैस्तथोपसंहृत्योपासनं कर्तव्यमित्यर्थः ॥ ३ ॥

६६. ॐ गुणसाधारण्यश्रुतेश्च ॐ

गुणानां भगवद्गुणानां । **साधारण्यस्य** सर्वोपास्यत्वस्य । **श्रुतेः** 'साधारण्यात्'[3] **इति श्रुत्युक्तत्वाच्च** । देवैस्तथोपासनं कार्यमित्यर्थः ॥ ४ ॥

---

१. (ऋ.१०–९०–१३)

२. '**यस्मिन्** यस्मिन् यो हि चाङ्गे निविष्टः ।
परस्य चिन्त्यः स तथा तथैव' (पैङ्गायणश्रुतिः)

३. '**साधारण्यात्** सर्वगुणाः परस्य ।
समाहार्यास्तत्त्वदृशो मुमुक्षोः' (माण्डव्यश्रुतिः)

॥ न वाधिकरणम् ॥ ४२ ॥

६७. ॐ न वाऽतत्सहभावश्रुतेः ॐ

अङ्गदेवतोपासनं देवान्यैर्न कार्यम् । किन्तु देवैरेवेति वा व्यवस्थितविकल्पः स्यात् । कुतः अतत्सहाभावश्रुतेः तत्सहश्रुतेरभावात् । सर्वशाखागतगुणोपासनेन सहाङ्गदेवतोपासनस्य श्रवणादित्यर्थः ॥ १ ॥

६८. ॐ दर्शनाच्च ॐ

'सत्यो ज्ञानः'[1] इति श्रुतौ अस्यार्थस्य दर्शनात् उक्तत्वाच्च । देवैरेवाङ्गदेवतोपास्तिः कार्या नान्यैरित्यर्थः ॥ २ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

—०—

१. 'सत्यो ज्ञानः परमानन्दरूप आत्मेत्येव नित्यदोपासन स्यात् ।
नान्यत् किञ्चित् समुपासीत धीरस्सर्वैर्गुणैर्देवगणा उपासते' (कमठश्रुतिः)

तृतीयाध्यायस्य चतुर्थः पादः

॥ पुरुषार्थाधिकरणम् ॥ १ ॥

१. ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ

पुरुषैरर्थ्यमानं यच्छुभफलं तत्सर्वमपि । अतः ब्रह्मदर्शनाद् भवति न तु मोक्षमात्रम् । कुतः शब्दात् 'यं यं'[१] इति श्रुतेरिति भगवान् बादरायणो मन्यत इत्यर्थः ॥ १ ॥

२. ॐ शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॐ

शेषत्वात् ज्ञानस्य कर्माङ्गत्वात् । निमित्तादेव पुरुषार्थवादः 'यं यम्'[१] इति श्रुतौ ज्ञानस्य स्वर्गादिपुरुषार्थसाधनत्ववादः न तु मोक्ष इव स्वर्गादौ प्राधान्यात् । तत्कथम् । यथा अन्येषु स्वर्गसाधनकर्मशेषभूतेषु धनादिषु । यथा स्वर्गं धनादिति प्राधान्यवादः । तथा इति जैमिनिराचार्यो मन्यत इत्यर्थः ॥ २ ॥

३. ॐ आचारदर्शनात् ॐ

'यज्ञेन यज्ञम्'[२] इति देवानामपि कर्मानुष्ठानश्रुतेश्च न ज्ञानादेव सर्वपुरुषार्थ-प्राप्तिरित्यर्थः ॥ ३ ॥

---

१. 'यँयं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तन्तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः' (मु. ३-१-१०)

२. 'यज्ञेन यज्ञमयजन्त' (तै. आ. ३-१२-७)

॥ स्तुत्यधिकरणम् ॥ ४ ॥

१४. ॐ स्तुतयेऽनुमतिर्वा ॐ

ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषोऽस्त्येव । कुतः यतः यथेष्टाचारो ज्ञानी मुच्यत एवेति ज्ञानिस्तुतय एव 'येन स्यात् केन स्यात्'[1] इत्युच्यते । अनुमतिर्वा ज्ञानिनां यथेष्टाचारेऽभ्यनुज्ञामात्रं वा न त्वत्र यथेष्टाचारविधिरत इत्यर्थः ॥ १ ॥

१५. ॐ कामकारेण चैके ॐ

एके शाखिनः । कामकारेण च यथेष्टाचारेणापि ज्ञानिनां मोक्षं 'कामचाराः'[2] इति श्रुतौ पठन्ति । अतो न ज्ञानिनः सदसत्प्रवृत्त्योर्मोक्षहानिः । किन्तु फले विशेषमात्रमस्तीत्यर्थः ॥ २ ॥

१६. ॐ उपमर्दञ्च ॐ

चशब्दोऽप्यर्थः । यदा ज्ञानिनः प्रारब्धकर्मणोऽपि किञ्चिद्भुक्तस्य ज्ञानेनोपमर्दं ईषत्फलह्रासम् । 'ओमित्युच्चार्य'[3] इति श्रुतावेके शाखिनः पठन्ति । तदा ज्ञानोत्तरकालीनासत्कर्म न मोक्षप्रतिबन्धकमिति किं वर्णनीयमित्यर्थः ॥३॥

१७. ॐ ऊर्ध्वरेतस्सु च शब्दे हि ॐ

कामचाराणामपि ज्ञानिनां मुक्त्यधिकारवत् कामचाराणां जिज्ञासूनां न ज्ञानाधिकारः । कुतः हि यस्मात् । शब्दे 'य इमम्'[4] इति श्रुतावूर्ध्वरेतस्त्वादिगुणवत्स्वेव ज्ञानोपदेशो विहितः । तस्मादित्यर्थः ॥ ४ ॥

---

१. 'अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति' (बृ.५.५.१)

२. '– कामभक्षाः कामवादाः कामेनैवेदं देहमुत्सृज्याथ परात्परमीयुरनारम्भणम्' (सामशाखा.)

३. 'ओमित्युच्चार्यान्तरिममात्मानमभिपश्योपमृद्य पुण्यं च पापं च काममाचरन्तो ब्रह्मानुव्रजन्ति' (तुरश्रुतिः)

४. 'य इमं परमं गुह्यमूर्ध्वरेतस्सु भाषयेत् । न तथा विद्यते भूयान्यं प्राप्यान्येऽपि भूयसः' (माठरश्रु.)

१८. ॐ परामर्शं जैमिनिरचोदना चापवदति हि ॐ

जैमिनिः परामर्शं 'येन स्यात्'[१] इति वाक्ये 'प्रातरुत्थाय'[२] इत्यादिश्रुत्युक्त-सदाचारस्यैव ग्रहणमभ्युपेत्यात्र सदाचारस्यैव स्वेच्छया नियमेनाचरणं प्रतिपाद्यम्। न तु निषिद्धस्य करणमिति मन्यते। कुतः **हि** यस्मात्। **अचोदना** अनिषिद्धं ज्ञानिना कार्यमिति विध्यभावः **अपवदति** च प्रत्युत 'ब्राह्मणो न हन्तव्यः' इति श्रुतिः विकर्म निषेधति च इति। तस्मादित्यर्थः ॥ ५ ॥

१९. ॐ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॐ

बादरायणः भगवान् बादरायणस्तु। **अनुष्ठेयं** स्वेच्छया श्रुत्याद्युक्तानुष्ठान-योग्यकिञ्चित्कर्माचरणाभ्युज्ञानमेव 'येन स्यात्'[१] इति श्रुतेरर्थः। न तु सर्वकर्मकरणाय यथेष्टाचारविधिरेवेति मन्यते। कुतः **साम्यश्रुतेः** केनापि प्रकारेण प्रवृत्तावपि 'ईदृश एव'[१] इति ज्ञानिनः साम्योक्तेः ॥ ६ ॥

२०. ॐ विधिर्वा धारणवत् ॐ

यथा वेदधारणविधेः त्रैवर्णिकाधिकारिकत्वमेव न तु सर्वाधिकारिकत्वम्। तथा **विधिः** ज्ञानिनामेव 'येन स्यात्'[१] इति स्वेच्छाचरणविधिः न त्वज्ञानिना-मित्यर्थः। **वा**शब्दः प्रागुक्तपक्षद्वयात् अस्य पक्षान्तरत्वद्योतकः ॥ ७ ॥

२१. ॐ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॐ

'केन स्यात्'[१] इति वाक्यं पूर्वोक्तस्तुतिः एव न स्वेच्छाचरणविधिः। कुतः? **उपादानात्** ज्ञानिभिरपि 'सन्ध्यामुपासीत'[२] इत्यादिसाधारणविधिस्वीकारात्

---

१. 'अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः **केन स्याद्येन स्यात्तेनेदृश एवेति**' (बृ.५.५.१)

२. 'प्रातरुत्थाय **सन्ध्यामुपासीत** यत्सन्ध्यामुपासते ब्रह्मैव तदुपासतेऽथ देवान्नमेजुहुयाद्देदा-नावर्तयीत नान्यत् किञ्चिदाचरेन्न सुरां पिबेन्न पलाण्डुं भक्षयीत न भृशं वदेन्न विस्मरेदात्मानं सोमं पिबेद्धुतशेषेण वर्तयेत्'

इति चेन्न। कुतः? **अपूर्वत्वात्** अशब्दवाच्यपरमात्माधीनत्वादित्यर्थः। तथाच ज्ञानिनः स्वेच्छाचरणविधेरप्यभावे सर्वविध्यतिदूरत्वप्रसङ्गेन परमात्माधीनत्वं न स्यादिति भावः ॥ ८ ॥

२२. ॐ भावशब्दाच्च ॐ

भावः इच्छाभावशब्दघटित 'यथाविधानम्'[1] इति श्रुतेश्च 'केन स्यात्'[2] इत्ययं कामचारविधिरित्यर्थः ॥ ९ ॥

२३. ॐ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॐ

नियमेन सर्वधर्माचरणविधिपक्षस्यानुष्ठेयानां मध्ये स्वेच्छया कतिपय-धर्माचरणाभ्यनुज्ञानपक्षस्य स्वेच्छाचरणविधिपक्षस्य च परस्परविरुद्धत्वात्। 'येन स्यात्'[2] इत्यादयः **पारिप्लवार्थाः** अव्यवस्थितार्थका **इति चेन्न**। कुतः? **विशेषितत्वात्** 'त्रेधा हि ज्ञानिनः'[3] इति श्रुतौ ज्ञानिनां विधिनियतादि-पदैर्विशेषितत्वेन तेषामनेकप्रकारत्वस्योक्तत्वादित्यर्थः ॥ १० ॥

२४. ॐ तथा चैकवाक्योपबन्धात् ॐ

उक्तपक्षत्रयानुसारिवाक्यानां अधिकारिभेदमाश्रित्याविरोधेनैकवाक्यतायाः युक्तत्वात्। तथाच श्रुतीनामेकवाक्यत्वे सिद्धे 'येन स्यात्' इति वाक्यस्यापि **एकवाक्योपबन्धात्** अधिकारिभेदेन व्यवस्थितार्थकत्वोपपत्तेः न पारिप्लवार्थत्व-मित्यर्थः। **तथाच** जैमिनिमतं मनुष्यज्ञानविषयम्। व्यासमतं देवताविषयम्। 'विधिर्वा' इति मतं विधिवेत्तृविषयमिति न विरोध इति भावः ॥ ११ ॥

---

१. 'यथाविधानमपरे विधिभावे प्रजापतेः। ब्रह्मणः परमस्यैव सर्वविध्यतिदूरता' (तुरश्रुतिः)

२. 'अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्यात्तेन स्यात्तेनेदृश एवेति' (बृ.५.५.१)

३. 'त्रेधा हि ज्ञानिनो ह वाव भवन्ति विधिनियता अनियताः स्वेच्छानियता इति। विधिनियता मनुष्या अनियता हि देवा ब्रह्मैव स्वेच्छानियत इति' (गौपवनश्रुतिः)

२५. ॐ अत एव चाग्नीन्धनाद्यनपेक्षा ॐ

ज्ञानस्य मोक्षसाधनत्वे **अग्नीन्धनाद्यनपेक्षा** अग्निहोत्रादिसत्कर्मसापेक्षितत्वं नास्ति । कुतः? **अत एव** कामचाराणामपि मोक्षस्य प्रमाणसिद्धत्वादित्यर्थः ॥ १२ ॥

२६. ॐ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॐ

अश्ववत् यथा गतिसाधनाश्वादयः गतिनिष्पत्यर्थमेवापेक्ष्यन्ते न तत्फलं ग्रामादिप्राप्त्यर्थम् । तथा मोक्षसाधनज्ञानोत्पत्तावेव । **सर्वापेक्षा** सर्वधर्मापेक्षा । न तु ज्ञानफलमोक्षेऽपि । कुतः? **यज्ञादिश्रुतेः** 'विविदिषन्ति यज्ञेन'[1] इति श्रुतेरित्यर्थः ॥ १३ ॥

२७. ॐ शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॐ

यद्यपि ज्ञानेनैव मोक्षो नियतः । तथाऽपि ज्ञानी **शमदमाद्युपेतः स्यात्** शमदमादियुक्तो भवेत् । कुतः? **तद्विधेः** 'आचार्यात्'[2] इति श्रुत्या तस्य ज्ञानिनः शमदमादेर्विधानात् । **तथापि** न ज्ञानिनः शमदमादिवैयर्थ्यम् । कुतः **तदङ्गतया** ज्ञानाङ्गतया ज्ञानफलोपकार्यमतस्तेषां शमदमादीनाम् **अवश्यानुष्ठेयत्वात्** अवश्य-मनुष्ठानार्हत्वात् । तुशब्दः शमदमादेः पूर्णफलार्थत्वं सूचयति ॥१४॥

२८. ॐ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॐ

चशब्द एवार्थे । ज्ञानिनः **सर्वान्नानुमतिः** 'यदि ह वा अप्येवं वित्'[3] इति निषिद्धानिषिद्धसर्वभक्षणस्याभ्यनुज्ञानश्रुतिः । **प्राणात्यये** प्राणत्यागकाल-

---

१. '**विविदिषन्ति यज्ञेन** दानेन तपसाऽनाशकेन' (बृ.६-४-२२)

२. 'आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्य शान्तो भवेद्दान्तो भवेदनुकूलो भवेदाचार्यं परिचरेत् परिचरेदाचार्यम्' (माठरश्रुतिः)

३. '**यदि ह वा अप्येवंविन्निखिलं** भक्षयीतैवमेव स भवति'

विषयैव न तु सर्वकालविषया कुतः? तद्दर्शनात् तस्मिन्नर्थे 'न वा अजीविष्यम्'[1] इति श्रुतेः तदर्थरूपलिङ्गदर्शनाच्चेत्यर्थः ॥ १५ ॥

२९. ॐ अबाधाच्च ॐ

ज्ञानिनां निषिद्धाकरणे **बाधकाभावाच्च** निषिद्धं न कार्यमित्यर्थः ॥ १६ ॥

३०. ॐ अपि स्मर्यते ॐ

तत्करणेऽल्पफलता च 'अतीत'[2] इत्यादिना कृष्णादिभिः स्मृतिभिः निषिद्धं न कार्यमिति **स्मर्यते** च । अतः **अपि** न निषिद्धं ज्ञानिभिः कार्यमित्यर्थः ॥ १७ ॥

३१. ॐ शब्दश्चातोऽकामचारे ॐ

चो यतः । **अकामचारे** निषिद्धकर्मभावे । **शब्दः** 'स य एतदेवं वित्'[3] इति श्रुतिरस्ति । **अतः** अपि न निषिद्धं ज्ञानिना कार्यमित्यर्थः ॥ १८ ॥

३२. ॐ विहितत्वाच्चाश्रमकर्मापि ॐ

चः कारणसमुच्चये । **अपिः** वर्णाश्रमधर्मसमुच्चये । ज्ञानिना न केवलं निषिद्धमकार्यम् । किन्त्वाश्रमकर्मापि वर्णाश्रमोचितकर्मापि सम्पूर्णफलार्थं कार्यम् । कुतः? **विहितत्वात्** 'पश्यन्नपि'[4] इति श्रुतिविहितत्वादित्यर्थः ॥१९॥

३३. ॐ सहकारित्वेन च ॐ

---

१. 'न वा अजीविष्यमिमानखादन्निति होवाच कामो म उपादानम्' (छां. १-१०-४)

२. 'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः ।
एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत्' (हरिवंशेषु)

३. 'स य एतदेवं विदेवं मन्वान एवं पश्यन्न कामचरितं चरेच्च कामं भक्षयीत न काममनुवर्तेत' (कौण्डिन्य.)

४. 'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन् ।
यदात्मनस्तु नियतमानन्दोत्कर्षमाप्नुयात्' (कौषारवश्रुतिः)

ज्ञानिना सम्पूर्णफलसिद्धयै सत्कर्म कार्यमेव । कुतः? 'यथा राज्ञः'[१] इति श्रुतौ मोक्षफलातिशयकर्मणो ज्ञानसहकारित्वेन उक्तत्वाच्चेत्यर्थः ॥ २० ॥

॥ उभयलिङ्गाधिकरणम् ॥ ५ ॥

३४. ॐ सर्वथाऽपि तु त एवोभयलिङ्गात् ॐ

सर्वथाऽपि देशकालगुरूपदेशाद्यनेकसाधनसम्पत्तावपि ये ज्ञानयोग्याः **त** एव ज्ञानमाप्नुवन्ति । नायोग्याः । कुतः? **उभयलिङ्गात्** । उभयोः योग्यायोग्ययोः इन्द्रविरोचनयोः । विरिञ्चोपदेशसाम्येऽपि सम्यग्विपरीतज्ञानप्राप्तिरूप-ज्ञापकादेवेत्यर्थः ॥ १ ॥

३५. ॐ अनभिभवं च दर्शयति ॐ

च यतः । 'दैवीमेव'[२] इति श्रुतिः । न केवलं योग्यायोग्यस्वरूपं दर्शयति । किन्त्वनभिभवं **च** स्वभावतिरस्काराभिभवञ्च । **दर्शयति** प्रतिपादयति । अतो नायोग्यानां ज्ञानप्राप्तिरित्यर्थः ॥ २ ॥

३६. ॐ अन्तरा चापि तु तद्दृष्टेः ॐ

चशब्दोऽवधारणे । तुशब्दो विशेषार्थः । **अन्तरा** सम्यग्ज्ञानविपरीतज्ञान-योर्मध्ये । स्थितानां नित्यसंसारिणा**मपि** मिश्रस्वभावानभिभव एव । कुतः? **तद्दृष्टेः** तेषां तस्मिन् मिश्रज्ञान एव तस्योदाहृतस्य **दृष्टेः** दर्शनादित्यर्थः ॥३॥

३७. ॐ अपि स्मर्यते ॐ

---

१. 'यथा राज्ञस्सहकार्येव मन्त्री तथाऽप्येतं क्षितिपः कार्यमिच्छेत् ।
एवं ज्ञानं कर्म विनाऽपि कार्यं सहायभूतं न विचारः कुतश्चित्' (कमठश्रुतिः)

२. 'दैवीमेव सम्पत्तिं देवा अभिगच्छन्त्यासुरीमेव चासुरा नैवैतयोरभिभवः कदाचित्स्वभाव एव ह्येवतिष्ठते'

कृष्णादिभिः (गीतायां) स्वभावानभिभवः 'असुराः'[१] इति स्मर्यते च। अतोऽपि देवदानवमानवस्वभावानां नाभिभव इत्यर्थः ॥ ४ ॥

३८. ॐ विशेषानुग्रहं च ॐ

चशब्दो युक्तिसमुच्चये। यतः 'भृण्वे वीर'[२] इति श्रुतिः देवेषु परमेश्वरस्य विशेषानुग्रहं च। दर्शयति प्रतिपादयति। अतो देवानामेव सम्यक् ज्ञानतत्फले नान्येषामित्यर्थः ॥ ५ ॥

३९. ॐ अतस्त्वितरज्यायो लिङ्गाच्च ॐ

तुशब्दोऽवधारणे। अतो देवभागादसुरभागस्य कदाप्यूनत्वाभावात्। इतरत् असुरवृन्दमेव। अतो देवभागाज्ज्यायः बहुलम्। कुतः? लिङ्गात् 'तस्मान्न जनतामियात्'[३] इति जनसङ्गप्रवेशनिषेधोक्त्यन्यथाऽनुपपत्तिरूपलिङ्गात्। चशब्दसूचितः 'ततः कनीयसा'[४] इति श्रुतेश्चेत्यर्थः ॥ ६ ॥

४०. ॐ तद्भूतस्य तु तद्भावो जैमिनेरपि नियमा-तद्रूपाभावेभ्यः ॐ

तद्भूतस्य तु देवभूतस्यैव। तद्भावः देवताभावः एवमसुरस्यैवासुरभावः जैमिनेराचार्यस्यापि सिद्ध एव। कुतः? नियमातद्रूपाभावेभ्यः 'नासुरा'[५] इति

---

१. 'असुरा आसुरेणैव स्वभावेन च कर्मणा। ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात्॥ देवा दैवस्वभावेन कर्मणा चाप्यसंशयम्। सम्यग्ज्ञानेन परमां गतिं गच्छन्ति वैष्णवीम्। नानयोरन्यथाभावः कदाचित्कापि विद्यते। मानुषा मिश्रमतयो विमिश्रमतयोऽपि च' (स्कान्दे)

२. 'भृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति नर्नीपमानः। एधमानद्विकुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्' (ऋ.६.४७.१६) ३. (बृ.३-३-१०)

४. 'ततः कनीयसा एव देवा ज्यायसा असुराः' (बृ.३-३-१)

५. 'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च गतिमीयुरात्मोपासनमेव जानिमनुभवन्ति'

चशब्दसूचितश्रुतेः 'यो यद्रूपः'[1] इति अतद्रूपशब्दोक्तान्यस्यान्यरूपत्वाभावश्रुतेः। अभावः अभूतिः। देवासुराणाम्। 'तं भूतिः'[2] इति भावशब्दितश्रुतेरित्यर्थः ॥ ७ ॥

॥ आधिकारिकाधिकरणम् ॥ ६ ॥

४१. ॐ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॐ

चशब्दः ज्ञानार्थिनां अयोग्याकाङ्क्षावर्जनरूपेतिकर्तव्यतान्तरसूचकः। **आधिकारिकमपि** देवतापदमपीतरैर्नाकाङ्क्ष्यम्। भगवदैश्वर्यादिकं तु सुतरामिति सूचयितुमपिशब्दः। कुतः? **पतनानुमानात्** अयोग्येच्छात्वतः पतनस्य स्मार्तयुक्तिसिद्धत्वात्। अत एव **तदयोगात्** अयोग्याकाङ्क्षाया कर्तुमयुक्तत्वादित्यर्थः ॥ १ ॥

४२. ॐ उपपूर्वमपीत्येके भावशमनवत्तदुक्तम् ॐ

भावशमनवत् भावे चित्ते शमनं भगवन्निष्ठा येषां ते भावशमनाः ऋषयः तत्पदं यथा नाकाङ्क्ष्यम्। किमुत सुतरां देवादिपदमिति सूचयितुमपिशब्दः। **इत्येके** शाखिनः मन्यन्ते। कुतः? यतो ज्ञानार्थिनां यथेतीन्द्रद्युम्नश्रुतौ। **तदुक्तं** तथोक्तम्। अत इत्यर्थः ॥ २ ॥

४३. ॐ बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॐ

बहिस्तु देवादिपदेभ्योऽन्यत्र। ज्ञाने भक्त्यादिविषये। **उभयथाऽप्याकाङ्क्षायां** अनाकाङ्क्षायामपि न दोषः। कुतः? देवर्षीरिति **स्मृतेराचाराच्च** नानात्वमिति शुभाचारविधायकशब्दाच्चेत्यर्थः ॥ ३ ॥

---

१. 'नासुराणां देवं रूपं न देवानामासुरं न चोभयं मनुष्याणां यो यद्रूपः स तद्रूपो निसर्गोऽयं भवति'

२. 'तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्वा अप्येतर्हि सुप्तो भूर्भूरित्येव प्रबोधयत्यथ भूरित्य सुरास्ते ह पराबभूवुः' (छां.आ.२-१-८)

॥ फलश्रुत्यधिकरणम् ॥ ७ ॥

४४. ॐ स्वामिनः फलश्रुतेरित्यात्रेयः ॐ

समुदायविवक्षया **स्वामिन** इत्येकवचनम् । तथाच स्वामिनां देवानामेव । ज्ञानफलं भवति न प्रजानाम् । कस्मात् तेषामेव ज्ञानस्वामित्वात् 'यदु किञ्च'[१] इति तेषामेव **फलश्रुतेश्चेत्येवमात्रेयाचार्यो** मन्यत इत्यर्थः ॥ १ ॥

४५. ॐ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॐ

हि यस्मात् । **तस्मै** प्रजार्थं देवैः **परिक्रियते** प्रजाद्वारा ज्ञानं सम्पाद्यते । तस्मादार्त्विज्यं आर्त्विज्यमिवेति शेषः । ऋत्विजां यज्ञफलमिव प्रजानामप्यल्पज्ञानफलमस्तीत्यौडुलोमिराचार्यो मन्यत इत्यर्थः ॥ २ ॥

४६. ॐ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॐ

तद्वतो प्रजावतो राज्ञः, शिष्यवतो गुरोश्च । **विध्यादिवत्** विधानफलयोरिव । यथा प्रजानां शिष्याणां पालनव्याख्यानयोः राजगुरुसहकारित्वेन विधानं फलञ्च तयोरेव मुख्यतया स्वविहितज्ञानदाने प्रजानां **सहकार्यन्तरविधिः** देवैरनुग्राह्यरूपविशेषसहकार्यन्तरत्वेन करणम् । **पक्षेण** पक्षत्वेन । **तृतीयं** आत्रेयौडुलोमिपक्षापेक्षया तृतीयः । अयमेव बादरायणीयपक्ष इत्यर्थः ॥३॥

॥ कृत्स्नभावाधिकरणम् ॥ ८ ॥

४७. ॐ कृत्स्नभावात्तु गृहिणोपसंहारः ॐ

यतः 'कुटुम्बे'[२] इति श्रुतौ **गृहिणो** गृहस्थस्यैव मोक्षफलोक्त्या पर्यवस्यति । **कृत्स्नभावात्** सम्पूर्णगृहस्थधर्मवतो देवानपेक्ष्यैव । अतः श्रुत्यविरोधाच्च यतेरेव सर्वाश्रमेषूत्तमत्वमित्यर्थः ॥ १ ॥

---

१. 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति यदु किञ्चेमाः प्रजा विजानते देवा एव तद्विजानते देवानां ह्येतद्भवति स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाणः' (माध्यन्दिन.शु.)

२. 'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत्' ,'नच पुनरावर्तते नच पुनरावर्तते' (छां.८-१५-१)

४८. ॐ मौनवदितरेषामप्युपदेशात् ॐ

मौनवत् यतित्वस्येव । **इतरेषां** अन्याश्रमधर्माणामपि । **उपदेशात्** 'देवा एव ब्रह्मचारिणः'[1] इति श्रुतावुक्तत्वात् । सर्वाश्रमिभ्यो देवानामुत्तमत्वमित्यर्थः ॥ २ ॥

॥ अन्वयाधिकरणम् ॥ ९ ॥

४९. ॐ अनाविष्कुर्वन्नन्वयात् ॐ

गुरुः **अनाविष्कुर्वन्** सभादिषु आविष्कारमकुर्वन्नेव । शिष्येभ्यो विद्यामुपदिशेत् । कुतः? **अन्वयात्** अयोग्यानामपि ज्ञानप्राप्त्या अतिप्रसङ्गरूपयुक्तेरित्यर्थः ॥ १ ॥

॥ ऐहिकाधिकरणम् ॥ १० ॥

५०. ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ

अप्रस्तुतप्रतिबन्धे प्रस्तुतप्रतिबन्धशब्दोक्तप्रारब्धकर्माभावे । अपरोक्षज्ञान-**मैहिकं** श्रवणादीनां सम्पूर्तिजन्मन्येव भवति । **प्रतिबन्धे** तु जन्मान्तरे भवति । कुतः? **तद्दर्शनात्** 'श्रुत्वा'[2] इति श्रुतौ तथा प्रतिपादनादित्यर्थः ॥१॥

॥ मुक्तिफलाधिकरणम् ॥ ११ ॥

५१. ॐ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्त-दवस्थावधृतेः ॐ

एवं यथा ज्ञानेऽनियमः तथा **मुक्तिफलानियमः** । मोक्षाख्यफलेऽपि ज्ञानिनः तच्छरीरपातानन्तरमेव मोक्ष इति नियमो नास्ति । किन्तु असति प्रारब्धे तद्देहपातानन्तरमेव । सति तु तद्देहान्तरावसाने मोक्षो भवति । ननु कुत एवं कल्प्यते? ज्ञानजन्मानन्तरं मुक्त्यभावे कदाऽपि मुक्तिर्नेत्येवं कुतो न कल्प्यते?

---

१. 'देवा एव ब्रह्मचारिणो देवा एव गृहस्था देवा एव वनस्था यथा ह्येते मुनय एव सर्ववर्णाः सर्वाश्रमाः सर्वे ह्येते कर्म कुर्वन्ति' (कांण्ठरव्यश्रुतिः)

२. 'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य इहैव दृष्टिं परमस्य विन्देत् ।
यद्यारब्धं कर्म निबन्धकं स्यात्तेनैव पश्येद्योगमवान्ववेक्ष्य' (सौपर्णश्रुतिः)

इत्यत उक्तम्– **तत्** इति । **तस्यां ब्रह्मसंस्थो** इति श्रुतौ तस्मिन् ब्रह्मणि अवस्थितस्य । तज्ज्ञानिन इति यावत् । **अवधृतेः** अमृतत्वमेत्येवेति मोक्ष-फलावधारणादित्यर्थः । अतः प्रतिबन्धककल्पनेति भावः । उक्तस्य सर्व-स्यैतदध्यायार्थस्य प्रसिद्धत्वसूचनार्था द्विरुक्तिः ॥ १ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
तृतीयाध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

—०—

परिशिष्टम्- १

॥ ब्रह्मसूत्रानुक्रमणिका ॥

सं. सूत्राणि	अ.पा.सू.
अ	
अक्षरधियां त्ववरोधः	३ ३ ३४
अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्	३ १ ४
अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्	३ ३ ५७
अङ्गेषु यथाऽऽश्रयभावः	३ ३ ६३
अत एव चाग्नीन्धनाद्यनपेक्षा	३ ४ २५
अत एव चोपमा सूर्यकादिवत्	३ २ १८
अतः प्रबोधोऽस्मात्	३ २ ८
अतस्त्वितरज्यायो लिङ्गाच्च	३ ४ ३९
अतिदेशाच्च	३ ३ ४७
अतोऽनन्तेन तथा हि लिङ्गं	३ २ २७
अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्	३ ४ ८
अध्ययनमात्रवतः	३ ४ १२
अनभिभवं च दर्शयति	३ ४ ३५
अनाविष्कुर्वन्नन्वयात्	३ ४ ४९
अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्यां	३ ३ ३२
अनुबन्ध्यादिभ्यः	३ ३ ५१
अनुष्ठेयं बादरायणः साम्यश्रुतेः	३ ४ १९
अनेन सर्वगतत्वमायामशब्दादिभ्यः	३ २ ३८
अन्तरा चापितु तद्दृष्टेः	३ ४ ३६

सं. सूत्राणि	अ.पा.सू.
अन्ययात्वं च शब्दादिति चेन्नाविशेषात्	३ ३ ७
अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्	३ ३ ३७
अन्याधिष्ठिते पूर्ववदभिलापात्	३ १ २६
अन्वयादिति चेत्स्यादवधारणात्	३ ३ १८
अपि सप्त	३ १ १६
अपि स्मर्यते	३ ४ ३०
अपि स्मर्यते	३ ४ ३७
अपि चैवमेके	३ २ १३
अपि संराधने प्रत्यक्षानुमानाभ्यां	३ २ २४
अबाधाच्च	३ ४ २९
अम्बुवदग्रहणात्तु न तथात्वं	३ २ १९
अरूपवदेव हि तत्प्रधानत्वात्	३ २ १४
अशुद्धमिति चेन्न शब्दात्	३ १ २७
अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः	३ १ ६
असार्वत्रिकी	३ ४ १०

आ

आचारदर्शनात्	३ ४ ३
आत्मगृहीतिरितरवदुत्तरात्	३ ३ १७
आत्मशब्दाच्च	३ ३ १६
आदरादलोपः	३ ३ १५
आनन्दादयः प्रधानस्य	३ ३ १२
आनर्थक्यमिति चेन्न तदपेक्षत्वात्	३ १ ११
आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते	३ ४ ४५

सं. सूत्राणि	अ.पा.सू.
आह च तन्मात्रं	३ २ १६
इ	
इतरे त्वर्थसामान्यात्	३ ३ १४
इयदामननात्	३ ३ ३५
उ	
उपपत्तेश्च	३ २ ३६
उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्	३ ३ ३१
उपपूर्वमपीत्येके भावशमनवत्तदुक्तं	३ ४ ४२
उपमर्दं च	३ ४ १६
उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च	३ ३ ६
उपस्थितेस्तद्वचनात्	३ ३ ४२
उभयव्यपदेशात्त्वहिकुण्डलवत्	३ २ २८
ऊ	
ऊर्ध्वरेतःसु च शब्दे हि	३ ४ १७
ए	
एक आत्मनः शरीरे भावात्	३ ३ ५५
एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः	३ ४ ५१
ऐ	
ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्	३ ४ ५०
क	
कामकारेण चैके	३ ४ १५
कामादितरत्र तत्र चाऽयतनादिभ्यः	३ ३ ४०

सं. सूत्राणि	अ.पा.सू.
काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्	३ ३ ६२
कार्याख्यानादपूर्वं	३ ३ १९
कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां	३ १ ८
कृत्स्नभावात्तु गृहिणोपसंहारः	३ ४ ४७
ग	
गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः	३ ३ ३०
गुणसाधारण्यश्रुतेश्च	३ ३ ६६
च	
चरणादिति चेन्न तदुपलक्षणार्थेति काष्णाजिनिः	३ १ १०
छ	
छन्दत उभयाविरोधात्	३ ३ २९
त	
तच्छ्रुतेः	३ ४ ४
तत्रापि च तद्व्यापारादविरोधः	३ १ १७
तत्स्वाभाव्यापत्तिरुपपत्तेः	३ १ २४
तथाचैकवाक्योपबन्धात्	३ ४ २४
तथान्यप्रतिषेधात्	३ २ ३७
तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्यां	३ १ १
तदभावो नाडीषु तच्छ्रुतेरात्मनि हि	३ २ ७
तदव्यक्तमाह हि	३ २ २३
तद्भूतस्य तु नद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः	३ ४ ४०
तद्वतो विधानात्	३ ४ ६

सं. सूत्राणि	अ.पा.सू.
तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलं	३ ३ ४३
तन्मनः प्राण उत्तरात्	४ २ १३
तुल्यं तु दर्शनं	३ ४ ९
तृतीये शब्दावरोधः संशोकजस्य	३ १ २२
त्र्यात्मकत्वात्तु भूयस्त्वात्	३ १ २
द	
दर्शनाच्च	३ १ २१
दर्शनाच्च	३ २ २१
दर्शनाच्च	३ ३ ४९
दर्शनाच्च	३ ३ ६८
दर्शनात्	३ २ ३३
दर्शयति च	३ ३ ४
दर्शयति च	३ ३ २३
दर्शयति चाथो अपि स्मर्यते	३ २ १७
दहर उत्तरेभ्यः	३ २ १७
देहयोगाद्वासोऽपि	३ २ ६
ध	
धर्मं जैमिनिरत एव	३ २ ४१
न	
न चाऽधिकारिकमपि पतनानुमानात्तदयोगात्	३ ४ ४१
न तृतीये तथोपलब्धेः	३ १ १९
न भेदादिति चेन्न प्रत्येकमतद्वचनात्	३ २ १२
न वाऽतत्सहभावश्रुतेः	३ ३ ६७

सं. सूत्राणि	अ.पा.सू.
न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्	३ ३ ८
न वा विशेषात्	३ ३ २२
न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः	३ ३ ५३
न स्थानतोऽपि परस्योभयालिङ्गं सर्वत्र हि	३ २ ११
नातिचिरेण विशेषात्	३ १ २५
नाना शब्दादिभेदात्	३ ३ ६०
नाविशेषात्	३ ४ १३
नियमाच्च	३ ४ ७
निर्मातारं चैके पुत्रादयश्च	३ २ २
प	
परमतः सेतून्मानसम्बन्धभेदव्यपदेशभ्यः	३ २ ३२
पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ	३ २ ५
परामर्शं जैमिनिरचोदना चापवदति हि	३ ४ १८
परेण च शब्दस्य ताद्विध्यं भूयास्त्वात्त्वनुबन्धः	३ ३ ५४
पारिप्लवार्था इति चेन्न विशेषितत्वात्	३ ४ २३
पुरुषविद्यायामपि चेतरेषामनाम्नानात्	३ ३ २५
पुरुषार्थोऽतः शब्दादिति बादरायणः	३ ४ १
पूर्वं तु बादरायणो हेतुव्यपदेशात्	३ २ ४२
पूर्ववद्वा	३ २ ३०
पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत्	३ ३ ४६
प्रकाशवच्चावैयर्थ्यं	३ २ १५
प्रकाशवच्चावैशेष्यं	३ २ २५
प्रकाशश्च कर्मण्यभ्यासात्	३ २ २६

सं. सूत्राणि	अ.पा.सू.
प्रकाशाश्रयवद्वा तेजस्त्वात्	३ २ २९
प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः	३ २ २२
प्रतिषेधाच्च	३ २ ३१
प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः	३ १ ५
प्रदानवदेव हि तदुक्तं	३ ३ ४४
प्राप्तेश्चासमञ्जसं	३ ३ १०
प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे	३ ३ १३
फ	
फलमत उपपत्तेः	३ २ ३९
ब	
बहिस्तूभयथाऽपि स्मृतेराचाराच्च	३ ४ ४३
बुद्ध्यर्थः पादवत्	३ २ ३४
भ	
भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयति	३ १ ७
भावशब्दाच्च	३ ४ २२
भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति	३ ३ ५९
भेदान्नेति चेन्नैकस्यामपि	३ ३ २
म	
मन्त्रादिवद्वाऽविरोधः	३ ३ ५८
मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्	३ २ ३
मुग्धेऽर्धसंपत्तिः परिशेषात्	३ २ १०
मौनवदितरेषामप्युपदेशात्	३ ४ ४८

सं. सूत्राणि	अ.पा.सू.
य	
यथेतमनेवं च	३ १ ९
यावदधिकारमवस्थितिराधिकारिकाणां	३ ३ ३३
योनेः शरीरं	३ १ २९
र	
रेतः सिग्योगोथ	३ १ २८
ल	
लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि	३ ३ ४५
व	
विकल्पो विशिष्टफलत्वात्	३ ३ ६१
विद्याकर्मणोरिति तु प्रकृतत्वात्	३ १ १८
विद्यैव तु निर्धारणात्	३ ३ ४८
विधिर्वा धारणवत्	३ ४ २०
विभागः शतवत्	३ ४ ११
विशेषानुग्रहं च	३ ४ ३८
विहितत्वाच्चाऽश्रमकर्मापि	३ ४ ३२
वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं	३ ३ २०
वेदार्थभेदात्	३ ३ २६
व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्	३ ३ ५६
व्यतिहारो विशिंषन्ति हीतरवत्	३ ३ ३८
श	
शब्दश्चातोऽकामचारे	३ ४ ३१

सं. सूत्राणि	अ.पा.सू.
शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया	
तेषामवश्यानुष्ठेयत्वात्	३ ४ २८
शिष्टेश्च	३ ३ ६४
शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः	३ ४ २
श्रुतत्वाच्च	३ २ ४०
श्रुत्यादिबलीयस्त्वाच्च न बाधः	३ ३ ५०
स	
सञ्ज्ञातश्चेत्तदुक्तमस्ति तु तदपि	३ ३ ९
संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्	३ १ १४
स एव च कर्मानुस्मृतिशब्दविधिभ्यः	३ २ ९
सन्ध्ये सृष्टिराह हि	३ २ १
समन्वारम्भणात्	३ ४ ५
समान एवं चाभेदात्	३ ३ २०
समाहारात्	३ ३ ६५
सम्बन्धादेवमन्यत्रापि	३ ३ २१
सम्भृतिद्युव्याप्त्यपि चातः	३ ३ २४
सर्वथाऽपि तु त एवोभयलिङ्गात्	३ ४ ३४
सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्	३ ३ १
सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्	३ ४ २८
सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्	३ ४ २६
सर्वाभेदादन्यत्रेमे	३ ३ ११
सलिलवच्च तन्नियमः	३ ३ ४
सहकारित्वेन च	३ ४ ३३

सं. सूत्राणि	अ.पा.सू.
सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्	३ ४ ४६
साम्पराये तर्तव्याभावात्तथा ह्यन्ये	३ ३ २८
सुकृतदुष्कृते एवेति तु बादरिः	३ १ १२
सूचकश्च हि श्रुतेराचक्षते च तद्विदः	३ २ ४
सैव हि सत्यादयः	३ ३ ३९
स्तुतयेऽनुमतिर्वा	३ ४ १४
स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्	३ ४ २१
स्थानविशेषात्प्रकाशादिवत्	३ २ ३५
स्मारणाच्च	३ १ २३
स्मरन्ति च	३ १ १५
स्मर्यतेऽपि च लोके	३ १ २०
स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च	३ ३ ३
स्वामिनः फलश्रुतेरित्यात्रेयः	३ ४ ४४
हानौ तूपायनशब्देशषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तं	३ ३ २७

****

परिशिष्टम्- २

श्रीविजयीन्द्रतीर्थकृतब्रह्मसूत्रन्यायसङ्ग्रहः

तृतीयोऽध्यायः

जिज्ञासासूत्रगब्रह्मशब्दार्थः प्राङ् निरूपितः ।
अथेत्याद्यवशिष्टार्थ उत्तरद्विकगोचरः ॥ १ ॥
एवं च सिद्धसाध्यार्थं द्विकद्वयमिति स्थितिः ।
तृतीये साधनं साध्यं चतुर्थे तत्क्रमात्क्रमः ॥ २ ॥
वैराग्यभक्त्युपासातद्दृष्टिमाहात्म्यमङ्घ्रिषु ।
वैराग्याद्भक्तिदार्ढ्ये सत्युपासातोऽपरोक्षधीः ॥ ३ ॥
पूर्व पूर्वस्य हेतुत्वमुत्तरत्रेति तत्क्रमः ।
भूतयुग्यातिदेहार्थं प्रश्नादेर्मृतिमान्पुमान् ॥ ४ ॥
त्र्यात्मभूयस्त्वतोऽप्राद्धस्तथात्वं (भूतेतः) प्राणयुग्गतेः ।
अंशतोऽग्न्यादिगत्युक्तिः श्रद्धाऽऽपोग्रावथादिमे ॥ ५ ॥
अर्थादुक्तेश्च तत्सिद्धिः कर्म्यमुख्यामृतो मतः ।
श्रुतेनाशेषभुक्स्वर्गेऽन्यथाचागतिरागमात् ॥ ६ ॥
गतागती कर्मणैव चानिष्टादिकृतामपि ।
सप्तेति नित्यनिरयोऽत्रापीश व्यापृतिः श्रुतेः ॥ ७ ॥
नैतयोरिति साध्योक्तिनहितोः ससुखं तमः ।
नाविद्वत्त्वाद्धूमतादि न चिराद्गर्भभाक्च्छुतेः ॥ ८ ॥
व्रीह्यादिस्थितिरेवोक्तेः पितरं प्र(प्रा)विशत्पुरा ।
योनिं प्रविश्यैव देही वैराग्याद्धौ तु विंशतिः ॥ ९ ॥
(ॐ) ईशसृष्टः श्रुतेः स्वप्नः तत एव तिरोहितः ।
न कालाज्जाग्रदप्यस्मात्सृप्तिर्नाडीस्थितात्मनि ॥ १० ॥

प्रबोधोऽप्यत एवास्मात्सर्वावस्थास्सदा हरेः ।
मोह ईशेऽर्धप्रवेशो नेशरूपेषु भिन्नता ॥ ११ ॥
ईशोऽप्राकृतरूपोऽन्योऽजीवो यत्प्रतिबिम्बकः ।
नाभक्तौ साम्यसुव्यक्तिस्तद्वैचित्र्यं तथा फलात् ॥ १२ ॥
पातान्नदानादिनेशोऽव्यक्तोऽप्याविर्भवेत् स्वतः ।
कालवत्स्वान्यधर्मालौकिका (स्तेन्यतादितः) स्तत्सुखादयः ॥१३॥
स्थानभेदेऽप्यभिन्नांशो ध्येयादन्यो निषेधतः ।
सदा सर्वं चेशसृष्टं फळं चास्माद्धि युज्यते ॥ १४ ॥
ॐ भक्तयङ्गौ विंशति नया द्विचत्वारिंशदुत्तरे ।
सर्ववेदैर्विचार्योऽसौ विधेर्ध्येयोऽखिलैर्गुणैः ॥ १५ ॥
केषाञ्चिदेव माहात्म्यात्फलं तेषामतो महत् ।
आनन्दाद्यास्तु सर्वेषां प्रियशीर्षादिकं तु न ॥ १६ ॥
चतुः सर्वेतरैर्देवैर्ध्यानाध्याने द्वयोर्मते ।
आनन्दाद्यप्यात्मशब्दो यथार्थं सोऽपि तान्वदेत् ॥ १७ ॥
ध्येयास्तेऽलौकिकाः कार्या वाण्या सामान्यतः क्रियाः ।
युगपन्नात्मशब्दास्ते न सम्भृत्यादि निर्जरैः ॥ १८ ॥
नैकैकत्रापेक्षितोक्तिर्यत्त्यचिन्त्यं छिदादिकम् ।
स्वेच्छयोपासते मुक्ताः कर्माण्यातन्वते न वा ॥ १९ ॥
नापरोक्षदृशोऽमुक्तिः । साधिकारानुसारिणी ।
प्राणः सर्वाधिकार्यग्र्योध्याहृतेरीश्वरावरः ॥ २० ॥
सत्यादिरीश एवैकोऽबद्धैव श्रीर्भजत्यमुम् ।
श्रवणाद्यखिलं दृष्ट्यै तदङ्गं गुर्वनुग्रहः ॥ २१ ॥
स्वपत्नात्स बली लिङ्गैः विकल्पः प्राक्समे गुरौ ।
दृष्ट्यैवावधृतेर्मुक्तिः श्रुत्यादिः प्रबलोऽत्र च ॥ २२ ॥

भक्त्याद्यपि ज्ञानहेतुरीक्षा नानैव मोक्षदा ।
बिम्बवीक्षैव मोक्षार्था भक्त्या ब्रह्मैव मोक्षदम् ॥ २३ ॥
नांश्यन्योऽशस्तत्तनुस्थोऽङ्गत्वेनान्यामरार्चनम् ।
भूमोपास्योऽखिलैः श्रैष्ठ्यात्तद्धीर्नानाप्रकारतः (धिकारतः) ॥२४॥
बिम्बान्यस्योपास्यतापि काम्योपासा विकल्पिता ।
देवाश्रिताङ्गता ध्येया न देवान्यैः सहाश्रुतेः ॥ २५ ॥
(ॐ) दृष्ट्या सर्वपुमर्थाप्तिः नास्यां सर्वाधिकारिता ।
न सा विशेषाद्देवादौ कामचारोऽविधिः स्तुतिः ॥ २६ ॥
नैवायोग्यो लभेतेक्षां नेच्छेद् ब्राह्मपदाद्यपि ।
मुख्यज्ञानफला देवाः न्यासस्सर्वाश्रमोत्तमः ॥ २७ ॥
रहस्येवोपदेशः स्यात् तज्जन्मन्येव नेक्षणम् ।
मुक्तिश्चैवं ज्ञानजन्मन्येकादश तुरीयगाः ॥ २८ ॥

॥ इति श्रीब्रह्मसूत्रन्यायसङ्ग्रहे श्रीविजयीन्द्रयतिविरचिते
तृतीयोऽध्यायः ॥ ३ ॥

परिशिष्टम्- ३

श्रीधीरेन्द्रयतिविरचितः विषयवाक्यसङ्ग्रहः

तृतीयोऽध्यायः

ब्राह्मणो निर्वेदमिति तदन्तरं नयस्य हि ॥
त्र्यात्मकत्वादिति नये वेत्थैवेति च वाग्द्वयम् ॥ १ ॥
यद्वा तदन्तरनये वैराग्यादि प्रसाधनं (?) प्रबोधकम् ।
त्र्यात्मकत्वाप्राणगतेरिति वेत्थेति वाग्द्वयम् ॥ २ ॥
अग्निं वागप्येति वातमित्यग्र्यादिगतिश्रुतेः ।
प्रथमे श्रवणं वेत्थेत्यश्रुतत्वादिके च तत् ॥ ३ ॥
भाक्तं वेत्यत्र वैराग्यपूर्वसाधनबाधकम् ।
कृतात्ययनये भूतैर्गच्छतीत्यादि वाङ्मतम् ॥ ४ ॥
यथा तमेव पुनर्गच्छत्यागच्छतीति च ।
चरणादित्यत्र तथानिष्टादिकारिणामपि ॥ ५ ॥
संयमनेत्यपि सम्मत्या तत्रापीत्यनयोर्मतम् ।
अथैतयोः पथोर्नैकेति विद्याकर्मणोर्नये ॥ ६ ॥
न तृतीये तथेत्यत्र यातयाम इतीत्यपि ।
भूत्वेत्यादिकं तत्स्वाभाव्यापत्तिके नये ॥ ७ ॥
नाति चिरेणेति तत्र ततः शेषेण चेति वाक् ।
अन्याधिष्ठित इत्यस्मिन्निति व्रीहियवा इति ॥ ८ ॥
तद्य इह शुभकृतः रेतः सिग्योगिके त्विति ।
योनेः शरीरमित्यत्र सृतियोग्य इतीरितम् ॥ ९ ॥

इति श्रीधीरेन्द्रयतिकृते विषयवाक्यसङ्ग्रहे तृतीयाध्यायस्य प्रथमः पादः ॥

द्वितीयः पादः

स्वप्नायै वे त्यादि सन्ध्ये सृष्टिराह नये मतम् ।
वेदनन्तरमित्याद्यं पराभिध्यानके नये ॥ १ ॥

जागरितस्थान इति देहयोगादितीरिते ।
नाडीषु सुप्त इत्याद्या तदभाव इतीरिते
अतः प्रबोध इत्यस्मिन् यदा जीवः प्रबुध्यते ।
स एववेत्यधिकृतौ स स्वप्न इति वा मतम् ॥ ३ ॥

मुग्धेऽर्धसम्पात्तिनये मोहादिप्रतिपादके ।
दक्षिणानि मुखेत्यादि मतं न स्थानतो नये ॥ ४ ॥

अरूपयन्नरा रुग्मवर्णं चानन्तमात्रकम् ।
अतएवचोपमेत्यादावम्बुवदग्रहणे नये ॥ ५ ॥

वृद्धिह्रासादिका चैव यस्य देवेति भक्तिवाक् ।
यउत्रिधात्विति वचः प्रकृतैतावतानये ॥ ६ ॥

भाक्तिरेवैनमाभियाति तदव्यक्तनये तथा ।
उभयव्यपदेशाख्ये यस्य देवेति वा वचः ॥ ७ ॥

परमतस्सेत्वित्यत्र सत्यज्ञानादिवाचकम् ।
एतस्य ब्रह्मण इति स्थानवैशेष्यके नये ॥ ८ ॥

तथाऽन्यत्प्रतिषेधाख्ये ब्रह्मोपास्स्वेति वाङ्मतम् ॥
स इदं सर्वमसृजतेत्यनेनेति सन्नये ॥ ९ ॥

एषह्येवेत्यादि फलमत इत्यादिके नये ॥

॥ इति तृतीयाध्यायस्य द्वितीयः पादः ॥

अथ तृतीयः पादः

सर्ववेदान्ताधिकृतौ सर्वे वेदा इतीरितम् ।
सर्वैश्च वेदैरित्याद्यामुपसंहारके नये ॥ १ ॥
सर्वैर्गुणैरेक आत्मेत्येवेति च द्वयं (मतम्) ।
प्राप्तेश्चेति नये चायं सर्वाभेदनये तथा ॥ २ ॥
आनन्दादय इत्यत्र सत्यज्ञानादि वाचकम् ।
नये प्रियशिरस्त्वाख्ये एतस्य प्रमितीरितम् ॥ ३ ॥
अन्येषु तु यथायोगं इतरेत्वर्थसाम्यके ।
सर्वैरिति प्रागुदिते त्वाध्यानायेति सन्नये ॥ ४ ॥
विज्ञानमानन्दमिति गुणास्त्वात्मगृहीतिके ।
आत्मेत्येवेत्युक्तवाक्यमन्वयादिति सन्नये ॥ ५ ॥
एष नित्यो महिमेति कार्याख्यानादपूर्वके ।
समानएववेत्यत्र लौकिकेत्यादिकं मतम् ॥ ६ ॥
नवा विशेषादित्यत्र चात्मेत्येवेति वाग् भवेत् ।
सम्भृतिद्युव्याप्तिरेव सर्वेषुक्षार इत्यपि ॥ ७ ॥
पुरुषविद्यायामानेऽपीत्यत्र सर्वैर्गुणैरिति ।
अग्ने त्वचं विध्य ममनिति वेधादिके मतम् ॥ ८ ॥
हानौ तूपायनेत्यत्रोपासनादिविधायकम् ।
तमेवं विद्वानमृतः छन्दतोभयसन्नये ॥ ९ ॥
पूर्वोक्तमेवानियमः सर्वेषामिति चोदिते ।
तं तथोपासते यावदधिकारमवस्थितौ ॥ १० ॥
नामप्राणाद्यन्तवाक्यमियदामननादिति ॥
व्यतिहारनये विष्णोः यं सत्यैवेतिवादिनी ॥ ११ ॥

सत्यादयः सवै हीति प्राणो वावेति वाङ्नये ।
महतोऽयक्तमित्याद्यं कामादित्यादिके नये ॥ १२ ॥
श्रोतव्यमित्याद्यखिलं तन्निर्धारणपूर्वके ।
प्रदानवदिति ह्यत्र तदैव विषयार्पकम् ॥ १३ ॥
लिङ्गभूयस्त्वतस्तद्धीत्यत्र चाऽचार्यवानिति ।
आचार्याद्धियुक्तमेतत्पूर्ववैकल्पिके नये ॥ १४ ॥
ब्रह्मोपास्स्वेत्यादि वाक्यं विद्यैवत्विति सन्नये ।
श्रुत्यादिबलवत्वाच्चेत्यादावमृतमित्यदः ॥ १५ ॥
अनुबन्धादिभ्य इति दृश्यतेत्यादिकं वचः ।
प्रज्ञान्तरपृथक्त्वेति ब्रह्मोपासाविधायकम् ॥ १६ ॥
न सामान्यादपीत्यत्र दृष्ट्वैवेत्यादि दृष्टिवाक् ।
परेण शब्दस्येत्यत्र भक्त्या दर्शनवाङ्मतम् ॥ १७ ॥
व्यतिरेकस्तद्भावेत्यत्रोपासत्यादिविधायकम् ।
अङ्गावबद्धस्त्वित्यत्रात एवात्मानमेव च ॥ १८ ॥
भूम्नः क्रतुवदित्यत्र यो वै भूमेति विश्रुतम् ।
तदेव नानाशब्दादिभेदादित्यत्र चोदितम् ॥ १९ ॥
विकल्प इत्यधिकृतौ नृसिंहादेरुपास्तिवाक् ।
आवहन्तीत्यादिवाक्यं काम्यास्त्विति नये मतम् ॥ २० ॥
ब्रह्मा शिरसि चेत्याद्यमगेष्वित्यत्र सम्मतम् ।
नवेत्यत्र तदेव स्यात् टीकादौ विषयोक्तितः ॥ २१ ॥
भावदीपे न्यायमुक्तावल्यादौ च तथोक्तितः ।

॥ इति तृतीयाध्यायस्य तृतीयः पादः ॥

अथ चतुर्थः पादः

तमेवमित्यादिवाक्यं पुरुषार्थनयस्य हि ॥
तदेवासार्वत्रकीति ज्ञानादेवेति वाग् भवेत् ॥ १ ॥

नाविशेषादिति पठेद्भेदानर्थानितीरितम् ।
स्तुतयेऽनुमतिर्वेति स ब्राह्मण इति स्फुटम् ॥ २ ॥

सर्वथाऽपि तु त एवेत्यस्य तमेतं दृश्यतेति च ।
न चाधिकारिकमिति वेदे हीत्यादिकं वचः ॥ ३ ॥

ब्रह्मविदाप्नोतिपरमित्याद्यं स्वामिनः फले ।
कृत्स्नभावाधिकरणे कुटुम्बीत्यादिकं वचः ॥ ४ ॥

एतां मनुष्येष्वित्याद्यमनाविष्कृणके नये ।
नये त्वैहिकमित्यादावात्मा वाऽरेति दृष्टिवाक् ॥ ५ ॥

एवं मुक्तिफलेच्छेत्यत्र ब्रह्मसस्थामयं त्विति ॥
उद्धृतान्येव वाक्यानि टीकायां विषयोक्तितः ॥ ६ ॥

॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥

परिशिष्टम्- ४

श्री सुधीन्द्रतीर्थविरचिता श्रीमद्ब्रह्मसूत्राधिकरणरत्नमाला

॥ अथ तृतीयोऽध्यायः ॥

विचार्य ब्रह्मशब्दार्थमध्यायद्वितयेन तु ।
तृतीये त्वथजिज्ञासापदार्थः प्रविचार्यते ।
विरक्तिभक्त्युपासादग्रूपः पादेषु च क्रमात् ।
ज्ञानहेतूपासनाङ्गभक्तिदाढ्यर्थमादितः ॥
पादे जीवस्य गत्यादि सूत्रकृत् सन्न्यरूरुपत् ।
भूता वियोगं जीवस्य तत्राऽदाववदन्नये ॥ १ ॥

कृत्स्नभूतावियोगं तु तदुत्तरनयेऽवदत् ॥ २ ॥

प्रागुक्तभूतगमनं तृतीये समसीषधत् ॥ ३ ॥

उपपत्त्या प्राणगतिमाक्षिप्याऽनन्तरे नये ॥ असीषधत् ॥ ४ ॥

भूतगतिमाक्षिप्य भगवान्नये । पञ्चमे साधयामास ॥ ५ ॥

षष्टे भूतगतिं पुनः । विशेषश्रुत्यभावेन त्वाक्षिप्य समसीषधत् ॥ ६ ॥

कर्मणो मुक्तिहेतुत्वं नेति प्राह च सप्तमे ॥ ७ ॥

अष्टमे निश्शेषनाशाभावमाह स कर्मणाम् । भोगेन ॥ ८ ॥

नवमे स्वर्गादगर्तारितिर्रारिता ॥ ९ ॥

गतागतस्य दशमे हरिणा कर्मकार्यता ॥ १० ॥

गतागतं पापकृतामप्यस्तीत्युदितं ततः ॥ ११ ॥

द्वादशे नित्यानिरयप्राप्तिरुक्ता समर्थिता । हरिद्विषा ॥ १२ ॥

माह दुःखरूपतां नरकस्य तु । त्रयोदशे ॥ १३ ॥

स्वतन्त्रत्व चिन्तासाधनमेव तु ।
फलेनेत्यवदत्सूत्रकृन्नये तु चतुर्दशे ॥ १४ ॥

ततोऽधतमसस्यातिदुःखमात्रत्वमाह सः ॥ १५ ॥

षोडशे धूमादिभावाभावमाह सकर्मणा ॥ १६ ॥
नये सप्तदशे गर्भवासादिप्राप्तिमाशु सः ।
स्वर्गादवाग्गतास्याह ॥ १७ ॥

व्रीह्यादित्वं न कर्मिणः ॥
इत्याहऽष्टादशनये ॥ १८ ॥

त्यक्तस्वर्गस्य कर्मिणः ।
पितृप्रवेशास्तूपान्त्ये साधितो हरिणा नये ॥ १९ ॥

योनिप्रवेशेनेहदेहावाप्तिमाह नये हरिः ॥ २० ॥

चरमे विंशति नयाः तृतीयाय इतीरिताः ॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

तृतीयस्य द्वितीयाह्नौ विष्णुमहात्म्यमीरितम् ॥

भन्युत्पत्यर्थमस्याऽदौ स्वप्नस्रष्टृत्वमीरितम् ॥ १ ॥

तत्तिरोधायकत्वं तु द्वितीयेऽभिहितं हरेः ॥ २ ॥

जाग्रत्प्रवर्तकत्वं तु तृतीयेऽभिहितं नये ॥ ३ ॥

तुर्येऽधिकरणे तस्य मुक्तप्राप्यत्वमीरितम् ॥ ४ ॥

पञ्चमेऽभिहितं सुप्तबोधकत्वं हरेर्नये ॥ ५ ॥

षष्ठे सार्वज्ञनानामवस्थानां तु सर्वशः ॥ ६ ॥

प्रवर्तकत्वमीशस्य नये सूत्रकृतेरितम् ॥
अर्धप्राप्यत्वमुक्तं स होमावस्थाने सप्तमे । जीवेनेशस्या ॥ ७ ॥

ष्टमे तु निर्दोषगुणपूर्णताम् ॥
अभिन्नत्वं च सर्वत्र हरेः सूत्रकृदब्रवीत् ॥ ८ ॥

तस्याप्राकृतदेहत्वं जगाद नवमे नये ॥ ९ ॥

भेदाभेदाभावमाह दशमे जन्तुना हरेः ।
स्वरूपाभिव्यक्तिरूपफलं भक्ते हरौ नये ॥ एकादशेऽ ॥ ११ ॥

वदद्भक्तितारतम्यं तदुत्तरे ॥ १२ ॥

त्रयोदशेऽवदद् विश्वपालकत्वं हरे नये ॥ १३ ॥

आत्मप्रसादैकसाध्यमापरोक्ष्यं रमेशितुः ।
इत्यर्थमाह भगवान्नये व्यासश्चतुर्दशे ॥ १४ ॥

नये पञ्चदशे प्राह गुणित्वं जगदीशितुः ॥ १५ ॥

अलौकिकत्वमवदत् तद्गुणानां तु षोडशे ॥ १६ ॥

कादिकादिगुणौघस्य व्यासः सप्तदशे नये ॥ १७ ॥
कादिकादिगुणाभास भावमाह जगत्प्रभुः ।
प्रागुक्ताव्यक्ततामेव श्रीशस्य समसीषधत् । अष्टादशे नये व्यासः ॥ १८ ॥

सर्वकर्तृत्वसाधनम् । स उपान्त्यनये चक्रे ॥ १९ ॥

नयेऽन्त्ये फलदातृतां ॥ २० ॥

आहैकविंशति नयाः तृतीयस्य द्वितीयके ॥

॥ इति तृतीयाध्यायस्य द्वितीयः पादः ॥

तृतीयस्य तृतीयाह्नावुदितोपासना हरेः ।
आद्ये नये सर्वशास्त्रश्रुतिमन्त्योश्च कार्यता ।
समर्थिता सूत्रकृता ॥ १ ॥

हरेः सार्वत्रिकान् गुणान् ।
उपसंहृत्य तद्ध्यानं द्वितीये कार्यमाह सः ॥ २ ॥

तृतीये तूपसंहारानुपसंहारायोनये ।
युक्तत्वं कर्तृभेदेन तूपसंहृतिकार्यताम् ॥ ३ ॥

तुर्ये फलाधिकत्वोक्त्या प्राह सर्वाधिकारिणाम् ॥ ४ ॥

साधारणं गुणोपास्तिनिर्णयं प्राह पञ्चमे ॥ ५ ॥

प्राह प्रियशिरस्त्वादेः षष्ठे सर्वानुपास्यताम् ॥ ६ ॥

सप्तमे त्वमरादीनां बहुसद्गुणचिन्तनम् ॥ ७ ॥

उक्तोपसंहृत्यनुपसंहृत्योर्मानमष्टमे ॥ नये जगाद ॥ ८ ॥

प्रागुक्तचतुर्गुणविचिन्तनम् ॥ नवमे साधयामास ॥ ९ ॥

अनुपसंहारमानताम् । प्रागुक्तामात्मशब्दस्य दशमे समसीषधत् ॥ १० ॥

एकादशेऽलौकिकानां गुणानां ध्येयतोक्तिता । नये सूत्रकृता ॥ ११ ॥

वाप्यः क्रियाणामुपसंहृतिः ॥
न विशिष्य गुणानां वा किन्तु सामान्यतश्च सा ॥
इत्यर्थं द्वादशे प्राहा ॥ १२ ॥ नुपसंहार मानताम् ।
आत्मशब्दाच्चेति सूत्रप्रोक्तामात्मपदस्य तु । नये समर्थयामास
वेदव्यासस्त्रयोदशे ॥ १३ ॥

सम्भृत्यादिगुणानां स प्राह सर्वानुपास्यताम् ॥ चतुर्दशे ॥ १४ ॥

पञ्चदशे गुणानामुपसंहृतिः ॥ कार्येति सर्वशः प्राह ॥ १५ ॥

कर्माद्यानुपास्यताम् ॥ वेधादेः षोडशे ॥ १६ ॥

प्राह मुक्तावप्यस्तितोदिता । हर्युपास्तेः सप्तदशे ॥ १७ ॥

नियतिः कर्मणां कृतेः । अष्टादशे तु मुक्तानां ब्रह्मसूत्रकृतोदिता ॥ १८ ॥

तदुत्तरनये मोक्षनैयत्यं ब्रह्मदर्शिनाम् ।
उपासनधिकारस्य नियमं तारतम्यतः ॥

तदुत्तरनये प्राह ॥ २० ॥

ततः प्राणावसानताम् । उपासकानामवदत् ॥ २१ ॥

प्राणादुत्तमतां हरेः ॥ २२ ॥

ततः प्राह हरेरेव प्राणादुत्तमतां ततः ।
उपासनेऽधिकारस्य भावः संसाधितः श्रियः ।
चतुर्विंशे नये तेन ॥ २४ ॥

श्रवणादित्रयस्य च । कर्तव्यतां प्राह नये पञ्चविंशे तदुत्तरे ॥ २५ ॥

प्रीत्या गुरूपदेशाख्यमुपास्तेरङ्गमाह सः ।
ततो गुरुप्रसादस्य साधनेषु बलिष्ठताम् ॥ २६ ॥

पूर्वप्राप्तादन्यगुरोः स्वीकार्यत्वम् । २७ ॥

ततोऽवदत् ॥ २८ ॥

ज्ञानस्यैव ततः प्राह सूत्रकृन्मुक्तिहेतुताम् ॥ २९ ॥

तदुत्तरनये तेन सैवाऽक्षिप्य समर्थिता ॥ ३० ॥

तदुत्तरे दर्शनस्य प्राह भक्त्यादिकार्यताम् ॥ ३१ ॥

तारतम्यं दर्शनस्य तदुत्तरनयेऽवदत् ॥ ३२ ॥

विम्बज्ञानस्य सन्मुक्तिहेतुत्वं तु तदुत्तरे ॥ ३३ ॥

भक्तेर्यदृष्टिहेतुत्वं स्वातन्त्र्येणा तु तत्र च ॥ ३४ ॥

इत्युत्तरनये प्राह त्वैक्यमंशाशिनोस्ततः ॥ ३५ ॥

ब्रह्माद्यङ्गसुरोपास्तेः कार्यतामाह तूत्तरे ॥ ३६ ॥

आह सर्वोपास्यतां तु ततो भूमगुणस्य तु ॥ ३७ ॥

तारतम्येनैव सर्वोपास्यतां तु तदुत्तरे ॥ ३८ ॥

ततो विम्बोपासनस्य विकल्पेनैव कार्यताम् ॥ ३९ ॥

काम्यविध्योक्तरूपाणां गुणानामप्युपासनम् ।
विकल्पेनैव कर्तव्यमित्याह तदुत्तरे ॥ ४० ॥

हीश्वराङ्गाश्रितत्वेन ब्रह्मादीनामुपासनम् ॥
कार्यं दैवैरिति प्राहोपान्त्ये तु भगवान्नये ॥ ४१ ॥

नयान्ते प्राह देवान्यैवरुक्तोपास्तेरकार्यताम् ॥ ४२ ॥

चत्वारिंशद् द्वौ च नयाः तृतीयस्य तृतीयके ॥

॥ इति तृतीयाध्यास्य तृतीयः पादः ॥

तृतीयस्य चतुर्थेऽङ्गौ ज्ञानसामर्थ्यमीरितम् ॥
आद्ये ज्ञानस्य सर्वार्थसाधनत्वमुदीरितम् ॥ १ ॥

नये द्वितीये तद्ज्ञानं न समस्ताधिकारिकम् । इत्याह ॥ २ ॥

तारतम्यस्य सत्तामाह तृतीयके ॥ ३ ॥

ज्ञानाधिकारे तुर्ये तु विशेषं ज्ञानिनोऽवदत् ॥ ४ ॥

सदसत्सम्प्रवृचिभ्यामाह पञ्चमके नये ॥ ५ ॥

ब्रह्मज्ञानस्याधिकारिमात्रप्राप्यत्वमाह सः ॥
ब्रह्मज्ञानस्य देवानां पदानाकाङ्क्षिमिनैरिः ।
प्राप्यत्वमाह षष्ठे तु ॥ ६ ॥ ज्ञानं सन्निधिमात्रतः ॥
अस्वामिनोऽपि फलदमिति सप्तमकेऽवदत् ॥ ७ ॥

आधिक्यमष्टमे ज्ञाने विशेषादधिकारिणाम् ॥
गतीनामाह सर्वेभ्यो नवमे त्वतिगोप्यताम् । ज्ञानस्याह परोक्षस्य ॥ ९ ॥

दशमे सूत्रकृन्नये ॥ आह साधनसम्पत्तिजन्मन्येवोदयं दृशेः ॥
अभावे प्रतिबन्धस्य स्वोदयादुत्तरक्षणे ॥ १० ॥
ज्ञानं मुक्तिप्रदातृ स्यात्प्रतिबन्धो भवेन्न च ।
इति प्राह नयेऽत्यं तु ॥ ११ ॥ भगवान् सूत्रकृद्धरिः ।
तृतीयस्य तुरीयेऽङ्गौ नया एकादशेरिताः ।

॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥

परिशिष्टम्- ६

एतद्ग्रन्थोदाहृतप्रमाणवचनानां वर्णानुक्रमसूचिका

प्रमाणम्	पृ.सं.
'भूतबन्धस्तु संसारो ' इति च वाराहे ॥	२
'भूतानां विनिवृत्तिस्तु मरणं समुदाहृतम् । इति भारते ।	२
'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.५.३.२)	४
'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छां.५.३.९)	४
'नैव भगव इति' (छा. ५.३.३)	४
'तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः' (भाग ३.२७.४५)	६
'क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम् ।' (भाग. ३.२७.४५)	६
'यत्र वाव भूतानि तत्र करणानि नित्यानि' इति भाल्लवेयश्रुतिः	७
'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः' (बृ. ५.२.१३)	८
'चक्षुरादित्यं मनश्चन्द्रमसं दिशः श्रोत्रम्' (बृ. ५-२-१३)	८
'म्रियमाणमिमं जीवं वासुदेवादिदेवताः ।' (ऐ.भा. २.१.८)	९
'आकाशाख्यं स्वरूपं तु विष्णुस्तद् हृदि संस्थितः ।' (बृ.भा.५.२.१३)	९
'पुरुषस्य मृतौ ब्रह्मन् प्राणा भागत एव तु ।' इति ब्राह्मे ॥	१०
'मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च ।' इति ब्रह्माण्डे	११
'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' (छा.५-४-२)	११
'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छा.५.९.१)	१२
'अतः शब्दस्तु हेत्वर्थे तथेत्यर्थे च वर्तते ।' (भा.ता. १०.९४.१५)	१३
'अग्निं वाक्' (बृ. ५-२-१३)	१२
'अर्थेनं यजमानं किं न जहाति ' इति कौण्डिन्यश्रुतौ	१४
'अपामसोममृता अभूम' (ऋ. ८-४८-३)	१४
'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' (आप.श्रौ. ८.१.१)	१४

प्रमाणम्	पृ.सं.
'नान्यः पन्था अयनाय विद्यते' (तै.आ. ३.१२.७)	१५
'स एनमविदितो न भुनक्ति यथा वेदो ...सृजते' (बृ.३-४-१५)	१७
'स य आत्मानम्' (बृ. ३.४.१५)	१८
'अथ यो ह वा अस्माल्लोकमदृष्ट्वा प्रैति' (बृ.३.४.१५)	१८
'आत्मानमेव लोकमुपासीत (बृ. ३-४-१५)	१९
'अमृतो वाव सोमपो भवति यावदिन्द्रो यावन्मनुर्यावदादित्यः'	१९
'कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति '	१९
'यानि तीर्थादिवाक्यानि कर्मादि विषयाणि च ।' (गी.भा. ३.२०)	२०
'ततः शेषेणेमं लोकमायाति पुनः कर्म कुरुते पुनर्गच्छति' इति श्रुतेः ।	२१
'भुक्तशेषानुशयवानिमां प्राप्य भुवं पुनः ।'	२१
'यथेतमेव गच्छति यथेतमागच्छति स भुङ्क्ते स कर्म कुरुते'	२३
'धूमादभ्रमभ्रादाकाशमाकाशाच्चन्द्रलोकं ' इति काषायणश्रुतिः	२४
'तद्य इह रमणीयचरणा रमणीयां ' (छा. ५-१०-७)	२५
'आचार इति सम्प्रोक्तः कर्माङ्गत्वेन शुद्धिदः ।' इति स्मृतेः	२६
'नान्यः पन्था अयनाय विद्यते' (तै. आ. ३-१२-७)	२६
'इष्टापूर्तम्' (मु.१-२-१०)	२६
'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते' (छा. ५-१०-३)	२७
'रमणीयचरणाः' (छा. ५-१०-७)	२७
'धर्मं चरत माऽधर्मम्'	२८
'नान्यः पन्थाः' (तै.आ. ३-१३)	२९
'तद्य इह शुभाकृतो ये' इति भाल्लवेयश्रुतौ	३०
'जीवाभेदो निर्गुणत्वम्' (म.ता.नि)	३२
ब्रह्मरुद्रमादीनां साम्यदृष्टिरनन्यता । (गी.ता. ९.११)	३३
गच्छन्ति पापिनस्सर्वे नरकं नात्र संशयः ।	३३

प्रमाणम्	पृ.सं.
'तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।' (भ.गी. १६.१९)	३४
'सर्वदेववरत्वेन यो न जानाति केशवम्।' (स्मृतिः)	३४
'रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा।' इति भारते	३५
'नैवेत उत्तिष्ठन्ते' (कौण्ठरव्य)	३५
'सर्वं विसृजति सर्वं विलापयति ' इति कौषारवश्रुतिः	३६
'स स्वर्गे स भूमौ स नरके सोऽन्ये तमसि ' इति पौत्रायणश्रुतिः	३७
'नरकेऽपि वसन्नीशो नासौ दुःखभुगुच्यते।' इति भागवततन्त्रे	३८
'अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ।' (बृ.भा. ६.४.४)	३८
तद्व्रतानां तु दुःखानां भोगोऽभिमतिरुच्यते। (गी.ता. १३.३२)	३८
'अथैतयोः पथोर्न कतरेण तानीमानि' (छा. ५-१०-८)	३९
'तद्य इत्थं विदुः' (छा. ५-१०-१)	४०
'विद्यापथः कर्मपथौ द्वौ पन्थानौ प्रकीर्तितौ।'	४०
'आत्मा वा अरे द्रष्टव्यः' (बृ. ४-४-५)	४१
'तद्विजिज्ञासस्व' (तै. ३-१)	४१
'ज्योतिष्टोमेन यजेत' (आप. श्रौ १०-२-१)	४१
'यत्र दुःखं सुखं तत्र सर्वत्रापि प्रतीयते।' (स्मृतिः)	४१
'अथाविद्वानकर्माऽवाग्गच्छति।' (श्रुतिः)	४२
'तिर्यक्षु नरके चैव सुखलेशो विधीयते।' इति भविष्यत्पर्वणि	४३
'अतिप्रिये यथा राजा न दुःखं सहते क्वचित्।' इति हि ब्राह्मे	४४
'नारायणप्रसादेन समिद्ध(समृद्ध)ज्ञानचक्षुषा।' पाद्मे	४४
'महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम्।' इति कौर्मे	४७
'धूमो भूत्वाऽभ्रं भवति' (छा. ५-१०-५ कापायणश्रुतौ)	४८
'धूमादिभावप्राप्तिश्च तद्व्रतौ गतिरेव तु।' गारुडे	४९
'एकदेशस्वभावेन वागभेदाऽपि युज्यते।' (स्मृतिः)	५०

प्रमाणम्	पृ.सं.
'तत्त्वमसि' (छा.६-८-७)	५०
'सर्वं खल्विदं ब्रह्म' (छा.३.१४.१)	५०
'यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति' (छा.५.१०.५)	५१
'तद्य इह रमणीयचरणा' (छा.५-१०-७)	५१
'स्वर्गाल्लोकादवाक्प्राप्तो वत्सरात्पूर्वमेव तु ।' इति च नारदीये	५२
'अभ्याशो ह' (छा.५-१०-७)	५२
'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा' (छा.५-१०-६)	५२
'धूमो भूत्वाऽभ्रं भवति' (छा. ५-१०-५)	५३
'सोऽवाग्गतः स्थावरान् प्रविश्याभोगेनैव व्रजन्' कौषारवश्रुतौ	५४
'स्वर्गादवाग्गतो देही व्रीह्यादीतरदेहगः ।' इति वाराहे	५४
'वायव्यं श्वेतमालभेत' (तै. सं. २-१-१)	५५
'हिंसा त्ववैदिका या तु तयाऽनर्थो ध्रुवं भवेत् ।' इति वाराहे	५५
'स्वर्गादवाग्गतश्चापि मातुरेवोदरं व्रजेत् ।' (स्मृतिः)	५६
'य एव गृही भवति यो वा रेतस्सिञ्चति तमेवानुविशति' (श्रुतिः)	५६
'यो यो ह्यन्नमत्ति यो वा रेतः सिञ्चति' (छां. ५-१०-६)	५६
'त इह' (छां. ५-१०-६)	५६
'ततो रेतस्सिचमेवानुप्रविशत्यथ' इति कौण्ठरव्यश्रुतेः	५७
'देहं गर्भस्थितं कापि प्रविशेत्स्वर्गतो गतः ।'	५८
'स्थावराणि दिवः प्राप्तः स्थावरेभ्यश्च पूरुषम् ।' इति व्राह्मे	६१
'न तत्र रथा न रथयोगा न पन्थानो' (बृ.६-३-१०)	६४
'न तत्रानन्दा मुदः प्रमुदो भवन्ति ।' (बृ.६-३-१०)	६४
'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' (कठ. ५-८.)	६५
'एतस्माद्धचेव पुत्रो जायते ' इति गौपवनश्रुतिः	६५
'त्रिगुणात्मिकाऽथ ज्ञानं च विष्णुशक्तिस्तथैव च ॥' (स्मृतिः)	६६

प्रमाणम्	पृ.सं.
'महामायेत्यविद्येति नियतिर्मोहिनीति च ॥' (वि.त.उ.व.)	६६
'मनोगतांस्तु संस्कारान् स्वेच्छया परमेश्वरः ।' ब्रह्माण्डे	६७
'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेऽभिपश्यति ।' (छा.५-२-१)	६९
'पुरुषं कृष्णं कृष्णदन्तं पश्यति ..... हन्ति' (ऐ.आ.३-२-४)	६९
'यद्वाव (यद्वाऽपि) ब्राह्मणो ब्रूयादेवता वृषभोऽपि वा ।'	६९
'स्वप्नादिबुद्धिकर्ता च तिरस्कर्ता स एव च ।' इति कौर्मे	७१
'स एव जागरिते स्थापयति' इति कौण्ठरव्यश्रुतेः	७२
'तुरं भगस्य धीमहि' (ऋ.५-८२-१)	७२
'आसु तदा नाडीषु सृप्तो भवति' (छा. ८.६.३)	७३
'सता सोम्य तदा सम्पन्नो भवति' (छा. ६.८.१)	७३
'तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति' (छा. ८-६-३)	७४
'अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।' (बृ.भा. ६.६.८)	७४
'अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।' (बृ.भा. ६.६.८)	७५
'देहादेहान्तरगते प्रविशेत्प्राणमेव तु ।' (भा.ता. ११.३.३९)	७५
'एष एव सुप्तं प्रबोधयत्येतस्माज्जीव' इति कौण्डिन्यश्रुतिः	७५
'एष ह्येव साधु कर्म कारयति' (कौ. ३.८)	७६
'प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु ।' (स्मृतिः)	७७
'एष स्वप्नान् प्रदर्शयत्येष प्रबोधयत्येष एव परम आनन्दः' (श्रुतिः)	७७
'आत्मानमेव लोकमुपासीत' (बृ.उ.१५)	७७
'हृदयस्थात्पराज्जीवो दूरस्थो जाग्रदेष्यति ।' इति वाराहे च	७९
'दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः' (मां.उ. २-२)	७९
'हृदि ह्येष आत्मा' (प्र. ३-६)	८०
'हृदये संस्थितो जीवो विशेषेण हरिस्तथा ।' (स्मृतिः)	८०
'सप्ताङ्ग एकोनविंशतिमुखो विश्वः' (मा २-३)	८३

प्रमाणम्	पृ.सं.
'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते' (ऐ. आ. ३-२-३)	८४
'एकरूपः परो विष्णुः सर्वत्रापि न संशयः।' इति मात्स्ये	८४
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि (भाग-१-९.४९)	८५
'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ।' (मा. २-१६)	८६
'एष त आत्माऽन्तर्याम्यमृतः' (बृ. ५-७-३)	८७
'अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्' (बृ.४-५-१)	८७
'अयं वै हरयोऽयं वै दश च सहस्राणि' (बृ.४-५-१९)	८७
'यः पृथिव्यां तिष्ठन् .....योऽग्नौ तिष्ठन्' (बृ.५-७)	८७
'यः पृथिव्यां तेजोमयोऽमृतमयो..... यो वायौ' (बृ.४-५)	८८
'अयं वै हरयोऽयं वै दश' (बृ.४-५-१९)	८८
'इन्द्रो मायाभिः पुरुरूप ईयते युक्ता' (ऋ.६-४७-१७)	८८
'अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमश्शिवः।' (मा.४-७)	८९
'कार्यकारणबद्धौ' (मा. २-१६)	९०
'बद्धो बन्धादिसाक्षित्वाद्भिन्नो भिन्नेषु संस्थितेः। ब्रह्मतर्के	९१
'अनित्यमुच्यते' (जै.सू. १-२-१)	९२
'अस्थूलमनणु' (बृ. ५-८-८)	९३
'भौतिकानि हि रूपाणि भूतेभ्योऽसौ परो यतः।' इति मात्स्ये	९३
'यदा पश्यः पश्यते रुग्मवर्णम्' (मु.३-१-३)	९४
'श्यामा-च्छबलं प्रपद्ये' (छा.८-१३-१)	९४
'सुवर्णज्योतिः' (तै. ३-१०)	९४
'आत्मैवास्य ज्योतिः' (बृ. ६-६-६)	९६
'ऐकात्म्यप्रत्ययसारम्' (मा.२-४)	९६
'एकः प्रधान उद्दिष्टः आत्मा पूर्णत्वतश्श्रुतः। (मां.भा.२.४)	९७
'आनन्दमात्रमजरं पुराणमेकं' इति चतुर्वेदशिखायाम्	९७

प्रमाणम्	पृ.सं.
'तद्विज्ञानेन परिश्यन्ति धीराः' (मु.२-२-८)	९७
'शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जनम्।' इति च मात्स्ये	९८
'सज्ज्ञानानन्दशीर्षोऽसौ सज्ज्ञानानन्दबाहुकः।' (स्मृतिः)	९९
'ब्रह्मणस्तद्गुणानां च भेददर्शयधरं तमः।' इति पैङ्गिश्रुतिः	९९
'रूपं रूपं प्रतिरूपो बभूव (बृ.४-५-१९)	१०१
'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा' (कठ २-२३)	१०३
'महित्वबुद्धिर्भक्तिस्तु स्नेहपूर्वाऽभिधीयते।' इति पाद्मे	१०५
'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।'(म.ता.नि. १.८५)	१०५
'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।' (भ.गी. ११.५४)	१०६
'साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुः।' इति ब्राह्मे	१०८
'अथात आनन्दस्य' (तै. २-८)	१०८
'अथात आनन्दस्य मीमांसा भवति' (तै.२-८)	१०९
'सैषाऽऽनन्दस्य मीमांसा भवति' (तै.२-८)	१०९
यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे।	११०
'नैतावदेना परो अन्यदस्त्युक्षा' (ऋ. १०.३१.८)	११२
'अस्येदेषा सुमतिः' (ऋ. १०.३१.६,८.७)	११२
'महद्देवानामसुरत्वमेकम्' (ऋ.३.४४.१)	११२
'सृष्टिं च पालनं चैव संहारं नियमं तथा।' इति ब्रह्माण्डे	११४
'अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलम्।' इति कौण्ठरव्यश्रुतिः	११६
'न तमाराधयित्वाऽपि कश्चिद्व्यक्तीकरिष्यति।' इति ब्रह्मवैवर्ते	११७
'नासौ सूक्ष्मो न स्थूलः पर एव स भवति' इति माण्डव्यश्रुतेः	११९
'महतो महीयान्' (कठ. २-२०)	११९
स्थूलसूक्ष्मविशेषोऽत्र न क्वचित्परमेश्वरे। इति च गारुडे	१२०
'अव्यक्तव्यक्तभावौ च न क्वचित्परमेश्वरे।' इति कौर्मे	१२०

प्रमाणम्	पृ.सं.
'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो (बृ. ४-४-५)	१२१
'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते' (श्वे.१-१०)	१२२
'नित्याव्यक्तोऽपि भगवान्' इति नारायणाध्यात्मे	१२३
'आनन्दं ब्रह्मणो विद्वान्' (तै.२-४)	१२३
'अयैष एव परम आनन्दः' (बृ.६-३-३३)	१२३
'आनन्दो ब्रह्म' (तै. ३.६)	१२३
'प्रकाशवत्कालवद्वा यथाऽङ्गे शयनादिकम्।' इति नारायणाध्यात्मे	१२७
'आनन्देन त्वभिन्नेन व्यवहारः प्रकाशवत्।' इति ब्राह्मे	१२८
'एकमेवाद्वितीयम्' (छा. ६-२-१)	१२८
'नेह नानाऽस्ति किञ्चन' (कठ. २-४-११)	१२८
'एष सेतुर्विधृतिः' (छा.८-४-१)	१२९
'य एष आनन्दः परस्य' (श्रुतिः)	१२९
'एष नित्यो महिमा ब्राह्मणस्य' (बृ.६.४.२३)	१२९
'यतो वाचो निवर्तन्ते' (तै.२-४)	१२९
'एतस्यैवानन्दस्यान्यानि भूतानि' (बृ. ६-३-३२)	१२९
'अन्यज्ज्ञानं तु जीवानामन्यज्ज्ञानं परस्य च।' (स्मृतिः)	१२९
'प्रतिबिम्बरूपविप्लुटकं तदानन्दस्य चाखिलाः।' इति बृहद्भाष्योक्तेः	१३१
'अमृतत्वस्येशानः' (तै.आ.३-३२)	१३२
'अदृष्टमव्यवहार्यमव्यपदेश्यं सुखं' इति कौण्डिन्यश्रुतिः	१३१
'पादोऽस्य विश्वा भूतानि' (ऋ. १०. ९०.३)	१३३
'त्रिपादस्यामृतं दिवि' (ऋ.१०-९०-३)	१३४
'अदृष्टमव्यवहार्यम्' (कौण्डिन्य)	१३४
'अलौकिकास्तस्य शब्दाः तथाऽर्थाः' (श्रुतिः)	१३४
'अलौकिको ह्येष विष्णुः परत्वात्' (श्रुतिः)	१३४

प्रमाणम्	पृ.सं.
'अलौकिकोऽपि ज्ञानादिः' पाद्मे	१३४
'ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च।' इति वाराहे	१३६
'ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादितः।' इति पाद्मे	१३७
'यथा जीवानन्दादेरन्यद्ब्रह्म तथोपासाकृतादपि।' (केन.भा.१-६)	१३८
'पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितम्।' इति ब्रह्मतर्के	१३९
'एष सर्व एष सर्वगत एष सर्वेश्वरः' इति भाल्लवेयश्रुतिः	१४१
'अनुप्रविश्य नामरूपे व्याकरोत्' (छा.६-३-३)	१४२
'सर्वत्र सर्वमेतस्मात्सर्वदा सर्ववस्तुषु।' इति चतुर्वेदशिखायाम्	१४२
'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्' (बृ.५-९-२८)	१४४
'स प्रियः सर्वदातृणां ज्ञानिनां परमप्रियः। बृहद्भाष्ये	१४५
'एष ह्येव साधुकर्म कारयति (कौ. ३-८)	१४५
'पुण्येन पुण्यं लोकं नयति पापेन पापम्' (प्र. ३-७)	१४६
'द्रव्यं कर्म च कालश्च' (भाग. २.५.१४)	१४६
'उभयोरपि दृष्टोऽन्तः' (गी. २-१६)	१४८
'नासतो विद्यते भावो नाभावो विद्यते सतः' (गी. २.१६)	१४९
'आत्मेत्येवोपासीत' (बृ. ३-४-७)	१५०
'आत्मानमेव लोकमुपासीत' (बृ.३-४-१५)	१५०
'तमेवैकं जानथ' (मुं.२-२-५)	१५०
'विज्ञाय प्रज्ञां कुर्वीत' (बृ.६-४-२१)	१५०
'अत्र ह्येते सर्व एकी भवन्ति' (बृ.३-४-७)	१५०
'अमृतस्यैष सेतुः' (मुं २-२-५)	१५०
'वाचो विग्लापनं हि तत्' (बृ.६-४-२१)	१५०
'प्राणश्चेव प्राणो नाम भवति' (बृ. ३-४-७)	१५०
'विज्ञानमानन्दं ब्रह्म' (बृ. ५-९-२८)	१५१

प्रमाणम्	पृ.सं.
'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.२-१)	१५१
'आत्मेत्येवोपासीत' (बृ.३-४-७)	१५१
'कं ब्रह्म खं ब्रह्म' (छ.४.१०-५)	१५१
'श्रोता मन्ता' (ऐ.आ ३-२-४-१९)	१५१
'अत्रायं पुरुषः (बृ. ६-३-९)	१५३
'सैषा षड्विधा चतुष्पदा गायत्री' (छा.३-१२-५)	१५३
'स्वाध्यायोऽध्येतव्यः' (तै.आ.२-१५)	१५३
'सर्ववेदोक्तमार्गेण कर्म कुर्वीत नित्यशः ।' (स्मृतिः)	१५४
'यथा नदीनां सलिलं शक्ये सागरगं भवेत् ।' आग्नेये	१५६
'सर्वैश्च वेदैः परमो हि देवो ।' इति चतुर्वेदशिखायाम्	१५६
'सर्वान् वेदान् सेतिहासान् सपुराणान् सयुक्तिकान् ।' इति ब्रह्मतर्के	१५६
'उपास्य एकः परतः परो यो' इति भाल्लवेयश्रुतिः	१५८
'विधिशेषाणि कर्माणि सर्ववेदोदितान्यपि ।' आग्नेये	१५९
'सोऽरोदीत्' (तै.सं.१-५-१)	१५९
'यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' (तै. सं १-५-१)	१६०
'गुणैरेव स तूपास्यो नैव दोषैः कथञ्चन ।' इति बृहत्तन्त्रे	१६०
'आत्मेत्येवोपासीत' (बृ.३-४-७)	१६१
'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' (छा. १-९-२)	१६३
'सोऽहं नामविदेवास्मि नात्मवित्' (छा. ७-१-३)	१६३
'यद्वै किञ्चिदध्यागीष्ट नामैवैतत्' (छा. ७.१.३)	१६४
'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदं' (छा. ७-१-२)	१६४
'नामत्वात्सर्वविद्यानां गुणानामुपसंहृतिः ।' इति च ब्रह्मतर्के	१६४
'नाम वा एता ब्रह्मणः सर्वविद्यास्तस्मादेकः' इति कौण्डिन्यश्रुतौ	१६४
'गुणैस्सर्वैरुपास्योऽसौ ब्रह्मणा परमेश्वरः ।' इति भविष्यत्पर्वणि	१६६

प्रमाणम्	पृ.सं.
'सम्पूर्णोपासनाद्ब्रह्मा सम्पूर्णानन्दभाग्भवेत् ।' इति पाद्मे	१६७
'सच्चिदानन्द आत्मेति ब्रह्मोपासा विनिश्चिता ।' इति ब्रह्मतर्के	१७०
'नैव सर्वगुणाः सर्वैरुपास्या मुक्तिभेदतः ।' इति वाराहे	१७२
'ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा ।' इति परमसंहितायाम्	१७४
'गुणास्सर्वेऽपि वेत्तव्या ध्यातव्याश्च न संशयः ।' (स्मृतिः)	१७५
'ज्ञानध्यानसमायोगाद्गुणानां सर्वशः फलम् ।' इति बृहत्तन्त्रे	१७५
'आत्मेत्येवोपासीत' (बृ.३-४-७)	१७६
'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१)	१७७
'विज्ञानमानन्दं ब्रह्म' (ब्र. ५-९-२८)	१७७
'अत्र ह्येते सर्व एकीभवन्ति' (बृ.३-४-७)	१७७
'आनन्दानुभवत्वाच्च निर्दोषत्वाच्च भण्यते ।' इति बृहत्तन्त्रे	१७८
'आप्तव्याप्तेरात्म-शब्दः परमस्य प्रयुज्यते' (स्मृतिः)	१७८
'आत्मेत्येव' (बृ. ३-४-७)	१७९
'अलौकिकास्तस्य गुणा ह्युपास्या अलौकिकं मुक्तिकार्यं यतोऽस्य'	१८१
'गुणास्त्वैविक्रमाद्यास्तु संहर्तव्या न संशयः । ' इति बृहत्तन्त्रे	१८४
'सर्वान् गुणानात्मशब्दो ब्रवीति' इति भाल्लवेयश्रुतिः	१८५
'उक्षा स द्यावापृथिवी बिभर्ति' (ऋ. १०-३१-७)	१८६
'एष हि सर्वेषु लोकेषु भाति' (छा. ४-१५-४)	१८६
'देवादीनामुपास्यास्तु भृतिव्याप्त्यादयोः गुणाः ।' इति ब्रह्मतर्के	१८७
'सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदीरिताः ।' इति ब्रह्मतर्के	१८९
'भिन्धि विद्धि शृणीहीति फलभेदेन सर्वशः ।' इति बृहत्तन्त्रे	१९०
'ताभिर्विध्य हृदये यातुधानान् ..... ।' (ऋ.१०-८७-४,५)	१९०
'जक्षन् क्रीडन्' (छां. ८-१२-३)	१९१
'ब्रह्मविदाप्नोति परम' (तै.उ.२-१-१)	१९३

प्रमाणम्	पृ.सं.
'एतत्साम गायन्नास्ते' (तै.३-१०)	१९३
'श्रोतव्यो मन्तव्यः' (बृ. ४-४-५)	१९३
'तद्विजिज्ञासस्व' (तै. ३-१)	१९३
'मुक्ता अपि हि कुर्वन्ति स्वेच्छयोपासनं हरेः ।' ब्रह्मतर्के	१९४
'कृष्णो मुक्तैरिज्यते वीतमोहैः ॥' भारते	१९४
'ब्रह्मविदाप्नोति' (तै. २-१-१)	१९५
'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति' (बृ. ३-३-२२)	१९५
'स्थितप्रज्ञत्वमाप्ता ये ज्ञानेन परमात्मनः ।' वायुप्रोक्ते	१९६
'कदाचित्कर्म कुर्वन्ति कदाचिन्नैव कुर्वते ।' (स्मृतिः)	१९८
'तीर्णतर्तव्यभागा ये प्राप्तानन्दाः परात्मनः ।' इति ब्रह्माण्डे	१९९
'सर्वे गुणा ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैः'	२०१
'न कश्चिद्ब्रह्मवित्सृतिमनुभवति' इति कौण्डिन्यश्रुतिः	२०१
'अथात आनन्दस्य मीमांसा' (तै. २-८)	२०३
'ज्ञानं चोपासनं चैव मुक्तावानन्द एव च ।' अध्यात्मे	२०४
'अप्रीतिर्मद्वशो नायमिति मत्सर ईरितः' (नाममहोदधौ) -भा.ता.१.१८.२९	२०४
'नानाविधा(देव)जीवसङ्घा विमुक्तौ' तुरश्रुतौ	२०५
'प्राणो वाव सर्वेभ्यो भूयान्न हि' कौण्ठरव्यश्रुतिः	२०७
'अस्ति भगवो नाम्नो वाव भूयोऽस्तीति' (छा. ७-१-५)	२१०
'वाग्वाव नाम्नो भूयसी' (छा.७-२-१)	२१०
'एष तु वा अतिवदति' (छां.७-१६)	२१०
'स वा एष एवं पश्यन्नेवं मन्वान एवं' (छा. ७-१५)	२१०
'उत्तमत्वं हि देवानां मुक्तावपि हि मानवात् ।' इति बृहत्तन्त्रे	२१२
'सत्यं भगवो विजिज्ञासे' (छा. ७.१६)	२१३

प्रमाणम्	पृ.सं.
'नामादिप्राणपर्यन्तात् यो हि सत्यादिरूपवान्।' ब्रह्मतर्के	२१४
'सत्याद्या अहमात्मान्ता यद्गुणास्समुदीरिताः।' इति चाध्यात्मे	२१४
'यतः प्रसूता' (महा.१)	२१५
'सर्वायतना सर्वकाला सर्वेच्छा सर्वज्ञा' इति वत्सश्रुतेः	२१६
'नामादयस्तु बद्धत्वान्मोचकत्वात्परोऽपि च।' इति ब्रह्मतर्के	२१७
'द्वा सुपर्णा' (मु.३.१)	२१७
ईश्वरः प्रकृतिर्जीवो जडं चेति चतुष्टयम्। (बृ.भा.३.५.१)	२१८
'सैव हि सत्यादयः' (ब्र.सू. ३-३-३९)	२१८
'यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिश्च सात्त्वतैः।' (स्मृतिः)	२२०
'यथा श्रीर्नित्यमुक्ताऽपि प्राप्तकामाऽपि सर्वदा।' इति बृहत्तन्त्रे	२२०
'द्वावेतावनादिनित्यावनादियुक्तौ' इति गौपवनश्रुतिः	२२१
'रमायां रममाणोऽपि तत्स्थेनैव श्रियाऽत्मना। रमते'	२२२
'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो' (बृ.४-४-५)	२२३
'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ।' ब्रह्मतर्के	२२५
'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ।' (अनु.)	२२५
'अथ वा सततं शास्त्रविमर्शेन भविष्यति।' (त.सा.सं. ४.१५७)	२२५
'विष्णुशास्त्रावमर्शनं, एकमन्यद्धरेर्ध्यानम्॥' (त.सा.सं. ४.१३५)	२२५
'आचार्यवान् पुरुषो वेद' (छा. ६-१४-२)	२२७
'भगवांस्त्वेव मे कामे ब्रूयात्' (छा. ४-९-२)	२२८
'श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्धचैव' (छा. ४-९-३)	२२८
'अत्र ह न किञ्चन वीयाय' उपकोसलवचनम् (छां. ४.९.)	२२९
'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा. ४-१०)	२२९
'आचार्यस्तु ते गतिं वक्ता' (छा.४-१४)	२३०

प्रमाणम्	पृ.सं.
'य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छा. ४-१५)	२३०
'किन्तु सोम्य तेऽनुवोचन्' (छा. ४-११)	२३०
'इति ह प्रतिजज्ञे' (छा. १४)	२३०
'लोकान्वाव किल सोम्य तेऽब्रुवन्नहं तु वक्ष्यामि' (छा.४-१४)	२३०
'आचार्यस्तु ते गतिं वक्ता' (छा.४.१४)	२३०
'श्रोतव्यो मन्तव्यः' (बृ.४-४-५)	२३१
'गुरुप्रसादो बलवान्न तस्माद्बलवत्तरम् ।' वाराहे	२३१
'गुरुत्यागे भवेन्मृत्युर्मन्त्रत्यागे दरिद्रता ।' (स्मृतिः)	२३२
'पूर्वस्मादुत्तमो लब्धः स्वयमेव गुरुर्यदि । ' इति बृहत्तन्त्रे	२३३
'समग्रानुग्रहं कश्चित्स्वयमेव समो यदि ।' इति महासंहितायाम्	२३४
'ब्रह्मोपास्व ब्रह्मोपचरस्व' इति पौष्यायणश्रुतिः	२३५
'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' (गी. ३-२०)	२३६
'तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्थाः' (श्वे ३-८)	२३६
'सर्वान् परो मापयाऽयं सिनीते' इति कौशिकश्रुतेः	२३७
'इन्द्रोऽश्वमेधांच्छतमिष्ट्वाऽपि राजा ब्रह्माणमीड्यं' (श्रुतिः)	२३८
'नास्त्यकृतः कृतेन' (मुं १-२-१२)	२३८
'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।' (स्मृतिः)	२३८
'नान्यः पन्थाः (श्वे. ३.८)	२३८
'कर्मणैव' (गी.३-२०)	२३९
'अनुबन्धस्तु भक्तिः स्याद् बन्धः स्नेह उदाहृतः' (भा.ता. ७.१.४७)	२४०
'भक्तिर्विष्णौ गुरौ चैव गुरोर्नित्यप्रसन्नताम् ।' इति नारायणतन्त्रे	२४१
'अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टय इति ।' कमठश्रुतौ	२४३
'दृष्ट्यैव ह्यवताराणां मुच्यन्ते केचिदञ्जसा ।' अध्यात्मे	२४४
'प्रादुर्भावानपि यदा ज्ञानदृष्ट्यैव पश्यति' (काठक.भा.२.४.१०)	२४४

प्रमाणम्	पृ.सं.
'मुक्त्यर्थमात्मयोग्यं तु विज्ञानं तदुदाहृतम् ।' (श्रुतिः)	२४६
'हृदिस्था या हरेर्मूर्तिः जीवो यत्प्रतिबिम्बकः ।'(भा.ता.११.२७.१२)	२४६
'सामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मदर्शनात् ।' इति नारायणतन्त्रे	२४७
'मुच्यते नात्र सन्देहो दृष्ट्या तु स्वात्मयोग्यया' इति नारायणतन्त्रे	२४७
'दर्शनेनात्मयोग्येन मुक्तिर्नान्येन केनचित् ॥' इति चाध्यात्मे	२४८
'नियमेनैव मोक्षाय भवेद्योग्या भवेद्यदि ।' (अध्यात्मे)	२४८
'भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति' इति माठरश्रुतिः	२४८
'तस्यैष आत्मा विशते ब्रह्मधाम' (मु.३-२-४)	२४९
'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।'(मु.३-२-३)	२४९
'भक्तिस्थः परमो विष्णुस्तयैवैनं वशं नयेत् ।' मायावैभवे	२५०
'अंशिनस्तु पृथग्जाता अंशास्तस्यैव कर्मणा । परमसंहितायाम्	२५४
'समत्वाद्वोत्तमत्वाद्वा नाङ्गदेवाद्युपासनम् ।' इति ब्रह्मतर्कवचनम्	२५५
'सर्ववर्णाश्रमैर्विष्णुरेक एवेज्यते सदा ।' (स.स्मृ. ३२)	२५५
'वेदाहमेतं पुरुषं महान्तम्' (तै.आ. ३-१२)	२५६
'हिरण्यगर्भस्समवर्तताग्रे' (तै.सं.४-१-८)	२५६
'उपासनाऽङ्गदेवानां परमङ्गतया भवेत् ।' इति बृहत्तन्त्रे	२५७
'भूमैव देवः परमो ह्युपास्यो' इति गौपवनश्रुतिः	२५९
'शब्दोऽनुमा तथैवाक्षो योग्यताभेदतस्सदा ।' इति ब्रह्मतर्के	२६०
'मुक्त्यर्थमात्मयोग्यं हि कार्यमेव ह्युपासनम् ।' इति ब्रह्मतर्के	२६२
'वसुपूर्णकरं रत्नपर्वतस्थं विभावयन् ।' (तन्त्र.सं.४.११६)	२६४
'यस्य यस्य हि यः कामः तस्य तस्य ह्युपासनम् ।' इति बृहत्तन्त्रे	२६४
'चक्षोस्सूर्यो अजायत' (ऋ.१०.९०.१३)	२६५
'अङ्गैः पराद्यै हि देवा विसृष्टास्तत्तद्गुणान्' इति काषायणश्रुतौ	२६७
'सत्यो ज्ञानः परमानन्दरूप आत्मेत्येवं' इति कमठश्रुतौ	२६९

प्रमाणम्	पृ.सं.
'यं यं लोकं मनसा संविभाति' (मु.३-१-१०)	२७२
'स्वर्गं धनाद्देहतो वै गृहाच्च प्राप्स्यन्ति धीराः' (स्मृतिः)	२७३
'यदेव विद्यया करोति श्रद्धयोपनिषदा' (छा.१-१-१०)	२७४
'कर्मैव देहं दैविकं मानुषं' इति माठरश्रुतिः	२७५
'ज्ञानी च कर्माणि सदोदितानि' इति कमठश्रुतौ	२७६
'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।' (ई.२)	२७६
'ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो' इति कौण्ठरव्यश्रुतेः	२७७
'राजसूयजितान् लोकान् अश्वमेधाभिवर्धितान्।' (म.भा. १८.३.२६)	२७८
'ज्ञानिनामपि देवानाम्॥' ब्रह्मतर्के	२७८
'स्वयन्तु भगवान् व्यासो' इति भविष्यत्पर्वणि	२८१
'ज्ञानिनामपि देवानां विशेषः कर्मभिर्भवेत्।' इति ब्रह्मतर्के	२८२
'नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु।'	२८३
'प्रधानवायुर्मरुतोऽश्विनौ च वस्वर्करुद्राः पितरो गुरुश्च।' (स्मृतिः)	२८५
'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते।' इति ब्रह्मतर्के	२८५
'पठेद्वेदानथार्थानधीयीताथ विचार्य ब्रह्म विन्देत्' इति कौषारवश्रुतिः	२८६
'अथ पुमर्थसाधनान्यर्थो' इति कौण्डिन्यश्रुतिः	२८७
'अथ मुनिरमौनं च मौनं च' (बृ. ५-५-१)	२८८
'प्रथमब्राह्मणो मुक्तो द्वितीयो योग्य उच्यते।' (बृ.भा. ३.४.१३)	२८९
'कामचाराः कामभक्षाः कामवादाः' (सामशाखा)	२९०
'ओमित्युच्चार्यान्तरिममात्मानमभिपश्योपमृद्य' इति च तुरश्रुतौ	२९१
'न तावता कामचाराणां ज्ञानेऽधिकारः।' इति माठरश्रुतेः	२९१
'प्रातरुत्थाय सन्ध्यामुपासीत' (श्रुतिः)	२९२
'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान्' (तै.सं. ६-३-१०)	२९३
'केन स्याद्येन स्यात्तेनेदृश एव' (बृ. ५. ५.१)	२९५

प्रमाणम्	पृ.सं.
'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।' (गी.३-१७)	२९६
'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः।' (ब्र.सू.भा. ३.४.३०)	२९७
'केन स्याद्येन स्यात्' (बृ.५-५-१)	२९७
'स्वाध्यायोऽध्येतव्यः' (तै.आ. २-१५-१)	२९८
'स्वेच्छयैव प्रवृत्तिस्तु ब्रह्मणो विधिचोदिता।' इति ब्राह्मे	२९८
'विधीनां विषयास्त्वन्ये ब्रह्मणः स्वेच्छया कृतौ।' इति ब्रह्मतर्के	३००
'यथाविधानमपरे विधिभवि प्रजापतेः।' इति च तुरश्रुतौ	३०१
'केन स्याद्येन स्यात्' (बृ. ५-५-१)	३०१
'त्रेधा हि ज्ञानिनो ह वाव भवन्ति' गौपवनश्रुतौ	३०१
'स्वेच्छानुवृत्त्यैव भवेद्ब्रह्मणः प्रायशस्तथा।' (ब्र.सू.भा. ३.४.२५)	३०३
'अज्ञानां ज्ञानदो विष्णुः'(ब्र.सू.अनु. १.१.१ श्लो. ५)	३०४
'विष्णुर्हि दाता मोक्षस्य'(म.भा.ता.नि. १.७८)	३०४
'मोक्षदस्तु जनार्दनः'॥ (ब्र.सू.अनु.१.१.१ श्लो.१५)	३०४
'येषां ज्ञानं समुत्पन्नं तेषां मोक्षो विनिश्चितः। ब्रह्मतर्के	३०४
'विविदिषन्ति यज्ञेन दाने न तपसाऽनाशकेन' (बृ.६-४-२२)	३०५
'ज्ञानादेव सर्वे कामाः' (कौण्ठरव्य)	३०७
'आचार्याद्विद्यामवाप्यैतमात्मानमभिपश्य' इति माठरश्रुतौ	३०७
'ब्राह्मी वाव त उपनिषदमब्रूमेति।' (केन.४-७,८,९)	३०८
'यस्य ज्ञानं तस्य मोक्ष इति नात्र विचारणा।' इत्याग्नेये	३०९
'यदि ह वा अप्येवंविन्निखिलं भक्षयीतैवमेव स भवति' (श्रुतिः)	३१०
'न वा अजीविष्यमिमानखादन्निति होवाच' (छा.१-१०-४)	३१०
'अन्यायचरणाभावे न हि ज्ञानस्य बाधनम्।' इति ब्रह्मतर्के	३११
'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः।' इति हरिवंशेषु	३१२

प्रमाणम्	पृ.सं.
'स य एतदेवंविदेवं मन्वान एवं' इति कौण्डिन्यश्रुतौ।	३१३
'न निषिद्धानि वर्तेत पूर्णज्ञानफलेच्छया।' इति पाद्मे	३१३
'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन्।' इति कौषारवश्रुतौ	३१४
'यथा राज्ञस्सहकार्येव मन्त्री' इति कमठश्रुतौ	३१५
'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु।' इति ब्रह्माण्डे	३१५
'सर्वदुःखनिवृत्तिस्तु ज्ञानिनो' इति बृहत्तन्त्रे(ब्रह्मतर्के)	३१६
'धर्मस्वरूपचित्रत्वाद्यो यो देवमनोगतः।' इति च पाद्मे	३१६
'य आत्माऽपहतपाप्मा' (छा. ८-७-३)	३१८
'तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति।' (छा.८-७)	३१९
'असुरा आसुरेणैव स्वभावेन च कर्मणा।' इति स्कान्दे	३२१
'सर्वभूतेषु येनैकम्' (भ.गी. १८.१०)	३२२
'शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति' (ऋ.६-४७-१६)	३२३
'असुरान् दमयन् विष्णुः' इति भविष्यत्पर्वणि	३२३
'तस्मान्न जनतामियात्' (बृ.३-३-२०)	३२४
'ततः कनीयसा एव देवा ज्यायसा असुराः' (बृ.३-३-१)	३२४
'असुरा बहुला यस्मात्तस्मान्न जनतामियात्।' इति च ब्राह्मे	३२५
'नासुराणां दैवं रूपं न देवानामासुरं न चोभयं'	३२५
'नासुरा दैवीं न देवा आसुरीम्' (श्रुतिः)	३२५
'तं भूतिरिति देवा उपासाञ्चक्रिरे' (ऐ.आ. २-१-८)	३२६
'देवानां भूतिरित्येव मनो विष्णौ स्वभावतः।' इति चाध्यात्मे	३२७
'देवाः शापबलादेव प्रह्लादादित्वमागताः।' (गी.ता. १६.२४)	३२८
'स्वधर्मनिष्ठः शतजन्मभिः पुमान्।' (भाग. ४.२४.२९)	३२८
'न देवपदमन्विच्छेत्कुत एव हरेर्गुणान्।' इति ब्रह्माण्डे	३३०

प्रमाणम्	पृ.सं.
'मायाभिरुत्सिसृप्यत इन्द्र द्यामारुरुक्षतः ' (ऋ.८-१४-१४)	३३१
'अथ यथर्षीन् प्रजापतीन्नाकांक्षेदेवं' इन्द्रद्युम्नश्रुतिः	३३२
'न दैवानभिकांक्षेत कुत एव हरेर्गुणान् ।' बृहत्संहितायाम्	३३३
'विज्ञानभक्त्यादिकमप्यतीव न साधनं ... ।'(म.ता.नि. २९.४२)	३३५
'देवर्षिगन्धर्वाणां पदाकांक्षी पतेद् ध्रुवम् ।'	३३५
'नानात्वमेव कामानां नाकामः क च दृश्यते ।' इत्याचाराच्च	३३६
'विहाय कामान्यः सर्वान् पुमांश्चरति निस्पृहः ।' (भ.गी.२.७१)	३३६
'ब्रह्मविदाप्नोति परम्' (तै.२-१)	३३७
'ज्ञानादिदानं देवानां विष्णुना साधु चोदितम् ।' वाराहे	३४१
'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधत्'	३४३
'न च पुनरावर्तते न च पुनरावर्तते' (छा. ८.१५१)	३४३
'कृत्स्ना ह्येते गृहिणो देवाः कृत्स्ना ह्येते' इति पौत्रायणश्रुतिः	३४४
अदायादास्तु पुत्राणामुद्रिक्तज्ञानचक्षुषः । (भा.ता. २.६.१९)	३४५
'देवा एव ब्रह्मचारिणो देवा एव गृहस्था' इति कौण्ठरव्यश्रुतौ	३४६
'एतां विद्यामधीत्य ब्रह्मदर्शी वाव भवति ।' इति माठरश्रुतौ	३४७
'मा नः स्तेनेभ्यो ये अभिद्रुहस्पदे' (ऋ.२-२३-१६)	३४८
'अथोपशमेनोपरता मनुष्याः' (ऋ.२-२३-१६)	३४८
'आसन्यं प्राणमूचिरे .... ब्रह्मणस्पतिः' (बृ. ३-३-२१)	३४९
'वाग्धिबृहती' (छा. १-२-११)	३४९
'तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ।' (भा.ग.३.२७.२१)	३५०
'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो'(बृ. ४-४-५)	३५१
'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य' इति सौपर्णश्रुतौ	३५१
'श्रवणं मननं चैव निदिध्यासनमेव च ।' इति बृहत्संहितयाम्	३५३

प्रमाणम्	पृ.सं.
'धर्मी स्वर्गं विधर्मी निरयमेत्येव' (श्रुतिः)	३५४
'विद्वानमृतमाप्नोति नात्र कार्या विचारणा।' इति नारायणाध्यात्मे	३५५
'सर्वप्रमाणसिद्धत्वं वक्तुमाध्यायमूलतः।' (ऐ.भा.द्वि.प्र.)	३५६

परिशिष्टम्- ६

अद्वैत-विशिष्टाद्वैत-द्वैतदर्शनानुसारेणाधिकरणसूत्रसङ्ख्यासूचिका

अद्वैतमतरीत्या	विशिष्टाद्वैतमतरीत्या	द्वैतमतरीत्या
अथ तृतीयाध्यायस्य प्रथमः पादः	अथ तृतीयाध्यायस्य प्रथमः पादः	अथ तृतीयाध्यायस्य प्रथमः पादः
तदन्तरप्रतिपत्त्यधिकरणम्	तदन्तरप्रतिपत्त्यधिकरणम्	तदन्तराधिकरणम्
२९२.तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्	२८८. तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्	२९५.तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्
२९३.त्र्यात्मकत्वात्तु भूयस्त्वात्	२८९. त्र्यात्मकत्वात्तु भूयस्त्वात्	त्र्यात्मकत्वाधिकरणम्
२९४. प्राणगतेश्च	२९०. प्राणगतेश्च	२९६.त्र्यात्मकत्वात्तु भूयस्त्वात्
२९५.अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्	२९१. अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्	प्राणगत्यधिकरणम्
२९६. प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः	२९२. प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः	२९७. प्राणगतेश्च
२९७. अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः	२९३. अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः	अग्न्याद्यधिकरणम्
		२९८.अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्
		प्रथमाधिकरणम्
		२९९. प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः

२९८. भाक्तं वाऽनात्मवित्त्वात्,
तथा हि दर्शयति

कृतात्ययाधिकरणम्

२९९. कृतात्ययेऽनुशयवान्
दृष्टस्मृतिभ्यां यथेतमनेवं च

३००. चरणादिति चेन्नोप-
लक्षणार्थेति कार्ष्णाजिनिः

३०१. आनर्थक्यमिति चेन्न तदपेक्षत्वात्

३०२. सुकृतदुष्कृते एवेति तु बादरिः

अनिष्टादिकार्यधिकरणम्

३०३. अनिष्टादिकारिणामपि
च श्रुतम्

३०४. संयमने त्वनुभूयेतरेषा-
मारोहावरोहौ
तद्गतिदर्शनात्

३०५. स्मरन्ति च

३०६. अपि च सप्त

२९४. भाक्तं वाऽनात्मवित्त्वात्,
तथा हि दर्शयति

कृतात्ययाधिकरणम्

२९५. कृतात्ययेऽनुशयवान्
दृष्टस्मृतिभ्यां यथेतमनेवं च

२९६. चरणादिति चेन्न
तदुपलक्षणार्थेति कार्ष्णाजिनिः

२९७. आनर्थक्यमिति चेन्न
तदपेक्षत्वात्

२९८. सुकृतदुष्कृते एवेति तु बादरिः

अनिष्टादिकार्यधिकरणम्

२९९. अनिष्टादिकारिणामपि च श्रुतम्

३००. संयमने
त्वनुभूयेतरेषामारोहावरोहौ
तद्गतिदर्शनात्

३०१. स्मरन्ति च

अश्रुतत्वाधिकरणम्

३००. अश्रुतत्वादिति चेन्नेष्टादिकारिणां
प्रतीतेः

भाक्ताधिकरणम्

३०१. भाक्तं वाऽनात्मवित्त्वात्, तथा
हि दर्शयति

कृतात्ययाधिकरणम्

३०२. कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां

यथेताधिकरणम्

३०३. यथेतमनेवं च

चरणाधिकरणम्

३०४. चरणादिति चेन्न तदुपलक्षणार्थेति
कार्ष्णाजिनिः

३०५. आनर्थक्यमिति चेन्न तदपेक्षत्वात्

३०६. सुकृतदुष्कृते एवेति तु बादरिः

३०७. तत्रापि च
तद्व्यापारादविरोधः
३०८. विद्याकर्मणोरिति तु
प्रकृतत्वात्
३०९. न तृतीये तथोपलब्धेः
३१०. स्मर्यतेऽपि च लोके
३११. दर्शनाच्च
३१२. तृतीयशब्दावरोधः
संशोकजस्य
साभाव्यापत्त्यधिकरणम्
३१३. साभाव्यापत्तिरुपपत्तेः
नातिचिराधिकरणम्
३१४. नातिचिरेण विशेषात्
अन्याधिष्ठिताधिकरणम्
३१५. अन्याधिष्ठिते पूर्ववदभिलापात्
३१६. अशुद्धमिति चेन्न शब्दात्
३१२. अपि सप्त
३१३. तत्रापि च तद्व्यापारादविरोधः
३१४. विद्याकर्मणोरिति तु प्रकृतत्वात्
३१५. न तृतीये तथोपलब्धेः
३१६. स्मर्यतेऽपि च लोके
३१७. दर्शनाच्च
३१८. तृतीयशब्दावरोधः संशोकजस्य
तत्स्वाभाव्यापत्त्यधिकरणम्
३१९. तत्स्वाभाव्यापत्तिरुपपत्तेः
नातिचिराधिकरणम्
३२०. नातिचिरेण विशेषात्
अन्याधिष्ठिताधिकरणम्
३२१. अन्याधिष्ठिते पूर्ववदभिलापात्
३२२. अशुद्धमिति चेन्न शब्दात्
३२३. रेतःसिग्योगोऽथ
अनिष्टाधिकरणम्
३२७. अनिष्टादिकारिणामपि च श्रुतम्
३२८. संयमने त्वनुभूयेतरेषामारोहाव-
रोहौ तद्गतिदर्शनात्
३२९. स्मरन्ति च
अपिसप्ताधिकरणम्
३३०. अपि च सप्त
तत्राप्यधिकरणम्
३३१. तत्रापि च तद्व्यापारादविरोधः
विद्याधिकरणम्
३३२. विद्याकर्मणोरिति तु प्रकृतत्वात्
न तृतीयाधिकरणम्
३३३. न तृतीये तथोपलब्धेः
३३४. स्मर्यतेऽपि च लोके
३३५. दर्शनाच्च
३३६. तृतीये शब्दावरोधःसंशोकजस्य

३१७. रेतःसिग्योगोऽथ

३१८. योनेः शरीरम्

इति तृतीयाध्यायस्य प्रथमः पादः

	अत्र पादे	आदितः
अधिकरणानि	६	९३
सूत्राणि	२७	३१८

३१४. योनेः शरीरम्

इति तृतीयाध्यायस्य प्रथमः पादः

	अत्र पादे	आदितः
अधिकरणानि	६	७४
सूत्राणि	२७	३१४

३१७. स्मरणाच्च

तत्स्वाभाव्याधिकरणम्

३१८. तत्स्वाभाव्यापत्तिरुपपत्तेः

नातिचिरेणाधिकरणम्

३१९. नातिचिरेण विशेषात्

अन्याधिकरणम्

३२०. अन्याधिष्ठिते पूर्ववदभिलापात्

३२१. अशुद्धमिति चेन्न शब्दात्

रेतोऽधिकरणम्

३२२. रेतःसिग्योगोऽथ

योन्यधिकरणम्

३२३. योनेः शरीरम्

इति तृतीयाध्यायस्य प्रथमः पादः

	अत्र पादे	आदितः
अधिकरणानि	२०	११५
सूत्राणि	२९	३२३

अथ तृतीयाध्यायस्य द्वितीयः पादः

सन्ध्याधिकरणम्

३१९. सन्ध्ये सृष्टिराह हि

३२०.निर्मातारं चैके पुत्रादयश्च

३२१. मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्

३२२.सूचकश्च हि श्रुतेः, आचक्षते च तद्विदः

३२३.पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ

३२४. देहयोगाद्वासोऽपि

तदभावाधिकरणम्

३२५. तदभावो नाडीषु तच्छ्रुतेरात्मनि च

३२६. अतः प्रबोधोऽस्मात्

अथ तृतीयाध्यायस्य द्वितीयः पादः

सन्ध्याधिकरणम्

३१५. सन्ध्ये सृष्टिराह हि

३१६. निर्मातारं चैके पुत्रादयश्च

३१७.मायामात्रं तु कात्स्न्र्येनानभिव्यक्त-स्वरूपत्वात्

३१८. पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ

३१९. देहयोगाद्वा सोऽपि

३२०. सूचकश्च हि श्रुतेराचक्षते च तद्विदः

तदभावाधिकरणम्

३२१.तदभावो नाडीषु तच्छ्रुतेरात्मनि च

३२२.अतः प्रबोधोऽस्मात्

कर्मानुस्मृतिशब्दविध्यधिकरणम्

३२३. स एव तु कर्मानुस्मृतिशब्दविधिभ्यः

अथ तृतीयाध्यायस्य द्वितीयः पादः

सन्ध्याधिकरणम्

३२४. सन्ध्ये सृष्टिराह हि

३२५.निर्मातारं चैके पुत्रादयश्च

३२६. मायामात्रं तुकात्स्न्र्येनानभि-व्यक्तस्वरूपत्वात्

३२७.सूचकश्च हि श्रुतेः, आचक्षते च तद्विदः

पराभिध्यानधिकरणम्

३२८.पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ

देहयोगाधिकरणम्

३२९. देहयोगाद्वासोऽपि

तदभावाधिकरणम्

३३०.तदभावो नाडीषु तच्छ्रुतेरात्मनि ह

कर्मानुस्मृतिशब्दविध्याधिकरणम्

३२७. स एव तु कर्मानुस्मृतिशब्द-
विधिभ्यः मुग्धेऽर्धसम्पत्यधिकरणम्

३२८. मुग्धेऽर्धसम्पत्तिः परिशेषात्

उभयलिङ्गाधिकरणम्

३२९. न स्थानतोऽपि
परस्योभयलिङ्गं सर्वत्र हि

३३०. न भेदादिति चेन्न प्रत्येकमतद्वचनात्

३३१. अपि चैवमेके

३३२. अरूपवदेव हि तत्प्रधानत्वात्

३३३. प्रकाशवच्चावैयर्थ्यम्

३३४. आह च तन्मात्रम्

३३५. दर्शयति चाथो अपि स्मर्यते

३३६. अत एव चोपमा सूर्यकादिवत्

३३७. अम्बुवदग्रहणात्तु न तथात्वम्

३३८. वृद्धिह्रासभाक्त्वमन्तर्भावा-
दुभयसामञ्जस्यादेवम्

मुग्धाधिकरणम्

३२४. मुग्धेऽर्धसम्पत्तिः परिशेषात्

उभयलिङ्गाधिकरणम्

३२५. न स्थानतोऽपि परस्योभयलिङ्गं
सर्वत्र हि

३२६. भेदादिति चेन्न प्रत्येकमतद्वचनात्

३२७. अपि चैवमेके

३२८. अरूपवदेव हि तत्प्रधानत्वात्

३२९. प्रकाशवच्चावैयर्थ्यात्

३३०. आह च तन्मात्रम्

३३१. दर्शयति चाथो अपि स्मर्यते

३३२. अत एव चोपमा सूर्यकादिवत्

३३३. अम्बुवदग्रहणात्तु न तथात्वम्

३३४. वृद्धिह्रासभाक्त्वमन्तर्भावादुभय-
सामञ्जस्यादेवं दर्शनाच्च

प्रबोधाधिकरणम्

३३१. अतः प्रबोधोऽस्मात्

कर्मानुस्मृत्यधिकरणम्

३३२. स एव च कर्मानुस्मृतिशब्दविधिभ्यः

सम्पत्त्यधिकरणम्

३३३. मुग्धेऽर्धसम्पत्तिः परिशेषात्

न स्थानतोऽप्यधिकरणम्

३३४. न स्थानतोऽपि परस्योभयलिङ्गं
सर्वत्र हि

३३५. न भेदादिति चेन्न प्रत्येकमतद्वचनात्

३३६. अपि चैवमेके

अरूपाधिकरणम्

३३७. अरूपवदेव हि तत्प्रधानत्वात्

३३८. प्रकाशवच्चावैयर्थ्यम्

३३९. आह च तन्मात्रम्

३४०. दर्शयति चाथो अपि स्मर्यते

३३९. दर्शनाच्च

प्रकृतैतावत्त्वाधिकरणम्

३४०. प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः

३४१. तदव्यक्तमाह हि

३४२. अपि संराधने प्रत्यक्षानुमानाभ्याम्

३४३. प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्

३४४. अतोऽनन्तेन तथा हि लिङ्गम्

३४५. उभयव्यपदेशात्त्वहिकुण्डलवत्

३४६. प्रकाशाश्रयवद्वा तेजस्त्वात्

३४७. पूर्ववद्वा

३४८. प्रतिषेधाच्च

पराधिकरणम्

३४९. परमतः सेतून्मानसम्बन्धभेद-व्यपदेशेभ्यः

३५०. सामान्यात्तु

३५१. बुद्ध्यर्थः पादवत्

उपमाधिकरणम्

३५२. अत एव चोपमा सूर्यकादिवत्

अम्बुवदधिकरणम्

३५३. अम्बुवदग्रहणात्तु न तथात्वम्

वृद्धिह्रासाधिकरणम्

३५४. वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्

३५५. दर्शनाच्च

प्रकृताधिकरणम्(पालकत्वाधिकरणम्)

३५६. प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः

अव्यक्तत्वाधिकरणम्

३५७. तदव्यक्तमाह हि

३५८. अपि संराधने प्रत्यक्षानुमानाभ्याम्

३५९. प्रकाशवच्चावैशेष्यम्

३६०. प्रकाशश्च कर्मण्यभ्यासात्

व्यपदेशेभ्यः
३५०. सामान्यात्तु
३५१. बुद्ध्यर्थः पादवत्
३५२. स्थानविशेषात् प्रकाशादिवत्
३५३. उपपत्तेश्च
३५४. तथाऽन्यप्रतिषेधात्
३५५. अनेन सर्वगतत्वमायामशब्दादिभ्यः
फलाधिकरणम्
३५६. फलमत उपपत्तेः
३५७. श्रुतत्वाच्च
३५८. धर्म जैमिनिरत एव
३५९. पूर्वं तु बादरायणो हेतुव्यपदेशात्
इति तृतीयाध्यायस्य द्वितीयः पादः
अत्र पादे आदितः
अधिकरणानि ८ १०१
सूत्राणि ४१ ३५९
३४७. स्थानविशेषात्प्रकाशादिवत्
३४८. उपपत्तेश्च
३४९. तथाऽन्यप्रतिषेधात्
३५०. अनेन सर्वगतत्वमायामशब्दादिभ्यः
फलाधिकरणम्
३५१. फलमत उपपत्तेः
३५२. श्रुतत्वाच्च
३५३. धर्मं जैमिनिरत एव
३५४. पूर्वं तु बादरायणो हेतुव्यपदेशात्
इति तृतीयाध्यायस्य द्वितीयः पादः
अत्र पादे आदितः
अधिकरणानि ८ ८२
सूत्राणि ४० ३५४
३५०. अतोऽनन्तेन तथा हि लिङ्गम्
अहिकुण्डलाधिकरणम्
३५१. उभयव्यपदेशात्त्वहिकुण्डलवत्
३५२. प्रकाशाश्रयवद्वा तेजस्त्वात्
३५३. पूर्ववद्वा
३५४. प्रतिषेधाच्च
परमताधिकरणम्
३५५. परमतः सेतून्मानसम्बन्धभेद-
व्यपदेशेभ्यः
३५६. दर्शनात्
३५७. बुद्ध्यर्थः पादवत्
स्थानविशेषाधिकरणम्
३५८. स्थानविशेषात्प्रकाशादिवत्
३५९. उपपत्तेश्च
तथान्यत्वाधिकरणम्
३६०. तथाऽन्यत्प्रतिषेधात्

सर्वगतत्वाधिकरणम्

३६१.अनेन सर्वगतत्वमायामयश्चब्दादिभ्यः

फलाधिकरणम्

३६२.फलमत उपपत्तेः

३६३. श्रुतत्वाच्च

३६४. धर्मं जैमिनिरत एव

३६५. पूर्वं तु बादरायणो हेतुव्यपदेशात्

इति तृतीयाध्यायस्य द्वितीयः पादः

	अत्र पादे	आदितः
अधिकरणानि	२०	१३५
सूत्राणि	४२	३६५

अथ तृतीयाध्यायस्य तृतीयः पादः

सर्ववेदान्तप्रत्ययाधिकरणम्

३६६.सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्

३६७.भेदान्नेति चेन्नैकस्यामपि

अथ तृतीयाध्यायस्य तृतीयः पादः

सर्ववेदान्तप्रत्ययाधिकरणम्

३५५. सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्

३५६. भेदान्नेति चेदेकस्यामपि

अथ तृतीयाध्यायस्य नृतीयः पादः

सर्ववेदान्तप्रत्ययाधिकरणम्

३६०.सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्

३६१.भेदान्नेति चेन्नैकस्यामपि

३६२.स्वाध्यायस्य तथात्वेन हि
समाचारेऽधिकाराच्च सववच्च तन्नियमः
३६३.दर्शयति च

उपसंहाराधिकरणम्

३६४.उपसंहारोऽर्थाभेदाद्विधिशेषवत्
समाने च

अन्यथात्वाधिकरणम्

३६५.अन्यथात्वं शब्दादिति
चेन्नाविशेषात्
३६६.न वा प्रकरणभेदात्
परोवरीयस्त्वादिवत्
३६७.सञ्ज्ञातश्चेत्तदुक्तमस्ति तु तदपि

व्याप्त्यधिकरणम्

३६८.व्याप्तेश्च समञ्जसम्

सर्वाभेदाधिकरणम्

३६९..सर्वाभेदादन्यत्रेमे

३५७. स्वाध्यायस्य तथात्वं हि
समाचारेऽधिकाराच्च सववच्च तन्नियमः
३५८. दर्शयति च
३५९. उपसंहारोऽर्थाभेदाद्विधिशेषवत्
समाने च

अन्यथात्वाधिकरणम्

३६०.अन्यथात्वं शब्दादिति
चेन्नाविशेषात्
३६१. न वा प्रकरणभेदात्
परोवरीयस्त्वादिवत्
३६२. सञ्ज्ञातश्चेत्तदुक्तमस्ति तु तदपि
३६३. व्याप्तेश्च समञ्जसम्

सर्वाभेदाधिकरणम्

३६४. सर्वाभेदादन्यत्रेमे

आनन्दाद्यधिकरणम्

३६५. आनन्दादयः प्रधानस्य

३६८.स्वाध्यायस्य तथात्वेन हि
समाचारेऽधिकाराच्च
३६९.सलिलवच्च तन्नियमः
३७०.दर्शयति च

उपसंहाराधिकरणम्

३७१.उपसंहारोऽर्थाभेदाद्विधि-
शेषवत्समाने च
३७२.अन्यथात्वं चशब्दादिति
चेन्नाविशेषात्
३७३.न वा प्रकरणभेदात्परोवरीय-
स्त्वादिवत्
३७४.सञ्ज्ञातश्चेत्तदुक्तमस्ति तु तदपि

प्राप्त्यधिकरणम्

३७५.प्राप्तेश्च समञ्जसम्

सर्वाभेदाधिकरणम्

३७६.सर्वाभेदादन्यत्रेमे

आनन्दाद्यधिकरणम्

३७०. आनन्दादयः प्रधानस्य

३७१. प्रियशिरस्त्वाद्यप्राप्तिरुप चयापचयौ हि भेदे

३७२. इतरे त्वर्थसामान्यात्

आध्यानाधिकरणम्

३७३. आध्यानाय प्रयोजनाभावात्

३७४. आत्मशब्दाच्च

आत्मगृहीत्यधिकरणम्

३७५. आत्मगृहीतिरितरवदुत्तरात्

३७६. अन्वयादिति चेत् स्यादवधारणात्

कार्याख्यानाधिकरणम्

३७७. कार्याख्यानादपूर्वम्

समानाधिकरणम्

३७८. समान एवं चाभेदात्

३६६. प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे

३६७. इतरे त्वर्थसामान्यात्

३६८. आध्यानाय प्रयोजनाभावात्

३६९. आत्मशब्दाच्च

३७०. आत्मगृहीतिरितरवदुत्तरात्

३७१. अन्वयादिति चेत् स्यादवधारणात्

कार्याख्यानाधिकरणम्

३७२. कार्याख्यानादपूर्वम्

समानाधिकरणम्

३७३. समान एवं चाभेदात्

सम्बन्धाधिकरणम्

३७४. सम्बन्धादेवमन्यत्रापि

३७५. न वा विशेषात्

३७६. दर्शयति च

सम्भृत्यधिकरणम्

आनन्दाधिकरणम्

३७७. आनन्दादयः प्रधानस्य

प्रियशिरस्त्वाधिकरणम्

३७८. प्रियशिरस्त्वाद्यप्राप्तिरुप चयापचयौ हि भेदे

इतराधिकरणम्

३७९. इतरे त्वर्थसामान्यात्

आध्यानाधिकरणम्

३८०. आध्यानाय प्रयोजनाभावात्

३८१. आत्मशब्दाच्च

आत्मगृहीत्यधिकरणम्

३८२. आत्मगृहीतिरितरवदुत्तरात्

अन्वयाधिकरणम्

३८३. अन्वयादिति चेत् स्यादवधारणात्

कार्याख्यानाधिकरणम्

३८४. कार्याख्यानादपूर्वम्

सत्यविद्याधिकरणम्

३७९. सम्बन्धादेवमन्यत्रापि

३८०. न वा विशेषात्

३८१. दर्शयति च

सम्भृत्यधिकरणम्

३८२. सम्भृतिद्युव्याप्त्यपि चातः

पुरुषविद्याधिकरणम्

३८३. पुरुषविद्यायामिव चेतरेषामनाम्नानात्

वेधाधिकरणम्

३८४. वेधाद्यर्थभेदात्

हान्यधिकरणम्

३८५. हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम्

साम्परायाधिकरणम्

३८६. साम्परायें तर्तव्याभावात्तथाह्यन्ये

३७७. सम्भृतिद्युव्याप्त्यपि चातः

पुरुषविद्याधिकरणम्

३७८. पुरुषविद्यायामपि चेतरेषामनाम्नानात्

वेधाद्यधिकरणम्

३७९. वेधाद्यर्थभेदात्

हान्यधिकरणम्

३८०. हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम्

साम्परायाधिकरणम्

३८१. साम्परायें तर्तव्याभावात् तथा ह्यन्ये

३८२. छन्दत उभयाविरोधात्

३८३. गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः

३८४. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्

३८५. यावदधिकारमवस्थितिराधिकारिकाणाम्

समानाधिकरणम्

३८५. समान एवं चाभेदात्

३८६. सम्बन्धादेवमन्यत्रापि

नवाधिकरणम्

३८७. न वा विशेषात्

३८८. दर्शयति च

सम्भृत्यधिकरणम्

३८९. सम्भृतिद्युव्याप्त्यपि चातः

पुरुषाधिकरणम्

३९०. पुरुषविद्यायामपिचेतरेषामनाम्नानात्

वेधाधिकरणम्

३९१. वेधाद्यर्थभेदात्

हान्यधिकरणम्

३९२. हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम्

३९३. साम्परायें तर्तव्याभावात् तथाह्यन्ये

३८७. छन्दत उभयाविरोधात्

गतेरर्थवत्त्वाधिकरणम्

३८८. गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः

३८९. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्

अनियममाधिकरणम्

३९०. अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्

यावदधिकाराधिकरणम्

३९१. यावदधिकारमवस्थितिराधिकारिकाणाम्

अक्षरधियाधिकरणम्

३९२. अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्

इयदधिकरणम्

३९३. इयदामननात्

अनियमाधिकरणम्

३८६. अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्

अक्षरध्यधिकरणम्

३८७. अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्

३८८. इयदामननात्

अन्तरत्वाधिकरणम्

३८९. अन्तरा भूतग्रामवत्स्वात्मनः अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्

३९०. व्यतिहारो विशिंषन्ति हीतरवत्

३९१. सैव हि सत्यादयः

कामाद्यधिकरणम्

३९२. कामादीतरत्र तत्र चाऽयतनादिभ्यः

३९३. आदरादलोपः

छन्दाधिकरणम्

३९४. छन्दत उभयाविरोधात्

३९५. गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः

३९६. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्

अनियमाधिकरणम्

३९७. अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्याम्

यावदधिकरणम्

३९८. यावदधिकारमवस्थितिराधिकारिकाणाम्

३९९. अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्

इयदामननाधिकरणम्

४००. इयदामननात्

४०१. अन्तरा भूतग्रामवदिति चेत् तदुक्तम्

४०२. अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्

अन्तराधिकरणम्

३९४. अन्तरा भूतग्रामवत्स्वात्मनः

३९५. अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्

व्यतिहाराधिकरणम्

३९६. व्यतिहारो विशिंषन्ति हीतरवत्

सत्याद्यधिकरणम्

३९७. सैव हि सत्यादयः

कामाद्यधिकरणम्

३९८. कामादीतरत्र तत्र चाऽऽयतनादिभ्यः

आदराधिकरणम्

३९९. आदरादलोपः

४००. उपस्थितेऽतस्तद्वचनात्

तन्निर्धारणाधिकाणम्

४०१. तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्

३९४. उपस्थितेऽतस्तद्वचनात्

तन्निर्धारणानियमाधिकरणम्

३९५. तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्

प्रदानाधिकरणम्

३९६. प्रदानवदेव तदुक्तम्

लिङ्गभूयस्त्वाधिकरणम्

३९७. लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि

पूर्वविकल्पाधिकरणम्

३९८. पूर्वविकल्पः प्रकरणात् स्यात्क्रियामानसवत्

३९९. अतिदेशाच्च

४००. विद्यैव तु निर्धारणाद् दर्शनाच्च

४०१. श्रुत्यादिबलीयस्त्वाच्च न बाधः

४०२. अनुबन्धादिभ्यःप्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्

व्यतिहाराधिकरणम्

४०३. व्यतिहारो विशिंषन्ति हीतरवत्

सत्याधिकरणम्

४०४. सैव हि सत्यादयः

कामाधिकरणम्

४०५. कामादितरत्र तत्र चाऽयतनादिभ्यः

४०६. आदरादलोपः

४०७. उपस्थितेस्तद्वचनात्

निर्धारणाधिकरणम्

४०८. तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्

प्रदानाधिकरणम्

४०९. प्रदानवदेव हि तदुक्तम्

लिङ्गभूयस्त्वाधिकरणम्

४१०. लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि

प्रदानाधिकरणम्

४०२. प्रदानवदेव तदुक्तम्

लिङ्गभूयस्त्वाधिकरणम्

४०३. लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि

४०४. पूर्वविकल्पः प्रकरणात् स्यात्क्रियामानसवत्

४०५. अतिदेशाच्च

४०६. विद्यैव तु निर्धारणात्

४०७. दर्शनाच्च

४०८. श्रुत्यादिबलीयस्त्वाच्च न बाधः

४०९. अनुबन्धादिभ्यः प्रज्ञान्तर-पृथक्त्ववद्दृष्टश्च तदुक्तम्

४१०. न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः

४११. परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः

४०२. न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः

४०४. परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः

शरीरेभावाधिकरणम्

४०५. एक आत्मनः शरीरे भावात्

४०६. व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिवत्

अङ्गावबद्धाधिकरणम्

४०७. अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्

४०८. मन्त्रादिवद्वाऽविरोधः

भूमज्यायस्त्वाधिकरणम्

४०९. भूम्नः क्रतुवज्ज्यायस्त्वम् तथा हि दर्शयति

शब्दादिभेदाधिकरणम्

४१०. नाना शब्दादिभेदात्

पूर्वविकल्पाधिकरणम्

४११. पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत्

४१२. अतिदेशाच्च

विद्याधिकरणम्

४१३. विद्यैव तु निर्धारणात्

४१४. दर्शनाच्च

श्रुत्यधिकरणम्

४१५. श्रुत्यादिबलीयस्त्वाच्च न बाधः

अनुबन्धाधिकरणम्

४१६. अनुबन्धादिभ्यः

प्रज्ञान्तराधिकरणम्

४१७. प्रज्ञान्तरपृथक्त्ववद् दृष्टिश्चतदुक्तम्

न सामान्याधिकरणम्

४१८. न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः

ऐकात्म्याधिकरणम्

४१२. एक आत्मनः शरीरे भावात्

४१३. व्यतिरेकस्तद्भावाभावित्वा-
न्नतूपलब्धिवत्

अङ्गावबद्धाधिकरणम्

४१४. अङ्गावबद्धास्तु न शाखासु
हि प्रतिवेदम्

४१५. मन्त्रादिवद्वाऽविरोधः

भूमज्यायस्त्वाधिकरणम्

४१६. भूम्नः क्रतुवज्ज्यायस्त्वम्,
तथा हि दर्शयति

शब्दादिभेदाधिकरणम्

४१७. नाना शब्दादिभेदात्

विकल्पाधिकरणम्

४१८. विकल्पोऽविशिष्टफलत्वात्

विकल्पाधिकरणम्

४११. विकल्पोऽविशिष्टफलत्वात्

४१२. काम्यास्तु यथाकामं
समुच्चीयेरन्न वा .
पूर्वहेत्वभावात्

यथाश्रयभावाधिकरणम्

४१३. अङ्गेषु यथाश्रयभावः

४१४. शिष्टेश्च

४१५. समाहारात्

४१६. गुणसाधारण्यश्रुतेश्च

४१७. न वा तत्सहभावाश्रुतेः

४१८. दर्शनाच्च

इति तृतीयाध्यायस्य तृतीयः पादः

	अत्र पादे	आदितः
अधिकरणानि	२६	१०८
सूत्राणि	६५	४१८

परेणाधिकरणम्

४१९. परेण च शब्दस्य ताद्विध्यं
भूयस्त्वात्त्वनुबन्धः

एकाधिकरणम्

४२०. एक आत्मनः शरीरे भावात्

४२१. व्यतिरेकस्तद्भावभावित्वा-
न्नतूपलब्धिवत्

अङ्गावबद्धाधिकरणम्

४२२. अङ्गावबद्धास्तु न शाखासु हि
प्रतिवेदम्

४२३. मन्त्रादिवद्वाऽविरोधः

भूमाधिकरणम्

४२४. भूम्नः क्रतुवज्ज्यायस्त्वम्,
तथा च दर्शयति

नानाशब्दाधिकरणम्

४२५. नाना शब्दादिभेदात्

काम्याधिकरणम्

४१९. काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्

यथाश्रयभावाधिकरणम्

४२०. अङ्गेषु यथाश्रयभावः

४२१. शिष्टेश्च

४२२. समाहारात्

४२३. गुणसाधारण्यश्रुतेश्च

४२४. न वा तत्सहभावाश्रुतेः

४२५. दर्शनाच्च

इति तृतीयाध्यायस्य तृतीयः पादः

	अत्र पादे	आदितः
अधिकरणानि	३६	१३७
सूत्राणि	६६	४२५

विकल्पाधिकरणम्

४२६. विकल्पो विशिष्टफलत्वात्

काम्याधिकरणम्

४२७. काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्

अङ्गाधिकरणम्

४२८. अङ्गेषु यथाऽऽश्रयभावः

४२९. शिष्टेश्च

४३०. समाहारात्

४३१. गुणसाधारण्यश्रुतेश्च

नवाधिकरणम्

४३२. न वाऽतत्सहभावश्रुतेः

४३३. दर्शनाच्च

इति तृतीयाध्यायस्य तृतीयः पादः

	अत्र पादे	आदितः
अधिकरणानि	४२	१७७
सूत्राणि	६८	४३३

अथ तृतीयाध्यायस्य चतुर्थः पादः

पुरुषार्थाधिकरणम्

४२६.पुरुषार्थोऽतः शब्दादिति बादरायणः

४२७. शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः

४२८.आचारदर्शनात्

४२९. तच्छ्रुतेः

४३०. समन्वारम्भणात्

४३१. तद्वतो विधानात्

४३२. नियमाच्च

४३३. अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्

४३४. तुल्यं तु दर्शनम्

४३५. असार्वत्रिकी

४३६. विभागः शतवत्

४३७. अध्ययनमात्रवतः

४३८.नाविशेषात्

अथ तृतीयाध्यायस्य चतुर्थः पादः

पुरुषार्थाधिकरणम्

४१९.पुरुषार्थोऽतः शब्दादिति बादरायणः

४२०. शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः

४२१.आचारदर्शनात्

४२२.तच्छ्रुतेः

४२३. समन्वारम्भणात्

४२४. तद्वतो विधानात्

४२५.नियमात्

४२६. अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्

४२७. तुल्यं तु दर्शनम्

४२८. असार्वत्रिकी

४२९. विभागः शतवत्

४३०. अध्ययनमात्रवतः

४३१. नाविशेषात्

अथ तृतीयाध्यायस्य चतुर्थः पादः

पुरुषार्थाधिकरणम्

४३४.पुरुषार्थोऽतः शब्दादिति बादरायणः

४३५.शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः

४३६. आचारदर्शनाच्च

४३७. तच्छ्रुतेः

४३८. समन्वारम्भणात्

४३९. तद्वतो विधानात्

४४०. नियमाच्च

४४१.अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्

४४२.तुल्यं तु दर्शनम्

असार्वत्रिकाधिकरणम्

४४३.असार्वत्रिकी

४४४.विभागः शतवत्

४४५.अध्ययनमात्रवतः

४३९.स्तुतयेऽनुमतिर्वा
४४०.कामकारेण चैके
४४१.उपमर्दं च
४४२. ऊर्ध्वरतःसु च शब्दे हि

परामर्शाधिकरणम्

४४३. परामर्शं जैमिनिरचोदना चापवदति हि
४४४.अनुष्ठेयं बादरायणः साम्यश्रुतेः
४४५. विधिर्वा धारणवत्

स्तुतिमात्राधिकरणम्

४४६.स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्
४४७. भावशब्दाच्च

पारिप्लवाधिकरणम्

४४८.पारिप्लवार्था इति चेन्न विशेषितत्वात्
४४९. तथा चैकवाक्यतोपबन्धात्

अग्नीन्धनाद्यधिकरणम्

४५०. अत एव चाग्नीन्धनाद्यनपेक्षा

४३२. स्तुतयेऽनुमतिर्वा
४३३.कामकारेण चैके
४३४. उपमर्दं च
४३५. ऊर्ध्वरेतःसु च शब्दे हि
४३६.परामर्शं जैमिनिरचोदनाच्चापवदति हि
४३७. अनुष्ठेयं बादरायणः साम्यश्रुतेः
४३८. विधिर्वा धारणवत्

स्तुतिमात्राधिकरणम्

४३९. स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्
४४०. भावशब्दाच्च

पारिप्लवार्थाधिकरणम्

४४१.पारिप्लवार्था इति चेन्न विशेषितत्वात्
४४२. तथा चैकवाक्यतोपबन्धात्

अग्नीन्धनाद्यधिकरणम्

४४३. अत एव चाग्नीन्धनाद्यनपेक्षा

अविशेषाधिकरणम्

४४६.नाविशेषात्

स्तुत्यधिकरणम्

४४७.स्तुतयेऽनुमतिर्वा
४४८.कामकारेण चैके
४४९.उपमर्दं च
४५०. ऊर्ध्वरेतःसु च शब्दे हि
४५१. परामर्शं जैमिनिरचोदना चापवदति हि
४५२.अनुष्ठेयं बादरायणः साम्यश्रुतेः
४५३. विधिर्वा धारणवत्
४५४. स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्
४५५. भावशब्दाच्च
४५६.पारिप्लवार्था इति चेन्न विशेषितत्वात्
४५७. तथा चैकवाक्योपबन्धात्

सर्वापेक्षाधिकरणम्

४५१.सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्

४५२.शमदमाद्युपेतः स्यात्,तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्

सर्वान्नानुमत्यधिकरणम्

४५३. सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्

४५४. अबाधाच्च

४५५. अपि च स्मर्यते

४५६. शब्दश्चातोऽकामकारे

आश्रमकर्माद्यधिकरणम्

४५७. विहितत्वाच्चाऽऽश्रमकर्मापि

४५८. सहकारित्वेन च

४५९. सर्वथाऽपि त एवोभयलिङ्गात्

४६०. अनभिभवं च दर्शयति

विधुराधिकरणम्

४६१. अन्तरा चापि तु तद्दृष्टेः

सर्वापेक्षाधिकरणम्

४४४. सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्

शमदमाद्यधिकरणम्

४४५. शमदमाद्युपेतः स्यात् तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्

सर्वान्नानुमत्यधिकरणम्

४४६. सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्

४४७. अबाधाच्च

४४८. अपि स्मर्यते

४४९. शब्दश्चातोऽकामकारे

विहितत्वाधिकरणम्

४५०.विहितत्वाच्चाऽश्रमकर्मापि

४५१. सहकारित्वेन च

४५२. सर्वथाऽपि त एवोभयलिङ्गात्

४५३. अनभिभवं च दर्शयति

४५८. अत एव चाग्नीन्धनाद्यनपेक्षा

४५९.सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्

४६०.शमदमाद्युपेतः स्यात्, तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्

४६१.सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्

४६२. अबाधाच्च

४६३. अपि स्मर्यते

४६४. शब्दश्चातोऽकामचा(का)रे

४६५. विहितत्वाच्चाऽश्रमकर्मापि

४६६. सहकारित्वेन च

उभयलिङ्गाधिकरणम्

४६७. सर्वथाऽपि तु त एवोभयलिङ्गात्

४६८. अनभिभवं च दर्शयति

४६९. अन्तरा चापि तु तद्दृष्टेः

४७०. अपि स्मर्यते

४७१. विशेषानुग्रहं च

४६२. अपि च स्मर्यते
४६३. विशेषानुग्रहश्च
४६४. अतस्त्वितरज्ज्यायो लिङ्गाच्च

तद्भूताधिकरणम्

४६५. तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः

अधिकाराधिकरणम्

४६६. नचाऽऽधिकारिकमपि पतनानुमानात्तदयोगात्
४६७. उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम्

बहिरधिकरणम्

४६८. बहिस्तूभयथाऽपि स्मृतेराचाराच्च

स्वाम्यधिकरणम्

४६९. स्वामिनः फलश्रुतेरित्यात्रेयः
४७०. आर्त्विज्यमित्यौडुलोमिः, तस्मै हि परिक्रीयते
४७१. श्रुतेश्च

विधुराधिकरणम्

४५४. अन्तरा चापि तु तद्दृष्टेः
४५५. अपि स्मर्यते
४५६. विशेषानुग्रहश्च
४५७. अतस्त्वितरज्ज्यायो लिङ्गाच्च

तद्भूताधिकरणम्

४५८. तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः
४५९. नचाऽधिकारिकमपि पतनानुमानात्तदयोगात्
४६०. उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्
४६१. बहिस्तूभयथाऽपि स्मृतेराचाराच्च

स्वाम्यधिकरणम्

४६२. स्वामिनः फलश्रुतेरित्यात्रेयः
४६३. आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते
४७२. अतस्त्वितरज्ज्यायो लिङ्गाच्च
४७३. तद्भूतस्य तु तद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः

आधिकारिकाधिकरणम्

४७४. नचाऽधिकारिकमपि पतनानुमानात् तदयोगात्
४७५. उपपूर्वमपीत्येके भावमशनवत् तदुक्तम्
४७६. बहिस्तूभयथाऽपि स्मृतेराचाराच्च

फलश्रुत्यधिकरणम्

४७७. स्वामिनः फलश्रुतेरित्यात्रेयः
४७८. आर्त्विज्यमित्यौडुलोमिः, तस्मै हि परिक्रीयते

सहकार्यन्तरविध्यधिकरणम्

४७९. सहकार्यन्तरविधिः पक्षेण

सहकार्यन्तरविध्यधिकरणम्

४७२. सहकार्यन्तरविधिः पक्षेण तृतीयं तत्त्वतो विध्यादिवत्

४७३. कृत्स्नभावात्तु गृहिणोपसंहारः

४७४. मौनवदितरेषामप्युपदेशात्

अनाविष्कुराधिकरणम्

४७५. अनाविष्कुर्वन्नन्वयात्

ऐहिकाधिकरणम्

४७६. ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् मुक्तिफलाधिकरणम्

४७७. एवं मुक्तिफलानियमस्तदवस्थाधृतेस्तदवस्थाधृतेः

इति तृतीयाध्यायस्य चतुर्थः पादः

अत्र पादे	आदितः	
अधिकरणानि	१७	२५४
सूत्राणि	५२	४७७

सहकार्यन्तरविध्यधिकरणम्

४६४. सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्

४६५. कृत्स्नभावात्तु गृहिणोपसंहारः

४६६. मौनवदितरेषामप्युपदेशात्

अनाविष्काराधिकरणम्

४६७. अनाविष्कुर्वन्नन्वयात्

ऐहिकाधिकरणम्

४६८. ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्

मुक्तिफलाधिकरणम्

४६९. एवं मुक्तिफलानियमस्तदवस्थाधृतेस्तदवस्थाधृतेः

इति तृतीयाध्यायस्य चतुर्थः पादः

अत्र पादे	आदितः	
अधिकरणानि	१५	१२३
सूत्राणि	५१	४६९

तृतीयं तद्वतो विध्यादिवत्

कृत्स्नभावाधिकरणम्

४८०. कृत्स्नभावात्तु गृहिणोपसंहारः

४८१. मौनवदितरेषामप्युपदेशात्

अन्वयाधिकरणम्

४८२. अनाविष्कुर्वन्नन्वयात्

ऐहिकाधिकरणम्

४८३. ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्

मुक्तिफलाधिकरणम्

४८४. एवं मुक्तिफलानियमस्तदवस्थाधृतेस्तदवस्थाधृतेः

इति तृतीयाध्यायस्य चतुर्थः पादः

अत्र पादे	आदितः	
अधिकरणानि	१७१	१८८
सूत्राणि	५१	४८४